८८/१६

श्री विश्वनाथ विरचितो भाषापरिच्छेदः

निजनिर्मितसिद्धान्तमुक्तावल्या विशदीकृतः

शब्दखण्डो भागः ।

न्यायाचार्य पं० श्री ज्वालाप्रसाद गौड़

विरचित विलासिनी-हिन्दी संस्कृत टीका द्वय विभूषितः

R625x7,1,1
152K0.1

पूज्यपाद महामहोपाध्याय कल्प

पं० श्री शिवदत्तमिश्रचरणैः, निर्ध्यायानुमोदितः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

3847
R625x7,1,1
152K0.1
Visvanatha.
...siddhanta
...V. 1

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

R625x7,1,1
152 KO·1

3847

શ્રીમજ્જગદ્ગુરુ શ્રી - [illegible]

શ્રી મહાસ્વામી જી મહારાજ - [illegible]

સાદર સમર્પિત

[illegible]

૨૦।૨।૭૩

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamawadi Math, Varanasi
Acc. No. 3847
~~1934~~

CC-0. Jangamwadi Math Collection. Digitized by eGangotri



CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्री विश्वनाथपञ्चाननभट्टाचार्यप्रणीता

न्यायसिद्धान्तमुक्तावली

न्यायाचार्य पं० श्री 'ज्वालाप्रसाद गौड़'
विरचित-विलासिनी-हिन्दी-संस्कृत टीकाद्वयसहिता

पूज्यपाद महामहोपाध्याय कल्प
पं० श्री शिवदत्तमिश्रचरणैः, निर्ध्यायानुमोदितः

प्रथम संस्करण] १९६० [मूल्य—१५)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रकाशिका
सरयू देवी
डी० ३४/१८५ गणेश महाल
वाराणसी

R625x7,1,1
152K0·1
1934

सोल एजेण्ट—
मोतीलाल बनारसीदास
नैपाली खपरा पो० ब० ७५, वाराणसी।
बैंग्लोरोड, जवाहर नगर, दिल्ली।
बाँकीपुर, पटना।

मुद्रक
बैजनाथ प्रसाद
कल्पना प्रेस,
रामकटोरा रोड, वाराणसी

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY.
Jangamwadi Math, VARANASI,
Acc. No. 3847
CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रकाशिका
सरयू देवी
डी० ३४/१८५ गणेश महाल
वाराणसी

सोल एजेण्ट—
मोतीलाल बनारसीदास
नैपाली खपरा पो० ब० ७५, वाराणसी।
बैंग्लोरोड, जवाहर नगर, दिल्ली।
बाँकीपुर, पटना।

मुद्रक
बैजनाथ प्रसाद
कल्पना प्रेस,
रामकटोरा रोड, वाराणसी

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्री विश्वनाथपञ्चाननभट्टाचार्यप्रणीता

न्यायसिद्धान्तमुक्तावली

न्यायाचार्य पं० श्री 'ज्वालाप्रसाद गौड़'

विरचित-विलासिनी-हिन्दी-संस्कृत टीकाद्वयसहिता

पूज्यपाद महामहोपाध्याय कल्प

पं० श्री शिवदत्तमिश्रचरणैः, निर्ध्यायानुमोदितः

प्रथम संस्करण]

१९६०

[मूल्य—१५)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गुणनिरूपणम्

अथ द्रव्याश्रिताज्ञेया निर्गुणानिष्क्रिया गुणाः

द्रव्यं निरूप्य गुणान्निरूपयति। अथेत्यादिना। गुणत्वजातौ किं मानमिति चेदिदं—द्रव्यकर्मभिन्ने सामान्यवति या कारणता सा किंचिद्धर्मावच्छिन्ना निरवच्छिन्नकारणताया असंभवात्, न हि रूपत्वादिकं सत्ता वा

द्रव्यनिरूपण करके गुणों का निरूपण करते हैं—द्रव्याश्रितत्व-निर्गुणत्वनिष्क्रियत्व-यह गुणसामान्य का लक्षण है। यह कारिका का अर्थ है।

प्रश्न—गुणत्वजाति में क्या प्रमाण है।

उत्तर—यह अनुमान प्रमाण है कि—द्रव्यकर्म से भिन्न जो सामान्य (जाति) वाला (गुण) उसमें रहने वाली कारणता किसी धर्म से अवच्छिन्ना है—क्योंकि निरवच्छिन्न कोई कारणता होती ही नहीं-(अतः वह गुण में रहने वाली कारणता जिस धर्म से अवच्छिन्ना है-वही गुणत्वजाति है)

प्रश्न—गुण में रहने वाली कारणता का अवच्छेदक गुणत्व है—अतः वह कारणता गुणत्व से अवच्छिन्ना है-क्योंकि "यो धर्मो यस्या अवच्छेदकः सा तद्धर्मावच्छिन्ना भवति" यह नियम है-सो हम पूछते हैं कि गुण में रहने वाली कारणता का अवच्छेदक गुणत्व को न मानकर 'रूपत्व' को या सत्ता को ही क्यों न मान लिया जाय, इससे भी किञ्चिद्धर्मावच्छिन्नत्वरूप साध्य की उपपत्ति हो जाती है।

मूले अथ शब्दस्यानन्तर्यमर्थः। तमेवाह। द्रव्यंनिरूप्येति। द्रव्यनिरूपणानन्तर मित्यर्थः। गुणान्निरूपयतीति। गुणसामान्यलक्षणमाहेत्यर्थः। अवसरसंगत्या इति शेषः। विभागवाक्याद् द्रव्यस्यैव प्रथममुपस्थितत्वेन तत्रैवादौ जिज्ञासा .. यते तन्निरूपणेन जिज्ञासा निवृत्तौ अवश्यवक्तव्यत्वाद्गुणस्येति भावः। अत्र गुणत्वजातिमत्वं गुणसामान्यलक्षणं बोध्यम्। तत्र प्रमाणं पृच्छति। गुणत्व जातावितिति। इदमिति। अनुमानं प्रमाणमित्यर्थः। यद्यपि गुणत्वजातौ प्रत्यक्षमेव प्रमाणम्, रूपादिषु संयुक्तसमवेतसमवायेन गुणत्वप्रत्यक्षसंभवात्, तथापि रूपादावापामरसाधारणगुणइति प्रत्ययस्याऽसिद्धेरितिध्येयम्। गुणजन्यानि सर्वाणि कार्याणि द्रव्यगुणकर्मान्यतमत्वेनानुगमय्य तत्कारणतावच्छेदकत्वेन, द्रव्यकर्मान्यसन्निष्ठकारणतात्वेन सर्वाणि गुणनिष्ठकारणत्वानि अनुगमय्य तदवच्छेदकत्वेन वा गुणत्वजातिसाधनायानुमानमाह। द्रव्यकर्मभिन्ने इति। एतेन रूपरसादीनां सर्वेषां कार्यतावच्छेदकानुगतधर्मस्य सत्वे एव तदवच्छिन्नकारणतावच्छेदकतया गुणत्वजातिसिद्धिः स्यात्तादृशानुगतधर्म एव दुर्घट इति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तत्रावच्छेदिका न्यूनाधिकदेशवृत्तित्वात्, अतश्चतुर्विंशत्यनुगतं किंचिद्वाच्यं तदेव गुणत्वमिति ।

उत्तर—रूपत्व या सत्ता गुण में रहने वाली कारणता के अवच्छेदक नहीं हो सकते हैं—क्योंकि अन्यून एवं अनतिरिक्त वृत्ति जो धर्म वही अवच्छेदक हुआ करता है-सो रूपत्व उस कारणता के न्यूनवृत्ति है क्योंकि कारणता अन्यगुणों में भी है-और रूपत्व केवल रूपमात्र में ही है। और सत्ता कारणता के अतिरिक्त (द्रव्य-कर्म) में वृत्ति है-अतः २४ गुणों में रहने वाले किसी ऐसे एक धर्म को अवश्य मानना चाहिये कि जिस धर्म से अवच्छिन्ना वह कारणता होगी--वही अनुगत धर्म गुणत्व है-और वही गुणत्व जाति है।

समाहितम्। द्रव्यगुणकर्मान्यतमत्वेनानुगमसंभवात्। तथा च समवायसंबन्धावच्छिन्न "द्रव्यगुणकर्मान्यतमत्वावच्छिन्न" कार्यतानिरूपितसमवायं स्वसमवायिसमवायाऽन्यतरसम्बन्धावच्छिन्न "द्रव्यकर्मान्यसन्निष्ठ" कारणता किंचिद्धर्मावच्छिन्ना कारणतात्वादित्यनुमानेन गुणत्वजातिसिद्धिः । **असंभवादिति** । अप्रसिद्धत्वादित्यर्थः। एतत्तत्त्वं चोक्तं द्रव्यत्वजातिनिरूपणे । रूपत्वादिकमित्यादिना रसत्वादिपरिग्रहः। तत्र । कारणतायां । **न्यूनेति** । रूपत्वस्य कारणतान्यूनवृत्तित्वात्, सत्तायाश्च कारणतातिरिक्तवृत्तित्वादित्यर्थः । **अतः** । क्लृप्तधर्माणामवच्छेदकत्वाऽसंभवादित्यर्थः। **चतुर्विंशत्यनुगतमिति** । चतुर्विंशतिगुणमात्रसमवेतमित्यर्थः। **वाच्यमिति** । निरुक्तकारणतावच्छेदकतया अवश्यं स्वीकार्यमित्यर्थः । **तदेव गुणत्वमिति** । गुणत्वशब्दवाच्यमित्यर्थः। एवकारेण रूपत्वादेः सत्वस्य वा गुणत्वशब्दवाच्यत्वव्यवच्छेदः। न च परमाणुपरिमाणादौ कारणत्वाभावान्न गुणत्वसिद्धिरिति वाच्यम्। ज्ञायमानलिंगस्य करणत्वमते तस्यानुमितिकरणत्वात्।

अथैवं सति घटपटान्यतरत्वेन घटपटावनुगमय्य तत्कारणतावच्छेदकत्वेन, घटसमवायिकारणत्वपटसमवायिकारणत्वान्यतरत्वेन तदुभयसमवायिकारणत्वेऽनुगमय्य तदवच्छेदकत्वेन वा कपालतन्तुसाधारणजातिसिद्धेरपि दुर्वारतयाऽनन्त "कोटि" जातिकल्पनप्रसंगः। न चाऽवश्यक्लृप्तप्रत्येककारणतावच्छेदकधर्मावच्छिन्नत्वमादाय सिद्धसाधनमिति वाच्यम्। एवं सति तवापि अतिरिक्तानुगतजातिसाधनासंभवात्। अथ द्रव्यत्वावच्छिन्नसमवायिकारणतानिरूपितरूपरसादिनिष्ठकार्यतावच्छेदकतया गुणत्वजातिसिद्धिः, भावकार्याणां समवायिकारणत्वनियमस्याप्रयोजकतया द्रव्यकर्मणोः समवायिजन्यत्वे मानाभावेन तत्साधारण्यविरहेपि क्षतिविरहात्। न च तादृशनियमस्याप्रयोजकत्वे गुणत्वावच्छिन्नं प्रत्यपि द्रव्यत्वेन समवायिकारणत्वे मानाभाव इति वाच्यम्। अवयविवदवयववृत्तिगुणादावपि रूपरसादेः "कारणगुणपूर्वकस्य" उत्पादवारणाय तस्याऽऽवश्यकत्वात्। न च तथापि अतिरिक्तजातिकल्पनमपेक्ष्य लाघवादावश्यकसत्ता जातिरेव कार्यतावच्छेदिकेति वाच्यम्। सत्ताजाते

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

र्वेद्धुतराऽकार्यैसाधारणधर्मत्वेन तादृशकार्यतायामनवच्छेदकत्वादिति चेन्न। तावता रूपादिषु "कारणगुणपूर्वकेषु" गुणत्वजातिसिद्धावपि तस्याश्चतुर्विंशतिवृत्तित्वे मानाभावात्, उक्तयुक्त्या समवायिकारणानां स्वसमवेतसत्सामान्यं प्रति तत्तद्द्रव्यक्तित्वेन विशेषकार्यकारणभावस्यावश्यकत्वेन द्रव्यत्वेन गुणत्वेन सामान्यकार्यकारणभावे मानाभावाच्च। तावतैव यावद्विशेषसामग्रीवाधेनाऽवयववृत्तिगुणादौ कारणगुणक्रमेण रूपाद्युत्पादनवारणसंभवात्। न च द्रव्यस्य विशिष्य तत्तद्द्रव्यक्तित्वेन समवायिकारणत्वेपि समवायिकारणनाशक्षणे गुणोत्पत्तिवारणाय सामान्यतः कार्यसहवर्तितया द्रव्यत्वेन समवायिकारणत्वमावश्यकम्, अनन्तासु तत्तद्द्रव्यव्यक्तित्वेन समवायिकारणतासु कार्यसहवर्त्तित्वप्रवेशमपेक्ष्य कार्यसहवर्त्तितया सामान्यतोऽतिरिक्तैककारणत्वकल्पनाया एव लघुत्वादिति वाच्यम्। तथासति समवायिकारणनाशक्षणे कर्मोत्पत्तिवारणाय कर्म प्रत्यपि कार्यसहवर्तितया द्रव्यत्वेन समवायिकारणत्वस्यावश्यकतया न्यूनवृत्तेर्गुणत्वस्य तत्कार्यतावच्छेदकत्वाऽसंभवात्।

अथ रूपत्वादिप्रकारेण गृहीतायां गुणपदशक्यताया अवच्छेदकत्वेन लाघवाद् गुणत्वजातिः सिद्ध्यति। रूपादिनिष्ठा गुणपदजन्यबोधविषयत्वप्रकारतानिरूपितेश्वरेच्छीयविशेष्यता किञ्चिदवच्छिन्ना शक्तिविशेष्यतात्वाद् घटादिपदशक्तिविशेष्यतावदित्यनुमानादवच्छेदकं सिद्ध्यल्लाघवाच्चतुर्विंशतिसाधारणस्यैकस्यैव जातिरूपस्य सिद्धेः। न च पदशक्यतावच्छेदकत्वेनापि जातिसिद्धौ विभुपदशक्यतावच्छेदकत्वेनापि गगनादिचतुष्टयसाधारणजातिसिद्ध्यापत्तिरिति वाच्यम् भूतपदशक्यतावच्छेदकत्वेनापि पृथिव्यादिपंचकसाधारणसिद्धजात्या सांकर्यापत्त्या विनिगमनाविरहेण विभुत्वमूर्तत्वयोरुभयोरेवाऽजातित्वात्। न च तथापि अपूर्वाऽदृष्टादिपदशक्यतावच्छेदकत्वेन हर्यादिपदशक्यतावच्छेदकत्वेन चानुगतजातिसिद्ध्यापत्तिर्दुर्वारैवेति वाच्यम्। अपूर्वादिपदहर्यादिपदाभ्यां धर्मत्वाऽधर्मत्व, सिंहत्वविष्णुत्वादिप्रकारकस्वारसिकप्रतीतेः सर्वसिद्धत्वात्। गुणपदाद्रूपत्वादिप्रकारकप्रतीतिश्च न विवादग्रस्ता, अन्यथा शक्यतावच्छेदकव्यवस्था क्वापि न स्यात्, सर्वत्रैव लघुलक्ष्यतावच्छेदकमादाय विवादसंभवात्। परन्तु परत्वत्वादेर्गुणपदशक्यतावच्छेदकत्वे मानाभावात्, लौकिकानां तत्र गुणव्यवहारविरहात्, तांत्रिकाणां तत्र गुणव्यवहारस्य च स्वस्वपरिभाषयोपपद्यमानतया शक्त्यसाधकत्वात्. अन्यथा कर्मणोपि गुणपदशक्यत्वप्रसंगात्, न्यायभूषणकृद्व्यवहारात्, परिभाष्यतावच्छेदकत्वेनापि जातिसिद्धौ अनन्तजातिसिद्धिप्रसंगादिति विभावनीयमिति संक्षेपः।

मीमांसकास्तु गुणपदप्रवृत्तिनिमित्तं "गुणत्वं" न जातिः, लौकिकप्रत्यक्षाविषयवृत्तित्वाद्यन्नैवं तन्नैवं यथा गोत्वम्। न च पृथिवीत्वादौ व्यभिचार इति वाच्यम्। इष्टत्वात्। न च तथापि आत्मत्वमनस्त्वादौ व्यभिचार इति वाच्यम्। चक्षुर्ग्राह्यत्वे सतीत्यनेन विशेषणीयत्वात्। वृत्तित्वं च समवाय, स्वरूपान्यतरसम्बन्धेन विवक्षणीयम्। अन्यथा घटत्वादेरपि कालिकविशेषणतया लौकिकप्रत्यक्षाविषयवृत्तित्वेन व्यभिचारापत्तेः। समवायमात्रेण वृत्तित्वविवक्षणे परनये स्वरूपासिद्ध्यापत्तेः, तन्नये गुणत्वस्योपाधितया स्वरूपसंवन्धेनैव वृत्तेः। अथ परनयेऽखण्डोपाधेरपि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

समवेतत्वाभ्युपगमेन न स्वरूपासिद्धिः। नच जातिलक्षणस्य तत्रातिव्याप्तिः। अनुगतव्यंजकव्यंग्यस्यापि तन्नये जातिलक्षणघटकत्वादितिवाच्यम्। तैरखण्डोपाध्यन्तरस्य समवेतत्वोपगमेपि गुणत्वस्य समवेतत्वानुपगमात्। स्वरूपसंबन्धमात्रेण वृत्तित्वविवक्षणे तु न्यायनये स्वरूपासिद्ध्यापत्तेः।

एवंस्वसमनियतव्यंजकाभावाच्च गुणत्वे जातित्वाभावः साधनीयः, तथा च गुणत्वं न जातिः स्वसमनियतधर्मप्रकारकज्ञानव्यंग्यत्वाभावादित्यपि बोध्यम्। स्वसमनियतधर्मप्रकारकत्वं च स्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वे सति स्वाभाववद्वृत्त्यधिकरणतानिरूपकतानवच्छेदको यो धर्मस्तदवच्छिन्नधर्मप्रकारकत्वम्। तेन सास्नादीनां प्रतिव्यक्तिभिन्नत्वेपि तद्व्यंग्यगोत्वादौ न व्यभिचारः। सास्नात्वादेरनुगतत्वात्। न च सामान्यवत्त्वे सति गुणाभाववत्वं व्यंजकम्, सामान्यवानगुणो गुण इति प्रतीतेरिति वाच्यम्। गुणाभाववत्वज्ञाने गुणत्वज्ञानम्, गुणत्वज्ञाने गुणाभाववत्ताज्ञानमित्यन्योन्याश्रयात्। सामान्यवत्वे सति स्पर्शरहितत्वे सति द्रव्याश्रितत्वं च न तथा, कर्मणि अतिव्याप्तेः। नच कर्मान्यत्वेसतीति विवक्षणीयमिति वाच्यम्। तथासति रूपान्यत्वेसति रसान्यत्वेसति इत्यादेरपि सुवचत्वप्रसंगात्। तथाच रूपान्यत्वविशिष्टयथोक्तधर्मस्य व्यंजकत्वसंभवेन रूपव्यावृत्तरसादिसाधारणैकजातिसिद्धिः स्यात्, रसान्यत्वविशिष्टयथोक्तधर्मस्य व्यंजकत्वसंभवेन रसव्यावृत्तरूपगन्धादिसाधारणजातिसिद्धिः स्यादित्यादि क्रमेणाऽनन्तजातिसिद्धिः स्यादिति प्राहुः।

तच्चिन्त्यम्। जातिपदवाच्यत्वे समनियतधर्मप्रकारकज्ञानव्यंग्यत्वं न प्रयोजकम्, समनियतव्यंजकव्यंग्यत्वस्य जातिलक्षणघटकत्वे मानाभावात्। नच तथापि गुणत्वस्य जातित्वे समनियतधर्मज्ञानं विना प्रत्यक्षं कथं स्यात्, जातिप्रत्यक्षे समनियतधर्मज्ञानस्य हेतुत्वादिति वाच्यम्। यथा रूपप्रभाविशेषवान् मणिः पद्मरागपदवाच्य इत्युपदेशसहकृतेनेन्द्रियेण गृह्यते तथैव गुणत्वस्यापि सामान्यवान् कार्यानाश्रयो गुण इत्युपदेशसहकृतेनेन्द्रियेण विनापि समनियतधर्मज्ञानं प्रत्यक्षसंभवात्। इत्थं च सकलजातिप्रत्यक्षे समनियतधर्मज्ञानं न कारणमिति विदाङ्कुर्वन्तु।

अथ कर्मापि गुणपदवाच्यं सामान्यवत्वे सति कार्यानाश्रयत्वरूपगुणपदप्रवृत्तिनिमित्तयोगादित्यर्थकस्य कर्मापि गुणस्तल्लक्षणयोगादिति वदतो भूषणस्य* मतेपि गुणत्वं न जातिः, गुणपदप्रवृत्तिनिमित्तस्य जातित्वानभिधानात्।

न च तन्मते गुणपदप्रवृत्तिनिमित्तस्य कुतो न जातित्वम्, यथोक्तधर्मस्यैव समनियतत्वेन व्यंजकत्वसंभवादिति वाच्यम्। यथोक्तधर्मस्यानपेक्षित 'कार्याश्रयद्रव्य' व्यावृत्तिघटितत्वेन व्यंजकत्वाऽसंभवात्। चक्षुर्ग्राह्यत्वेसति लौकिकप्रत्यक्षाविषयवृत्तितया जातित्वासंभवाच्च। किन्तु गुणत्वं "गुणपदप्रवृत्तिनिमित्त" मखण्डोपाधिरेव। प्रकाशकृदनुसारिणस्तु कर्मापि गुणः—गुणपदवाच्यं-तल्लक्षणयोगात्, गुणत्वाख्य-

---

* भूषणो नाम न्यायसूत्रवृत्तिकारइति तार्किकरक्षायाम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जातिरूपगुणपदप्रवृत्तिनिमित्तयोगादिति भूषणार्थः । तन्मते सामान्यवत्वे सति कार्यानाश्रयत्वस्यैव समनियतत्वेन तद्व्यंग्यत्वेनैव गुणपदप्रवृत्तिनिमित्तस्य जातित्वसंभवात्, गुणपदप्रवृत्तिनिमित्तस्य चतुर्विंशतिमात्रवृत्तिजातित्ववादिनं वैशेषिकमपेक्ष्य विशेष इत्याहुः । तच्चिन्त्यम् । यथोक्तधर्मस्याऽनपेक्षितव्यावृत्तिघटितत्वेन व्यंजकत्वाऽसंभवात् । अन्यथा वैशेषिकमतेपि कर्मान्यत्वघटितयथोक्तधर्मस्य व्यंजकत्वसंभवेन वैशेषिकमतमेव ज्यायः स्यादिति चेन्न । चलनात्मकतया प्रतीयमानस्यकर्मणः रूपादिव्यावृत्तस्योत्क्षेपणाद्यनुवृत्तस्यैकवैजात्यस्यानुभवसिद्धत्वात् ।

"कर्म गुणः सामान्यवत्वेसति स्पर्शरहितत्वेसति द्रव्याश्रितत्वात्, सामान्यवत्वेसति कार्यानाश्रयत्वात्, इत्यनुमानाच्च कर्म गुण इति न्यायभूषणकारः । गुणकर्मणोरेकत्वं वदतः तस्य गुणत्ववत् कर्मत्वमपि नास्ति व्यवस्थापकाभावात् इति विवक्षितम्, उताऽस्तिकर्मत्वं गुणत्वमेव नास्ति इति वा विवक्षितम् । नाद्यः— व्यवस्थापकसत्वात्—तथाहि—परस्परविरुद्धसंयोगविभागलक्षणकार्योत्पादकत्वं च कर्मणो व्यवस्थापकमनुभवसिद्धमेवेति उदयनाचार्याः । अस्यार्थः—परस्परविरुद्धं— परस्परनाश्यनाशकभावापन्नं—यत्संयोगविभागोभयलक्षणं कार्यं तदुत्पादकत्वमित्यर्थः । तथा च स्वपश्चाद्भाविभावाजन्यस्वजन्यविभागनाशकसंयोगजनकस्वरूपयोग्यत्वमिति यावत् । अतो न परस्परस्य दुर्वचत्वम् । स्वपदं लक्ष्यत्वेनाभिमतकर्मपरम् । व्यवस्थापकमिति । समनियतव्यंञ्जकमित्यर्थः । न च तथापि चक्षुर्ग्राह्यत्वे सति लौकिकप्रत्यक्षाविषयवृत्तितया कथं जातित्वमिति वाच्यम् । वैजात्यस्यानुभवसिद्धत्वे तस्य जातित्वाभावव्याप्यत्वे मानाभावादिति भावः । अत्र संयोगविभागात्मककार्यद्वयजनकत्वं कर्मणो गुणादिभ्योव्यावर्त्तकम् । परस्परविरुद्धत्वं तु संयोगविभागयोर्वैजात्यमाविष्कर्तुम् । तथा च कर्मत्वं जातिः स्वाश्रयजन्यविभागनाशकसंयोगजनकतावच्छेदकत्वादिति जनकतावच्छेदकतया कर्मत्वजातिसिद्धिः । न द्वितीयः — अत्राचार्याः । "तद्विपरीतं च कार्यं रूपादीनां चतुर्विंशतेरुपलभ्यते । ततस्तैः कर्मविपरीतजातीयैर्भवितव्यम् । न ह्येकजातीयत्वे कार्यभेदनियम उपपद्यते इति ।" अस्यार्थः । तद्विपरीतं च कार्यमिति । परस्परविरुद्धसंयोगविभागोभयभिन्नमेव कार्यमित्यर्थः । परस्परविरुद्धसंयोगविभागोभयकार्यजनकभिन्नत्वमिति यावत् । तैः— रूपादिचतुर्विंशतिगुणैः । कर्मविपरीतजातीयैरिति । कर्मव्यावृत्तसकलरूपाद्यनुवृत्तवैजात्यवद्भिर्भवितव्यमित्यर्थः । एकजातीयत्वे । कर्मत्वजातिमत्वे । कार्यभेदनियम इति । क्वचित्परस्परविरुद्धसंयोगविभागोभयकार्यजनकत्वम्, क्वचित्तादृशकार्यजनकत्वावच्छिन्नभेद इत्युपपद्यते इत्यर्थः । तथा च स्वजन्यविभागनाशकसंयोगजनकभिन्नत्वरूपस्य परस्परविरुद्धसंयोगविभागोभयाजनकत्वस्याऽवच्छेदकतया गुणत्वजातिसिद्धिः । तथा च गुणत्वं जातिः समवेतत्वे सति स्वाश्रयजन्यविभागनाशकसंयोगजनकभेदावच्छेदकत्वात्, विशेषणताविशेषापेक्षया समवायस्य लाघवेन समवायसंबन्धेनैव गुणत्वस्य वृत्तित्वस्वीकारान्न तस्याऽखण्डोपाधित्वमिति भावः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

द्रव्याश्रिता इति। यद्यपि द्रव्याश्रितत्वं न लक्षणम्, कर्मादावतिव्याप्तेः। द्रव्यत्वव्यापकतावच्छेदकसत्ताभिन्नजातिमत्त्वं तदर्थः। भवति हि

(द्रव्याश्रिता इति) यद्यपि द्रव्याश्रितत्व गुण का लक्षण नहीं है—क्यों द्रव्याश्रितत्व इस लक्षण की कर्म में अतिव्याप्ति हो रही है—कारण कि कर्म भी द्रव्याश्रित है। तथापि द्रव्यत्व का व्यापकता वच्छेदक जो सत्ता भिन्न जाति-तादृशजातिमत्त्व यही द्रव्याश्रितत्व का अर्थ है—सो द्रव्यत्व का व्यापकतावच्छेदक एवं सत्ताभिन्नजाति गुणत्व जाति होती है—और तादृशगुणत्वजातिमत्ता

न चैवमदृष्टेश्वरज्ञानादौ तत्सिद्धिर्न स्यादिति वाच्यम्। तादृशसंयोगाऽसाधारणकारणभिन्नत्वस्य विवक्षितत्वात्, तस्य च तत्र सत्वात्। ननु संयोगविभागाजनकत्वं कर्मव्यतिरिक्तसकलपदार्थनिष्ठामेव जातिं व्यवस्थापयेत्, न रूपादिचतुर्विंशतिमात्रनिष्ठं गुणत्वमिति चेन्न। द्रव्यस्यापि परस्परविरुद्धसंयोगविभागजनकभिन्नत्वप्रसंगात्। न चेष्टापत्तिः। रूपादिवन्नैकं द्रव्यं संयोगविभागावारभेत। न च तदुभयजनकभिन्नत्वस्य सामान्यादावपि सत्वान्न्यूनवृत्तिगुणत्वस्य कथं तदवच्छेदकत्वमिति वाच्यम्। सामान्यवत्वे सतीति विशेषणीयत्वात्। न चापराभ्युपगतं गुणत्वमखण्डोपाधिरेव तदवच्छेदकमस्त्विति वाच्यम्। परेण तस्य स्वरूपेण वृत्तित्वस्वीकारे गौरवात्, समवायेन वृत्तित्वस्वीकारे तु जातित्वस्यार्थवशसिद्धत्वात्। समनियतव्यंजकव्यंग्यत्वस्य लक्षणघटकत्वे गौरवान्मानाभावाच्च। अत्रेदं बोध्यम्। स्वजन्यविभागनाशकसंयोगजननस्वरूपयोग्यत्वरूपस्य "परस्परविरुद्धसंयोगविभागरूपकार्यकारित्वस्या" विशेषेपि स्वपश्चाद्भाविभागाजन्य स्वजन्यविभागनाशकसंयोगस्वरूपयोग्यत्व तादृशस्वरूपयोग्यत्वभिन्नत्वरूपाभ्यां "अनपेक्षत्वसापेक्षत्वाभ्यां" द्रव्यकर्मणोर्विजातीयत्वम्। तथा सामान्यवत्व कार्यानाश्रयत्वाद्यविशेषेपि स्वजन्यविभागनाशकसंयोगजननस्वरूपयोग्यत्वतादृशस्वरूपयोग्यत्वभिन्नत्वरूपाभ्यां "विरुद्धाविरुद्धकार्यत्वाभ्यां" गुणकर्मणोरपि विजातीयत्वमिति संक्षेपः।

ननु गुणाः पूर्वमेव स्वरूपतः प्रतिपादिताः पुनः कथं प्रतिपाद्यन्ते इति चेन्न। साधर्म्यवैधर्म्यप्रकारेण द्रव्याणि निरूपितानि, संप्रति ताभ्यामेव गुणानां निरूपणात्। तद्धर्मसमव्याप्तोधर्मस्तद्धर्मावच्छिन्नस्य साधर्म्यम्। तद्धर्मावच्छिन्नेतरसमव्याप्तो धर्मस्तद्धर्मावच्छिन्नस्य वैधर्म्यम्। अत्र कार्यत्वसंगतिरपि बोध्या।

द्रव्याश्रितत्वमिति। समवायेन द्रव्यवृत्तित्वमित्यर्थः। कर्मादाविति। आदिना द्रव्यसामान्यविशेषाणां परिग्रहः। तथापीति। अत्र द्रव्यत्वव्यापकतासमवायेन ग्राह्या। तेन तादात्म्येन द्रव्यनिष्ठव्यापकताया अवच्छेदकत्वेपि द्रव्यत्वस्य न क्षतिः। लक्ष्ये लक्षणं योजयति। भवतिहीति। द्रव्यत्वव्यापकतावच्छेदकमिति। निर्गुणद्रव्याभावादितिभावः। द्रव्यत्वव्यापकतावच्छेदकेत्यस्य फलमाह। द्रव्यत्वं कर्मत्वं वेति। जातिपदस्य फलमाह। द्रव्यत्वत्वमिति। सत्तामादाय द्रव्येऽतिव्याप्तिवारणाय

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रूपं रसः स्पर्शगन्धौ परत्वमपरत्वकम् ॥८६॥
द्रवत्वस्नेहवेगाश्च मता मूर्तगुणा अमी ।
धर्माधर्मौ भावना च शब्दो बुद्ध्यादयोऽपि च ॥८७॥
एतेऽमूर्तगुणाः सर्वे विद्वद्भिः परिकीर्तिताः ।
संख्यादयो विभागान्ता उभयेषां गुणा मताः ॥८८॥

गुणत्वं द्रव्यत्वव्यापकतावच्छेदकं तद्वत्ता च गुणानामिति । द्रव्यत्वं कर्मत्वं वा द्रव्यत्वव्यापकतावच्छेदकं गगनादौ द्रव्यकर्मणोरभावात् । द्रव्यत्ववत्त्वं सामान्यत्वादिकं वा न जातिरिति तद्व्युदासः । निर्गुणा इति । यद्यपि निर्गुणत्वं कर्मादावप्यस्ति तथापि सामान्यवत्त्वे सति कर्मान्यत्वे च सति निर्गुणत्वं बोध्यम्। जात्यादीनां न सामान्यवत्त्वं, कर्मणो न कर्मान्यत्वम्, द्रव्यस्य न निर्गुणत्वमिति तत्र तत्र नातिव्याप्तिः । निष्क्रिया इति स्वरूपकथनं नतु लक्षणं गगनादावतिव्याप्तेः । वेगा इति । वेगेन स्थितिस्थापकोऽप्युपलक्षणीयः । मूर्तगुणा इति ।

चौबीस गुणों में है–द्रव्यत्व या कर्मत्व द्रव्यत्व का व्यापकतावच्छेदक नहीं है–क्योंकि द्रव्य-और कर्म यदि द्रव्यत्व के व्यापक हों–तब द्रव्यत्व और कर्मत्व व्यापकतावच्छेदक हो सकते हैं सो द्रव्य और कर्म-द्रव्यत्व के व्यापक ही नहीं हैं–व्यापक तब हो सकते हैं जब कि जहाँ-जहाँ द्रव्यत्व रहे वहाँ वहाँ द्रव्य-कर्म यदि रहें सो द्रव्यत्व गगन आदि में है परन्तु वहाँ द्रव्य-कर्म नहीं है–हाँ द्रव्यत्व का व्यापक द्रव्यत्व एवं सामान्य हो सकता है और तब व्यापकतावच्छेदक द्रव्यत्वत्व या सामान्यत्व आदि होंगे परन्तु वे जाति ही नहीं–अतः उनका भी व्युदास हुआ–अर्थात् द्रव्यत्व-और सामान्यमें अतिव्याप्ति नहीं है। (निर्गुणाः इति) यद्यपि निर्गुणत्व (गुणशून्यत्व) गुण का लक्षण नहीं है–क्योंकि इस लक्षण की कर्म आदि में अतिव्याप्ति है। तथापि सामान्य वाला हो कर्म से अन्य हो–एवं निर्गुण हो—उसे गुण कहते हैं। इस लक्षण की तत्तत्पदार्थों में अतिव्याप्ति का वारण करते हैं कि—जात्यादि (जातिविशेष-समवाय-अभाव) ये सामान्यवान् नहीं हैं। कर्म-कर्म से अन्य नहीं है–और द्रव्य निर्गुण नहीं है–सो इस लक्षण की जात्यादि में-कर्म-और द्रव्य में अतिव्याप्ति नहीं हुई। 'निष्क्रिया' यह गुण के स्वरूप का कथन किया है अन्यथा यह यदि गुण का लक्षण किया जावेगा तो यह लक्षण गगन आदि में अतिव्याप्त हो जावेगा। क्योंकि गगन भी निष्क्रिय है।

रूप-रस-स्पर्श-गन्ध-परत्व-अपरत्व-द्रवत्व-स्नेह-वेग-ये मूर्त (पृथ्वी-जल-तेज-वायु-मन) द्रव्यों के गुण हैं। यहाँ वेग से स्थितिस्थापक (संस्कार) का भी ग्रहण कर लेना 'मूर्तगुणाः'

सत्ताभिन्नेति जातिविशेषणम् । निर्गुणत्वं गुणवद्भिन्नत्वम् । सत्यन्तद्वयस्य विशेष्यदलस्य फलमाह । जात्यादीनामिति । तत्र तत्र । जात्यादौ कर्मणि द्रव्येच ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संयोगश्च विभागश्च संख्याद्वित्वादिकास्तथा ।
द्विपृथक्त्वादयस्तद्वदेतेऽनेकाश्रिताः गुणाः ॥८९॥
अतः शेषगुणाः सर्वे मता एकैकवृत्तयः ।

अमूर्त्तेषु न वर्तन्ते इत्यर्थः । लक्षणं तु तावदन्यान्यत्वम् । एवमग्रेपि । अमूर्त-गुणा इति । मूर्तेषु न वर्तन्ते इत्यर्थः । उभयेषामिति । मूर्तामूर्तगुणा इत्यर्थः। मूर्तवृत्तिवृत्ति-अमूर्तवृत्तिवृत्ति गुणत्वव्याप्यजातिमत्वम् । संख्यात्वादिकमादा-लक्षणसमन्वयः । ८६—८८ । अनेकाश्रिा इति । संयोगविभागद्वित्वादीनि द्विवृत्तीनि, त्रित्वचतुष्ट्वादिकं त्रिचतुरादिवृत्तीति बोध्यम् । ८६ अत इति । रूपरसगन्धस्पर्शैकत्वपरिमाणैकपृथक्त्वपरत्वापरत्वबुद्धिसुखदुखेच्छाद्वेषप्रयत्न-गुरुत्वद्रवत्वस्नेहसंस्कारादृष्टशब्दा इत्यर्थः ।

का यह अर्थ है कि ये गुण अमूर्तद्रव्यों में नहीं रहते हैं। इन मूर्तगुणों का लक्षण है (तावद-न्यान्यत्व) एतद्भिन्नभिन्नत्व-अर्थात् इन मूर्तगुणों से जो भिन्न-तद्भिन्नत्व इन्हीं में आयेगा-अतः यह लक्षण सर्वथा निर्दुष्ट है ॥ ८६ ॥ धर्म अधर्म-भावनाख्यसंस्कार-शब्द-बुद्धि-सुख-दुःख-इच्छा-द्वेष और प्रयत्न ये अमूर्त (मूर्तद्रव्यों से भिन्न) द्रव्यों के गुण हैं। ऐसा विद्वानों ने कहा है ॥ ८७ ॥ संख्या-परिणाम-पृथक्त्व-संयोग-विभाग-ये पाँच मूर्त-अमूर्त दोनों द्रव्यों के गुण हैं ॥ ८८ ॥

संयोग-विभाग-द्वित्वादिसंख्या-तथा द्विपृथक्त्व आदि गुण सर्वथा अनेकाश्रित हैं। (अनेकाश्रिताः) संयोग-विभागद्वित्वये दो में वृत्ति हैं आदिपदग्राह्य त्रित्व-चतुष्ट्व आदि तीन चार में वृत्ति है—ऐसा जानना चाहिये ॥ ८६ ॥ इन चार गुणों से (शेष) अवशिष्ट सभी

निष्क्रियाः क्रियावद्भिन्नाः । स्वरूपकथनमिति । वस्तुतो गुणे क्रियानास्तीति स्फुटप्रतित्यर्थमित्यर्थः । गगनादाविति । आदिना दिक्कालात्मनां परिग्रहः। वेगेनेति । वेगपदस्य भावनान्यसंस्कारपरत्वादिति भावः। मूर्तगुणा इति साधा-रणम् । फलितार्थमाह । अमूर्तेष्विति । तेन संख्यादिषु नातिव्याप्तिः । न च घटमात्र-वृत्त्येकत्वसंख्यादावतिव्याप्तिरिति वाच्यम् । मूर्तत्वव्याप्यतावच्छेदकगुणवृत्तिजाति-मत्वस्य विवक्षितत्वात् । तावदिति । रूपरसगन्धस्पर्शपरापरत्वद्रवत्वस्नेहवेगस्थिति-स्थापकान्यतमत्वमित्यर्थः । मूर्तेषु न वर्तन्ते इति । मूर्तत्वाभावव्याप्यतावच्छेदक-परिमाणवृत्तिजातिमत्वं फलितम् । तेनाऽमूर्तमात्रवृत्तिसंख्यादौ नातिव्याप्तिः । न वा परमहत्वत्वजातिमादायातिव्याप्तिः ।

ननु उभयेषां गुणा इतिमूलाद् यत्किंचिदुभयवृत्तिगुणत्वं लभ्यते तच्च रूपादावतिव्याप्तमत उभयपदं मर्तामूर्तपरतया व्याचष्टे । मूर्तामूर्तगुणा इत्यर्थइति। उभयोर्मूर्तामूर्तयोः द्रव्यमात्रस्येति यावत् । कालवृत्तिवृत्तिगुणत्वव्याप्यजातिमत्वं लक्षणं बोध्यम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

बुद्ध्यादिषट्कंस्पर्शान्ताः स्नेहः सांसिद्धिको द्रवः ॥९०॥
अदृष्टभावना शब्दाः अमी वैशेषिका गुणाः ।

बुद्ध्यादीति । बुद्धिसुखदुखेच्छाद्वेषप्रयत्ना इत्यर्थः । स्पर्शान्ताः । रूपरसगन्धस्पर्शा इत्यर्थः । द्रवो द्रवत्वम् । वैशेषिकाः विशेषा एव वैशेषिकाः स्वार्थे ठक् । विशेषगुणा इत्यर्थः ।

गुण एक-एक द्रव्य में रहते हैं—जैसे-रूप-रस-गन्ध-स्पर्श-एकत्व-परिणाम-एकपृथक्त्व-परत्व-अपरत्व बुद्धि-सुख-दुःख-इच्छा-द्वेष-प्रयत्न-गुरुत्व-द्रवत्व-स्नेह-संस्कार-अदृष्ट-शब्द । बुद्धि सुख-दुःख-इच्छा द्वेष-प्रयत्न-ये बुद्ध्यादि छः, और रूप-रस-गन्ध-स्पर्श-ये चार स्पर्शान्त, सांसिद्धिकद्रवत्व, अदृष्ट-भावना-शब्द-ये विशेषगुण कहलाते हैं । विशेष तथा वैशेषिक ये दोनों एकार्थक हैं । स्वार्थ में ठकप्रत्यय होता है—"वैशेषिकागुणाः" इसका अर्थ है 'विशेषगुणाः' । संख्या से लेकर अपरत्वपर्यन्त-संख्या-परिणाम-पृथक्त्व-संयोग-विभाग-परत्व-अपरत्व नैमित्तिक द्रवत्व-तथा-गुरुत्व-वेग-ये सामान्यगुण हैं । संख्या से लेकर अपरत्व-पर्यन्त-द्रवत्व-स्नेह-ये चक्षुः

अतः शेषाः । पूर्वोक्तगुणभिन्नाः । एकैकवृत्तय इति । तत्वंच तद्व्यक्तित्वावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगित्वम् । अव्यासज्यवृत्तिधर्मस्य पर्याप्त्यस्वीकारे तु वस्तुविशिष्टत्वं एकैकवृत्तित्वम् । वै० स्वसमवेतत्व स्वभिन्नसमवेतान्यत्व स्ववृत्तिगुणत्ववत्वैतत्त्रितयसंबन्धेन । स्ववृत्तित्वं च कालिकसंबन्धेन गुणत्ववत्ता च समवायेन । भावनाभिन्नजन्यैकत्वव्यापकतावच्छेदकस्पर्शावृत्तिधर्मसमवाय्यन्यत्वे सति गुरुत्वनैमित्तिकद्रवत्वान्यगुणत्वं विशेषगुणलक्षणम् । संख्यादिसामान्यगुणेऽतिव्याप्तिवारणाय सत्यन्तम् । एवं च जन्यैकत्वव्यापकतावच्छेदकः स्पर्शावृत्तिश्चयो धर्मः संख्यात्वं तत्समवायित्वाद्वारणम् । संस्कारत्वस्य जन्यैकत्वव्यापकतावच्छेदकतया स्पर्शावृत्तितया च तत्समवायित्वेन भावनायाः संग्रहो न स्यादतो भावनाभिन्नेति समवायिविशेषणम् । तथा च भावनाभिन्नत्वरूपविशेषणाभावादेव विशिष्टाभावात्तत्संग्रहः । वेगस्थितिस्थापकयोर्भावनाभिन्नत्वेपि जन्यैकत्वव्यापकत्वावच्छेदकीभूतसंस्कारत्वसमवायित्वाद्वारणम् । परत्वाऽपरत्वादावपि परत्वत्वादिधर्मस्य शब्दादिरूपजन्यव्यापकतानवच्छेदकत्वादतिव्याप्तिवारणायैकत्वोपादानम् । उक्तातिव्याप्तिवारणायैव जन्यपदोपादानम् । तयोर्धर्मयोरेकत्वव्यापकतानवच्छेदकत्वेपि जन्यैकत्वव्यापकतावच्छेदकत्वात्तयोर्व्युदास इति ध्येयम् । स्पर्शावृत्तीत्यनुपादाने रूपादेरपि जन्यैकत्वव्यापकतावच्छेदकसत्तागुणत्वसमवायित्वादसंभवःस्यादिति । रूपावृत्तित्वादिकं विहाय स्पर्शावृत्तिपर्यन्तानुधावनं स्पर्शसंग्रहायैव । रूपादावपि रूपसंयोगान्यतरत्वस्पर्शान्यत्वादिरूपतादृशधर्मसत्वादव्याप्तिवारणाय समवायीति । पूर्वषट्पदार्थवारणाय विशेष्यदलम् । गुरुत्वनैमित्तिकद्रवत्वयोरतिव्याप्तिवारणाय गुरुत्वनैमित्तिकद्रवत्वान्येति ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संख्यादिरपरत्वान्तो द्रवोऽसांसिद्धिकस्तथा ॥९१॥
गुरुत्ववेगौ सामान्यगुणा एते प्रकीर्तिताः ।
संख्यादिरपरत्वान्तो द्रवत्वं स्नेह एव च ॥९२॥
एते तु द्वीन्द्रियग्राह्या अथ स्पर्शान्तशब्दकाः ।
बाह्यैकैकेन्द्रियग्राह्याः, गुरुत्वादृष्टभावनाः ॥९३॥
अतीन्द्रियाः, विभूनां तु ये स्युर्वैशेषिका गुणाः ।

संख्येति । संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वानीत्यर्थः । द्वीन्द्रियेति । चक्षुषा त्वचापि ग्रहणयोग्याः । बाह्येति । रूपादीनां चक्षुरादि-

तथा त्वचा इन दो इन्द्रियों से ग्राह्य हैं । (अथ) 'स्पर्शान्त' रूप-रस-गन्ध-स्पर्श-और शब्द ये बाह्य एक-एक इन्द्रिय से ग्राह्य हैं—रूपादि चक्षु आदि से ग्राह्य हैं ।

गुरुत्व—अदृष्ट—भावना—ये अतीन्द्रिय हैं—अर्थात् इनका किसी इन्द्रिय से प्रत्यक्ष नहीं होता है । और जो विभुवों के विशेष गुण हैं वे अकारणगुणोत्पन्न (अकारणपूर्वक) हैं । कारण के गुणों से कार्य में जो गुण उत्पन्न होते हैं वे कारण गुण पूर्वक कहे जाते हैं—रूपादिकों को जैसे अगाड़ी कहेंगे । बुद्धि—सुख—दुःख—इच्छा—द्वेष—प्रयत्न—धर्म—अधर्म—भावना—तथा शब्द—ये कारणगुणोत्पन्न नहीं हैं—क्यों कि आत्मा का यदि कोई कारण होता तब उसमें जैसे बुद्धि—सुख—दुःख—आदि गुण उत्पन्न होते वैसे ही आत्मा में उत्पन्न होते—परन्तु आत्मा का कोई कारण ही नहीं है । ९३ ॥ ९४ ॥ अपाकज अर्थात् अग्नि संयोग से न उत्पन्न होने

गुरुत्ववेगावित्यत्र वेगपदं भावनातिरिक्तसंस्कारपरम्, तेन स्थितिस्थापकस्यापि परिग्रहः । रूपस्पर्शान्यत्वे सति द्रव्यविभाजकोपाधिव्याप्यतावच्छेदक संयोगविभागवेगद्रवत्वावृत्तिजातिशून्यगुणत्वम् । शुक्लरूपे अनुष्णाशीतस्पर्शे चातिव्याप्तिवारणाय सत्यन्तम् । द्रव्यविभाजकं पृथिवीत्वादि तद्व्याप्यतावच्छेदकं च गन्धत्वादि तच्छून्यत्वं च संख्यादौ सत्वाल्लक्षणसमन्वयः । यत्संख्यादेर्न द्वीन्द्रियेण ग्रहस्तत्राव्याप्तेराह । ग्रहणयोग्या इति । तथा च द्वीन्द्रियजन्यग्रहविषयत्वं न तदर्थः । किन्तु तादृशग्रहयोग्यत्वमिति भावः । तथा च चक्षुस्त्वगुभयेन्द्रियजन्यलौकिकप्रत्यक्षविषयतावच्छेदकधर्मसमवायिगुणत्वं निष्कर्षः । मूले स्पर्शान्तशब्दका इति । रूपरसगन्धस्पर्शशब्दा इत्यर्थः । बाह्यैकैकेन्द्रियग्राह्या इति । रूपं चक्षुषः, रसो रसनस्य, गन्धो घ्राणस्य, स्पर्शस्त्वचः, शब्दः श्रवणस्य ग्राह्य इत्यर्थः । रूपादीनामिति । रूपरसगन्धस्पर्शशब्दानामित्यर्थः । चक्षुरादिग्राह्यत्वादिति । चाक्षुषादियोग्यत्वादित्यर्थः । तेन चाक्षुषाद्यविषयरूपादौ नाव्याप्तिः । मूले गुरुत्वादृष्टभावना इत्यत्र भावनापदं वेगभिन्नसंस्कारपरम् । तेन स्थितिस्थापकस्यापि संग्रहः । अतीन्द्रियत्वं च लौकिकसाक्षात्कारविषयगुणत्वव्याप्य "संस्कारत्वान्य" धर्मवदन्यगुणत्वम् । विभूनां तु ये स्युर्वैशेषिका गुणा इति । ते इति शेषः । कारणगुणेन । स्वसमवायिकारणकारण-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अकारणगुणोत्पन्ना एते तु परिकीर्तिताः ॥६४॥
अपाकजास्तु स्पर्शान्ता द्रवत्वं च तथाविधम् ।
स्नेहवेगगुरुत्वैकपृथक्त्वपरिमाणकम् ॥६५॥
स्थितिस्थापक इत्येते स्युः कारणगुणोद्भवाः ।
संयोगश्च विभागश्च वेगश्चैते तु कर्मजाः ॥६६॥

ग्राह्यत्वात् । विभूनामिति । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मादृष्टभावना-शब्दा इत्यर्थः । अकारणेति । कारणेन कार्ये ये गुणा उत्पाद्यन्ते ते कारणगुणपूर्वका रूपादयो वक्ष्यन्ते बुद्ध्यादयस्तु न तादृशाः, आत्मादेः कारणाभावात् ।

अपाकजास्त्विति । पाकजरूपादीनां कारणपूर्वकत्वाभावादपाकजा इत्युक्तम् । तथाविधम्—अपाकजम् । तथैकत्वमपि बोध्यम् । संयोगश्चेति । कर्मजत्वं यद्यपि न साधर्म्यं घटादावतिव्याप्तेः, संयोगजसंयोगेऽव्याप्तेश्च । तथापि कर्मजन्यवृत्तिगुणत्वव्याप्यजातिमत्त्वं बोध्यम् । एवमन्यत्रापि

वाले जो रुप–रस–गन्ध–स्पर्श । और (तथाविध) अपाकज जो द्रवत्व–स्नेह–वेग गुरुत्व-एकपृथक्त्व–परिमाण–तथा स्थितिस्थापक नामक संस्कार ये सब कारणगुणोत्पन्न हैं । (अपाकजास्त्विति) पृथिवी के जो रूप–रस–गन्ध–स्पर्श–पाकज हैं अर्थात् अग्निसंयोग से उत्पन्न हैं–अतः वे कारणगुणपूर्वक नहीं है–सो कारणगुणपूर्वकत्व साधर्म्य की उनमें अतिव्याप्तिवारण करने के लिये 'अपाकजाः' यह स्पर्शान्त का विशेषण कहा । ६५ ॥ संयोग–विभाग–वेगाख्य संस्कार ये कर्म से उत्पन्न होते हैं । (कर्मजा इति) यद्यपि कर्मजत्व (कर्मजन्यत्व) संयोग–विभाग–वेग–इन तीन का साधर्म्य नहीं है–क्योंकि चक्र भ्रमणादि रूप कर्मजन्यत्व घट आदि में भी है–अतः घटादि में अतिव्याप्ति हो जावेगी । और संयोग से जायमान संयोग में अव्याप्ति हो जावेगी–क्योंकि उस संयोग में कर्म जन्यत्व नहीं है अपितु संयोगजन्यत्व है । तथापि कर्मजत्व का कर्म से उत्पन्न होने वाले पदार्थों में रहने वाली जो गुणत्वव्याप्यजाति

समवेतगुणेन । कार्ये–स्वसमवायिकारणे । ते गुणाः । तथा च स्वसमवायिकारण-कारणगुणजन्यत्वं कारणगुणपूर्वकत्वम् । तदभाववत्वमकारणगुणपूर्वकत्वम् । तादृशाः-कारणगुणपूर्वकाः । आत्मादेः—बुद्धिसमवायिकारणस्य । कारणाभावादिति । नित्यत्वादिति ध्येयम् ॥९०-६४॥ अपाकजमिति । सांसिद्धिकमित्यर्थः । संयोगज-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्पर्शान्तपरिमाणैकपृथक्त्वस्नेहशब्दके भवेदसमवायित्वम् ।
अथ वैशेषिके गुणे ॥९७॥
आत्मनः स्यान्निमित्तत्वमुष्णस्पर्शगुरुत्वयोः ।
वेगेऽपि च द्रवत्वे च संयोगादिद्वये तथा ॥९८॥
द्विधैव कारणत्वं स्यादथ प्रादेशिको भवेत् ।
वैशेषिको विभुगुणः संयोगादिद्वयं तथा ॥९९॥

क्वचिदूह्यम् । ९५–९६ पृथक्त्वेत्यत्र त्वप्रत्ययस्य प्रत्येकमन्वयादेकत्वं पृथक्त्वं च ग्राह्यम् । पृथक्त्वपदेन चैकपृथक्त्वम् । भवेदसमवायित्वमिति ।

(संयोगत्व विभागत्व–वेगत्व–) तादृश जातिमत्ता इन्हीं तीनों में रहेगी—अतः अव्याप्ति नहीं है। इसी प्रकार अन्यत्र भी जानना ॥ ९६ ॥ रूप–रस–गन्ध–स्पर्श–परिमाण–एकत्व–एकपृथक्त्व–स्नेह–और शब्द–ये असमवायिकारण होते हैं। (स्पर्शान्तेति) स्पर्श यहाँ अनुष्ण लेना चाहिये। 'एकपृथक्त्वम्' यहाँ पर 'त्व' प्रत्यय का प्रत्येक के साथ अन्वय कर देने से एकत्व–पृथक्त्व का ग्रहण कर लेना चाहिये। और पृथक्त्वपद से एकपृथक्त्व विवक्षित है। (भवेदसमवायित्वमिति) घटादि के रूप–रस–गन्धस्पर्श के प्रति–कपाल आदि के रूप–रस–गन्ध स्पर्श–असमवायिकारण होते हैं। (अर्थात् कार्य के गुणों के प्रति कारणगुण असमवायिकारण होते हैं) एवं कपाल आदि का परिमाण घट आदि के परिमाण के प्रति असमवायिकारण होता है। शब्द भी द्वितीयशब्द के प्रति असमवायिकारण होता है। ऐसे ही स्थितिस्थापक–एकपृथक्त्व को भी जाना।

आत्मा (जीवात्मा) के बुद्धि आदि विशेषगुण निमित्तकारण होते हैं। (निमित्तत्वमिति) बुद्धि आदि–इच्छा आदि के निमित्तकारण होते हैं। ९७ ॥

का० अर्थ—उष्णस्पर्श–गुरुत्व–वेग–द्रवत्व–संयोग–विभाग–इनमें असमवायिकारणता तथा निमित्तकारणता–यह दो प्रकार की कारणता रहती है।

(द्विधैवेति) असमवायिकारणता–तथा निमित्तकारणता–यही दो प्रकार की कारणता पूर्वोक्त गुणों में रहती है–तथाहि–अवयव (कपाल आदि) गत उष्णस्पर्श अवयवी (घट-

---

संयोगे इति। एवं विभागजविभागे वेगजवेगे इत्यपि बोध्यम्। एवं कर्मजत्वलक्षणमिव। अन्यत्रापि। उत्तरलक्षणेष्वपि ॥९५-९६॥ स्पर्शान्तेति। रूपरसगन्धस्पर्शा इत्यर्थः। स्पर्शपदमुष्णस्पर्शेतरस्पर्शपरम्। उष्णस्पर्शस्य तु द्विधा कारणत्वं वक्ष्यति। द्वितीयशब्दं प्रतीति। असमवायिकारणत्वमिति पूर्वेणान्वयः। निमित्तत्वमिति। आत्मनोवैशेषिके गुणे निमित्तत्वं स्यादित्यर्थः। उष्णस्पर्श इति। अवयवगतोष्णस्पर्श इत्यर्थः। उष्णस्पर्शस्य। अवयविगतोष्णस्पर्शस्य। गुरुत्वपतनयोरिति।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

घटादिरूपरसगन्धस्पर्शाः कपालादिरूपरसगन्धस्पर्शेभ्यो भवन्ति । एवं कपालादिपरिमाणादीनां घटादिपरिमाणाद्यसमवायिकारणत्वम्, शब्दस्यापि द्वितीयशब्दंप्रति, एवं स्थितिस्थापकैकपृथक्त्वयोरपि बोध्यम् ।

निमित्तत्वमिति । बुद्ध्यादीनामिच्छादिनिमित्तत्वादितिभावः । द्विधैवेति । असमवायिकारणत्वं निमित्तकारणत्वं च । तथाहि उष्णस्पर्शः उष्णस्पर्शस्याऽसमवायिकारणम्, पाकजे निमित्तम्। गुरुत्वं गुरुत्वपतन-योरसमवायिकारणम्, अभिघाते निमित्तम्। वेगो वेगस्पन्दनयोरसमवायि

आदि) गत उष्णस्पर्श के प्रति असमवायिकारण होता है। और घटादिगत पाकजरूपादि के प्रति निमित्तकारण भी होता है। इसी प्रकार कारणगतगुरुत्व–कार्यगतगुरुत्व के प्रति–एवं आद्य-पतनरूप क्रिया के प्रति असमवायिकारण होता है–और (प्रतिघात) अभिघाताख्य संयोग के प्रति निमित्तकारण होता है। ऐसे ही कारण का वेग, कार्य के वेग के प्रति असमवायिकारण होता है—और कार्य का वेग कार्य स्पन्द के प्रति असमवायिकारण होता है—तथा अवयवी का वेग दो अवयवियों के परस्पर टकराने से उत्पन्न हुवे अभिघाताख्य संयोग के प्रति निमित्तकारण होता है। इसी प्रकार द्रवत्व द्रवत्व के प्रति असमवायिकाहण होता है -- और स्यन्दनात्मक जलादि क्रिया के प्रति असमवायिकारण होता है। एवं वह जलगत द्रवत्व (संग्रह) आटे (पिष्ट) के संयोग के प्रति निमित्तकारण होता है। एवं भेरी और दंड का संयोगः शब्द के प्रति निमित्तकारण होता है—और भेरी के अन्तवर्त्ती. जो आकाश—उस आकाश संयोग के प्रति असमवायिकारण होता है। ऐसे ही बांस के दो दलों का विभाग वंशदलाकाश विभाग में असमवायिकारण होता है। और शब्द में निमित्त ॥ ९८ ॥

का० अ० आकाश आदि विभु द्रव्यों के शब्द—ज्ञान आदि विशेषगुण—तथा संयोग विभाग—ये दोनों (प्रादेशिक) अव्याप्यवृत्ति (जो कि पहिले कह चुके हैं) होते हैं। ९९ ॥

चक्षुर्ग्राह्यमिति। कारिकार्थ स्पष्ट है।

प्रश्न—रूपत्वजाति में क्या प्रमाण है।

गुरुत्वे कारणैकार्थप्रत्यासत्त्या। पतने कार्यैकार्थप्रत्यासत्त्येति विशेषः। प्रादेशिकः-दैशिकाऽव्याप्यवृत्तिः। तेन कालिकाऽव्याप्यवृत्तिरूपादौ नातिव्याप्तिः। अव्याप्यवृत्ति-गुणत्वव्याप्यजातिमत्वं तदर्थः। तेनेश्वरज्ञानादौ कर्मादौ च नाऽव्याप्त्यतिव्याप्ती ॥९९॥

इदानीमुद्देशक्रमानुसारेण रूपादीनां लक्षणमाह। मूले चक्षुर्ग्राह्यमिति। लक्ष्यतावच्छेदकीभूतरूपत्वजातौ प्रमाणमाह। रूपत्वजातिस्त्विति। प्रत्यक्षसिद्धेति। अनुगतप्रतीतिसिद्धेत्यर्थः। यथाश्रुते परमाणुरूपाणां अनुद्भूतानां अभिभूतानां च रूपाणां प्रत्यक्षाविषयत्वेन तत्साधारण्याभावात। ननुरूपत्वप्रकारकप्रतीतौ मानाभावः,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चक्षुर्ग्राह्यं भवेद्रूपं द्रव्यादेरुपलंभकम् ।
चक्षुषः सहकारि स्याच्छुक्लादिकमनेकधा ॥१००॥

अभिघाते निमित्तम् । द्रवत्वं द्रवत्वस्पन्दनयोरसमवायि संग्रहे निमित्तम्। भेरीदण्डसंयोगः भेर्याकाशसंयोगेऽसमवायी शब्दे निमित्तम् । वंशदलद्वय-विभागः वंशदलाकाशविभागेऽसमवायी शब्दे निमित्तम् । प्रादेशिक: अव्याप्यवृत्तिः ॥९७-९८॥

चक्षुरिति । रूपत्वजातिस्तु प्रत्यक्षसिद्धा । रूपशब्दोल्लेखिनी प्रतीति र्नास्तीति चेन्मास्तु रूपशब्दप्रयोगस्तथापि नीलपीतादिषु अनुगतजाति-विशेषोऽनुभवसिद्ध एव, रूपशब्दाप्रयोगेपि नीलोवर्णः पीतो वर्णः इति वर्ण शब्दोल्लेखिनी प्रतीतिरस्त्येव ।

उत्तर—"रूपंरूपम्" इस अनुगत प्रतीति का नियामक रूपत्वजाति चक्षुःस्वरूपप्रत्यक्ष प्रमाण से चक्षुःसंयुक्तसमवेतसमवायसन्निकर्ष के द्वारा सिद्ध है ।

प्रश्न—'रूपं रूपम्' इत्याकारक रूपशब्दोल्लेखिनी प्रतीति यदि हो—तब इस प्रतीति का नियम होने से रूपत्व जाति की सिद्धि हो सकती है—परन्तु जब कि रूपशब्दोल्लेखिनी प्रतीति ही जिस पुरुष को नहीं होती है—उस पुरुष को "रूपंरूपम्" इस अनुगतप्रतीति की नियामक रूपत्व जाति कैसे सिद्ध होगी ।

उत्तर—यदि रूपम् २ यह अनुगत रूप शब्द प्रयोग नहीं होता है तो न हो-तथापि नील पीत—आदि सातों रूपों में अनुगत जाति विशेष तो अनुभव सिद्ध है—और वही जाति रूपत्व जाति है । दूसरी बात यह है कि नील—पीत—आदि में रूप शब्द का प्रयोग न होने पर भी नीलोवर्णः पीतोवर्णः, यह वर्णशब्दोल्लेखिनी प्रतीति तो होती ही है-सो तब भी रूपत्व जाति की असिद्धि नहीं है—क्योंकि वर्ण और रूप दोनों पर्यायवाचक हैं । ऐसे ही नीलत्व आदि जातियां भी प्रत्यक्ष प्रमाण से सिद्ध हैं पूर्ववत् ।

यद्रूपावच्छिन्ना कारणता तद्रूपं कारणतावच्छेदकमित्यादौ धर्ममात्रे एव रूपशब्द-प्रयोगाच्चेत्याशंकते । रूपशब्दोल्लेखिनीति । प्रतीतिरस्त्येवेति । तथा च तादृश-प्रतीत्या वर्णत्वजातिसिद्धौ तादृशजातिरेव रूपत्वशब्देनापि व्यवह्रियते इतिभावः। अथ नीलोवर्ण इति प्रयोगवत् अकारादयो वर्णाः चत्वारो वर्णा इत्यादिव्यवहारदर्शनेन वर्णशब्दोल्लेखिप्रतीत्यापि नानुगतजातिसिद्धिरिति रूपत्वस्य नीलपीतादिसकल-साधारणैकजातित्वे मानाभावः । नीलत्वपीतत्वादीनामेव नीलपीतादिषु रूपबुद्धि-विषयत्वस्य सुवचत्वात् । न च पाकाजन्यरूपत्वावच्छिन्नं प्रति रूपत्वेनाऽसमवायि-कारणतया कारणतावच्छेदकतयैव तत्सिद्धिरिति वाच्यम् । नीलपीतादिकं प्रति नीलपीतादेर्विशेषतोऽसमवायिकारणत्वस्यावश्यकतया तादृशसामान्यकार्यकारणभावे मानाभावात् । न च पाकनाश्यतावच्छेदकतया लाघवाद्रूपत्वजातिसिद्धिः, नीलादि-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नाशत्वस्य तत्कार्यतावच्छेदकत्वे बहुतरनाश्यनाशकभावापत्तिरिति वाच्यम्। पाकनाश्यतावच्छेदकतया रूपरसगन्धस्पर्शद्रवत्वेषु पञ्चस्वेवैकं वैजात्यं कल्प्यते लाघवान्न तु रूपत्वरसत्वादिकमिति वक्ष्यमाणत्वात्। न च रूपवति रूपान्तरानुत्पत्त्या रूपं प्रति रूपस्य प्रतिबन्धकत्वात्, तादृशप्रतिबध्यप्रतिबन्धकतावच्छेदकतयैव रूपत्वजातिसिद्धिः, नीलत्वपीतत्वादीनां नानात्वादिति वाच्यम्। रूपवति रूपान्तरानुत्पादवत् रसादिमत्यपि रसाद्यन्तरानुत्पादात् रूपरसगन्धस्पर्शेषु चतुर्ष्वेव सजातीयप्रतिवध्यप्रतिबन्धकतावच्छेदकत्वेनैकजातिकल्पनात्। रूपत्वरसत्वावच्छिन्नं प्रति रूपत्वरसत्वादिना प्रत्येकं प्रतिबन्धकत्वे गौरवात्। अत्रप्राहुः। नीलपीतादिषु रूपं रूपमित्यनुगतप्रत्ययादेव तत्सिद्धिः। नीलत्वपीतत्वादीनामननुगततया तादृशप्रत्ययस्य ततोऽसंभवादिति प्राहुः।

नव्यास्तु लौकिकविषयतासंबन्धेन त्वाचसाक्षात्कारं प्रति तादात्म्येन नीलादेः प्रतिबन्धकतया तदवच्छेदकत्वेन रूपत्वसिद्धिः। नीलत्वपीतत्वादीनां तदवच्छेदकत्वे बहुतरप्रतिबध्यप्रतिबन्धकभावापत्तिः। न च त्वाचसाक्षात्कारप्रतिबन्धकतावच्छेदकतया लाघवाद्रूपरसगन्धगुरुत्वस्थितिस्थापकेषु पञ्चसु एव एका जातिः कल्प्यते न तु केवलरूपे इति वाच्यम्। पाकनाश्यतावच्छेदकरूपादिद्रवत्वान्तपञ्चकसाधारणवैजात्येन सजातीयप्रतिवध्यप्रतिबन्धकतावच्छेदकरूपादिस्पर्शान्तचतुष्टयवृत्तिवैजात्येन च सांकर्यापत्तेः। न च त्वाचसाक्षात्कारप्रतिबन्धकतावच्छेदकतया रूपरसगन्धेषु त्रिष्वेवैका जातिः कल्प्यते न तु केवलरूपे इति वाच्यम्। तथा तुल्ययुक्त्या चाक्षुषसाक्षात्कारप्रतिबन्धकतावच्छेदकतयारसगन्धस्पर्शेषु त्रिष्वपि एकजातिकल्पनापत्त्या सांकर्यापत्तेः, रूपस्पर्शयोरेव परस्परं व्यभिचारात्। न च चाक्षुषसाक्षात्कारप्रतिबन्धकतावच्छेदकतया रसनगन्धयोर्द्वयोरेवैका जातिः कल्प्यते। स्पर्शश्च स्पर्शत्वेन पृथगेव चाक्षुषसाक्षात्कारप्रतिबन्धक इति न सांकर्यम्, चाक्षुषप्रतिबन्धकतावच्छेदकरसगन्धसाधारणवैजात्यस्य रूपादित्रयसाधारणत्वाच्च प्रतिबन्धकतावच्छेदकवैजात्यव्याप्यत्वादिति वाच्यम्। विनिगमनाविरहाच्चाक्षुषसाक्षात्कारप्रतिबन्धकतावच्छेदकवैजात्यं रसगन्धस्पर्शेषु त्रिषु एकमेव। त्वाचसाक्षात्कारप्रतिबन्धकतावच्छेदकवैजात्यन्तु चाक्षुषसाक्षात्कारप्रतिबन्धकतावच्छेदकवैजात्यव्याप्यं रसगन्धयोरेकम्, रूपं च रूपत्वेन पृथगेव त्वाचप्रतिबन्धकमिति वैपरीत्यस्यापि सुवचत्वात्। तस्माद्विनिगमकाभावाद्रूपस्पर्शयोः त्वाचत्वचाक्षुषत्वावच्छिन्नं प्रति रूपत्वस्पर्शत्वाभ्यां पृथगेव प्रतिबन्धकत्वम्। रसगन्धयोर्गुरुत्वस्थितिस्थापकयोश्च परस्परविरुद्धवैजात्यद्वयेन चाक्षुषत्वाचोभयं प्रति प्रतिबन्धकताद्वयम्, प्रतिवध्यता च प्रत्येकं त्वाचत्वचाक्षुषत्वाभ्यां चाक्षुषत्वाचोभयमात्रनिष्ठेन प्रतिबन्धकतावच्छेदकतया सिद्धजातिविशेषेण वेत्यन्यदेतदिति प्राहुः।

अन्ये तु द्रव्यादिचाक्षुषजनकतावच्छेदकतया रूपत्वजातिसिद्धिः। नीलपीतत्वादीनामननुगतत्वात्। परमाण्वाद्यतीन्द्रियवृत्तिनीलादिषु च नीलत्वादिना सांकर्यभयादेव रूपत्वाभ्युपगमादित्याहुः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवं नीलत्वादिकमपि प्रत्यक्षसिद्धम्। न चैकैका एव नीलादिव्यक्तय इत्येकव्यक्तिवृत्तित्वान्नीलत्वादिकं न जातिरिति वाच्यम्। नीलो नष्ट रक्त उत्पन्न इत्यादिप्रतीतेर्नीलादेरुत्पादविनाशशालितया नानात्वात्। अन्यथा एकनीलनाशे जगदनीलमापद्येत। न च नीलसमवाय-रक्तसमवाययोरेवोत्पाद-विनाशविषयकोसौ प्रत्यय इति वाच्यम्। प्रतीत्या समवायानुल्लेखात्। न

प्रश्न—नील—पीत—आदि रूप व्यक्ति तो संसार में एक एक ही हैं—अतः उन एक एक व्यक्ति में रहने वाली नीलत्व—पीतत्व आदि जाति कैसे हो सकती हैं।

उत्तर - यह कथन ठीक नहीं—क्योंकि आमपाकनिष्ठित घट में यह प्रतीति होती है कि "नीलो नष्टः रक्त उत्पन्नः"—सो इस प्रतीति से नील आदि रूप व्यक्तियों को उत्पाद—विनाशशली होने से नानात्व सिद्ध है—(अन्यथा) एक ही नीलव्यक्ति यदि संसार में हो तो—उसके नाश होने पर संसार अनील हो जाना चाहिये।

प्रश्न—"नीलोनष्टः-रक्त उत्पन्नः" इन प्रतीति का अर्थ है "नीलसमवायो नष्टः" 'रक्त समवाय उत्पन्नः' अतः उक्तप्रतीति—नील समवाय के नाश को तथा रक्तसमवाय के उत्पाद को ही विषय करती है—(इससे नीलादि व्यक्ति नाना सिद्ध नहीं हुवी—अपितु एक ही सिद्ध हुवीं—इसलिये एकव्यक्तिमात्रवृत्ति नीलत्व होने से नीलत्व को जातित्व का खण्डन हो गया)।

उत्तर—"नीलो नष्टः" रक्त उत्पन्नः" इन प्रतीतियों से समवाय का उल्लेख ही जब कि नहीं हो रहा है तो उक्तप्रतीति को समवायावगाहिनी नहीं मान सकते हैं।

तदसत्। चाक्षुषजनकतावच्छेदकतया तत्कल्पने रूपवद्द्रव्यनिष्ठैकत्वमादाय विनिगमनाविरहापत्तेः।

केचित्तु रूपपदवर्णपदशक्यतावच्छेदकतया लाघवाद्रूपत्वजातिसिद्धिरिति वदन्ति। तच्चिन्त्यम्।

एवं नीलत्वादिकमपीति। आदिना शुक्लत्वादीनां षण्णां संग्रहः। अपिना रूपत्वसमुच्चयः। प्रत्यक्षसिद्धमिति। वदन्तीति शेषः। अनुगतप्रतीतिसिद्धमित्यर्थः। **अन्यथा** नीलादीनामेकव्यक्तित्वे। **एकनीलनाशे।** आश्रयनाशादिना नीलनाशे सति। **आपद्येतेति।** तथाच विषयाभावेन कुत्रापि नीलचाक्षुषं न स्यादितिभावः। **असौ प्रत्यय इति।** नीलो नष्टः रक्त उत्पन्न इत्यादिप्रत्यय इत्यर्थः। इदमपि समवायस्य नानात्वमतेन। **समवायानुल्लेखादिति।** समवायानुपस्थापनादित्यर्थः। **प्रत्यक्षस्य।** स एवायं नील इति प्रत्यक्षस्य। **तज्जातीयविषयकत्वादिति।** पूर्वानुभूतनीलव्यक्ति सजातीयनीलव्यक्तिविषयकत्वादित्यर्थः। **लाघवन्त्विति।** नीलादिव्यक्तेरैक्ये लाघवन्त्वित्यर्थ। **प्रत्यक्षबाधितमिति।** नीलो नष्ट रक्त उत्पन्न इति प्रत्यक्षबाधितमित्यर्थः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स एवायं नील इति प्रत्यक्षबलाल्लाघवाच्चैक्यमिति वाच्यम्। प्रत्यक्षस्य तज्जातीयविषयकत्वात्, सैवेयं गुर्जरीतिवत्। लाघवं तु प्रत्यक्षबाधितम्। अन्यथा घटादीनामप्यैक्यप्रसंगात्। उत्पादविनाशबुद्धेः समवायालंबनेनोपपत्तेरिति। एतेन रसादिकमपि व्याख्यातम्।

चक्षुर्ग्राह्यमिति। चक्षुर्ग्राह्यविशेषगुण इत्यर्थः। एवमग्रेऽपि। द्रव्यादेरिति।

प्रश्न—"स एवायं नीलः" इस प्रतीति के बल से—तथा लाघव से नील आदि को एक ही मान लिया जाय। (इससे नीलत्व पीतत्व आदि को जातित्व का खंडन हो जावेगा)।

उत्तर—"स एवाऽयं नीलः" यह प्रत्यक्ष तज्जातीयविषयक है—अर्थात् यादृशनीलत्व जातिमान् वह नील देखा था—तादृश नीलत्वजातिमान् यह नील है। जैसे यह वही गुड़िया (गुर्जरी) है। और लाघव तो "नीलो नष्टो रक्त उत्पन्नः" इस प्रत्यक्ष प्रतीति से ही बाधित हो रहा है। अन्यथा घट—पट आदि को भी एक ही मान लिया जाय—(इस पर यदि आप यह कहें कि 'घट उत्पन्नः" घटो नष्टः इस प्रतीति से घट जब कि उत्पाद विनाशशाली सिद्ध हो रहा है तो एक कैसे हो सकता है—इस शंका में तुम्हारे की तरह हम भी यही उत्तर दे देंगे कि "घटोनष्टः" का अर्थ है कि "घटसमवायो नष्टः" सो इस प्रकार जैसे घट-पट आदि का ऐक्य प्रत्यक्ष से बाधित है-ऐसे ही नील-पीत आदि भी एक नहीं माने जा सकते हैं—अतः अनेक नील में वृत्ति होने के नाते नीलत्व जाति सिद्ध हो गयी) (एतेन) इस पूर्वोक्त युक्ति से रसादिक भी व्याख्यात हो गये—अर्थात् रसादि भी नीलादि की तरह अनेक हैं अतएव उनमें भी रसत्व-मधुरत्व आदि जातियाँ सिद्ध हो जाती हैं।

अन्यथा—लाघवमात्रेण नीलादिव्यक्तेरैक्याभ्युपगमे। ननु घटो नष्ट इतिबाधकप्रत्ययस्य सत्वान्नैक्यसिद्धिरतआह। उत्पादविनाशबुद्धेरिति। घटो नष्टः घटउत्पन्न इत्यादिप्रतीतेरित्यर्थः। समवायालंबनेति। समवायोत्पत्तिविनाशविषयकत्वस्वीकारेणैवेत्यर्थः। उपपत्तेरिति। प्रमात्वनिर्वाहादित्यर्थः। अतो घटो नष्ट इति वाक्याधीनशाब्दबोधे घटसमवायस्याविशेष्यत्वात् तादृशशब्दोल्लेखिप्रत्यक्षस्यापि समवायविषयकत्वासंभवेन घटध्वंसविषयकत्वस्यैवाऽवश्यमंगीकर्तव्यतया लाघवस्याऽकिंचित्करत्वाद् घटादीनामनेकत्ववत् तुल्ययुक्त्या नीलादीनामप्यनेकत्वमवश्यमंगीकार्यमिति भावः। एतेनेति। नीलस्याऽनेकत्वव्यवस्थापनेनेत्यर्थः। रसादिकमपीति। रसत्वादिकमपीत्यर्थः। आदिना मधुरत्वगन्धत्व सुरभित्व-स्पर्शत्वशीतत्वादीनां संग्रहः। संयोगादावतिव्याप्तिमाशंक्याह। चक्षुर्ग्राह्य मितीति। अत्र विशेषपदं न परिभाषिकविशेषगुणपरम्। किन्तु विलक्षणपरम्। वैलक्षण्यं च त्वगग्राह्यत्वम्। अथवा चक्षुर्ग्राह्यमितिसावधारणम्। तथाच त्वगिन्द्रियजन्यप्रत्यक्षीयलौकिकविषयतानवच्छेदकत्वे सति चाक्षुषप्रत्यक्षीयलौकिकविषयतावच्छेदको यो गुणविभाजको धर्मस्तद्वत्वं रूपस्य लक्षणम्। एवमग्रेपीति। स्पर्शलक्षणेपीत्यर्थः। उपलब्धि-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उपलम्भकं-उपलब्धिकारणम्। इदमेव विवृणोति। चक्षुष इति। द्रव्यगुणकर्म-सामान्यानां चाक्षुषप्रत्यक्षं प्रति उद्भूतरूपं कारणम्। शुक्लादिकमनेकधेति। तच्च रूपं शुक्लनीलपीतरक्तकर्बुरादिभेदादनेकप्रकारकं भवति।

ननु कथं कर्बुरमतिरिक्तं रूपं भवति। इत्थम्। नीलपीताद्यवयवा-रब्धोऽवयवी न तावन्नीरूपोऽप्रत्यक्षत्वप्रसंगात्। नापि व्याप्यवृत्तिनीलादिक-

रूप द्रव्यादि का उपलंभक (प्रत्यक्ष का कारण) है—अर्थात् जिस द्रव्य में रूप रहेगा-उसी द्रव्य का चाक्षुष प्रत्यक्ष हो सकेगा—वही कहा है "चक्षुषः सहकारी स्यात्" इत्यादि। कि द्रव्य-गुण-कर्म-सामान्य—इन सबके चाक्षुषप्रत्यक्ष के प्रति उद्भूत रूप कारण होता है।

और वह रूप शुक्ल-नील पीत-रक्त-हरित—कपिश (बन्दर का रूप) कर्बुर—आदि भेद से सात प्रकार का है।

प्रश्न—कर्बुर (चित्र) रूप अतिरिक्त क्यों माना जाता है।

उत्तर—'इत्थम्' इसलिये अतिरिक्त माना जाता है कि जिस अवयवी का एक अवयव नील है—दूसरा पीत है—तीसरा अन्य रूपवान् है—उन नील-पीत आदि अनेक अवयवों से आरब्ध जो अवयवी—उसमें कौन-सा रूप मानना चाहिये—क्योंकि उस अवयवी को सर्वथा नीरूप तो कह नहीं सकते—कारण कि नीरूप मानने पर प्रत्यक्ष नहीं हो सकेगा। अतः यदि

कारणमिति। चाक्षुषप्रत्यक्षे सहकारिकारणमित्यर्थः। इदमेव। चाक्षुषकारणत्वमेव। विवृणोति। स्पष्टं बोधयति। उद्भूतरूपमिति। रूपमात्रस्य हेतुत्वे चक्षुरादेश्चाक्षुषा-पत्तेरतउद्भूतत्वविशेषणम्। कारणमिति। कार्यकारणभावस्तु "गृह्णाति चक्षुः संबन्धादालोकोद्भूतरूपयोः" इतिकारिकाव्याख्यानावसरे प्रपञ्चितः। अनेकधेति-मूलाद् ज्ञायते नवीनमते रूपं षड्विधम्, प्राचीनमते सप्तविधम्। अन्यथा सप्तधे-त्येव ब्रूयात्।

अथ अव्याप्यवृत्तिनीलादिसमुदाय एव चित्ररूपमिति प्रतीतिविषयः। नच नीलादीनां व्याप्यवृत्तित्वे का हानिरिति वाच्यम्। नीलादीनामव्याप्यवृत्तित्वं विना तत्समुदायस्य एकत्र वृत्तित्वाऽसंभवात्। एवं च तादृशनीलादिसमुदायविषयकत्वा-ङ्गीकारेणैव चित्ररूपमिति प्रतीत्युपपत्तेरतिरिक्तचित्ररूपाङ्गीकारो निष्प्रामाणिक इत्याशयेनाशंकते। नन्विति। विप्रतिपत्तिस्तु रूपत्वं नीलादिषड्न्यतमत्वव्याप्यं नवेत्याकारिका बोध्या। इत्थमिति। वक्ष्यमाणप्रकारेणाऽतिरिक्तं भवतीत्यर्थः। प्रकारमाह। नीलपीतादिति। नीलपीतरक्ततन्त्वाद्यारब्धपटादिरित्यर्थः। अप्रत्यक्षत्व-प्रसंगादिति। द्रव्यवृत्तिलौकिकविषयतासंबन्धेन चाक्षुषं प्रति समवायेनोद्भूतरूपस्य हेतुतया तत्र कारणाभावादिति भावः। नच स्वाश्रयसमवेतत्वसंबन्धेन रूपं प्रयोजक-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मुत्पद्यते, पीतावच्छेदेनापि नीलोपलब्धिप्रसंगात् । नापि अव्याप्यवृत्तिनीलादिकमुत्पद्यते, व्याप्यवृत्तिजातीयगुणानामव्याप्यवृत्तित्वे विरोधात् ।

उस अवयवी में व्याप्यवृत्ति (सर्वावयवावच्छेदेन) नील-पीत–आदि अनेक रूप उत्पन्न होते हैं–(अर्थात् उस अवयवी में नील पीत-शुक्ल आदि जितने भी रूप हैं–उन रूपों में से प्रत्येक रूप उस अवयवी के सब भागों में व्याप्त होकर वर्तमान है–ऐसा मानते हैं तो) यह भी कहना ठीक नहीं है–क्योंकि पीतावच्छेदेन नील की उपलब्धि होने लगेगी–(अर्थात् उस अवयवी के जिस भाग में पीतरूप है--उस पीतभागावच्छेदेन अर्थात् पीतभाग में (अवच्छेदेन–यह सप्तमी का अर्थ है) नीलरूप की उपलब्धि होनी चाहिये— क्योंकि तुम तो व्याप्यवृत्ति मानते हो सो जहाँ पीत है वहाँ भी तुम्हारे मत से नील है ही है—एवं जहाँ नील है—उस नील भाग में पीतरूप की उपलब्धि होनी चाहिये । अतः व्याप्यवृत्ति नीलादि उस अवयवी में उत्पन्न होते हैं — यह नहीं कहा जा सकता है] और यदि नील-पीत आदि अनेक अवयवों से आरब्ध उस अवयवी के किसी भाग में नील--किसी में पीत--इस क्रम से अव्याप्यवृत्ति अर्थात् उसमें व्याप्त होकर न रहने वाले नीलादि की उत्पत्ति मानते हैं तो वह ठीक नहीं—क्योंकि नीलादि वस्तुतः व्याप्यवृत्ति हैं—अब यदि उन्हें अव्याप्यवृत्ति माना जायगा तो विरोध हो

मिति वाच्यम् । गौरवात् । स्वाश्रयसमवेतत्वस्य स्वाश्रयसमवेतसमवेतत्त्वस्य वा प्रयोजकत्वमित्यत्र विनिगमकाभावात्कार्यकारणभावद्वयापाताच्च । तत्रसाक्षात्संबन्धावगाहित्वस्य प्रमात्वस्य चानुभवसिद्धत्वाच्च । नच व्याप्यवृत्तीनि एव तत्र नीलपीतादिनानारूपाणि अवयवति उत्पद्यन्ते इति वाच्यम् । नीलावयवावच्छेदेन चक्षुः संयोगदशायामपि पीताद्युपलंभः, पीतावयवावच्छेदेन चक्षुःसंयोगदशायां नीलाद्युपलंभः स्यात्, व्याप्यवृत्तिजात्यादितुल्यत्वादित्याह । **नापीति** । **व्याप्यवृत्तीति** । दैशिकव्याप्यवृतीत्यर्थः । कालिकाऽव्याप्यवृत्तित्वं तु अस्यास्येवेति भावः । तत्वं च यावदवयवावच्छेद्यत्वम् । **पीतावच्छेदेनापीति** । यावदवयवावच्छेदेनेत्यर्थः । **नीलोपलब्धिप्रसंगादिति** । नीलाद्येकैकस्यैवोपलब्धिप्रसंगादित्यर्थः तथाच नीलादेर्व्याप्यवृत्तितया नानारूपवदवयवारब्धे पटे एकरूपव्यक्तेरेवोत्पत्तिसंभवेन एकरूपस्यैव प्रत्यक्षं स्यान्नान्यरूपस्य, परस्परविरोधे तु कस्यापि प्रत्यक्षंनस्यादिति भावः ।

नच तथापि अव्याप्यवृत्तीनि एव नीलपीतादिनानारूपाणि तत्रावयविन्युत्पद्यन्ते, अव्याप्यवृत्तित्वोपगमाच्च न नीलावयवावच्छेदेन चक्षुः संनिषंदशायां पीताद्युपलंभः, पीतावयवावच्छेदेन चक्षुः सन्निकर्षदशायां च न नीलाद्युपलंभः । चक्षुःसंयोगावच्छेदकावच्छिन्नसमवायसंबन्धावच्छिन्नाधारतालक्षणसन्निकर्षस्य निरूपकतासंबन्धेन विषयनिष्ठतया द्रव्यसमवेतचाक्षुषे हेतुत्वात् । अन्यथा मूलावच्छेदेन वृक्षे चक्षुःसंयोगादपिअग्रावच्छिन्नसंयोगकर्मादिचाक्षुषापत्तेरिति वाच्यम् । एवमपि परमाणौ नीलादेर्व्याप्यवृत्तिया पटादिसमवेतनीलादेः तत्सजातीयतया न तेषामव्याप्यवृत्तित्वं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तस्मान्नानाजातीयरूपैरवयविनि विजातीयं चित्ररूपमारभ्यते । अत एव एकं चित्रमित्यनुभवोपि, नानारूपकल्पने गौरवात् ।

जायेगा। इसलिये नानाजातीयरूप वाले नाना अवयवों से उत्पन्न अवयवी में एक विजातीय 'चित्र' रूप ही मानना होगा—(और वह चित्ररूप व्याप्यवृत्ति है) इसीलिये "एकं चित्रं रूपम्" यह अनुभव भी होता है—पूर्वोक्तरीत्या नानारूप की कल्पना करना गौरव है।

कल्पयितुं शक्यम्, विरोधादित्याह। **नापीति** । **अव्याप्यवृत्तिनीलादिकमिति** । दैशिकाऽव्याप्यवृत्तिनीलादिकमित्यर्थः। तथाच एतत्प्रत्यक्षेऽवयवेषु यावन्ति रूपाणि तत्तद्रूपाणां अवयविनि विरोधाभावेनोत्पत्तिसंभवान्न प्रत्यक्षत्वानुपपत्तिरिति भावः। **व्याप्यवृत्तिजातीयेति** । व्याप्यवृत्तिजातिश्च सविषयावृत्तिर्बोध्या, तेन व्याप्यवृत्तीश्वरज्ञानजातीयस्याऽस्मदादिज्ञानस्याव्याप्यवृत्तित्वेपि न क्षतिः। **विरोधादिति** । एकत्र वर्तमानत्वाऽसंभवादित्यर्थः। **तस्मादिति** । पीतादिनामव्याप्यवृत्तित्वाऽसंभवादित्यर्थः। **नानाजातीयरूपैरिति** । अवयवसमवेतनीलादिरूपैरित्यर्थः। **विजातीयमिति**। नीलादिषडन्यतमवृत्तिरूपविभाजकजातिभिन्नरूपविभाजकजात्याश्रयमित्यर्थः। **चित्ररूपमिति** । व्याप्यवृत्तीत्यादिः। **अतएवेति** । अतिरिक्तरूपस्वीकारादेवेत्यर्थः। **एकमिति** । अतिरिक्तरूपानंगीकारे नीलादीनां बहुत्वात् एकत्वप्रकारकानुभवो न स्यादिति भावः। **अनुभवोपीति** । उपपद्यते इति शेषः।

तथाच चित्रनामकं विलक्षणरूपं स्वीकार्यम्, नीलमात्रारब्धेऽवयविनि नीलः पटः नीलंरूपमिति प्रतीतिवन्नीलपीतादिविजातीयनानारूपवदवयवारब्धेऽवयविन्यपि चित्रः पटः, चित्रं रूपमित्यादिप्रतीतेः सर्वसिद्धत्वात्। अथ समानाधिकरणसमानकालीननानारूपमेव तद्विषयः, एकं चित्रमितिप्रतीतिरपि एकोधान्यराशिरितिवद्विलक्षणसमूहत्वविषयकेत्यत आह। **नानारूपकल्पनेगौरवादिति** । अनेकेषु नानारूपेषु चित्रमितिप्रतीतिविषयतास्वीकारे गौरवादित्यर्थः। नीलपीतादिविजातीयनानारूपकल्पनामपेक्ष्य एकचित्रकल्पनाया एव लघुत्वात्। न च चित्रपटादावपि नीलपटः इत्यादिप्रतीतेस्तत्रापि तत्र नीलपीतादिनानारूपकल्पनमावश्यकमिति वाच्यम्। स्वाश्रयसमवेतत्वादिपरंपरयाऽवयवनीलादिविषयकत्वेनैव तादृशप्रतीत्युपपत्तेः साक्षात्संबन्धावगाहिप्रतीतेश्चाऽनन्तरूपकल्पनागौरवात्मकबाधकबलेनाऽप्रमात्वात्। एतेन लोहितइत्यादिस्मृतिरपि व्याख्याता, तस्या अपि परंपरयाऽवयवनीलादिविषयकत्वात्। न चैवंतत्र लाघवादवयवी नीरूप एवाभ्युपेयताम्, चित्रप्रतीतेश्च परंपरयाऽवयववृत्तिविजातीयनानारूपविषयकत्वेनैवोपपत्तेरिति वाच्यम्। तेषामरूपत्वेऽप्रत्यक्षत्वापत्तेः, परंपरया रूपवत्त्वन्तु न प्रत्यक्षत्वप्रयोजकम्, गौरवात्। परंपराया अननुगमाच्च। न च तत्रापि चित्ररूपस्थलेऽवयवनीलपीतादिसत्वेन सामग्रीसत्वादवयविनि नीलपीतादिकं दुर्वारमिति वाच्यम्। वक्ष्यमाणक्रमेण प्रतिवध्यप्रतिबन्धकभावकल्पना-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इत्थं च नीलादीनां पीताद्यारम्भे प्रतिबन्धकत्वकल्पनादवयविनि न पीताद्युत्पत्तिः।

प्रश्न—चित्ररूप स्वीकार करने पर उक्त अवयवी के नीलभाग में पीतरूप की उपलब्धि क्यों नहीं होती है।

उत्तर—चित्ररूप स्वीकार करने पर नीलावच्छेदेन अर्थात् नीलभाग में पीतरूप की उपलब्धि इसलिये नहीं होती है कि उस उक्त अवयवी के नीलभाग में यदि पीत की उत्पत्ति हो तब पीतरूप की उपलब्धि हो सकती है—परन्तु नीलावच्छेदेन पीत के आरम्भ (उत्पत्ति) में नील ही प्रतिबन्धक हो जायेगा—अतः उस अवयवी में नीलावच्छेदेन पीतादि की उत्पत्ति नहीं होती है, (एतेन) चित्ररूप की व्याख्या के अनुसार चित्रस्पर्श की व्याख्या भी जानना उचित है—अर्थात् चित्ररूपवत् चित्रस्पर्श अवश्य मानना चाहिये—अन्यथा चित्ररूपस्थलीय

नयैव नीलपीताद्युत्पादवारणसंभवात्। न चैवं बहुतरप्रतिवध्यप्रतिबन्धकभावकल्पने गौरवमिति वाच्यम्। अनन्तविजातीयनानारूपतत्प्रागभाव-तद्ध्वंस-तत्कार्यकारणभावकल्पनामपेक्ष्य कतिपयप्रतिवध्यप्रतिबन्धकभावादिकल्पनाया एव लघुत्वात्।

ननुचित्ररूपाधिकरणे घटादौ स्वाश्रयसमवेतत्वसंबन्धेन कपालनीलादीनां कारणानां सत्वात्कथं तत्र न नीलाद्युत्पत्तिरित्यत आह। इत्थंचेति। उक्तलाघवेन चित्ररूपसिद्धौ चेत्यर्थः। पीताद्यारम्भे इति। पीतत्वावच्छिन्ने इत्यर्थः। प्रतिबन्धकत्वकल्पनादिति। समवायेन नीलं प्रति स्वसमवायिसमवेतत्वसंबन्धेन नीलान्यरूपत्वेन, पीतरूपं प्रति पीतान्यरूपत्वेन प्रतिबन्धकत्वकल्पनादित्यर्थः। इदमत्र तत्वम्। समवायेन नीलादिकं प्रति स्वसमवायिसमवेतत्वसंबन्धेन नीलादेः कारणत्वस्य सर्वमतसिद्धतया, चित्ररूपाङ्गीकर्तृतदनङ्गीकर्तृउभयमते नानारूपवदवयवारब्धावयविनि घटे स्वसमवायिसमवेतत्वसंबन्धेन कपालनीलादीनां सत्वात्पीतावच्छेदेन नीलाद्युत्पत्तिवारणाय समवायेन नीलं प्रति स्वसमवायिसमवेतत्वसम्बन्धेन नीलान्यरूपत्वेन प्रतिबन्धकत्वस्यावश्यकतया उभयत्र साम्येपि चित्रमिति प्रतीतिविषयताया अनेकेषु रूपेषु कल्पनागौरवं परमतिरिच्यते इति।

न च तथापि तत्र नीलाद्युत्पत्तिवारणाय नीलजनीलादिकं प्रति स्वाश्रयसमवेतत्वसंबन्धेनावयविनिष्ठनीलाद्यभाव एव प्रतिबन्धकोस्तु नीलान्यरूपत्वापेक्षया लघुत्वादिति वाच्यम्। तथासति यत्र पीतावयवद्वयारब्धेऽवयविनि यत्किंचिदवयवावच्छेदेन पाकात्तदवयवावयविनोः पीतनाशः ततो द्वितीयक्षणे पाकात्तदवयवे नीलोत्पत्त्याऽवस्थितावयवपीतसहकारेण तृतीयक्षणेऽवयविनि चित्रोत्पत्तिः-तत्र द्वितीयक्षणे पाकात्तदवयविनि नीलोत्पत्तिप्रसंगात्, अवयवे रूपजनकाग्निसंयोगदशायां अवयविन्यपि तादृशाग्निसंयोगनियमात्, अवयवगतनीलाद्यभावस्य नीलजनीलादिकं प्रत्येव प्रतिबन्धकत्वात्। न च सामान्यतोनीलत्वपीतत्वाद्यवच्छिन्नं प्रत्येवावयवनिष्ठनीलपीतेतररूपादेः प्रतिबन्धकत्वाभ्युपगमेपि तत्र द्वितीयक्षणेऽवयवपीतादवयविनि पीतोत्पत्तिर्दुर्वारा, पीतेतररूपस्य प्रतिबन्धकस्यावयवे पूर्वकाले

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विरहादिति वाच्यम्। नीलत्वपीतत्वाद्यवच्छिन्नं प्रति अवयवनीलपीतेतररूपादेः प्रतिबन्धकत्वस्य कार्यसहभावेनाभ्युपगमादेव तद्वारणसंभवात्।

नव्यास्तु चित्रोत्पत्तिसमये नीलाद्युत्पत्तिवारणाय पाकजव्यावृत्तनीलत्वादिव्याप्यजातिविशेषावच्छिन्नं प्रति नीलाद्यभाव एव स्वाश्रयसमवेतत्वसंबन्धेन प्रतिबन्धको वाच्यः, न तु नीलादिकं प्रति नीलेतररूपादिः, नीलाभावत्वादिकमपेक्ष्य नीलेतररूपत्वादेर्गुरुत्वात्। न चोक्तदोषः। रूपनाशकविलक्षणाग्निसंयोगस्य फलबलकल्प्यतया तत्रावयवेऽग्निसंयोगोत्पत्तिद्वितीयक्षणे एवावयविनि तादृशाग्निसंयोगकल्पनादेव द्वितीयक्षणेऽवयविनि पाकान्नीलोत्पत्त्यसंभवात्, रूपवति रूपान्तरानुत्पत्तेः। न हि अवयवे रूपनाशकाऽग्निसंयोगदशायामवयविन्यवश्यं तादृशाग्निसंयोगो, मानाभावात्। न चैवं द्वितीयक्षणे चित्रोत्पत्तिरेव कथं स्यात्, द्वितीयक्षणेऽवियविनि रूपान्तरसत्वादिति वाच्यम्। चतुर्थक्षणे एव तत्र चित्रोत्पादात्, क्षणैकविलंबस्य चाऽदोषत्वात्।

न चैवमपि यत्र नीलपीतरक्तत्रितयारब्धे चित्रावयविनि नीलावयवावच्छेदेनाग्निसंयोगात्तदवयववृत्तिनीलनाशसमकालं चित्रनाशः ततस्तदवयवे पाकाच्छुक्लोत्पत्त्या शुक्लपीतरक्तत्रितयजन्यचित्रोत्पत्तिः तत्र पाकादवयवे शुक्लोत्पत्तिसमयेऽवयविनि पीतरक्तोभयजन्यचित्रोत्पत्तिर्दुर्वारा, नीलाद्यभावस्य नीलादिकं प्रत्येव प्रतिबन्धकत्वादिति वाच्यम्। सामान्यतश्चित्रत्वावच्छिन्नं प्रति स्वाश्रयसमवेतत्वसंबन्धेन रूपाद्यभावस्य, समवायसंबन्धेन विनश्यदवस्थरूपनाशकविलक्षणाग्निसंयोगस्य वा प्रतिबन्धकत्वम्, अन्यथा त्वन्मते पि अप्रतीकारात्। अत एव चित्रत्वजातिरपि प्रामाणिकी, रूपाभावादेः प्रतिबध्यतावच्छेदकतयैव तत्सिद्धेरिति प्राहुः।

अथाऽतिरिक्तचित्ररूपाभ्युपगन्तृनयेऽवयवनिष्ठ नीलपीतादिविजातीयनानारूपाणां केन रूपेण हेतुत्वम्, न तावद्रूपत्वेन चित्रत्वेन, नीलपीताद्येकतरमात्रारब्धेपि चित्रोत्पत्त्यापत्तेः। न च प्रागभावविरहात्तत्र तदनुत्पाद इति वाच्यम्। एकावयवे पाकेन विजातीयरूपोत्पत्त्या यत्रावयविनि चित्रोत्पत्तिर्भविता तत्र तस्यापि सत्वात्। पिठरपाकस्य व्यवस्थापनीयत्वात्, प्रागभावस्य तत्कारणत्वस्य च निराकर्त्तव्यत्वाच्च। नापि विजातीयनानारूपत्वेन, सर्वस्यैव रूपस्य रूपान्तरविजातीयत्वादिति चेन्न। समवायेन चित्रत्वावच्छिन्नं प्रति स्वाश्रयसमवेतत्वसंबन्धेन रूपविशिष्टरूपत्वेनैव हेतुत्वात्। रूपे रूपवै०स्वविजातीयत्व–स्वसमनियतत्वोभयसं०। तेन नीलपीताद्येकतरमात्रारब्धे अवयविनि न चित्रोत्पत्तिः। समनियतत्वघटकव्याप्यत्वव्यापकत्वे स्वसमवायिसमवेतत्वसंबन्धेन बोध्ये। स्वविजातीयत्वं च चित्रत्वातिरिक्तस्ववृत्तिजातिभिन्नजातिमत्वम्। तेन चित्रमात्रान्न चित्रोत्पादाऽसंभवः। शुक्लतरशुक्लतमाभ्यामपि चित्रोत्पादः, यदि च ताभ्यां विलक्षणशुक्लोत्पाद एव तदा तु रूपत्वसाक्षाद्व्याप्यत्वेन चरमजातिर्विशेष्येति ध्येयम्।

अन्येतु चित्रत्वावच्छिन्नं प्रति रूपत्वेनैव हेतुत्वम्। नचैवं नीलमात्रादपि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एतेन स्पर्शोपि व्याख्यातः। रसादिकमपि नाव्याप्यवृत्ति, किन्तु नानाजातीयरसवदवयवैरारब्धेऽवयविनि रसाभावेपि न क्षतिः। तत्र रसग्रहाऽवयवरस एव गृह्यते, रसनेन्द्रियादीनां द्रव्यग्रहे सामर्थ्याभावादवयविनो नीरसत्वेपि क्षतेरभावात्।

दोष वहां भी हो जायेंगे। इसी प्रकार रसादिक भी अव्याप्यवृत्ति नहीं हैं—किन्तु मधुर आदि नाना रस वाले अवयवों से आरब्ध (उत्पन्न) अवयवी में रस न भी मानें तो कोई हानि नहीं है। उस अवयवी में रसनेन्द्रिय से अवयव के रस का ही प्रत्यक्ष होता है—रसन आदि इन्द्रियों की (चक्षुः-त्वक् को छोड़कर) द्रव्यप्रत्यक्ष करने की सामर्थ्य नहीं है—इसलिये यहाँ अवयवी को नीरस मानने में भी कोई हानि नहीं है। (अभिप्राय यह है कि रूपस्थल में तो नानारूप

चित्रोत्पत्तिप्रसंग इति वाच्यम्। चित्रत्वावच्छिन्नं प्रति चित्रेतररूपत्वावच्छिन्नाभावस्यापि कार्यसहभावेन हेतुत्वादिति वदन्ति।

नव्यास्तु चित्रत्वावच्छिन्नं प्रति रूपत्वेनैव हेतुत्वम्। नचैवं नीलमात्रादपि चित्रोत्पादप्रसंग इति वाच्यम्। नीलपीतमात्रारब्धे नीलरक्तमात्रारब्धे नीलरक्तपीतत्रितयमात्रारब्धे परस्परविलक्षणतत्तच्चित्रविशेषं प्रति नीलत्वपीतत्वाभ्यां नीलत्वरक्तत्वाभ्यां नीलत्वरक्तत्वपीतत्वादिभिर्हेतुतावश्यकत्वेन तत्तद्विशेषसामग्रीविरहादेव तत्र चित्रानुत्पादात्, विशेषसामग्रीसहिताया एव सामान्यसामग्र्या कार्योपधायकत्वादित्याहुः।

एतेनेति। चित्ररूपनिरूपणेनेत्यर्थः। स्पर्शोपीति। अपिना रूपसमुच्चयः। यथा रूपं व्याख्यातं तथा स्पर्शोपि व्याख्यातप्राय इत्यर्थः। प्राचीनमते स्पर्शस्यापि व्याप्यवृत्तितया सुकुमारकठिनादि नानास्पर्शवदवयवारब्धेऽवयविनि एकस्पर्शव्यक्तेरेवोत्पत्तिसंभवेन एकस्पर्शस्यैव प्रत्यक्षं स्यान्नान्यस्पर्शस्य, परस्परविरोधे तु कस्यापि प्रत्यक्षं न स्यात्, अतो लाघवाच्च चित्रैकस्पर्शोऽभ्युपयते नानास्पर्शाभ्युपगमेऽनन्तव्यक्तिकल्पनापत्तेः, निःस्पर्शत्वाभ्युपगमे च स्पार्शनानुपपत्तेरिति भावः। रसादिकमपीति। प्राचीनमते इत्यादिः। आदिना गन्धपरिग्रहः। अपिना स्पर्शसमुच्चयः। तथाच यथा स्पर्शो न दैशिकाऽव्याप्यवृत्तिः, तथा रसो गन्धश्च न दैशिकाव्याप्यवृत्तिरिति भावः। ननु तर्हि मधुरादिनानारसवदवयवारब्धावयविनो नीरसत्वापत्तिरित्यत्रेष्टापत्तिमाह। किंत्विति। न क्षतिरिति। पृथिव्यादेररूपत्वेऽस्पर्शत्वेऽप्रत्यक्षत्वरूपो यो दोषः स अवयविनो नीरसत्वे नास्तीत्यर्थः। तथाच गन्धरसौ चित्रौ न स्वीक्रियेते, सुरभ्यसुरभ्यारब्धे, तिक्तमधुराद्यारब्धे च लाघवान्निर्गन्धत्वस्य नीरसत्वस्यैव चोपगमात्। घ्राणरसनयोर्द्रव्याऽग्राहकत्वादप्रत्यक्षतापत्तिरूपस्य दोषस्य तत्राऽभावात्। तिक्तमधुराद्यारब्धे तिक्तादिप्रतीतेः, षड्रसाहरीतकीत्यादिप्रतीतेश्च परंपरयैवोपपत्तेः। नच तिक्तमधुराद्यारब्धे सुरभ्यसुरभ्यारब्धे च

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वाले अवयवों से उत्पन्न अवयवी में अगत्या चित्ररूप मानना पड़ता है—अन्यथा अप्रत्यक्ष की आपत्ति हो रही है—ऐसे ही चित्रस्पर्श न मानने पर भी अप्रत्यक्ष की आपत्ति लग जायगी—अतः चित्रस्पर्श अवश्य ही मानना चाहिये—परन्तु चित्ररस न मानने पर क्या हानि है—हानि यही कह सकते हैं कि नानारस वाले अवयवों से आरब्ध अवयवी का प्रत्यक्ष नहीं होगा—इसमें इष्टापत्ति हम कर लेंगे अतः चित्ररस मानने की कोई आवश्यकता नहीं है)।

सामग्रीसत्वाद् गन्धरसोत्पत्तिर्दुर्वारेति वाच्यम्। अनन्तरसगन्धकल्पनामपेक्ष्य लाघवेन तिक्तजन्यतिक्तादिकं प्रति स्वाश्रयसमवेतत्वसंबन्धेन तिक्ताद्यभावस्य, सुरभिजन्यसुरभ्यादिकं प्रति स्वाश्रयसमवेतत्वसंबन्धेन सुरभ्याद्यभावस्य च प्रतिबन्धकत्वकल्पनात्, सामग्र्या एवाऽसिद्धेः। वस्तुतस्तु जन्यरसत्वावच्छिन्नं प्रति रसत्वावच्छिन्नं प्रति वा रसविशिष्टरसत्वेन, गन्धत्वावच्छिन्नं प्रति च गन्धविशिष्ट गन्धत्वेन प्रतिबन्धकत्वम्। वै० पूर्ववत्।

नचैवं रूपेण सामान्यतः प्रतिबध्यप्रतिबन्धकभावे विजातीयनानारसवदारब्ध-नीरसावयवसरसावयवाभ्यामारब्धेऽवयविन्यपिरसोत्पत्तिप्रसंग इति वाच्यम्। रसजन्यरसत्वाद्यवच्छिन्नं प्रति स्वाश्रयसमवेतत्वसंबन्धेन रसादिसामान्याभावस्यापि पृथक् प्रतिबन्धकत्वात्। रसजन्यरसत्वं च जन्यतासंबन्धेन रसवद्रसत्वम्। तेन जन्यताया अननुगतत्वेपि न क्षतिरित्येतत्सर्वं मनसि निधायाह। तत्रेति। नानारसवदवयवारब्धनीरसावयविनि इत्यर्थः। गृह्यत इति। अवयवरस एव रसनेन्द्रियजन्यप्रत्यक्षीयलौकिकविषयतावानित्यर्थः। रसनेन्द्रियादीनामिति। आदिना घ्राणश्रोत्रयोः परिग्रहः। सामर्थ्याभावादिति। कारणत्वाभावादित्यर्थः। अवयविन इति। नानारसवदवयवारब्धावयविन इत्यर्थः। क्षतेरभावादिति। द्रव्यरासनानुपपत्तिरूपदोषाभावादित्यर्थः। इदमुपलक्षणम्। सुरभ्यसुरभ्यवयवारब्धावयविनो निर्गन्धत्वेपि न क्षतिः। इदमत्रविभावनीयं चित्ररस-चित्रगन्धास्वीकारे सुरभ्यसुरभि द्व्यणुकत्रया रब्धे त्रसरेणौ रस-गन्धयोर्भानं न स्यात्। द्व्यणुकरस-गन्धयोरयोग्यत्वादिति। घ्राणेन्द्रियेणाऽवयवगन्धस्यैव ग्रहणात्। घ्राणेन्द्रियस्य द्रव्यग्रहे सामर्थ्याभावाच्चेति।

अत्रेदं चिन्त्यते—नीलपीतादिविजातीयनानारूपवदवयवारब्धेऽवयविनि नील-पीतादिप्रत्ययस्यानुभवसिद्धत्वात्तत्र नीलपीतादेरावश्यकत्वेऽतिरिक्तचित्ररूपकल्पनाया-मुक्तक्रमेण तस्याऽतिरिक्तकार्यकारणभावकल्पनायां गौरवान्मानाभावाच्च। चित्र-प्रत्ययस्य नीलपीतादिसमानाधिकरणसमानकालीनविजातीयनानारूपेणैवोपपत्तेः। नच नीलादिप्रतीतिः परंपरासंबन्धावगाहिनीति वाच्यम्। तत्र साक्षात्संबन्धावगाहित्वस्य प्रमात्वस्य चानुभवसिद्धत्वात्, अन्यथा लाघवान्नीलादेः त्रसरेणुपर्यन्तमात्रगतत्वप्रसंगात्, अन्यत्र तत्प्रतीतेः परंपरयैवोपपत्तेः। नचाऽन्येषां नीरूपत्वे प्रत्यक्षत्वापत्तिरिति वाच्यम्। अनुद्भूतत्वाभावकूटवद्रूपत्वेन प्रत्यक्षकारणत्वकल्पना-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मपेक्ष्यलाघवादुद्भूतैकत्वत्वेनैव प्रत्यक्षकारणतया नीरूपत्वेपि प्रत्यक्षतासंभवात् । एकत्वनिष्ठोद्भूतत्वं च एकत्वत्वव्याप्यजातिविशेषः । नच ममापि अनुद्भूतत्वाभावकूटवद्रूपत्वेन न हेतुत्वमपि तु रूपत्वेनैव, अनुद्भूतरूपे मानाभावादिति वाच्यम् । तथापि च चतुरणुकाद्यन्त्यावयविपर्यन्तेषु अनन्तरूपव्यक्तिकल्पनामपेक्ष्य लाघवादेकत्वनिष्ठोद्भूतत्वाख्यजातिविशेषस्यैकस्यैव प्रत्यक्षजनकतावच्छेदकतया कल्पयितुमुचितत्वात् । नचावयवनीलादेरवयविनीलादिकारणतया सामग्रीबलेनाऽन्यत्रापि तत्स्यादिति वाच्यम् । जन्यरूपत्वावच्छिन्नं प्रति रूपत्वावच्छिन्नं प्रति वा स्वाश्रयसमवेतत्वसंबन्धेन महत्वस्य प्रतिबन्धकतायाः सुवचत्वेनाऽन्यत्र सामग्र्या एवाऽसिद्धेः । अनन्तरूपव्यक्तिकल्पनामपेक्ष्य प्रतिबध्यप्रतिबन्धकभावैककल्पनाया एव लघुत्वात् । तस्मादन्यत्रापि साक्षात्संबन्धेन नीलादिमत्वप्रतीते यथार्थत्वस्यानुभवसिद्धतया साक्षात्संबन्धेन नीलादिमत्वमुपेयम् । तच्च प्रकृतेपि । नचैवं चित्रः पटः चित्रं रूपमित्यादिप्रतीतेरतिरिक्तचित्रावगाहित्वमप्यनुभवसिद्धमिति वाच्यम् । तदसिद्धे । अन्यथैवं प्रतिबन्द्या विषयव्यवस्था क्वापि न स्यात् । अत एव चित्रमपि नातिरिक्तं रूपमिति गुणदीधितौ पदार्थखण्डने च भट्टाचार्याः । एतेन तिक्तमधुराद्यारब्धे सुरभ्यसुरभ्यारब्धे चावयविनि चित्ररूपवादिनां लाघवान्नीरसत्वनिर्गन्धत्वाद्युपगमोपि प्रत्याख्यातः । तत्रापि साक्षात्संबन्धेन तिक्तादिप्रत्ययस्य सौरभादिप्रत्ययस्य चाऽबाधितत्वेन सर्वानुभवसिद्धत्वात् । अन्यथा रसगन्धयोः त्रसरेणुमात्रगतत्वप्रसंगात् । अन्यत्र तत्प्रतीतेः परंपरयैवोपपत्तेः । नच सामग्रीबलेनाऽन्यत्रापि तत्सिद्धिरिति वाच्यम् । सामान्यतो रसत्वगन्धत्वावच्छिन्नं प्रति स्वाश्रयसमवेतत्वसंबन्धेन महत्वस्य प्रतिबन्धकतायाः सुवचत्वेनाऽन्यत्र सामग्र्या एवाऽसिद्धेः । अनन्तरसगन्धव्यक्तिकल्पनामपेक्ष्य प्रतिबध्यप्रतिबन्धकभावैककल्पनाया एव लघुत्वात् । तस्मादन्यत्रापि साक्षात्संबन्धेन तिक्तादिमत्वप्रतीतेर्याथार्थ्यस्यानुभवसिद्धतया साक्षात्संबन्धेन रसगन्धवत्वमुपेयम्, तच्च प्रकृतेपि तुल्यमिति संक्षेपः ।

विनिगमकाभावादव्याप्यवृत्तीनि नीलपीतादिविजातीयनानारूपाण्येव तत्रावयविनि उत्पद्यन्ते । अव्याप्यवृत्तित्वोपगमाच्च न नीलावयवावच्छेदेन चक्षुःसन्निकर्षदशायां पीताद्युपलंभः, पीतावयवावच्छेदेन चक्षुःसन्निकर्षदशायां च न नीलाद्युपलंभः । चक्षुःसंयोगावच्छेदकावच्छिन्नसमवायसंबन्धावच्छिन्नाधारतालक्षणसन्निकर्षस्य निरूपकतासंबन्धेन विषयनिष्ठतया द्रव्यसमवेतचाक्षुषे हेतुत्वात्, अन्यथा मूलावच्छेदेन वृक्षे चक्षुःसंयोगादपि अग्रावच्छिन्नवृक्षसमवेतकर्मादिचाक्षुषापत्तेः । व्याप्यवृत्तिजात्याधारत्वस्यापि अवच्छेदकाभ्युपगमाच्च न व्याप्यवृत्तिजात्यादिचाक्षुषे व्यभिचारः । अस्तु वा द्रव्यसमवेताऽव्याप्यवृत्तिचाक्षुषं प्रति चक्षुःसंयोगावच्छेदकावच्छिन्नसमवायसंबन्धावच्छिन्नाधारता–द्रव्यसमवेतव्याप्यवृत्तिचाक्षुषं प्रति चक्षुःसंयुक्तनिष्ठसमवायसंबन्धावच्छिन्नव्याप्यवृत्त्याधारतासन्निकर्षः । नचैवं कार्यकारणभावद्वयकल्पने गौरवमितिवाच्यम् । अव्याप्यवृत्तिकर्मादिचाक्षुषानुरोधेन तादृशकार्यकारणभावद्वयस्य सर्वसिद्धत्वादित्याशयवतां मतमाह । नव्यास्त्विति । तत्र । नानारूपवदवयवारब्धेऽवयविनि । अव्याप्यवृत्ति । अवच्छिन्नवृत्तिकं ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नव्यास्तु तत्राऽव्याप्यवृत्त्यैव नानारूपम्, नीलादेः पीतादिप्रतिबन्धकत्वकल्पने गौरवात्। अतएव "लोहितो यस्तुवर्णेन मुखे पुच्छे च पाण्डुरः। श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते" इत्यादिशास्त्रमपि उपपद्यते। नच व्याप्याव्याप्यजातीययोर्द्वयोर्विरोधो, मानाभावात्। नच लाघवादेकं रूपम्। अनुभवविरोधात्। अन्यथा घटादेरपि लाघवादैक्यं स्यात्। एतेन स्पर्शादिकमपि व्याख्यातमिति वदन्ति ॥१००॥

नव्य लोग कहते हैं कि नानारूप वाले अनेक अवयवों से आरब्ध अवयवी में अव्याप्यवृत्ति ही नानारूप हैं—[अर्थात् किसी भाग में नील है तो किसी में पीत है—इत्यादि] चित्ररूप कोई वस्तु ही नहीं है—क्योंकि चित्ररूप मानने पर "इत्थं च नीलदीनां पीताद्यारम्भे" इत्यादि ग्रन्थ से नीलादि को पीताद्यारम्भ में जो प्रतिबन्धकत्व की कल्पना की है उसमें गौरव है। इसीलिये "लोहितोयस्तुवर्णेन मुखे पुच्छेच पाण्डुरः" इत्यादि शास्त्र वचन भी उपपन्न हो जाता है—अर्थात् नीलवृषोत्सर्ग के उद्देश्य से स्कन्द पुराण में ऐसा कहा है कि जो वृष वर्ण से तो (लोहित) लाल हो—मुख-और पूँछ में पीतरूप हो—खुर और विषाण (सींग) से श्वेत हो—वह नीलवृष कहा है।

प्रश्न—प्राचीन कहते हैं कि वस्तुतः रूपादि तो व्याप्यवृत्ति हैं—अब यदि आप नानारूप वाले अनेक अवयवों से आरब्ध अवयवी में अव्याप्यवृत्ति नानारूप मानेंगे तो व्याप्यवृत्तित्व के साथ अव्याप्यवृत्तित्व का विरोध है—अतः व्याप्यवृत्ति रूपादि में अव्याप्यवृत्तित्व कैसे युक्तियुक्त होगा।

उत्तर—इस व्याप्यवृत्तित्व-अव्याप्यवृत्तित्व के विरोध में कोई प्रमाण नहीं है।

प्रश्न—उक्त अवयवी में नानारूप मानने की अपेक्षया एक चित्र ही रूप क्यों न मान लिया जाय।

उत्तर—पूर्वोक्त शास्त्रवचन के अनुभव का विरोध होने से चित्ररूप नहीं माना जा सकता है। अन्यथा घट आदि को भी लाघवात् एक ही मान लिया जाय। इससे स्पर्शादि की भी व्याख्या जानना।

अर्थात् नवीनमत से चित्रस्पर्श भी नहीं मानना—नवीनमत में जैसे चित्ररूप नहीं—

नानारूपमिति। उत्पद्यते इति शेषः। तथाचाऽवयवेषु यावन्ति रूपाणि तत्तद्रूपाणामवयविनि विरोधाभावेनोत्पत्तिसंभवान्न प्रत्यक्षत्वानुपपत्तिरिति भावः। **प्रतिबन्धकत्वकल्पने इति**। समवायेन नीलादिकं प्रति स्वसमवायिसमवेतत्वसंबन्धेन नीलाद्यन्यरूपत्वेन प्रतिबन्धकत्वकल्पने इत्यर्थः। **गौरवादिति**। अवच्छेदकतासंबन्धेन नीलादिकं प्रति समवायेन नीलादेर्हेतुतया पीतावच्छेदेन नीलोत्पत्त्यापत्त्यभावात्प्रतिबन्धकत्वकल्पने गौरवमेवेति भावः। **अतएव**। नीलादीनामव्याप्यवृत्तित्वादेव। **मानाभावादिति**। परमाणुद्वयसंयोगस्यावच्छेदकाभावेन व्याप्यवृत्ति-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तया संयोगमात्रस्य व्याप्यवृत्तित्वापत्त्या तयोर्विरोधे मानाभावादिति भावः । लाघवादिति । चित्रमितिप्रतीतिविषयताया अनेकेषु रूपेषु कल्पनापेक्षयेत्यादिः । एकं रूपमिति । अतिरिक्तं चित्ररूपमित्यर्थः । अनेकरूपवत्ताऽनुभवविरोधादित्यर्थः । अन्यथा । अनुभवापलापे । एतेन । नीलादीनामव्याप्यवृत्तित्वकथनेन । व्याख्यातमिति । रस-गन्धस्पर्शानामव्याप्यवृत्तितया चित्ररसः–चित्रगन्धः–चित्रस्पर्शोपि- नाङ्गीकार्य इति भावः ।

ननु नव्यमते विषयतासंबन्धेन द्रव्यसमवेतचाक्षुषं प्रति स्वावच्छेदकावच्छिन्नसमवायसंबन्धावच्छिन्नाधारतानिरूपकत्वसंबन्धेन चक्षुःसंयोगः कारणमितिपर्यवसितम् । तथापि नीलपीताभ्यां कपालिकाभ्यामारब्धेन नीलपीतोभयात्मकेन कपालेनारब्धस्य घटस्य नीलकपालिकामात्रावच्छेदेन चक्षुःसंयोगेपि पीतोपलंभप्रसंगो दुर्वारः, कपालिकावच्छिन्नचक्षुःसंयोगस्य तत्समवेतकपालावच्छिन्नत्वनियमात् चक्षुःसंयोगावच्छेदककपालावच्छेदेनैव घटे पीताधारत्वसत्त्वात् । न च तत्र घटनिष्ठनीलपीताद्यवच्छेदकं न कपालं किन्तु नीलपीतकपालिकैवेति वाच्यम् । तथासति तत्र कपालावच्छेदेन घटवृत्तिनीलाद्युत्पत्तिवारणायाऽवच्छेदकतासंबन्धेन नीलाद्युत्पत्तिं प्रति समवायेन नीलेतररूपादेः प्रतिबन्धकत्वकल्पनापत्त्या महागौरवापत्तेः । तत्र कपालेऽवच्छेदकतासंबन्धेन घटवृत्तिनीलादेरसत्वे तत्र घटवृत्तिनीलादेरवच्छेदकतासंबन्धेनोत्पत्त्यधिकरणस्यैव दुर्लभत्वापत्तेः । वक्ष्यमाणयुक्त्याऽवच्छेदकतासंबन्धेन रूपोत्पत्तिं प्रति अवच्छेदकतासंबन्धेन रूपस्य प्रतिबन्धकत्वावश्यकतया कपालनिष्ठरूपावच्छेदिकायां कपालिकायामवच्छेदकतासंबन्धेन घटनिष्ठरूपोत्पत्तेरसंभवादिति चेन्न । या संयोगव्यक्तिर्यद्देशव्यापिनी तत्र तद्देश एवावच्छेदको नतु सम्पूर्णोऽवयव इत्यभ्युपगमेन कपालिकावच्छिन्नचक्षुःसंयोगस्य कपालावच्छिन्नत्वविरहात् । अन्यथा व्याप्यवृत्तितामतेपि अप्रतीकारात् । तच्चानुपदमेव स्फुटीभविष्यति । नचैवं तादृशघटस्य नीलकपालिकामात्रावच्छेदेन चक्षुःसंयोगे नीलोपलंभोपि न स्यात्, चक्षुःसंयोगावच्छेदकनीलकपालिकावच्छेदेनाधारत्वविरहात्, कपालनिष्ठरूपावच्छेदिकायां कपालिकायामवच्छेदकतासंबन्धेन घटनिष्ठरूपोत्पत्तेरसंभवात् प्रतिबन्धकसत्वादिति वाच्यम् । कपालनिष्ठरूपावच्छेदिकायां कपालिकायां प्रतिबन्धकसत्वादवच्छेदकतासंबन्धेन घटनिष्ठरूपोत्पत्तेरसंभवेपि प्रतीतिबलेनाऽवच्छेदकतासंबन्धेन तस्य तत्र सत्वे बाधकाभावात्, नहि यत्र येन संबन्धेन कार्यमुत्पद्यते तत्रैव तेन संबन्धेन वर्तते इति नियमोस्ति, घटादेर्दण्डादिमति संयोगसंबन्धेनोत्पद्य देशान्तरेपि संयोगसंबन्धेन वृत्तेः । नच तथापि नीलपीतोभयारब्धे घटे नीलान्नीलं समुत्पद्यमानं नीलावयवावच्छेदेनैवोत्पद्यते नतु पीतावयवावच्छेदेनेत्यत्र किं नियामकमिति वाच्यम् । समवायसंबन्धेन नीलादिविशेषोत्पत्तौ स्वाश्रयसमवेतत्वसंबन्धेन नीलादेरसमवायिकारणत्ववदवच्छेदकतासंबन्धेन नीलाद्युत्पत्तिं प्रति समवायेन नीलादेरपि हेतुत्वात् । एतेन कठिनसुकुमारादिनानास्पर्शवदवय-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वारब्धेऽवयविनि स्पर्शोत्पात्पादोपि व्याख्यातः। तत्रापि विनिगमकाभावादव्याप्यवृत्तिसुकुमारकठिनादिनानास्पर्शस्यैवावयविन्यभ्युपगमात्। तिक्तमधुरादिनानारसवदवयवारब्धेऽवयविनि विनिगमकाभावान्नानैव रसः। सुरभ्यसुरभिनानागन्धवदवयवारब्धेऽवयविनि च विनिगमकाभावान्नानैव गन्ध उत्पद्यते इति नीलादीनामव्याप्यवृत्तित्वमतनिष्कर्षः।

प्राचामयमाशयः। व्याप्यवृत्तीन्येव तत्र नीलपीतादिविजातीयनानारूपाणि अवयविनि उत्पद्यन्ते। नचैवं नीलावयवावच्छेदेन चक्षुःसंयोगदशायामपि पीताद्युपलंभः, पीतावयवावच्छेदेन चक्षुःसंयोगदशायां च नीलाद्युपलंभः स्यात्, व्याप्यवृत्तिजात्यादितुल्यत्वादिति वाच्यम्। नीलावयवाद्यवच्छिन्नचक्षुःसंयुक्तेऽवयविनि व्याप्यवृत्तीन्येव नानारूपाणि समुत्पद्यन्ते, एवं विजातीयनानास्पर्शवदवयवारब्धेऽवयविन्यपि व्याप्यवृत्तय एव नानास्पर्शाः समुत्पद्यन्ते, नत्वव्याप्यवृत्तयः, उक्तक्रमेण कार्यकारणभावबाहुल्यापत्तेः। एवंविजातीयनानारसगन्धवदवयवारब्धेऽवयविन्यपि व्याप्यवृत्तय एव नानारसगन्धा इत्याहुरिति व्याप्यवृत्तित्वमतनिष्कर्षः।

वस्तुतस्तु नीलपीतादिविजातीयनानारूपवदवयवारब्धेऽवयविनि अव्याप्यवृत्तीन्येव नीलपीतादिविजातीयनानारूपाण्युत्पद्यन्ते इति नवीनमतमेव साधीयः। व्याप्यवृत्तितापत्ते नीलावयवाद्यवच्छेदेन चक्षुःसंयोगदशायां पीताद्युपलंभवारणाय नीलाद्यवयवावच्छिन्नचक्षुःसंयोगाधारतावत्समवायस्यैव नीलादिग्राहकत्वस्यावश्यवक्तव्यतया नीलपीतादिरूपभेदेन चक्षुःसंयुक्तसमवायस्यानन्तकार्यकारणभावापत्तेः। नचाऽव्याप्यवृत्तित्वपक्षेऽपि नीलपीतोभयारब्धेऽवयविनि पीतावयवावच्छेदेन नीलोत्पत्तिवारणायाऽवच्छेदकतासंबन्धेन नीलोत्पत्तिं प्रति समवायसंबन्धेन प्रातिस्विकरूपेण नीलपीतादेर्हेतुत्वमावश्यकम्, अवच्छेदकतासंबन्धेन रूपोत्पत्तिं प्रति समवायेन द्रव्यस्य कारणत्वं पुनरधिकम्, अन्यथा नीलपीतोभयारब्धावयविव्यक्तौ समवायसंबन्धेन नीलान्नीलमुत्पद्यमानमारंभकनीलवयव्यक्तावेवाऽवच्छेदकतासंबन्धेनोत्पद्यते, नतु अन्त्यावयविनि, द्रव्यानवष्टब्धोदासीनकपालादौ वेत्यत्र नियामकाभावप्रसंगादिति वाच्यम्। अवच्छेदकतासंबन्देन नीलपीताद्युत्पत्तिं प्रति समवायसंबन्धेन नीलपीतादेर्हेतुत्वानभ्युपगमात्। तत्तद्व्यक्तिनिष्ठावच्छेदकतासंबन्धेन सत्त्वावच्छिन्नोत्पत्तिं प्रति तादात्म्यसंबन्धेन तत्तद्व्यक्तित्वेन तत्तद्देशव्यक्तीनां हेतुत्वावश्यकतया कारणसमाजविरहादेव नीलपीतोभयारब्धेऽवयविनि पीतावयवावच्छेदेन नीलोत्पादवारणसंभवात्। तथाहि व्याप्यवृत्तिनीलादेरवच्छेदकतासंवन्धेनोत्पत्तिरलीकैव। अव्याप्यवृत्तिनीलन्तु, जगतिद्वयम्, एतद्व्यक्तिसमवेतम्, एतदितरव्यक्तिसमवेतं च। तत्राऽऽद्यस्य न पीतावयवावच्छेदेनोत्पत्तिसंभवः, नीलावयवावच्छिन्नातिरिक्तस्य एतद्व्यक्तिसमवेतनीलस्याऽलीकत्वात्, अवच्छेदकतासंबन्धेन तदुत्पत्तिं प्रति नीलावयवव्यक्तेस्तादात्म्येन सामान्यकारणत्वात्। नापि द्वितीयस्य पीतावयवावच्छेदेनोत्पत्तिसंभवः, अवच्छेदकतासंबन्धेन तदुत्पत्तिं प्रति एतदितरव्यक्त्यारंभयोगाधारतावत्समवायस्यैव नीलादिग्राहकत्वात्। नीलपीताभ्यां कपालिकाभ्यामारब्धेन नीलपीतोभयात्मककपालेनारब्धस्य घटस्य नीलकपालिकामात्रावच्छेदेन

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चक्षुःसंयोगेपि पीतोपलंभप्रसंगश्च पूर्ववद्वारणीयः। नन्वेवं नीलपीतादिरूपभेदेन चक्षुःसंयुक्तसमवायस्यानन्तकार्यकारणभावापत्तौ तत्पक्षमपेक्ष्य पूर्वोक्ताऽव्याप्यवृत्तिपक्ष एव साधीयान्। नच पूर्वोक्ताऽव्याप्यवृत्तिपक्षेपि अवच्छेदकतासंबन्धेन नीलपीताद्युत्पत्तिं प्रति समवायसंबन्धेन प्रातिस्विकरूपेण नीलपीतादेर्हेतुत्वाभ्युपगमात्, अत्र पक्षे च तद्विरहान्न तत्पक्षमपेक्ष्य कार्यकारणभावाधिक्यमिति वाच्यम्। अवच्छेदकतासम्बन्धेननीलाद्युत्पत्तिं प्रति प्रातिस्विकरूपेण नीलादेः कार्यकारणभावमपेक्ष्य नीलपीतादिविषयभेदेन चक्षुःसंयुक्तसमवायस्य कार्यकारणभावानां गुरुशरीरतया संख्यासाम्येपि एतत्पक्षस्य जघन्यत्वादिति चेन्न।

अव्याप्यवृत्तित्वपक्षेऽवच्छेदकतासंबन्धेन रूपोत्पत्तिं प्रति समवायसंबन्धेन द्रव्यस्य कारणताया आधिक्यात्। ननु प्रातिस्विकरूपेण नीलाद्यवच्छिन्नचक्षुःसंयोगस्य नीलादिग्राहकत्वाभ्युपगमेपि पीताद्यवच्छेदेन चक्षुःसंयोगदशायां चक्षुःसंयुक्तसमवायलक्षणसामान्यसामग्रीमर्यादया नीलादौ लौकिकविषयतया द्रव्यसमवेतचाक्षुषापत्तिर्दुर्वारा। नच यावद्विशेषसामग्रीबाधात्सामान्यकार्यबाधः, द्रव्यसमवेतचाक्षुषं जगतिद्वयम्, रूपविषयकम्, रूपेतरविषयकं च तत्र रूपविषयकचाक्षुषस्य न सामग्री, नीलादिचाक्षुषं प्रति नीलाद्यवच्छिन्नचक्षुःसंयोगानां विशिष्य हेतुत्वात्। नापि रूपेतरविषयकचाक्षुषस्य, रूपेतरविषयकचाक्षुषं प्रति रूपेतरव्यक्तीनां तत्तद्व्यक्तित्वेन विषयविधया हेतुत्वादिति वाच्यम्। विषयस्य विशेषतः कार्यकारणभावानभ्युपगमादिति चेन्न। विशेषतः कार्यकारणभावानभ्युपगन्तृमते एतदापत्तिवारणाय रूपेतरचाक्षुषं प्रति विषयनिष्ठतया रूपभेदस्यापि पृथग् हेतुताया वक्तव्यत्वात्। नच नीलपीतादिविजातीयनानारूपवदवयवारब्धेऽवयविनि नीलपीतादेर्व्याप्यवृत्तित्वे "लोहितोयस्तुवर्णेनेत्यादिस्मृतिविरोधः, तत्स्मृत्या एकस्मिन्नेव वृषेऽवच्छेदकभेदेन लोहितत्वादिबोधनात्, अवच्छेदकत्वस्य सप्तम्यर्थत्वादिति वाच्यम्। तत्र मुखे पुच्छेच पाण्डुर इत्यादेः स्वाश्रयसमवेतत्वसंबन्धेन मुखपुच्छवृत्तिपाण्डुररूपवानित्यर्थकतयाऽवच्छेदकतापर्यन्तस्याऽतदर्थत्वात्। एवं सुकुमारकठिनादिनानास्पर्शवदवयवारब्धावयवव्यक्तीनां तादात्म्यसंबन्धेन तत्तद्व्यक्तित्वेन सामान्यकारणत्वात्, तत्तदवयवावच्छिन्नातिरिक्तस्यैव तदितरव्यक्तिसमवेतरूपस्यालीकत्वात्। नच तथापि पीतावयवव्यक्तेरपि पाकेन रूपपरावृत्त्या कालान्तरे नीलावयविव्यक्त्यन्तरारंभकतया तन्नीलावयविव्यक्तिसमवेतनीलस्यैव पीतावयवावच्छेदेन तदानीमुत्पत्तिर्दुर्वारैवेति वाच्यम्। क्रियासंयोगकार्यकारणभावरीत्या तदवयविव्यक्तिसमवेतसत्सामान्यं प्रत्येव तदवयविव्यक्तेस्तत्तद्व्यक्तित्वेन समवायिकारणतया समवायिकारणविरहादेव तदवयविव्यक्तिसमवेतनीलस्यापि पीतावयवावच्छेदेन तदानीमुत्पादाऽसंभवात्। नीलादेः समवायसंबन्धेनोत्पत्तिं विनाऽवच्छेदकतासंबन्धेनोत्पत्तिविरहात्। अतएवावच्छेदकतासंबन्धेन रूपोत्पत्तिं प्रति समवायेन द्रव्यस्य कारणत्वमपि नोपेयम्। नच तदनभ्युपगमे नीलपीतोभयारब्धघटव्यक्तौ समवायसंबन्धेन नीलान्नीलमुत्पद्यमानमारम्भकपीतावच्छेदेनेव द्रव्यानवष्टब्धोदासीननीलकपालावच्छेदेनापि कुतो नोत्पद्यते इति वाच्यम्। व्याप्यवृत्तिनीलादेरवच्छेदकतासंबन्धेनोत्पत्तिरलीकैव,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जलादिपरमाणौ तन्नित्यमन्यत्सहेतुकम् ।
रसस्तु रसनाग्राह्योमधुरादिरनेकधा ॥१०१॥

जलादीति । जलपरमाणौ तेजःपरमाणौ च रूपं नित्यम् । पृथिवीपरमाणुरूपं तु न नित्यं तत्र पाकेन रूपान्तरोत्पत्तेः । नहि घटस्य पाकानन्तरं तदवयवोऽपक्व उपलभ्यते । नहि रक्तकपालस्य कपालिका नीलावयवा भवति । एवं क्रमेण परमाणावपि पाकसिद्धेः । अन्यत् । जलतेजःपरमाणुरूपभिन्नं रूपम्, सहेतुकं । जन्यम् । रसं निरूपयति । रसस्त्विति । १०१

ऐसे ही चित्र स्पर्श भी नहीं है) ॥१००॥ जलपरमाणु में और तेज के परमाणु में रूप नित्य है । पृथिवीपरमाणु में रूप नित्य नहीं है–क्योंकि पृथिवीपरमाणु में पाक (अग्नि संयोग) से रूपान्तर (रक्तरूप) की उत्पत्ति हो जाती है । क्योंकि घट के पाक होने के अनन्तर उसके अवयव अपक्व रह जावे यह बात सर्वथा अनुचित है–कारण कि अग्निसंयोग से रक्त

अव्याप्यवृत्तिनीलन्तु जगतिद्वयम्, एतद्व्यक्तिसमवेतम्, एतदितरव्यक्तिसमवेतं च, तयोश्च द्वयोरेव द्रव्यानवष्टब्धोदासीननीलकपाले तदानीमवच्छेदकतासंबन्धेनोत्पत्त्यसंभवात् । उक्तरीत्या कारणसमाजविरहात् । किंच व्याप्यवृत्तितापक्षे उक्तयुक्त्या रूपेतरचाक्षुषं प्रति विषयनिष्ठतया रूपभेदस्य, नीलादिचाक्षुषं प्रति प्रातिस्विकरूपेण विषयविधया नीलादेश्च हेतुत्वमवश्यं वक्तव्यम्, तथाचाऽव्याप्यवृत्तितापक्षमपेक्ष्य महागौरवमिति विभावनीयम् ॥१००॥

पृथिवीपरमाणुरूपस्याऽनित्यत्वे हेतुमाह । तत्रेति । पृथिवीपरमाणावित्यर्थः । पाकेन । विजातीयतेजःसंयोगेन । रूपान्तरोत्पत्तेरिति । पूर्वरूपनाशरूपान्तरोत्पत्तेरित्यर्थः । परमाणौ रूपनाशरूपान्तरोत्पादे प्रमाणमाह । नहीति । ननु घटावयवेऽव्यायातु पाको नतु परमाणौ अतआह नहिरक्तेति । एवंक्रमेणेति । द्व्यणुके पाकानुमितिद्वारेत्यर्थः । पाकसिद्धेरिति । पाकानुमितिसंभवादित्यर्थः तथाच द्व्यणुकंपाकजन्यरूपवत् पाकजन्यरूपाश्रयसमवायित्वात्, त्रसरेणुवदित्यनुमानेन द्व्यणुकेपाकसिद्धौ पार्थिवपरमाणुः पाकजन्यरूपवान् पाकजन्यरूपवत्समवायित्वात् त्रसरेणुवदित्यनुमानेन परमाणावपि पाकसिद्धिरिति भावः । मूले रसनाग्राह्यइति । रसनेन्द्रियजन्यप्रत्यक्षीयलौकिकविषयताश्रयगुणविभाजकजातिमत्वमित्यर्थः । तेन परमाणुरसे नाव्याप्तिः । ननुरसत्वजातौ मानाभावः । तिक्तत्वमधुरत्वादीनामेव रसबुद्धिविषयत्वस्य सुवचत्वात् । रसस्य चाक्षुषत्वाचप्रतिबन्धकत्वन्तु न रसत्वेनाऽपितु गन्धरसगुरुत्वस्थितिस्थापकसाधारणेनैकेन वैजात्येन

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सहकारी रसज्ञाया नित्यतादि च पूर्ववत्।
· घ्राणग्राह्योभवेद्गन्धोघ्राणस्यैवोपकारकः ॥१०२॥

सहकारीति। रासनज्ञाने रसः कारणमित्यर्थः। पूर्ववदिति। जलपरमाणौ रसो नित्यः, अन्यः सर्वोपि अनित्य इत्यर्थः। गन्धं निरूपयति। घ्राणग्राह्य इति। उपकारक इति। घ्राणजन्यज्ञाने कारणमित्यर्थः। सर्वोगन्धोऽ-

(परिपक्व) हुये कपाल का अवयव कपालिका नीलावय नहीं होती है। इस क्रम से परमाणु में भी पाक की सिद्धि हो गयी। (अन्यत्) जल-तेज के परमाणुओं के रूप से भिन्न जो रूप वह सब रूप (सहेतुक) अनित्य है। रासनप्रत्यक्ष में रस कारण है ॥१०१॥ (पूर्ववदिति) पहिले की तरह जलपरमाणु में रस नित्य है-और सब पृथिवीपरमाणु का रस अनित्य है। गन्ध का निरूपण करते हैं-(उपकारकः) घ्राण इन्द्रिय से जन्य जो ज्ञान उसमें गन्ध कारण है- गन्ध सब ही अनित्य है- ॥१०२॥ गन्ध दो प्रकार है सौरभ (सुगन्ध) असौरभ (दुर्गन्ध)

अतो न प्रतिबन्धकतावच्छेदकतयापि तत्सिद्धिः। नच रसनसंयुक्तसमवायस्य रसत्वविशिष्टलौकिकविषयतासंबन्धेन रासनोत्पत्तिं प्रति कारणतया सन्निकर्षकार्यतावच्छेदकसंबन्धघटकतयैव लाघवात्तत्सिद्धिरिति वाच्यम्। वस्तुगत्या रसनिष्ठस्य लौकिकविषयत्वस्य लाघवेन कार्यतावच्छेदकसंबन्धतया रसत्वस्य तत्राऽप्रवेशादिति चेदत्र प्राञ्चः। रसोरसइत्यनुगतप्रतीतिबलात्तत्सिद्धिरित्याहुः। नव्यास्तु घ्राणसंयुक्तसमवायरसनासंयुक्तसमवाययोरविशिष्टतया रूपस्पर्शादिष्वपि वस्तुगत्या रसगन्धनिष्ठत्वोपलक्षितेन लौकिकविषयतासंबन्धेन घ्राणजरासनोत्पत्तिवारणाय तादृशविषयतासंबन्धेन घ्राणजरासनोत्पत्तिं प्रति गन्धत्वरसत्वाभ्यां तादात्म्यसंबन्धेन कारणत्वस्यावश्यकतया तदवच्छेदकतयैव गन्धत्वरसत्वसिद्धिरिति प्राहुः। मूले—मधुरादिरनेकधेति। प्राचीनमते चित्ररसमादाय सप्तधा--नवीनमते मधुराम्ललवणकटुकषायतिक्तभेदात् षड्विध इत्यर्थः। १०१ अन्यः—पृथिवीसमवेतो रसः अनित्यजलसमवेतरसश्च। अनित्यरसोपिद्विविधः—पाकजाऽपाकजभेदात्। पृथिव्यां पाकजः, अग्निसंयोगासमवायिकारणकः। जलेऽपाकजः, अपाकजस्थले चावयविसमवेतरसं प्रति अवयवसमवेतरसोऽसमवायिकारणम्। घ्राणग्राह्य इति। घ्राणेन्द्रियजन्यप्रत्यक्षीयलौकिकविषयताश्रयगुणविभाजकजातिमत्वं लक्षणम्। गन्धत्वजातिसिद्धिस्तु पूर्वोक्तदिशावसेया। सर्वोपीति। अनित्य एवेति। परमाणुगन्धस्यापि पाकजत्वादिति भावः। १०२

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सौरभश्चासौरभश्च स द्वेधा परिकीर्तितः ।
स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्यादुपकारकः ॥१०३॥
अनुष्णाशीतशीतोष्णभेदात्स त्रिविधोमतः ।
काठिन्यादिक्षितावेव नित्यतादि च पूर्ववत् ॥१०४॥

नित्य एव १०२ स्पर्शं निरूपयति । स्पर्श इति । उपकारक इति । स्पार्शनप्रत्यक्षे स्पर्शः कारणमित्यर्थः । १०३ अनुष्णाशीतेति । पृथिव्यां वायौ च स्पर्शोऽनुष्णाशीतः । जले शीतः । तेजसिउष्णः । काठिन्येति । कठिनसुकुमारस्पर्शौ पृथिव्यामेवेत्यर्थः । कठिनत्वादिकं तु न संयोगनिष्ठो जातिविशेषः, चक्षुर्ग्राह्यतापत्तेः । पूर्ववदिति । जलतेजोवायुपरमाणुस्पर्शा नित्यास्तद्भिन्नास्त्वनित्या इत्यर्थः ॥१०४॥

स्पर्श का निरूपण करते हैं—उपकारक इति । स्पार्शनप्रत्यक्ष में स्पर्श कारण है ॥१०३॥ वह स्पर्श अनुष्णाशीत—शीत—उष्ण—भेद से तीन प्रकार का है । अनुष्णाशीतेति । पृथिवी-और वायु में अनुष्णाशीत स्पर्श रहता है । जल में शीत । तेज में उष्ण । कठिन—और सुकुमा (मृदु) स्पर्श पृथिवी ही में रहता है । कठिनत्व—आदिपद से सुकुमारत्व—ये संयोग में रहने वाली जाति विशेष नहीं है—अन्यथा "यो गुणो येनेन्द्रियेण" इस नियम के अनुसार संयोग चक्षु से ग्रहण योग्य होने के नाते—संयोग में रहने वाली कठिनत्व आदि जातियों को भी चक्षुर्ग्राह्यत्व की आपत्ति लग जायगी । पूर्ववदिति । जल-तेज-वायु इन तीन के परमाणुओं का स्पर्श नित

सौरभश्चासौरभश्चेत्यादिना गन्धस्य द्वैविध्यप्रतिपादनं नवीनमतेन । नवीनास्तु चित्रगन्धं न स्वीकुर्वन्ति सुरभ्यसुरभिकपालद्वयारब्धे घटे गन्धविरहेपि अवयगन्धस्यैव भानात् । प्राञ्चस्तु चित्रगन्धं स्वीकुर्वन्ति । अन्यथा सुरभ्यसुरभिद्व्यणुकत्रयारब्धे त्र्यणुके गन्धभानं न स्यात्, द्व्यणुकगन्धस्याऽयोग्यत्वात् । एवं चित्ररसोपि स्वीकार्य इति ध्येयम् । स्पर्शस्त्वगिन्द्रियग्राह्य इति सावधारणमूलात्त्वग्भिन्नेन्द्रियजन्यप्रत्यक्षीयलौकिकविषयताशून्यत्वे, सति त्वगिन्द्रियजन्यप्रत्यक्षीयलौकिकविषयतावत्वे सति गुणविभाजकजातिमत्वं लक्षणम् । स्पर्शत्वजातिस्तु शीतोष्णादिषु स्पर्शः स्पर्शः इत्यनुगतप्रतीतिबलादेव सिद्ध्यति । शीतोष्णत्वादेरननुगतत्वात् । केषांचिन्मते स्पर्शपदशक्यतावच्छेदकतयैव तत्सिद्धिः ।

नव्यमते तु लौकिकविषयतासम्बन्धेनचाक्षुषोत्पत्तिं प्रति शीतोष्णादीनां तादात्म्यसंबन्धेन प्रतिबन्धकत्वावश्यकतया तदवच्छेदकतयैव तत्सिद्धिः । अन्ये तु द्रव्यस्पार्शनजनकतावच्छेदकतया तत्सिद्धिः । शीतत्वोष्णत्वादीनामननुगतत्वात्, परमाण्वाद्यतीन्द्रियवृत्तिशीतोष्णादिषु च शीतत्वादिना सांकर्यभयादेव तदभ्युपगम इत्याहुः । तच्चिन्त्यम् । स्पार्शनजनकतावच्छेदकतया तत्कल्पने स्पर्शवद्द्रव्यनिष्ठैकत्वमादाय विनिगमनाविरहापत्तेरित्यास्तां विस्तरः । १०३ मूले—काठिन्यादीति । स्वार्थे ष्यञ् । तथाच पृथिव्या अनुष्णाशीतः स्पर्शः त्रिविधः कठिनसुकुमारचित्र-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एतेषां पाकजत्वं तु क्षितौ नान्यत्र कुत्र चित्।
तत्रापि परमाणौ स्यात्पाकोवैशेषिके नये ॥१०५॥

एतेषामिति। एतेषां—रूपरसगन्धस्पर्शानाम्। नान्यत्रेति। पृथिव्यां हि रूपरसगन्धस्पर्शपरावृत्तिरग्निसंयोगादुपलभ्यते। न हि शतधापि ध्मायमाने जले रूपादिकं परावर्तते। नीरे सौरभमौष्ण्यं चाऽन्वयव्यतिरेकाभ्यामौपाधिकमेवेति निर्णीयते। पवनपृथिव्योः शीतस्पर्शादिवत्। तत्रापि—पृथिवीष्वपि—अध्ये परमाणावेव पाक इति वैशेषिका वदन्ति। तेषामयमाशयः—अवयविनाऽ-

है ॥१०४॥ एतेषामिति। रूप-रस-गन्ध-स्पर्श—इन चारों की अग्निसंयोग से परावृत्ति पृथिवी ही में होती है—अन्यत्र नहीं—क्योंकि जल को सैकड़ों बार तपाने पर भी उसके रूप-रस आदि का परिवर्त्तन नहीं होता है। जल में सुगन्ध—और औष्ण्य औपाधिक हैं—ऐसा अन्वय—व्यतिरेक के द्वारा निश्चित है—पवन-तथा पृथिवी में जैसे शीतस्पर्श औपाधिक है। "तत्रापि परमाणौ स्यात् पाको वैशेषिके नये" इसका अर्थ यह है कि 'तत्रापि' अर्थात् पृथिवी में भी—वैशेषिकों के मत में परमाणु ही में पाक होता है। (परमाणु में पाक होता है—इसका अर्थ यह है कि अवयव ही में पाक होता है—परमाणु भी अवयव है-घटरूप

भेदात्। पाषाणादिस्पर्शः-कठिनः। नवनीतादिस्पर्शः सुकुमारः। नानास्पर्शवदवयवारब्धः पृथिवीस्पर्शः चित्रस्पर्शः। चक्षुर्ग्राह्यतापत्तेरिति। योगुणो यदिन्द्रियेण गृह्यते इति नियमादितिभावः। तद्भिन्नाः—जलतेजोवायुपरमाणुसमवेतस्पर्शभिन्ना इत्यर्थः। १०४

जलादौ रूपादेरपरावृत्तिमुपपादयति। नहीति। शतधापिध्मायमाने। शतधाऽष्णीकृतेपि। एतेनाग्निसंयोगसत्वमाविष्कृतम्। रूपादिकं—परावर्तते इति रूपान्तरादि नोत्पद्यते इत्यर्थः। तथाच जलेऽग्निसंयोगसत्वेपि रूपान्तराद्यनुत्पत्तेः। स्वरूसंबन्धेन पूर्वरूपादिनाशं प्रति समवायेन रूपान्तरोत्पत्तिं प्रति च तादात्म्येन पृथिव्या हेतुत्वमावश्यकमिति जले तादृशकारणाभावान्नरूपादिपरावृत्तिरिति भावः। नन्वेवं जले कथं सौरभोष्णयोरुपलब्धिरित्यत आह। जले। इति। सौरभमिति प्रतीयमानमित्यादि। अन्वयव्यतिरेकाभ्यामिति। पृथिवीतेजःसंयोगसत्वे सौरभाद्युपलब्धिसत्वम्, पृथिवीतेजःसंयोगाभावे सौरभाद्युपलब्ध्याभाव इत्यन्वयव्यतिरेकाभ्यामित्यर्थः। औपाधिकमेवेति। पृथिवीतेजोनिष्ठमेवेतीत्यर्थः। निर्णीयते इति। अनुमीयते इत्यर्थः। तथाच जले ह्युपलभ्यमानसौरभादिकं जलासमवेतं पृथिव्याद्युपाधिसंबन्धसत्ताकालीनसत्तावत्त्वे सति तादृशोपाधिसंबन्धसत्ताशून्यकालीनसत्ताशून्यत्वादित्यनुमानात्सौरभादौ जलासमवेतत्वसिद्धिः। तत्र दृष्टान्तमाह। पवनपृथिव्योरिति। तथाच जले सौरभादिप्रतीतिर्भ्रान्तिरेवेतिभावः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वष्टब्धेषु अवयवेषु पाको न संभवति—परन्तु वन्हिसंयोगेनाऽवयविषु विनष्टेषु स्वतन्त्रेषु परमाणुषु पाकः—पुनश्चपक्वपरमाणुसंयोगाद् द्व्यणुकादि क्रमेण पुनर्महावयविपर्यन्तमुत्पत्तिः। तेजसामतिशयितवेगवशात्पूर्वव्यूहनाशे झटिति व्यूहान्तरोत्पत्तिश्च।

अवयवी में नहीं) वैशेषिकों का यह आशय है कि घटादिरूप अवयवी से अवष्टब्ध (आवृत) अवयवों में पाक संभव नहीं है—परन्तु वन्हिसंयोग से अवयवी के विनष्ट होने के बाद सब परमाणुओं के पृथक् हो जाने पर प्रत्येक परमाणु में पाक होता है—उसके बाद पक्व परमाणुओं के परस्पर संयोग होने से द्व्यणुक-त्र्यणुक आदि के क्रम से फिर महावयवी पर्यन्त की उत्पत्ति हो जाती है। अग्निरूप तेज के अत्यन्त वेगशाली होने के कारण झटिति पूर्वव्यूह (श्यामघट) का नाश होकर व्यूहान्तर (रक्तघट) की उत्पत्ति हो जाती है। यहाँ द्व्यणुकादि

वैशेषिकास्तु पार्थिवपरमाणुषु क्रियाविभागादिवक्ष्यमाणरीत्याऽवयविषु विनष्टेषु स्वतन्त्रेषु परमाणुषु पाकः, पुनश्च पक्वपरमाणुसंयोगाद् द्व्यणुकादिक्रमेणाऽवयव्यन्तरमुत्पद्यते कारणगुणक्रमेण च तत्र रूपादीनामुत्पत्तिरिति वदन्ति। नैयायिकास्तु अवस्थिते एवावयविति रूपादयो विनश्यन्ति जायन्ते चेति वदन्ति। विप्रतिपत्तिस्तु पार्थिवावयविरूपादयः अग्निसंयोगाऽसमवायिकारणका नवेत्याकारिका। अत्र भावकोटि नैयायिकानाम् वैशेषिकाणां निषेधकोटिः।

तत्र वैशेषिकमतस्य दूषणीयतया आदौतन्मतमुपन्यस्यति। तत्रापीति। परमाणावेवेति। एवकारेणाऽवयविनो व्यवच्छेदः। तेन नैयायिकमतेपि परमाणौ पाकसत्वेपि न तन्मताऽविशेषः। रूपादीनां पाक इति। अग्निसंयोगजन्यरूपपरावृत्तिरित्यर्थः। इति वैशेषिका वदन्तीति। द्व्यणुकादिषु पाकाऽसंभवं वैशेषिका वदन्तीत्यर्थः। द्व्यणुकादिषु पाकाऽसंभवप्रकारः प्रदर्श्यते। तेषामिति। वैशेषिकाणामित्यर्थः। अवयविनाऽवष्टब्धेषु अवयवेष्विति। समवायेन घटादिविशिष्टेषु कपालेष्वित्यर्थः। इदं च घटादीनामप्युपलक्षकम्। पाको न संभवतीति। वन्हिसंयोगात्पूर्वरूपपरावृत्तिः, रूपान्तरोत्पत्तिश्चनसंभवतीत्यर्थः। अन्तर्बहिश्च सर्वेष्ववयवेषुवर्त्तमानस्याऽवयविनो बाह्यावयवानां वन्हिनासह संयोगसंभवेपि वन्हेरन्तःप्रवेशाऽसंभवेन सर्वावयवेषु वन्हिसंयोगरूपकारणाभावादिति भावः।

अथ सच्छिद्राणि अवयविद्रव्याणि तत्र स्थूलतेजसोऽन्तःप्रवेशाऽसंभवेपि तेजःपरमाणूनामन्तःप्रवेशसंभवादिति चेद्।

न तावत्परमाणवः सान्तराः निर्भागत्वात्, द्व्यणुकस्य सान्तरत्वे चानुत्पत्तिरेव तस्य, परमाण्वोरसंयोगात्, संयुक्तौ चेदिमौ निरन्तरावेव। प्रतीयमानेषु स्थूलद्रव्येषु अन्तरं न प्रतिभात्येव। त्र्यणुकेष्वेवान्तरं तच्चानुपलब्धियोग्यत्वान्न प्रतीयते। इति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

क्लिष्टकल्पना। तस्मान्निरन्तरा एव घटादयस्तेषामन्तस्तावदग्निपरमाणूनां प्रवेशो न संभवत्येव, यावत्पार्थिवावयवानां विभागो न भवेत्।

स्पर्शवति द्रव्ये स्पर्शवतो द्रव्यान्तरस्य वन्हेरभिघाताद् भिद्यमानेषु चावयवेषु क्रियाविभागादिन्यायेन द्रव्यारंभकसंयोगविनाशादवश्यं द्रव्यविनाश इत्याह। परन्त्विति। वन्हिसंयोगेनेति। परमाणुष्वित्यादिः। विनष्टेष्ववयविष्विति। घटादिद्व्यणुकपर्यन्तनाशानन्तरमिति यावत्। स्वतन्त्रेष्विति। कार्यद्रव्यध्वंसविशिष्टेष्वित्यर्थः। परमाणुष्वेवेति। एवकारेण कार्यद्रव्यविशिष्टेषु परमाणुषु पाकव्यवच्छेदः। पाक इति। वन्हिसंयोगात्पूर्वरूपपरावृत्तिःरूपान्तरोत्पत्तिश्चेति भावः। पुनश्चेति। अनन्तरमित्यर्थः। द्व्यणुकादिक्रमेणेति। परमाणुद्वयसंयोगाद्द्व्यणुकोत्पत्तिः, द्व्यणुकत्रयसंयोगात्त्र्यणुकोत्पत्तिरित्यादिक्रमेणेत्यर्थः। पुनरितिवाक्यालंकारे। ननु तत्रसंस्थानभेदः कथं न प्रतीयते इत्यत आह। तेजसामिति। वन्हेः सूक्ष्मावयवानामित्यर्थः। अतिशयितवेगवशादिति। विजातीयवेगाधीनक्रियावशादित्यर्थः। व्यूहः—संस्थानम्। व्यूहान्तरोत्पत्तिश्चेति। द्व्यणुकप्रभृतिचरमावयविपर्यन्तनाशः—द्व्यणुकप्रभृतिचरमावयविपर्यन्तोत्पत्तिश्चेत्यर्थः। तथाच क्षणभेदाऽज्ञानान्न पूर्वव्यूहनाशाद्युपलब्धिः, पूर्वव्यूहसाजात्यदोषात्पूर्वव्यूहभेदानुपलब्धिश्चेति भावः।

अत्रेदं बोध्यम्। वैशेषिका एव पीलुपाकवादिनः। एतन्मते नीलादिजन्यतावच्छेदकं नीलत्वादिव्याप्यवैजात्यं निखिलावयविवृत्त्येव, तेजःसंयोगजन्यतावच्छेदक वैजात्यन्तु परमाणुनीलादिमात्रवृत्ति। पाकाचाऽवयविनि न नीलाद्युत्पत्तिः, किन्तु परमाणौ रूपोत्पत्त्यनन्तरं कारणगुणक्रमेणैवावयविनि नीलाद्युत्पत्तिः। न चावयविनि विलक्षणाग्निसंयोगदशायां तत्र पाकजनीलाद्युत्पत्तिर्दुर्वारेति वाच्यम्। सति अवयविनि तद्रूपनाशाऽसंभवेन पूर्वरूपस्यैव तत्र पाकजरूपोत्पत्तौ प्रतिबन्धकत्वात्, वैलक्षण्यस्य फलबलकल्प्यतया तत्र विलक्षणतेजःसंयोगस्यैव वाऽनभ्युपगमाच्च। एवं तेजःसंयोगात्परमाणावेव रूपादिनाशः, नत्ववयविनि। अवयविरूपनाशस्तु आश्रयनाशादेव। नचैवं पाकानन्तरं घटादौ पूर्वरूपपरावृत्तिः कथमनुभूयते, आश्रयनाशविरहादिति वाच्यम्। तत्र तेजःसंयोगजन्यक्रियाविभागादिक्रमेण युगपत्कपालादिपरमाणुपर्यन्तानां सर्वावयवानां संयोगनाशाद्युगपदेव द्व्यणुकान्त्यावयविपर्यन्तानां विनाशः, ततस्तेषां रूपादिनाशः, ततो द्व्यणुकादिक्रमेण पुनर्घटान्तरमुत्पद्यते, ततः कारणरूपादिक्रमेण रूपाद्युत्पत्तिरित्यभ्युपगमात्। य एव श्याम आसीत्स एव रक्त इदानीमितिप्रत्यभिज्ञा तु तज्जातीयत्वावगाहिनी।

नचैवं परमाणुरूपनाशत्वम्, असमवेतवृत्तिरूपनाशत्वं वा विलक्षणाग्निसंयोगस्य कार्यतावच्छेदकमतो गौरवमिति वाच्यम्। विशेषणताविशेषेण वृत्तिमद्रूपनाशत्वस्य रूपनाशत्वस्य वा विलक्षणतेजःसंयोगकार्यतावच्छेदकत्वात्। अवयविरूपनाश-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मात्रस्यैवाऽऽश्रयनाशजन्यत्वेन विशेषणताविशेषेणाऽवर्त्तमानतया आश्रयनाशनाश्य-रूपव्यावृत्त प्रतियोगितासंबन्धेनानुत्पद्यमानतया च तत्र व्यभिचाराभावात्, एतच्च नैयायिकमतविचारावसरेस्फुटीभविष्यति ।

नचैवमपि अवयविनि विलक्षणाग्निसंयोगाद्रूपादिनाशापत्तिर्दुर्वारेति वाच्यम्। रूपनाशकतावच्छेदकाग्निसंयोगनिष्ठवैलक्षण्यस्य फलवलकल्प्यतयाऽवयविनिष्ठसंयोगे तदनभ्युपगमात् । पाकजन्यतावच्छेदकवैजात्यस्याऽवयविनीलादिवृत्तित्वे रूपनाश-कतावच्छेदकीभूतवैलक्षण्यस्य वाऽवयविनिष्ठाग्निसंयोगवृत्तित्वे यत्र नीलावयवद्वया-रब्धेऽवयविनि यत्किंचिदवयवावच्छेदेन विलक्षणाग्निसंयोगात्तदवयवावयविनोर्द्वयोरेव नीलनाशः ततो द्वितीयक्षणे पाकात्तदवयवे पीतोत्पत्त्या तृतीयक्षणेपीतावस्थितावयवनी-लाभ्यामवयविनि चित्रोत्पत्तिः तत्र द्वितीयक्षणेऽवयविनि पाकजपीतोत्पत्त्यापत्तिः, अवस्थितावयवनीलान्नीलोत्पत्त्यापत्तिश्च । नच नीलपीतत्वाद्यवच्छिन्नं प्रति नील-पीताद्यभावस्य जन्यरूपत्वावच्छिन्नं प्रति रूपत्वावच्छिन्नाभावस्य वा स्वाश्रयसमवे-तत्वसंबन्धेन प्रतिबन्धकतया न तत्र नीलाद्युत्पत्तिरिति वाच्यम् । न्यायनये युगपदेव अवयवावयविनोः पाकजनीलपीताद्युत्पत्त्यभ्युपगमात्, पाकजावयविनीलपीतादौ व्यभिचारेण तादृशप्रतिबध्यप्रतिबन्धकभावस्य वक्तुमशक्यत्वात् । नच नीलपीत-त्वावच्छिन्नं प्रति स्वाश्रयसमवेतत्वसंबन्धेन नीलेतररूपत्वादिना प्रतिबन्धकत्वम्, नीलजनीलत्वावच्छिन्नं प्रति स्वाश्रयसमवेतत्वसंबन्धेन नीलाद्यभावः प्रतिबन्धकः, अतो न तत्र द्वितीयक्षणे पाकजपीतोत्पत्तिः, नीलजनीलोत्पत्तिश्चेति वाच्यम्। नीलपीतादिकं प्रति नीलेतररूपादीनामनन्तप्रतिबध्यप्रतिबन्धकभावकल्पने गौरवात्। मम तु चित्रोत्पत्तिसमये नीलपीताद्युत्पत्तिवारणाय नीलजनीलादिकं प्रति नीलाद्य-भावस्य स्वाश्रयसमवेतत्वसंबन्धेन प्रतिबन्धकत्वात् । किं च न्यायन्याये पाकपौनः-पुन्येन एकस्मिन्नेवावयविनि क्रमेण नीलरक्तपुनर्नीलाद्यभ्युपगमात्, पूर्वपूर्वतत्तन्नी-लव्यक्त्युत्पत्तिकाले उत्तरोत्तरनीलादिव्यक्त्युत्पत्तेर्वारणाय उत्तरोत्तरतत्तन्नीलादिव्यक्तिं प्रति तत्तत्तेजःसंयोगव्यक्तीनां पूर्वपूर्वतत्तन्नीलादिध्वंसव्यक्तीनां वा विशिष्य हेतुत्व-मावश्यकमतोमहागौरवम् । अवयविन्यपि पाकाद्रूपनाशाभ्युपगमे यत्र घटनाशक-सामग्रीसमवधानकाले घटे रूपनाशकाग्निसंयोगोत्पत्तिः, तत्र घटनाशक्षणे पाकाद् घटे विशेषणताविशेषेण रूपनाशोत्पत्तिवारणायाग्निसंयोगस्य कार्यकालावच्छेदेन कार्याधिकरणदेशवृत्तितया नाशकत्वं वाच्यमतोगौरवमिति संक्षेपः ।

वैशेषिकैकदेशिनस्तु अनन्तधर्मिकल्पनापत्त्या मास्तु पाकजस्थलेऽवयवि-विनाशः, तथापि पाकेन परमाण्वाद्यन्त्यावयविपर्यन्तमेकदैव पूर्वरूपविनाशः, ततः परमाणोरेव पाकजरूपोत्पत्तिः, अनन्तरं कारणगुणक्रमेण द्व्यणुकादौ रूपान्तरो-त्पत्तिः, नचैकदैव परमाणुवद्द्व्यणुकादावपि पाकाद्रूपोत्पत्तिः । नच वैशेषिकनये पाकजरूपनाशं प्रति समवायसंबन्धावच्छिन्नप्रतियोगिताकद्रव्यसामान्याभावस्य हेतुतया सतिद्व्यणुके परमाणौ कथं रूपनाश इति वाच्यम् । तस्य हेतुत्वे माना-भावात् । नच द्रव्यानवष्टब्धपरमाणुपाके द्रव्यशून्यस्यैव परमाणोरूपनाशात्, पाकज-रूपनाशत्वावच्छिन्नं प्रत्येव तस्य हेतुत्वमिति वाच्यम् । तत्र द्रव्यसामान्याभावस्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अत्र द्व्यणुकादि स्वविनाशमारभ्य कतिभिः क्षणैः पुनरुत्पन्नरूपादिमद्-भवतीति शिष्यबुद्धिवैशद्यार्थं क्षणप्रक्रिया । तत्र विभागजविभागानंगीकारे नवक्षणा । तदङ्गीकारे तु विभागः किंचित्सापेक्षो विभागं जनयेत्, निरपेक्षस्य तत्त्वे कर्मत्वंस्यात् ।

विनाश से लेकर फिर उत्पन्न हुवा द्व्यणुक कितने क्षणों के बाद रूपादिमान् होता है—अब उस क्षणप्रक्रिया को शिष्यों की बुद्धि को विशद करने के लिये दिखलाते हैं । इस क्षण प्रक्रिया में विभागजविभाग को अङ्गीकार न करने पर नव क्षण होते हैं–(विभागजविभाग का मतलब यह है कि परमाणुद्वय के विभाग से परमाणु का आकाश से विभाग होगा–उस परमाण्वाकाश विभाग के प्रति परमाणुद्वय विभाग कारण है–अत परमाण्वाकाशविभाग परमाणुद्वयविभाग-जन्य है) और विभागजविभाग मानने पर पूर्वविभाग किसी से सापेक्ष होकर के ही उत्तर विभाग को उत्पन्न करेगा–क्योंकि निरपेक्ष होने पर विभाग भी कर्म हो जायेगा–(अर्थात्

दैववशसंपन्नत्वेपि तस्य हेतुत्वेमानाभावात् । नच सर्वदिगवच्छेदेनाग्निसंयोग एव रूपनाशे निमित्तम्, परमाण्वन्तरावष्टब्धे च परमाणौ न तत्संभवो मूर्तयोः समान-देशताविरोधादित्यारंभकसंयोगनाशस्यावश्यकतया द्रव्यनाशोप्यावश्यक इति वाच्यम् । निविडयोरेव मूर्तयोः समानदेशताविरोधात्, लाघवाद्विलक्षणतेजः-संयोगत्वेनैव श्यामादिनाशकतया सर्वदिगवच्छिन्नतेजःसंयोगत्वेन श्यामादिनाशकत्वे प्रमाणाभावाच । नच तथापि न्यायमतापेक्षया किं लाघवमिति वाच्यम् । अवयविनि पाकजरूपाभ्युपगमे नीलपीतादिजन्यतावच्छेदकतया नीलपीतादिनिष्ठावान्तरवैजात्य-सहस्रकल्पने गौरवापत्तेः । तदनभ्युपगमे तु नीलत्वाद्यवच्छिन्नं प्रत्येव नीलादेर्हेतु-त्वम्, यत्र स्वाश्रयसमवायित्वसंबन्धेन नीलोत्पत्तिस्तत्र समवायेन नीलमिति प्रत्यासत्तिः । तेन परमाणुनीलादौ न व्यभिचारः । अवयविनि पाकजरूपाभ्युपगमे तु नैतत्संभवः, अवयवरूपं विनापि अवयविनि पाकजरूपोत्पत्त्या व्यभिचारात् । नच स्वाश्रयसमवायित्वस्यकार्यतावच्छेदकसंबन्धत्वे चित्ररूपस्थलेऽव्याप्यवृत्ति-नीलपीतादिविजातीयनानारूपाभ्युपगमाद् व्यभिचारः, तत्र नीलादेः स्वाश्रयसम-वायित्वसंबन्धेन पीतावयवादावपि सत्वादिति वाच्यम् । नीलपीतादेरव्याप्यवृत्ति-त्वाभ्युपगमे स्वावच्छेदकत्वस्यापि कार्यतावच्छेदकसंबन्धत्वात् । न्यायनयेपि नीलादेरव्याप्यवृत्तित्वपक्षे पीतावयवाद्यवच्छेदेन नीलादेरुत्पत्तिवारणाय तेन संबन्धेन विलक्षणनीलाद्युत्पत्तिं प्रति समवायसंबन्धेन नीलादेर्हेतुत्वावश्यकतया गौरवाभावात् । नच नीलादेर्नाऽव्याप्यवृत्तित्वमिति वाच्यम् । इदं रूपं न किंचिदवच्छिन्नमिति-प्रत्ययाभावात्, प्रत्युत इह घटे सकलकपालावच्छेदेनैव रूपमित्याद्यवच्छेदकत्वा-वगाहिप्रत्ययस्यैव सत्वाच्चेतिप्राहुः ।

अत्रेति । अथेत्यर्थः । द्व्यणुकादीति । अस्य च रूपादिमद्भवतीत्यनेनाऽ-न्वयः । आदिना त्र्यणुकादिपरिग्रहः । स्वविनाशमारभ्येति । द्व्यणुकादिविनाशो-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संयोगविभागयोरनपेक्षं कारणं कर्मेति वैशेषिकसूत्रम्, स्वोत्तरोत्पन्नभावान्तरानपेक्षत्वं तस्यार्थः।

विभाग में कर्म लक्षण की अतिव्याप्ति हो जावेगी) क्योंकि वैशेषिकदर्शन का १७ वाँ सूत्र है जिसका अभिप्राय है कि संयोग और विभाग की उत्पत्ति में किसी की अपेक्षा न रखने वाला जो कारण उसे कर्म कहते हैं।

त्पत्त्यधिकरणक्षणमारभ्येत्यर्थः। पुनरुत्पत्त्येति। स्वसजातीयद्व्यणुकाद्युत्पत्त्यनन्तरमित्यर्थः। शिष्यबुद्धिवैशद्यार्थमिति। वैशद्यं-उत्पत्तिः। तथाच शिष्यबुद्ध्युत्पादनिमित्तीभूतेत्यर्थः। प्रक्रिया—द्व्यणुकनाशाद्युत्पत्तिक्षणनिरूपणम्। समाद्रियते इति शेषः। तत्रेति। विभागजविभागानङ्गीकारतदङ्गीकारपक्षद्वये इत्यर्थः। विभागजविभागानङ्गीकारेइति। कारणमात्रविभागजन्यकारणाकारणविभागानङ्गीकारपक्षे इत्यर्थः। कारणाकारणविभागस्य कारणमात्रविभागजन्यत्वाऽस्वीकर्तृप्राचीनमते, कपालकर्मणैव कपालद्वयविभागवत्कपालाकाशविभागस्यापि स्वीकारे इति यावत्। कारणाकारणविभागेन कार्याकार्यविभागस्तु स्वीक्रियत एव। तदङ्गीकारेत्विति। विभागजविभागाङ्गीकारे त्वित्यर्थः। इदं च नवीनमतम्। सर्वमेतद्विभागनिरूपणावसरे स्फुटीभविष्यति। विभागः—कारणमात्रविभागः। किंचित्सापेक्ष एवेति। स्वोत्तरोत्पन्नकिंचिद्वस्तुसहकृतएवेत्यर्थः। विभागं-कारणाकारणविभागम्। जनयेदिति। उत्पादयेदित्यर्थः। निरपेक्षस्येति। कारणमात्रविभागस्येत्यादिः। स्वोत्तरोत्पन्नकिंचिदसहकृतस्येत्यर्थः। तत्त्वे इति। विभागजनकत्वे इत्यर्थः। कर्मत्वंस्यादिति। कर्मलक्षणस्यातिव्याप्तिः स्यादित्यर्थः।

संयोगविभागयोरनपेक्षं कारणं कर्मेतिसूत्रस्यसंयोगस्य विभागस्यवाऽनपेक्षं कारणं कर्मेतिलक्षणद्वये तात्पर्यमित्यभिप्रायेण द्वितीयलक्षणस्याऽतिव्याप्त्यभिधानम्। कारणमात्रविभागस्य कारणाकारणविभागजनकत्वादनपेक्षत्वाच्च। इदमुपलक्षणम्। प्रथमलक्षणस्यापि कारणाकारणसंयोगेऽतिव्याप्तिर्बोध्या। तस्य कार्याकार्यसंयोगजनकत्वात्। अथैवमसंभवः, कर्मणोप्युत्तरसंयोगजनने पूर्वसंयोगनाशाऽपेक्षणादत आह। स्वोत्तरोत्पन्नेति। इदं चाऽसंभववारणाय, अन्यथा कर्मणोऽप्युत्तरसंयोगजनने द्रव्यान्तरापेक्षणादसंभवः स्यात्। भावान्तरेति। पूर्वसंयोगनाशसंग्रहार्थम्। स्वाधिकरणकालध्वंसाधिकरणक्षणोत्पत्तिकभावानपेक्षत्वम्, तत्र भावानपेक्षत्वं तादृशभावासहकृतत्वम्, तादृशभावाऽजन्यसंयोगविभागोभयजनकत्वमिति समुदितार्थः। विषयितया स्वाधिकरणीभूताऽतीतज्ञानादिध्वंसाधिकरणक्षणोत्पत्तिकस्वजन्यसंयोगादिजनकत्वात्असंभवइतिकालिकेनाधिकरणत्तालाभाय कालेति। स्वाधिकरणकालध्वसाधिकरणस्थूलकालोत्पत्तिकत्वंस्वस्यापीति पुनरसंभववारणाय स्वक्षणेति।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अन्यथाकर्मणोप्युत्तरसंयोगत्पत्तौ पूर्वसंयोगनाशापेक्षणादव्याप्तिः स्यात्। तत्र यदि द्रव्यारंभकसंयोगनाशविशिष्टं कालमपेक्ष्य विभागजविभागः स्यात्तदादशक्षणा अथ द्रव्यनाश विशिष्टं कालमपेक्ष्य विभागजविभागः स्यात्तदाएकादशक्षणा।

प्रश्न—उक्त कर्म लक्षण सूत्र की कर्म ही में अव्याप्ति हो रही है—क्योंकि कर्म भी उत्तर संयोग की उत्पत्ति में पूर्व संयोग नाश की अपेक्षा रखता है।

उत्तर—उस सूत्र का यह अभिप्राय है कि अपने से उत्तर काल में उत्पन्न होने वाले संयोग तथा विभाग की उत्पत्ति में किसी भावान्तर की अपेक्षा न करने वाला जो कारण उसे कर्म कहते हैं। [पूर्व संयोगनाश अभाव है—भाव नहीं है—अतः उसकी अपेक्षा यदि करे भी तब भी कोई दोष नहीं है] (तत्र) किसी से सापेक्ष होकर परमाणुद्वयविभाग परमाण्वाकाश विभाग को उत्पन्न करेगा, इस पक्ष में—यदि द्व्यणुकरूपद्रव्य का आरंभक जो संयोग (परमाणुद्वयसंयोग) उस संयोगनाश के अव्यवहितोत्तर काल में ही विभागजविभाग होगा तो वह अवयवी दशक्षण में फिर से रूपादिमान् हो सकेगा। और यदि द्व्यणुकरूपद्रव्य के विनाशकाल की अपेक्षा करके—अर्थात् द्व्यणुकनाशक्षण के अव्यवहितोत्तरक्षण में यदि विभागजविभाग होगा तो अवयवी को रूपादिमान् होने में एकादशक्षण लगेंगे। अवयवक्षण की प्रक्रिया

स्ववृत्तीत्युक्तावपितद्दोषतादवस्थ्यादुत्पत्तीति। स्ववृत्तिप्रागभावप्रतियोगिभावाजन्यत्वदित्यस्मद्गुरुचरणाः। तादृशपूर्वसंयोगध्वंसापेक्षेणैवकर्मणोत्तारसंयोगजननादसंभववारणाय भावेति। स्वाधिकरणक्षणोत्पत्तिकोक्तावपि तथेतितत्कालध्वंसाधिकरणेति। द्रव्यन्तु तादृशोत्पत्तिकावयवसंयोगं कर्म वाऽपेक्ष्यैव संयोगविभागौ जनयतीति न तत्रातिप्रसंगः। कारणाकारणविभागस्य कार्याकार्यविभागजननाद्विभागेऽतिव्याप्तिवारणाय संयोगेति। एवं विभागपदानुपादानेतादृशसंयोगेऽतिव्याप्तिर्बोध्या। तथाविधभावाऽजन्यत्वेन विभाग एव विशेषणीयः, नतु संयोगोपि व्यर्थत्वात्, तथाच भावपदं व्यर्थम्, कर्मणा विभागजनने मध्यवर्तिनः कस्याप्यनपेक्षणादिति विभावनीयम्।

केचित्तुस्वाधिकरणकालध्वंसाधिकरणोत्पत्तिकोयस्तदनधीनो यः स्वजन्यविभागस्तदधीनसंयोगजनकजातीयत्वं कर्मलक्षणम्। इतिप्राहुः। **अन्यथा**। अनपेक्षत्वस्य यथाश्रुयार्थकत्वे। **तत्रेति**। किंचित्सापेक्षविभागस्य विभागजनकत्वपक्षे इत्यर्थः। **द्रव्यारम्भकसंयोगनाशविशिष्टमिति**। परमाणुद्वयसंयोगनाशविशिष्टमित्यर्थः। **कालमिति**। क्षणमित्यर्थः। इदं च भावत्वसंपादनार्थम्। एवमग्रेपि। **द्रव्यनाशविशिष्टमिति**। द्व्यणुकनाशविशिष्टमित्यर्थः। नवदशैकादशक्षणाः प्रक्रियाः क्रमेणोपपादयति तथाहीत्यादिना।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तथाहि—अथनवक्षणा—वन्हिसंयोगात्परमाणौ कर्म ततः परमाण्वन्तरेण विभागः—तत आरंभकसंयोगनाशः—ततोद्यणुकनाशः १ ततः परमाणौ श्यामादिनाशः २ ततोरक्ताद्युत्पत्तिः ३ ततोद्रव्यारम्भानुगुणाक्रिया ४ ततोविभागः ५ ततः पूर्वसंयोगनाशः ६ ततआरम्भकसंयोगः ७ ततोद्वयणुकोत्पत्तिः ८ ततोरक्ताद्युत्पत्तिः ९।

बतलाते हैं—सर्व प्रथम अग्नि का संयोग परमाणु में होने से एक परमाणु में क्रिया हुवी—क्रिया होने से एक परमाणु का दूसरे परमाणु से विभाग हुआ—उसके बाद द्व्यणुक का आरंभक जो परमाणुद्वय का संयोग है उसका नाश हुआ—उसके बाद द्व्यणुकनाश ॥१॥ यह एक क्षण हुवा-यहीं से क्षण गणना करनी चाहिये—क्योंकि पहिले "द्व्यणुकादि विनाशमारभ्य" ऐसा लिखा है—अतः द्व्यणुकविनाशकाल से ही क्षणगणना आवश्यक है। उस (द्व्यणुकनाश) के बाद परमाणु में श्यामरूप का नाश ॥२॥ उसके बाद रक्तरूप की उत्पत्ति ॥३॥ परमाणुवों के रक्त होने के बाद परमाणु में द्व्यणुकस्वरूपद्रव्य के आरंभ (उत्पाद) का अनुगुण (जनक) क्रिया हुवी ॥४॥ उसके बाद जिस देश में वे दोनों परमाणु पृथक्रूप से थे—उन देशों से परमाणुद्वय का विभाग हुआ ॥५॥ उसके बाद परमाणुद्वय का उन देशों के साथ जो संयोग था—उसका नाश हो गया ॥६॥ उसके बाद द्व्यणुक का आरंभक परमाणुद्वय का संयोग हुवा ॥७॥ उसके बाद द्व्यणुक की उत्पत्ति ॥८॥ फिर उस द्व्यणुक में रक्त रूपादि की उत्पत्ति ॥९॥

वन्हिसंयोगादिति। वन्हिप्रतियोगिकनोदनसंयोगादित्यर्थः। परमाणौ-द्व्यणुकारंभकपरमाणौ। ततः। क्रियातः। परमाण्वन्तरेण विभागइति। परमाणुद्वयविभागइत्यर्थः। ततः। विभागात्। आरंभकसंयोगनाशइति। परमाणुद्वयसंयोगनाश इत्यर्थः। ततः। परमाणुद्वयसंयोगनाशात्। द्व्यणुकनाशइति। असमवायिकारणनाशस्य द्रव्यनाशहेतुत्वादितिभावः। द्व्यणुकनाशक्षणे एव परमाणोरुत्तरदेशसंयोगःकारणमात्रविभागजविभागानभ्युपगन्तृमते परमाणुद्वयविभागोत्त्पत्तिकाले एव परमाणोराकाशादिपूर्वदेशेन विभागोत्त्पत्तेः। परमाणुद्वयसंयोगनाशकाले एव गगनादिसंयोगनाशात्। ततः॰घणुकनाशान्तरं। श्यामादिनाशइति। परमाणौ रूपनाशं प्रति द्रव्यात्मकद्व्यणुकस्य प्रतिबन्धकतया द्व्यणुकसत्वे नाशाऽसंभवादिति भावः। इदमुपलक्षणम्—श्यामादिनाशक्षणेएवोत्तरसंयोगात्क्रियानाशोपि। ततः—श्यामादिनिवृत्त्यनन्तरं। रक्ताद्युत्पत्तिरिति। श्यामादिनाशकालोत्पन्नादन्यस्मादग्निसंयोगादित्यादिः। द्व्यणुकनाशकाग्निसंयोगस्य द्व्यणुकनाशक्षणे एव नाशादिति भावः। एतत्तत्वमेकस्मादग्निसंयोगान्नरूपनाशरक्तोत्पादौ इति पंक्तिव्याख्यानावसरे स्फुटीभविष्यति। ततः—रक्ताद्युत्पत्तौ—उत्तरसंयोगात्क्रियानिवृत्तौ च सत्यां। द्रव्यारंभानु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ननु श्यामादिनाशक्षणे रक्तोत्पत्तिक्षणे वा परमाणौ द्रव्यारम्भानुगुणाक्रियास्तु इतिचेत्—न—अग्निसंयुक्ते परमाणौ यत्कर्म तद्विनाशमन्तरेण गुणोत्पत्तिमन्तरेण च परमाणौ क्रियान्तराभावात्, कर्मवति कर्मान्तरानुत्पत्तेः, निर्गुणे द्रव्ये द्रव्यारंभानुगुणक्रियानुपपत्तेश्च । तथापि परमाणौ श्यामा-

प्रश्न—श्यामरूप का नाश परमाणु में जिस क्षण में हुवा है—उस क्षण में—अथवा परमाणु में रक्तरूप की उत्पत्ति जिस क्षण में हुवी है—उसी क्षण में परमाणु में द्वयणुकरूप द्रव्यकी (आरंभनुगुणा) उत्पादिका क्रिया मान ली जाय ।

उत्तर—अग्नि संयुक्त—परमाणु में (द्वयणुक का विनाशक) जो कर्म उसके नाश हुवे विना—एवं रक्तादि अन्य गुणों की उत्पत्ति हुवे बिना परमाणु में द्वयणुक की उत्पादक दूसरी क्रिया नहीं हो सकती है—क्योंकि प्रथम क्रिया के विद्यमान रहने पर उस द्रव्य में दूसरी क्रिया उत्पन्न नहीं हो सकती है—कारण कि प्रथमक्रिया प्रतिवन्धक हो जावेगी । और निगुर्णद्रव्य में द्वयणुकरूपद्रव्य की उत्पादक क्रिया नहीं हो सकती है—(कारण कि द्वयणुक नाश में कारणीभूत पूर्वक्रिया का नाश द्वितीयक्षण में अर्थात् श्यामनाशक्षण में होता है और तृतीयक्षण में रक्तरूप की उत्पत्ति होती है—अतः इसके वाद ही द्वयणुकरूपद्रव्य के आरंभानुगुणा क्रिया हो सकेगी—इसके लिये क्षणों के लाघव (न्यून) का विचार अकिञ्चित्कर है ।

गुणाक्रियेति । अदृष्टवदात्मसंयोगादित्यादिः । परमाणौ द्वयणुकारंभणाय क्रियेत्यर्थः । अदृष्टं च रक्ताद्युत्पत्तिकालोत्पत्तिकं ग्राह्यम्, अन्यथा रक्तानुत्पत्तिकाले द्रव्यारंभानुकूलक्रियोत्पत्तिसंभवे क्षणैकह्रासादष्टक्षणापत्तेः । विभागः देशान्तरादित्यादिः । पूर्वेति । देशान्तरानुयोगिकेत्यर्थः । आरंभकसंयोग इति । परमाणुद्वयसंयोगइत्यर्थः । ततः इति । संयुक्ताभ्यां परमाणुभ्यामित्यर्थः । ननु आरम्भकसंयोगनाशक्षणे कर्मणः सत्वात्तदानीं परमाणौ कर्मान्तरोत्पत्त्यसंभवेपि श्यामादिनाशक्षणे कर्मोत्पत्तौवाधकाभाव इत्याशंकते । नन्विति । तद्विनाशमन्तरेणेति । तथाच श्यामादिनाशक्षणे एव कर्मणो नाशात्तत्पूर्वक्षणावच्छेदेन परमाणौ कर्माऽभावस्यासत्वात्, कारणस्य कार्यपूर्ववर्त्तित्वनियमान्न श्यामादिनाशक्षणे परमाणौ कर्मान्तरोत्पत्तिसंभव इति-भावः । रक्तोत्पत्तिक्षणे कर्मान्तरोत्पत्तिं वारयति । गुणोत्पत्तिमन्तरेण चेति । क्रियान्तराभावादिति । द्रव्यारंभानुगुणक्रियोत्पत्त्यसंभवादित्यर्थः । श्यामनाशक्षणे क्रियोत्पत्तौ बाधकमप्याह निर्गुणे इति । रूपादिचतुष्टयान्यतमाभावविशिष्टे इत्यर्थः । यथाश्रुते परमाणौ श्यामादिनाशक्षणेपि एकत्वादिगुणसत्वादसंगत्यापत्तेः । द्रव्यारंभानुगुणक्रियानुत्पत्तेश्चेति । तथाच पृथिव्यादिचतुष्टयपरमाणुष्वेव तादृशक्रियोत्पत्त्या मनसि तादृशक्रियानुत्पत्त्या चाऽन्वयव्यतिरेकाभ्यां तादृशक्रियां प्रति रूपादिचतुष्टया-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दिनिवृत्तिसमकालं रक्ताद्युत्पत्तिः स्यादितिचेन्न–पूर्वरूपादिध्वंसस्यापि रूपान्तरे हेतुत्वादिति नवक्षणा।

अथदशक्षणा–साचाऽऽरम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागेन विभागजनने सति स्यात्। तथाहि–वन्हिसंयोगाद् द्वयणुकारंभके परमाणौ कर्म–ततोविभागः–ततआरम्भकसंयोगनाशः—ततोद्वयणुकनाशविभागजविभागौ १ श्यामनाशपूर्वसंयोगनाशौ २ ततोरक्तोत्पत्त्युत्तरसंयोगौ ३ ततोवन्हिनोदनजन्यपरमाणुकर्मणो नाशः ४ ततोऽदृष्टवदात्मसंयोगाद्‌द्रव्यारम्भानुगुणक्रिया ५ ततोविभागः ६ ततःपूर्वसंयोगनाशः ७ ततआरम्भकसंयोगनाशः ८ तद्द्वयणुकोत्पत्तिः ९ ततोरक्तोत्पत्तिः १० । अथैकादशक्षणा-

प्रश्न—तो भी परमाणु में श्यामनिवृत्ति (श्यामनाश) काल ही में रक्तरूप की उत्पत्ति मान ली जाय–(इससे भी एकक्षण का लाघव हो जायेगा–अर्थात् आठ ही क्षण लगेंगे)।

उत्तर—पूर्वरूप (श्याम) का ध्वंस भी रूपान्तर (रक्तरूप) की उत्पत्ति में कारण है। इति नवक्षणा।

अब दशक्षण की प्रक्रिया को बतलाते हैं–द्वयणुकरूपद्रव्यारंभकसंयोगविनाश काल ही में यदि विभागजविभाग मान लिया जाय अर्थात् परमाणुद्वयविभाग से परमाणवाकाश मान लिया जावे तो द्वयणुकरूपद्रव्य में रक्तरूप की उत्पत्ति दशक्षण में हो सकेगी–तथाहि–वन्हिसंयोग से द्वयणुकारंभक परमाणु में कर्म, उसके बाद दोनों परमाणुवों का परस्पर विभाग, फिर आरंभसंयोगनाश, उसके बाद द्वयणुकनाश और विभागजविभाग ॥१॥ उसके बाद श्यामनाश–पूर्वसंयोगनाश ॥ २ ॥ फिर रक्तोत्पत्ति–उत्तरसंयोग ॥ ३ ॥ फिर वन्हिनोदन (वन्हिसंयोग) से होने वाला जो कर्म–उसका नाश ॥४॥ उसकेबाद अदृष्टवत् आत्मसंयोग से परमाणु में द्वयणुकरूपद्रव्यारंभानुगुणा परमाणु में क्रिया ॥५॥ फिर उन परमाणुवों का देश से विभाग ॥६॥ उसके बाद पूर्वसंयोग (जो देश के साथ था) का नाश ॥७॥ फिर आरम्भसंयोग ॥८॥ तब द्वयणुकोत्पत्ति ॥९॥ उसके बाद द्वयणुक में रक्तरूप की उत्पत्ति ॥१०॥ इति दशक्षणा ॥

न्यतमविशिष्टद्रव्यस्य तादात्म्येन हेतुत्वमावश्यकमिति रक्ताद्युत्पत्तिकाले न तादृशक्रियोत्पत्तिरितिभावः। तथापीति। परमाणौ श्यामादिनिवृत्तिक्षणे रक्ताद्युत्पत्तिक्षणे वा द्रव्यारंभानुगुणक्रियोत्पत्त्यसंभवेपीत्यर्थः। रक्ताद्युत्पत्तिः स्यादिति। तत्काले प्रतिबन्धकीभूतपूर्वरूपस्याभावादित्याशयः। तथाचाऽष्टमक्षणे एव रूपोत्पत्तिर्दुर्वारेति भावः। पूर्वरूपध्वंसस्यापीति। अपिनाऽग्निसंयोगसमुच्चयः। रूपान्तरे हेतुत्वादिति तथाच श्यामादिनिवृत्तिसमकालं रक्ताद्युत्पत्तिर्न संभवति, अव्यवहितपूर्वक्षणे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वन्हिसंयोगात्परमाणौ कर्म—ततोविभागः—ततआरंभकसंयोगनाशः—ततोद्व्यणुकनाशः १ ततोद्व्यणुकनाशविशिष्टं कालमपेक्ष्य विभागजविभागश्यामनाशौ२ ततःपूर्वसंयोगनाशरक्तोत्पत्ती ३ ततउत्तरसंयोगः ४ ततोवन्हिनोदनजन्यपरमाणुकर्मणोनाशः ५ ततोऽदृष्टवदात्मसंयोगाद्द्रव्यारंभानुगुणक्रिया ६ ततोविभागः ७ ततःपूर्वसंयोगनाशः ८ ततआरम्भकसंयोगः ६ ततोद्व्यणुको-

अब एकादशक्षणवाली प्रक्रिया को बतलाते है—वन्हिसंयोग से परमाणु में क्रिया हुवी फिर परमाणुवों का परस्पर में विभाग हुवा, तब द्व्यणुकरूप द्रव्य का आरंभकसंयोगनाश हुवा, फिर द्व्यणुकनाश हुवा ॥१॥ फिर द्व्यणुकनाशोत्पत्त्यधिकरणक्षण के अव्यवहितोत्तरक्षण में विभागजविभाग—श्यामनाश ॥२॥ तब पूर्वसंयोगनाश—रक्तोत्पत्ति ॥३॥ फिर उत्तरदेश संयोग ॥४॥ उसके बाद वन्हिसंयोग से जायमान जो परमाणु में कर्म उसकानाश ॥५॥ तब अदृष्टवत् आत्मसंयोग से द्रव्यारंभानुगुणा क्रिया ॥६॥ उसके बाद विभाग ॥७॥ फिरपूर्वसंयोग नाश ॥८॥ द्व्यणुकरूपद्रव्य का आरम्भक उत्तर (परमाणुद्वय का परस्पर में) संयोग ॥९॥ उसके बाद द्व्यणुकोत्पत्ति ॥१०॥ फिर द्व्यणुक में रक्तोत्पत्ति ॥११॥

प्रतिबन्धकीभूत रूपाभावात्मककारणाभावादितिभावः । **इतिनवक्षणेति** । प्रक्रियेतिशेषः नवक्षणा यस्यामितिव्युत्पत्तिः । प्रक्रियाच—पूर्वद्व्यणुकनाशोत्पत्तिनवमक्षणे द्व्यणुकान्तरे रक्ताद्युत्पत्तिनिरूपणम् । सा प्रक्रिया च पूर्वद्व्यणुकनाशानुगुणक्रियात एव परमाणुद्वयविभागः परमाण्वाकाशविभागश्च—एवं कारणाकारणविभागेन कार्याकार्यविभागजननवत् कारणमात्रविभागेन कारणाकारणविभागजनने यदि स्वोत्तरभावी नापेक्ष्यते तदैवोपपद्यते—यदिच नैकक्रियातः द्रव्यारंभकसंयोगविरोधी तदविरोधीविभागश्चोभयम्, अथवा कारणमात्रविभागेन कारणाकारणविभागजनने स्वोत्तरभावी अपेक्ष्यते तदा दशमक्षणे रूपाद्युत्पत्तिमुपपादयति । **अथेति । साचेति** । पूर्वद्व्यणुकनाशप्रभृतिदशमक्षणे द्व्यणुकान्तरे रूपाद्युत्पत्तिश्चेत्यर्थः । **आरंभकसंयोगनाशविशिष्टं कालमपेक्ष्येति** । परमाणुद्वयसंयोगनाशोत्पत्त्यधिकरणक्षणाव्यवहितोत्तरक्षणे इत्यर्थः । **विभागेन**—कारणमात्रविभागेन—परमाणुद्वयविभागेनेतियावत् । **विभागजनने**—कारणाकारणविभागजनने—परमाण्वाकाशविभागजनने इति यावत् । **ततः**—परमाणुद्वयसंयोगनाशात् । **द्व्यणुकनाशविभागजविभागाविति** । द्व्यणुकनाशपरमाण्वाकाशविभागावित्यर्थः । कारणमात्रविभागजविभागं प्रति आरंभकसंयोगनाशस्य हेतुत्वादितिभावः । **श्यामनाशपूर्वसंयोगनाशाविति** । श्यामादेः परमाणुगगनसंयोगस्य च नाश इत्यर्थः । **रक्तोत्पत्त्युत्तरसंयोगाविति** । अन्यस्मादग्निसंयोगाद्रक्तोत्पत्तिः, परमाण्वाकाशसंयोगनाशाधीनपरमाण्वाकाशसंयोगान्तरं चेत्यर्थः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्पत्तिः १० ततोरक्तोत्पत्तिः ११ । मध्यमशब्दवदेकस्मादग्निसंयोगाच्च रूप-नाशरक्तोत्पादौ, तावत्कालमेकस्याग्नेरस्थिरत्वात् । किंच नाशक एव यद्युत्पादकस्तदा नष्टे रूपादौ तदग्निनाशे नीरूपश्चिरं परमाणुः स्यात् । उत्पादकश्चेन्नाशकस्तदा रक्तोत्पत्तौ तदग्निनाशे रक्ततरता न स्यात् ।

प्रश्न—जैसे मध्यमशब्द पूर्वशब्द का नाशक होता है--और उत्तर शब्द का उत्पादक होता है, ऐसे ही एक ही अग्निसंयोग से श्यामरूप का नाश—और रक्तरूप की उत्पत्ति परमाणु में क्यों न मान ली जाय ।

उत्तर—यदि श्यामरूप के विनाशक अग्निसंयोग को रक्तरूप का उत्पादक माना जायगा तब श्यामरूप के नष्ट हो जाने पर श्यामरूपनाशक अग्नि के भी नाश होने के पश्चात् चिरकाल तक परमाणु नीरूप ही रह जायेगा । और यदि रक्तरूप के उत्पादक अग्निसंयोग को श्यामरूप का नाशक माना जावे तब रक्तरूप की उत्पत्ति हो जाने पर श्यामरूप के नाशक अग्नि के नाश हो जाने पर रक्ततरता परमाणु में न आ सकेगी । ये एकादशक्षण हुवे ।

ततः-उत्तरसंयोगात् । वन्हिनोदनजन्यपरमाणुकर्मणोनाश इति । कर्मणः स्वजन्योत्तरसंयोगनाश्यत्वादितिभावः । अयमेव दशसंख्यापूरकः क्षणः । एकादशक्षणेति । क्रियते तथाहीतिशेषः । उत्तरदेशसंयोग इति । अयमेव एकादशसंख्यापूरकः क्षणः ।

अत्र येनाग्निसंयोगेन क्रियाविभागद्वारा द्व्यणुकनाशः, स एव श्यामादिनाशकः-रक्ताद्युत्पादकश्चास्तु । अथवा श्यामादिनाशकोग्निसंयोग एव रक्ताद्युत्पादकोस्त्वितिशंकाद्वयंनिरस्यति । मध्यमशब्दवदिति । यथामध्यमशब्दात्पूर्वशब्दनाशोत्तरशब्दोत्पादौ भवतः, तथा-एकस्मादग्निसंयोगाद् "द्व्यणुकनाशकात्" न श्यामनाशरक्तोत्पादौ भवतः इति व्यतिरेकदृष्टान्तः । द्व्यणुकनाशकाग्निसंयोगस्य श्यामादिनाशाऽजनकत्वे हेतुमाह । तावत्कालमिति । श्यामादिनिवृत्तिक्षणेतदव्यवहितपूर्वक्षणे चेत्यर्थः । एकस्याग्नेरिति । द्व्यणुकनाशकाग्निसंयोगस्येत्यर्थः । अस्थिरत्वादिति । अवर्त्तमानत्वादित्यर्थः । यदा परमाणावग्निसंयोगात्कर्म तदैव तादृशाग्निसंयोगजनककर्मणो नाशः "कर्मणः स्वजन्यसंयोगविनाश्यत्वात्" । ततो विभागः-अग्नौ कर्मान्तरं च "तादृशाग्निसंयोगजनकक्रियाध्वंसरूपप्रतिबन्धकाभावस्य अभिघातादेश्च सत्वात्" । ततश्चारंभकसंयोगनाशः-अग्निक्रियाजन्यविभागश्च । ततो द्व्यणुकनाशः-अग्निसंयोगनाशश्च जायते इति तादृशाग्निसंयोगाच्छ्यामादिनाशो न संभवति । तादृशाग्निसंयोगस्य श्यामादिनाशाव्यवहितपूर्वक्षणे एव नाशादिति अन्यस्मादग्निसंयोगादेव श्यामादिनाशोऽङ्गीकार्य इति भावः ।

ननु मास्तु द्व्यणुकनाशकाग्निसंयोगस्य श्यामादिनाशकत्वं रक्तोत्पादकत्वं च परन्तु श्यामादिनाशकाग्न्यन्तरसंयोगस्य रक्तोत्पादकत्वमस्तु इति द्वितीयशंका

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ परमाण्वन्तरे कर्मचिन्तनात्पञ्चमादिक्षणेऽपि गुणोत्पत्तिः।

अथ पञ्चक्षणा—(अन्य लोग द्वयणुकनाश होने के पश्चात् पुनः उत्पन्न द्वयणुक-द्वयणुकनाशक्षण से लेकर पांच-छः-सात-आठ क्षणों में भी रक्तरूप वाला हो सकता है ऐसा कहते हैं) उनमें से पाँच क्षण दिखलाते हैं कि परमाण्वन्तर में अर्थात् द्वयणुकनाशकक्रियावच्छिन्नपरमाणु से भिन्न द्वयणुकारंभक परमाणु में यदि कर्मचिन्तन करते हैं अर्थात् उत्पन्न जो द्वयणुक—तदारंभक जो संयोग--तादृशसंयोगनाशक्षण में यदि उत्पन्न होने वाले द्वयणुक के आरम्भक कर्म को स्वीकार करते हैं तो पञ्चम आदि क्षणों में भी गुणोत्पत्ति होती

निरस्यति। **किंचेति। नाशक एवेति।** एवकारेण नाशकतावच्छेदकव्याप्यं यद्युत्पादकतावच्छेदकं स्यात्तदेत्यर्थोलभ्यते। **नष्टे रूपादाविति।** विनश्यदवस्थाग्निसंयोगेनेत्यादिः। श्यामादौ नष्टेसतीत्यर्थः। **अग्निनाश** इति। तादृशाग्निसंयोगस्य श्यामादिनाशकाले नाशे सतीत्यर्थः। **नीरूपश्चिरं परमाणुः स्यादिति।** श्यामादिनाशकालेऽग्निसंयोगनाशेनोत्तरक्षणेरक्तोत्पत्त्यसंभवेन सर्वदा रूपाद्यभाववानेन परमाणुः स्यादित्यर्थः। नच श्यामादिनाशक्षणोत्पन्नाऽग्न्यन्तरसंयोगेन रक्तोत्पत्तौ बाधकाभाव इति वाच्यम्। तथाप्युत्पादकतावच्छेदकस्य नाशकतावच्छेदकव्याप्यमहिम्ना उत्पादकाग्निसंयोगस्योत्पन्नरक्तादिनाशकत्वावश्यकतया पुनरग्न्यन्तरसंयोगात्पुनः-रूपाद्युत्पत्तिस्वीकारेपि तेनैवाग्निसंयोगेन उक्तनियमबलात्तादृशरूपादेरपि नाशावश्यकतया परमाणोर्नीरूपत्वापत्तेर्दुर्वारत्वात्। नैयायिकमते तु अवयविनामपि नीरूपत्वापत्तिर्बोध्या। ननु रक्तोत्पादकतावच्छेदकवैजात्यं न श्यामनाशकतावच्छेदकवैजात्यव्याप्यम्, अपितु वैजात्ययोरभेदइति ब्रूमः। एवं च चरमाग्निसंयोगस्य रक्ताद्युत्पादकस्य तन्नाशस्वरूपयोग्यत्वेपि तादृशसंयोगस्यानुभवानुरोधेन रूपनाशं प्रति प्रतिबन्धकत्वस्वीकारात्तादृशाग्निसंयोगाद्रूपनाशाऽसंभवेन न पूर्वोक्तनीरूपत्वापत्तिरतोदोषान्तरमाह। **उत्पादकश्चेदिति।** नाशक उत्पादकश्चेदिति योजना। नाशकतावच्छेदकमेव यद्युत्पादकतावच्छेदकं तदेत्यर्थः। **रक्तोत्पत्ताविति।** श्यामादिनाशकचरमाग्न्यन्तरसंयोगेन रक्ताद्युत्पत्तावित्यर्थः। **तदग्निनाशे** इति। चरमाग्निसंयोगनाशे सतीत्यर्थः। **रक्ततरता न स्यादिति।** अयं भावः। रूपनाशकतावच्छेदकं विलक्षणाग्निसंयोगत्वं तदेव यद्युत्पादकतावच्छेदकं तदा कार्यतावच्छेदकमपि सामान्यतः पृथिवीपरमाणुरूपत्वं त्वया वाच्यं, तथासति क्वचिद्रक्ततरता क्वचिद्रक्ततमता परमाणौ न स्यात्कार्यवैचित्र्यस्य कारणतावच्छेदकभेदाधीनत्वादित्यलम्।

सेयं प्रक्रिया एकस्मिन्नेव परमाणौपूर्वद्वयणुकनाशिका उत्तरद्वयणुकोत्पादिका च क्रिया इति विशेषमाश्रित्य, यदा तु एकत्र परमाणौ द्वयणुकविनाशिका, अन्यस्मिन्परमाणौ द्वयणुकान्तरोत्पादिका क्रिया तदा द्वयणुकविनाशमारभ्य पञ्चमे षष्ठे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तथाहि—एकत्र परमाणौ कर्म-ततोविभागः—तत आरंकसंयोगनाशपरमाण्व-न्तरकर्मणी—ततस्तु द्व्यणुकनाशः—परमाण्वन्तरकर्मजन्यविभागइत्येकः कालः १ ततः श्यामादिनाशः—विभागाच्च पूर्वसंयोगनाशश्चेत्येकः कालः २ ततोरक्तोत्पत्तिः—द्रव्यारम्भकसंयोगश्चेत्येकः कालः ३ ततोद्व्यणुकोत्पत्तिः ४ ततो रक्तोत्पत्तिः ५ । इति पञ्चक्षणा । द्रव्यनाशसमकालं परमाण्वन्तरे कर्मचिन्तनात्षष्ठे गुणोत्पत्तिः—तथाहि—परमाणुकर्मणा परमाण्वन्तरविभागः-तत आरम्भकसंयोगनाशः—अथ द्व्यणुकनाशपरमाण्वन्तरकर्मणी १ अथ-

है—तथाहि--एक परमाणु में कर्म हुवा--उसके बाद दोनों परमाणुवों का विभाग, फिर द्व्यणुक का आरंभक जो परमाणुद्वयसंयोग उसका नाश तथा द्व्यणुक का आरम्भक जो परमाणुद्वय संयोग इसका नाश तथा द्व्यणुक का आरंभक जो परमाण्वन्तर उसमें क्रिया, फिर द्व्यणुक नाश, और दूसरे परमाणु में क्रिया से परमाणु आकाश का विभाग यह एक क्षण हुवा ॥ १ ॥ फिर श्यामरूप का नाश और विभाग होने से आकाश के साथ जो परमाणु का संयोग था उसका नाश ॥ २ ॥ तब परमाणु में रक्तोत्पत्ति तथा द्व्यणुक का आरंभक परमाणुद्वयसंयोग हुवा ॥ ३ ॥ फिर द्व्यणुक की उत्पत्ति हुवी ॥ ४ ॥ तब द्व्यणुक में रक्तरूप की उत्पत्ति हुवी ॥ ५ ॥

द्व्यणुक नाश क्षण में परमाण्वन्तर में यदि कर्म मानें तो षष्ठ क्षण में द्व्यणुक फिर से रक्तरूप वाला हो सकेगा—तथाहि—परमाणु में क्रिया होने से दूसरे परमाणु से विभाग हुवा, उसके बाद आरंभ संयोग नाश, फिर द्व्यणुक नाश और परमाण्वन्तर में कर्म यह ॥ १ ॥

सप्तमे अष्टमे वाक्षणे रक्तोत्पत्तिः, तत्रापि आरम्भकसंयोगनाशक्षणे परमाण्वन्तरे कर्मोत्पत्तौपञ्चमक्षणे, द्व्यणुकनाशक्षणे तदुत्पत्तौ षष्ठक्षणे, श्यामादिनाशक्षणे तदुत्पत्तौ सप्तमक्षणे, रक्तोत्पत्तिक्षणे तदुत्पत्तौ अष्टमक्षणे रक्तरूपोत्पत्तिर्बोध्या। तदेवविशदयति । परमाण्वन्तरे इति । द्व्यणुकनाशककर्मवत्परमाणुभिन्ने द्व्णुकान्त-रारंभकपरमाणौ इत्यर्थः । कर्मचिन्तनादिति । द्व्यणुकारंभकसंयोगनाशाद्युत्पत्तिक्षणे द्व्णुकान्तरारंभककर्मोत्पत्तिस्वीकारादित्यर्थः । पञ्चमादिक्षणेपीति । द्व्यणुकनाश-प्रभृतीत्यादिः । गुणोत्पत्तिरिति । रक्ताद्युत्पत्तिरित्यर्थः । संभवतीतिशेषः । सम्भव-प्रकारमेवाह । तथाहीति । ततोविभाग इति । परमाणुद्वयविभागइत्यर्थः । आरंभ-कसंयोगनाशपरमाण्वन्तरकर्मणीति । द्व्णुकारंभकसंयोगनाशः—द्व्णुकारंभकं परमा-णुकर्मचेत्यर्थः । परमाण्वन्तरकर्मजन्यविभागइति । परमाण्वाकाशविभाग इत्यर्थः । पूर्वसंयोगनाशश्चेति । परमाण्वाकाशसंयोगनाशश्चेत्यर्थः । द्रव्यारंभकसंयोग-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्यामनाशपरमाण्वन्तरकर्मजो विभागश्च २ ततोरक्तोत्पत्तिः परमाण्वन्तरे पूर्वसंयोगनाशश्च ३ ततः परमाण्वन्तरसंयोगः ४ ततो द्वयणुकोत्पत्तिः ५ ततो रक्तोत्पत्तिः ६ । इति षट्क्षणा । एवं श्यामनाशक्षणे परमाण्वन्तरे कर्मचिन्तनात्सप्तक्षणा—तथाहि—परमाणौ कर्म—ततः परमाण्वन्तरेण विभागः—तत आरम्भकसंयोगनाशः—ततो द्वयणुकनाशः १ ततः श्याम-नाशपरमाण्वन्तरकर्मणी २ ततो रक्तोत्पत्तिः परमाण्वन्तरे कर्मजविभागश्च ३ ततः परमाण्वन्तरेण पूर्वसंयोगनाशः ४ ततः आरंभकसंयोगः ५ ततो द्वयणुकोत्पत्तिः ६ ततो रक्तोत्पत्तिः ७ इति सप्तक्षणा । रक्तोत्पत्ति-

क्षण ॥ फिर श्याम नाश, और परमाण्वन्तर में क्रिया होकर आकाश से परमाणु का विभाग ॥ २ ॥ तब परमाणु में रक्तोत्पत्ति तथा परमाण्वन्तर में पूर्वाकाशसंयोग नाश ॥ ३ ॥ फिर एक परमाणु का परमाण्वन्तर के साथ संयोग ॥ ४ ॥ तब फिर द्वयणुकोत्पत्ति ॥ ५ ॥ फिर द्वयणुक में रक्तोत्पत्ति ॥ ६ ॥ इति षट्क्षणा ॥

इसी प्रकार श्याम नाश क्षण में परमाण्वन्तर में कर्मोत्पत्ति पक्ष में सात क्षण होते हैं—तथाहि—परमाणु में कर्म फिर परमाण्वन्तर से विभाग, तब आरंभक संयोगनाश, फिर द्वयणुक-नाश ॥ १ ॥ फिर श्यामनाश और परमाण्वन्तर में कर्म ॥ २ ॥ उसके बाद परमाणु में रक्तोत्पत्ति तथा परमाण्वन्तर में क्रिया होने से परमाण्वाकाश विभाग हुआ ॥ ३ ॥ तब परमाण्वन्तर से आकाश का पूर्वसंयोगनाश ॥ ४ ॥ उसके बाद एक परमाणु का दूसरे परमाणु के साथ संयोग ॥ ५ ॥ फिर द्वयणुकोत्पत्ति ॥ ६ ॥ तब द्वयणुक में रक्तोत्पत्ति ॥ ७ ॥ इति सप्तक्षणा ।

द्वेति । परमाणुद्वयसंयोगइत्यर्थः । एवमग्रेपि । **अष्टक्षणेति** । अष्टौ क्षणाः यस्या-मितिवहुव्रीहिः । अष्टक्षणाप्रक्रियेतिशेषः ।

ननु द्वणुकविनाशोत्पत्तिद्वितीय-तृतीय-चतुर्थक्षणेष्वपि रक्ताद्युत्पत्तिः संभवति, सा प्रक्रिया कथमुपेक्षिता । द्वयणुकनाशसमकालं द्वणुकोत्त्पत्तिस्वीकारे द्वितीयक्षणे, द्वणुकनाशसमकालं आरंभकसंयोगोत्त्पत्तिस्वीकारे तृतीक्षणे, तादृशनाशसमकालं परमाण्वन्तरस्य पूर्वसंयोगनाशस्वीकारे चतुर्थक्षणे रक्ताद्युत्पत्तिः संभवति-तथाहि—द्वयणुकारंभकंपरमाण्वन्तरे कर्म—ततः परमाणौ द्वयणुकनाशकं कर्म-परमाण्वाकाश-विभागश्च । ततः परमाण्वाकाशसंयोगनाश परमाणुद्वयविभागश्च । ततः आरंभक-संयोगः पूर्वपरमाणुद्वयसंयोगनाशश्च । ततोद्वयणुकान्तरोत्पत्तिः पूर्वद्वयणुकनाशश्च । ततो रक्तोत्पत्तिः। एवं एकस्मिन् परमाणौ द्वयणुकनाशकं कर्म—परमाण्वन्तरे द्वयणुकारंभकं कर्म । ततः परमाण्वन्तरविभागः परमाणुद्वयविभागश्च । ततः परमाण्व-न्तरस्य पूर्वदेशसंयोगनाशः—परमाणुद्वयसंयोगनाशश्च । तत आरंभसंयोगद्वयणुक-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नैयायिकानां तु नये द्व्यणुकादावपीष्यते ।

समकालं परमाण्वन्तरे कर्मचिन्तनादष्टक्षणा–तथाहि–परमाणौ कर्म–ततः परमाण्वन्तरविभागः–तत आरम्भकसंयोगनाशः–ततो द्व्यणुकनाशः १ ततः श्यामनाशः २ ततो रक्तोत्पत्तिपरमाण्वन्तरकर्मणी ३ ततः परमाण्वन्तर कर्मजविभागः ४ ततः परमाण्वन्तरे पूर्वसंयोगनाशः ५ ततः परमाण्वन्तर संयोगः ६ ततो द्व्यणुकोत्पत्तिः ७ ततो रक्तोत्पत्तिः ८ इति अष्टक्षणा ॥१०५॥

नैयायिकानामिति । नैयायिकानां मते द्व्यणुकादावयविन्यपि पाको भवति । तेषामयमाशयः । अवयविनां सच्छिद्रत्वाद्वन्हेःसूक्ष्मावयवैरन्तः प्रविष्टैरवयवेषु अवष्टब्धेष्वपि पाकोन विरुद्धयते । अनन्तावयवितन्नाशकल्पने

रक्तोत्पत्ति क्षण में परमाण्वन्तर में यदि कर्म चिन्तन करें तो आठ क्षण में द्व्यणुक फिर से रक्तरूपवाला हो सकेगा–तथाहि–परमाणु में कर्म, फिर परमाण्वन्तर से विभाग, त आरंभसंयोग नाश, फिर द्व्यणुकनाश ॥ १ ॥ फिर परमाणु में श्यामनाश ॥ २ ॥ त परमाणु में रक्तोत्पत्ति और परमाण्वन्तर में कर्म ॥ ३ ॥ फिर परमाण्वन्तर में क्रियाजन परमाणु आकाश का विभाग ॥ ४ ॥ उसके वाद परमाण्वन्तर से आकाश का पूर्वसंयो नाश ॥५॥ तब एक परमाणु का दूसरे परमाणु के साथ संयोग ॥६॥ फिर द्व्यणुकोत्पत्ति ॥७॥ तब रक्तोत्पत्ति ॥ ८ ॥ ये अष्टक्षण हुवे ।

गौतममतावलम्बियों के मत में द्व्यणुक आदि अवयवी में भी पाक होता है । उनक यह आशय है कि—घट आदि अवयवी सच्छिद्र होते हैं–अतः वन्हि के सूक्ष्म अवयव–सच्छिद्र अवयवी के अन्तः प्रविष्ट होकर अवयवी से अवष्टब्ध (आवृत) एवं अवयवी के आकार से संबद्ध अर्थात् ज्यों के त्यों बने हुवे अवयवों में भी पाक संपन्न कर देते हैं–अतः अवयवी में

नाशश्च । १ ततो द्व्यणुकान्तरोत्पत्तिः । २ ततो रक्तोत्पत्तिः । ३ एवं परमाणौ कर्म–ततः परमाण्वन्तरे कर्म–परमाणुद्वयविभागश्च । ततः परमाणुद्वयसंयोगनाशः–परमाण्वाकाशविभागश्च । ततो द्व्यणुकनाशः–पूर्वदेशसंयोगनाशश्च १ उत्तरदेश-संयोगः २ द्व्यणुकान्तरोत्पत्तिः ३ रक्तोत्पत्तिरितिद्वित्रिचतुर्षु क्षणेषु द्व्यणुके रक्तोत्पत्तिः सुकरैवेति चेन्न । द्व्यणुकनाशक्षणे द्व्यणुकोत्पत्तिर्न संभवति, पूर्वक्षणे परमाणौ प्रतिबन्धकीभूतद्व्यणुकसत्वात्, समवायेन द्रव्यंप्रति समवायसंबन्धावच्छिन्नप्रतियोगिताकद्रव्याभावहेतुतायाः सर्वसिद्धत्वात् । द्व्यणुकनाशात्पूर्वं परमाणूनां श्यामत्वेनाऽरक्ततया तेषां रक्तसमवायिद्व्यणुकान्तरोत्पादकत्वासंभवात् । द्व्यणुकोत्पत्तिसमये द्वयोरेव परमाण्वोर्नीरूपत्वापत्या चतुर्थक्षणेपि रूपोत्पत्यसंभवादिति दिक् । १०५

द्व्यणुकादावयविन्यपीति । द्व्यणुकप्रभृतिअन्त्यावयविपर्यन्ताऽवयविसमुदायेपीत्यर्थः । अपिना परमाणुपरिग्रहः । पाकोभवतीति । पूर्वरूपपरावृत्तिः, रूपान्तरो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गौरवात् । इत्थं च सोयं घट इति प्रत्यभिज्ञापि संगच्छते । यत्र तु न प्रत्यभिज्ञा तत्रावयविनाशोपि स्वीक्रियते इति ।

पाक मानने पर कोई विरोध नहीं है। और वैशेषिकों के मत में अनन्त अवयवी एवं उनके नाश की कल्पना करने में गौरव है। इसीलिये अवयवी में पाक मानने पर ही "सोऽयं घटः" वह प्रत्यभिज्ञा भी नैयायिकों के मत में संगत हो जाती है। और जिस मत में पक्वघट में यह प्रत्यभिज्ञा नहीं होती है—उस मत में अवयवी विनाश स्वीकार करने में कोई आपत्ति नहीं है।

त्पत्तिश्च भवतीत्यर्थः । तेषामिति । नैयायिकानामित्यर्थः । अयमिति । वक्ष्यमाण इत्यर्थः । आशयइति । बोध्यइतिशेषः । आशयमेवोपपादयति । अवयविनामिति । घटादीनामित्यर्थः । सच्छिद्रत्वादिति । वन्हेःसूक्ष्मावयवानां प्रवेशमात्रयोग्यछिद्रवत्वादित्यर्थः । वन्हेः सूक्ष्मावयवैरिति । घटावयविषु इत्यादिः । अन्तःप्रविष्टैरिति। अवयव्यन्तः प्रविष्टैः वन्हेः सूक्ष्मावयवैरित्यर्थः । अवयवेष्ववष्टब्धेष्वपीति । अवयविना सहेत्यादिः । अवयविनाऽवष्टब्धेष्ववयवेष्वपीत्यर्थः । अपिनाऽवयव्यनवष्टब्धावयवपरिग्रहः । पाकइति । पूर्वरूपपरावृत्तिः रूपान्तरोत्पादश्चेत्यर्थः । नविरुध्यतेइति । अवयविना न बाध्यते इत्यर्थः । घटादेः सच्छिद्रत्वात् तस्य घटोपादानयावदवयवेषु वह्निसंयोगविघटकत्वासंभवादितिभावः । अवयविनाशानंगीकारे बाधकाभावमुक्त्वा तदङ्गीकारे बाधकमप्याह । अनन्तावयवीति । इत्थंचेति । अवयविनाशानङ्गीकारे चेत्यर्थः । प्रत्यभिज्ञापि संगच्छतेइति । तादृशप्रत्यभिज्ञायाः प्रमात्वमुपपद्यते इत्यर्थः । पूर्वावयविविनाशे तूत्तरोत्पन्नावयविनि पूर्वावयविनोऽभेदाभावेनाऽभेदावगाहिप्रत्यभिज्ञायाः प्रमात्वं न स्यादिति भावः । यत्र । वक्रसच्छिद्रादिघटे । तत्रेति । यत्र कुलालस्य भोक्तुर्वा दुरदृष्टसहकृतसामग्रीतः सच्छिद्रघटादेरुत्पत्तिस्तत्रैवेत्यर्थः । अत्रेदं चिन्त्यते । नैयायिकैरपि क्वचिद् वैशेषिकप्रक्रियायाः स्वीकरणीयतया घटारंभकसकलपरमाणुष्वपि वन्हिसंयोगाद् द्व्यणुकनाशकक्रियोत्पत्तेः सत्त्वात्सर्वघटनाश आवश्यकः, तादृशाग्निसंयोगस्य विजातीयत्वे प्रमाणाभावात् । नचैवं सोयं घट इति प्रत्यिभिज्ञा कुत्रचित्कथं संगच्छते इति वाच्यम् । प्रमाणेन पूर्वघटनाशसिद्धौ क्वचित्तादृशप्रभिज्ञाया; तदेवौषधमित्यादिप्रत्यभिज्ञाया इव सजातीयाऽभेदविषयकत्वस्वीकारेणैवोपपन्नत्वादिति । अथ नैयायिकमते नीलादिकं प्रति अवयवनीलस्याऽग्निसंयोगस्य च हेतुतया परस्परं व्यभिचारेण कथं कार्यकारणभावः, कथं वा तेजःसंयोगस्य नीलादिनाशकत्वम्, आश्रयनाशस्याप्युक्तक्रमेण नीलादिनाशकतया व्यभिचारात् । नच नीलादिकं प्रति अवयवनीलादेर्हेतुत्वे मानाभावः, तत्तद्द्रव्यक्तिसमवेतं प्रति तत्तद्व्यक्तित्वेन समवायिकारणतया यावद्वि-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शेषसामग्रीबाधादेव पीताद्यारब्धेऽवयविनि नीलाद्यनुत्पादात्, तत्तद्व्यक्तिसमवेतातिरिक्तस्य नीलादेरलीकत्वादिति वाच्यम्। भावकार्याणां साऽसमवायिकारणकत्वनियमानुरोधेनाऽवयविनीलादिकं प्रति अवयवनीलादेरसमवायिकारणत्वस्यावश्यकत्वात्, अवयविनीलादिकं प्रति अवयवनीलादेरकारणत्वे नीलावयविनि पाकात्पीतोत्पत्तिदशायां नीलोत्पत्तेर्दुर्वारत्वाच्च। नीलरूपस्यापि तद्व्यक्तिसमवेतत्वेन तद्वयविव्यक्तिनीलरूपं प्रत्यपि समवायिकारणत्वादितिचेन्न–विलक्षणनीलत्वेन कार्यता, नीलत्वेन कारणता, समवायेन विलक्षणनीलं प्रति स्वाश्रयसमवेतत्वसंबन्धेन नीलस्य कारणत्वात्। वैलक्षण्यं च नीलादिजन्यतावच्छेदकतया सिद्धो नीलत्वव्याप्यजातिविशेषः, सच परमाणुरूपव्यावृत्तोऽवयविपाकजरूपव्यावृत्तश्चाऽतोनव्यभिचारः।

एवं विलक्षणनीलत्वेन तेजः संयोगत्वेन कार्यकारणभावः, कार्यताकारणतावच्छेदकसंबन्धश्च समवायः वैलक्षण्यं च पाकजन्यतावच्छेदकतया सिद्धो नीलत्वव्याप्यजातिविशेषः, सच नीलजन्यतावच्छेदककजातिविरुद्धोनिखिलपरमाणुनीलवृत्तिः, अवयविपाकजनीलवृत्तिश्च। न च विलक्षणनीलत्वावच्छिन्नं प्रति तेजः संयोगत्वेन हेतुत्वे यथाकथंचित्तेजःसंयोगादपि नीलोत्पत्त्यापत्तिरिति वाच्यम्। विलक्षणतेजःसंयोगत्वेन हेतुत्वात्। नचावयवनीलादेः तत्तज्जातिविशेषावच्छिन्नं प्रति हेतुत्वे नीलत्वं कस्य कार्यतावच्छेदकमिति वाच्यम्। पृथिवीत्वेन मूर्तत्वेन वा तदवच्छिन्नं प्रति समवायिकारणत्वात्। विलक्षणतेजः संयोगा–वयवनीलात्मकविशेषकारणद्वयाभावादेव द्रव्यान्तरे तदनुत्पादसंभवात्, तेजस्यपि विलक्षणतेजःसंयोगसत्वेपि विद्यमानरूपेणैव प्रतिबन्धात्। एतेन पीतादिरूपाणि रसगन्धस्पर्शनैमित्तिकद्रवत्वादि च व्याख्यातानि। न च शुक्लजन्यतावच्छेदकशुक्लनिष्ठवैजात्यम्, भास्वरत्वादिना संकरप्रसंगभयाद् दुर्वचमिति वाच्यम्। पृथिव्यवयविवृत्तिशुक्लमात्रवृत्तिवैजात्यविशेषः पृथिवीशुक्लजन्यतावच्छेदकः, भास्वरादिजन्यतावच्छेदकश्चअवयविभास्वरमात्रवृत्तिजातिविशेषइत्यभ्युपगमादिति न काप्यनुपपत्तिः।

तेजःसंयोगनीलाद्योर्नाश्यनाशकभावस्तु विशेषणताविशेषवद्रूपनाशं प्रति विलक्षणतेजःसंयोगः कारणम्। आश्रयनाशजन्यरूपनाशे व्यभिचारवारणाय विशेषणताविशेषवदितिरूपनाशविशेषणम्। विशेषणताविशेषश्च प्रतियोगिसमवायिनि यादृशविशेषणतया नाशो वर्तते तादृशविशेषणता। तथाच प्रतियोगितासंबन्धेन रूपनाशं प्रति स्वसमवायिपृथिवीसमवेतत्व स्ववृत्तिरूपत्वोभयसंबन्धेन विलक्षणतेजःसंयोगः कारणम्। स्वसमानाधिकरणरसगन्धादौ प्रतियोगितासंबन्धेन रूपनाशोत्पादवारणाय स्ववृत्तिरूपत्वस्य संबन्धकोटौ प्रवेशः। स्ववृत्तित्वं च कालिकविशेषणतया बोध्यम्। स्वसमवायिसमवेतत्वविशिष्टरूपत्वस्य संबन्धत्वे रूपत्वविशिष्टस्वसमवायिसमवेतत्वमादाय विनिगमनाविरहान्नाश्यनाशकभावद्वयापत्तिरिति तत्परित्यागः। तेजोवृत्तिरूपे प्रतियोगितासंबन्धेन तादृशरूपनाशापत्तिवारणाय पृथिवीत्वनिवेशः। अतएव पृथिवीत्वजातिरपि प्रामाणिकी। नच यत्र विशेषणताविशेषेण रूपनाशः तत्र स्ववृत्तिपृथिवीत्व, समवायोभयसंबन्धेन विलक्षण

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तेजःसंयोगः इत्येव कार्यकारणभावोऽस्तु लाघवात्, विशेषणताविशेषस्य कार्यतावच्छेदकसंबन्धत्वादेवाऽऽश्रयनाशजन्यरूपनाशे व्यभिचारविरहादिति वाच्यम्। तथासति विद्यमानरूपस्येव विनिगमनाविरहेणाऽतीतानागतरूपस्यापि नाशोत्पत्तिप्रसंगात्। प्रतियोगिनो ध्वंसहेतुत्वे मानाभावाद् गौरवाच्च। प्रतियोगिनो ध्वंसहेतुत्वाभ्युपगमेऽपि तत्तद्व्यक्तित्वेनैव हेतुत्वात्।

वस्तुतस्तु रूपनाशत्वावच्छिन्नं प्रत्येव विलक्षणतेजःसंयोगस्य हेतुत्वम्, नतु विशेषणताविशेषेण वृत्तिम दितिरूपनाशविशेषणम्। आश्रयनाशानाश्यरूपवृत्तिप्रतियोगिता च कार्यतावच्छेदकसंबन्धः, ध्वंसभेदेन प्रतियोगिताभेदस्य सर्वसिद्धत्वात्, अत आश्रयनाशजन्यरूपनाशे न व्यभिचारः। एवमेव रसगन्धस्पर्शद्रवत्वनाशकत्वमपि तेजःसंयोगस्यावसेयम्। रूपरसादिभेदेन नाश्यनाशकभावपंचकस्यानायत्याऽभ्युपगमात्।

अस्तु वा रूपरसगन्धस्पर्शद्रवत्वसाधारणमूर्तविशेषगुणत्वाख्यमेकं वैजात्यं पाकनाश्यतावच्छेदकम्, तदवच्छिन्ननाशत्वमेव कार्यतावच्छेदकम्, न तु रूपरसादिभेदेन नाश्यनाशकभावभेदो गौरवात्, पाकाद्रूपादीनां पंचानामेकतमनाशोत्पत्तिसमये पंचानामेवाऽवश्यं विनाश इत्युभ्युपगमात्। कारणतावच्छेदकसंबन्धघटकमपि स्ववृत्तिमूर्तविशेषगुणत्वमेव। पृथिवीत्वस्य कारणतावच्छेदकसंबन्धघटकतयैव तेजोवृत्तिरूपादेरिव सांसिद्धिकद्रवत्वस्यापि पाकान्न नाशः। नच नैमित्तिकद्रवत्वस्यापि विशेषगुणत्वे सिद्धान्तविरोधः। पारिभाषिकविशेषगुणत्वमादायैव तदुपपत्तेः।

नच चाक्षुषत्वाचोभयप्रतिबन्धकतावच्छेदकरसगन्धगुरुत्वस्थितिस्थापकवृत्तिवैजात्येन समं सांकर्यापत्त्या न तादृशजातिसंभवः, तद्वैजात्यस्य रसगन्धमात्रवृत्तित्वे गुरुत्वस्थितिस्थापकयोश्चाक्षुषापत्तेः, मानसप्रतिबन्धकतावच्छेदकभावनाधर्माधर्मनिष्ठवैजात्यस्यैव मानसत्वावच्छिन्नं विहाय प्रत्यक्षत्वावच्छिन्नं प्रति प्रतिबन्धकतावच्छेदकतया गुरुत्वस्थितिस्थापकसाधारण्येन कल्पने आत्ममनःसंयोगजन्यतावच्छेदकाऽऽत्मविशेषगुणत्वमादाय सांकर्यमिति वाच्यम्। जातिद्वयस्यैव चाक्षुषत्वाचोभयप्रतिबन्धकतावच्छेदकत्वात्, एका रसगन्धमात्रनिष्ठा, अन्या च गुरुत्वस्थितिस्थापकनिष्ठेति।

अथ रूपनाशकतावच्छेदकमग्निसंयोगनिष्ठवैलक्षण्यं न नीलादिजनकतावच्छेदकाग्निसंयोगनिष्ठवैलक्षण्यस्य व्याप्यं तदभिन्नं वा व्यभिचारेण रूपनाशत्वस्य मूलविशेषगुणत्वस्य वा तत्कार्यतावच्छेदकत्वाऽसंभवात्। नापि नीलादिजनकतावच्छेदकवैलक्षण्यव्यापकं, यत्र परमाण्वन्तं घटादौ आशुअग्निसंयोगोत्पत्तिद्वितीयक्षणेपरमाण्वन्तं घटे पूर्वरूपनाशोऽग्निक्रियानाशश्च—ततः परमाण्वन्तं घटे रूपान्तरोत्पत्तिः अग्नेः क्रियान्तरोत्पत्तिश्च, तेजसोऽतिशयितगमनशीलत्वात्, ततस्तद्रूपविनाशोऽग्निघटादिविभागश्च—ततोऽग्निसंयोगनाशः—इदानीं च घटादौ न पुनः रूपान्तरोत्पत्तिः, असमवायिकारणस्य कार्यसहभावेन हेतुत्वात्, तत्र घटादेर्नीरूपत्वप्रसंगात्, सर्वत्र मध्यमरूपव्यक्तीनां क्षणिकत्वप्रसंगाच्चेति चेन्न। अन्यथाऽसमवायि-

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
CC-0. Jangamwadi Math Collection. Digitized by eGangotri
Jangamawadi Math, Varanasi
Acc. No. 3847

गणनाव्यवहारे तु हेतुः संख्याभिधीयते ॥१०६॥

संख्यां निरूपयितुमाह । गणनेति । गणनाव्यवहाराऽसाधारणकारणं संख्येत्यर्थः ॥१०६॥

संख्या का निरूपण करते हैं—गणना का जो व्यवहार (एक–दो–तीन इत्यादि) उसका असाधारण कारण संख्या है। नित्य परमाणु आदि में एकत्व संख्या नित्य है–अनि

कारणस्य कार्यसहभावेन हेतुत्वेपि अत्र तेजःसंयोगस्य तथा हेतुत्वानभ्युपगमात्। नच तथापि क्षणिकत्वापत्तिर्दुर्वारेति वाच्यम्। मध्यमरूपव्यक्तीनां क्षणिकत्वस्येष्टत्वात्।

यद्वा नीलादिजनकतावच्छेदकजातिविरुद्धजातेरेव रूपादिनाशकतावच्छेदकत्वात्, उत्पादकाग्निसंयोगान्न तन्नाशसंभवः। एवं चैकस्मादग्निसंयोगाच्छ्यामादिविनाशः, अन्यस्माचाग्निसंयोगाच्छ्यामादिनाशकालोत्पन्नाद्रक्ताद्युत्पत्तिः अग्निसंयोगवत्यपि अग्न्यन्तरसंयोगोत्पत्तौ बाधकाभावात्। निविडयोर्मूर्त्तयोरेव समानदेशताविरोधात्।

वस्तुतस्तु रूपनाशकतावच्छेदकमग्निसंयोगनिष्ठवैलक्षण्यं नीलादिजनकतावच्छेदकतन्निष्ठवैजात्यव्यापकमेव, यत्र प्रतियोगितासंबन्धेन रूपनाशः तत्र स्वसमवायिपृथिवीसमवेतत्व—स्वपूर्ववर्त्तित्व—स्ववृत्तिरूपत्वैतत्त्रितयसंबन्धेन विलक्षणसंयोग इति सामानाधिकरण्यप्रत्यासत्या नाशकत्वाभ्युपगमाच्च न मध्यमरूपादीनां क्षणिकत्वमितिशम्।

संख्यां निरूपयितुमिति । उद्देशक्रमप्राप्तामित्यादिः। उद्देशक्रमेणैव लक्षणाभिधानस्य सकलतन्त्रसिद्धत्वादिति भावः। व्यवह्रियते "हानोपादानादिक्रियते" अनेनेति व्यवहारो ज्ञानम्। एकं द्वे त्रीणीत्याकारकम्। तस्य विषयविधया हेतुः संख्येत्यर्थः। हानं—निवृत्तिः। उपादानं—प्रवृत्तिः। आदिना इच्छाद्वेषशब्दप्रयोगपरिग्रहः।

अथ एकः द्वौ इत्याकारकं ज्ञानं यदि सविषयं स्यात्तदा तत्परिशेषेण स्वविषयसंख्यां साधयेत्, तत्रादौ तद्ज्ञानस्य सविषयत्वे किं मानमिति चेन्न। एकादिज्ञानं "एकादिविषयकज्ञानं" निर्विषयं चेति व्याघातात्, एकः द्वौ इत्यादिप्रत्ययानां लक्षण्यानुपपत्तिप्रसंगाच्च। नचास्तु सविषयकं परन्तु भ्रमवदसद्विषयकमेवाऽतः कुतोऽस्य विषयसाधकत्वमिति वाच्यम्। भ्रमभिन्नत्वात्। भ्रमभिन्नज्ञानस्य सद्विषयकत्वनियमादितिभावः।

अथ एक इति ज्ञानं घटमात्रविषयकमस्तु एवं च घटातिरिक्ताविषयकत्वे ततोधर्मिभिन्नसंख्यासिद्धिरिति चेन्न। तद्घटविषयकत्वे विषयाननुगमादनुगताकारतानुपपत्तिः, घटस्वरूपाणामनुगमकविषयान्तरस्वीकारे च तस्यैव घटे साक्षात्प्रकारत्वसंभवान्नैकत्वस्य घटस्वरूपतास्वीकारसंभव इति सर्वत्र यत्किंचिदेकम्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विषयकत्वमुपगन्तव्यम्, तथाचाऽसंभवतद्घटविषयताकस्य घटान्तरे एक इति ज्ञानस्यानुपपत्तेः। नचेष्टापत्तिः। घटान्तरेपि एक इति ज्ञानस्य सद्भावात्। नच घटत्वमेव एकत्वमस्तु तच्च सकलघटेषु अनुगतमिति वाच्यम्। पटेपि एकत्व-प्रत्ययात्। पटे एकत्वप्रत्ययस्य पटत्वरूपैकत्वविषयकत्वेऽननुगमात्, अनुगमक-धर्मान्तरस्य जातिरूपस्याऽसंभवात्। नापि रूपादिनिबन्धनं, परैरनङ्गीकारात्। तत्प्रत्ययविलक्षणत्वाच्च, रूपनिमित्तो हि प्रत्ययोनीलंपीतमित्येवस्यान्नतु एकं द्वे इति। नच पटे एकत्वप्रत्ययोभ्रम इति वाच्यम्। पटादौ एकत्वप्रत्ययस्याबाधितत्वात्।

तथाच घटादिविशेष्यकएकपदवृत्तिनिमित्तप्रकारक "निर्धर्मितावच्छेदकक" प्रत्ययः—घटघटत्वाप्रकारकत्वे सति घटघटत्वातिरिक्तप्रकारकः घटघटत्वशून्य "पटादि" विशेष्यकत्वे सति प्रमात्वाद् वस्त्रचर्मकंबलेषु नीलप्रत्यवदितिप्रयोगः पर्यवसितः। यद् यद्यच्छून्यविशेष्यकं सद्भ्रमभिन्नं तत् तत्तदन्यप्रकारकमिति सामान्य-व्याप्तिः। यथा वस्त्रादिविशेष्यकं नीलप्रकारकं ज्ञानं वस्त्रवस्त्रत्वशून्यविशेष्यकत्वे सति भ्रमभिन्नं वस्त्रवस्त्रत्वातिरिक्तनीलप्रकारकं च नीलादेर्वस्त्रभिन्नत्वस्योभयमतसिद्ध-त्वादिति ध्येयम्।

अथवा व्यवह्रियते अनेनेतिव्यवहारः शक्तिः, गणनापदं एकादिपरम्। एकादिपदशक्यतावच्छेदिका संख्येत्यर्थः।

एवं च कर्मत्वातिरिक्तसुबर्थतात्पर्यरहितं घटमानयेतिवाक्यं यदि एकमानयेति-वाक्यजबोधान्यूनविषयकबोधजनकं स्यात्तदा एकं अनेकं वाऽऽनयतीतिसंशयनिवर्तक-बोधजनकं स्यात्, एकमानयेतिवाक्यवदितितर्कोपि एकादिप्रत्ययस्याऽतिरिक्तसंख्या-विषयकत्वव्यवस्थापको बोध्यः। उक्ततर्काद् घटमानयेतिवाक्यजबोधस्य न्यूनविषय-कत्वसिद्धौ एकपदस्याऽतिरिक्तार्थकत्वसिद्धिः पर्यवस्यति। एवं एकमानयेतिवाक्यं यदि घटमानयेतिवाक्यजबोधान्यूनविषयकबोधजनकं स्यात्तदा घटमानयति पटंवेति-संशयनिवर्त्तकबोधजनकं स्याद् घटमानयेतिवदितितर्कोपि बोध्यः। तावता एक-मानयेतिवाक्यजबोधस्य घटत्वाद्यविषयकत्वसिद्धौ एकशब्दस्य घटत्वविशिष्टावाच-कत्वग्राहकप्रमाणेनातिरिक्तैकत्वगुणविशिष्टवाचकत्वसिद्धिः।

अथ सन्तु तर्हि जातिविशेषा एवसंख्याः घटत्वादिवत् कृतं गुणान्तरकल्पनया। नचाऽतिरिक्तसंख्यास्वीकारस्यावश्यकत्वे सा सामान्यरूपा गुणरूपा वेत्यत्र विनिगमनाविरह इति वाच्यम्। संख्यागुणत्वपक्षेपि एकत्वत्वद्वित्वत्वादिजातिमादा-यैव एकः द्वौ इत्यादिप्रत्ययानामनुगताकारता वाच्या, एवं चैकत्वद्वित्वादिकमेव सामान्यमस्तु। नच व्यासज्यवृत्तित्वमेव तस्य जातित्वे बाधकम्, जातेर्व्यासज्य-वृत्तित्वनियमादिति वाच्यम्। तादृशनियमस्याऽप्रयोजकत्वात्, घटत्वादेश्च मानाभावेन व्यासज्यवृत्तित्वाभावात्। एवंच गुणकर्मणोरपि द्वित्रिव्यवहारोमुख्यमेव, जातित्वे तत्रापि तत्संभवात्। नच द्वित्वत्रित्वादेर्जातित्वे परिमाणाऽसमवायिकारणत्वं न स्यात्, असमवायिकारणत्वं गुणकर्मणोरेवेति नियमादिति वाच्यम्। तादृशनियमे मानाभावात्। जात्यन्तरस्य कार्यकारणान्यतरैकार्थप्रत्यासत्या क्वचिदपि कार्यकारण-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्वाभावेन तन्निष्ठकारणतायां प्रामाणिकानामसमवायिकारणताव्यवहाराभावेन चाऽसमवायिकारणत्वाभावेपि कारणैकार्थप्रत्यासत्त्या द्वित्वादिनिष्ठपरिमाणकारणतायामसमवायिकारणतात्वेन प्रामाणिकव्यवहारस्य सत्वात्। नहि असमवायिकारणलक्षणे सामान्यत आत्मविशेषगुणावृत्तित्ववत्सामान्यतोजात्यवृत्तित्वविशेषणमप्यस्तीतिचेन्न।

द्वित्वमुत्पन्नं-द्वित्वं विनष्टमित्यादिप्रत्ययात्। द्वित्वादेर्नित्यत्वे संख्यात्वजातेस्तत्रासंभवप्रसंगाच्च। नित्यानेकसमवेतधर्मस्य जातिशून्यत्वनियमात्। द्वित्वादेर्जातित्वे सत्तादिवद्यावदाश्रयसन्निकर्षादिविरहेपि प्रत्यक्षतापत्तेश्च। व्यासज्यवृत्तिगुणत्वाख्यजातिविशेषाश्रयप्रत्यक्षं प्रत्येव यावदाश्रयसन्निकर्षादेरपेक्षितत्वेन, जातौ च जात्यसंभवात्। प्रातिस्विकरूपेण द्वित्वत्रित्वादिप्रत्यक्षं प्रति यावदाश्रयसन्निकर्षादेरपेक्षितत्वेऽनन्तकार्यकारणभावप्रसंगादिति संक्षेपः।

एतेन व्यासज्यवृत्तितया द्वित्वत्रित्वादिकं मास्तु जातिः, एकत्वं तुद्रव्यादित्रयवृत्तिजातिरेवास्तु, अतएव गुणकर्मणोरप्येकव्यवहारोमुख्य एव। नच सत्तया सहाऽन्यूनानतिरिक्तवृत्तितया न तादृशजातिसंभव इति वाच्यम्। तथापि घटत्वकलशत्ववत् सत्तैकत्वयोरेकजातित्त्वे बाधकाभावात्। सत्तैकत्वयोस्तुल्यव्यक्तिवृत्तित्वेपि एकः-सन्नित्यादिप्रत्ययवैलक्षण्यादेव विभिन्नजातिसंभवाच्च। तुल्यव्यक्तिवृत्तिजात्योर्भेदाभावेमानाभावस्यैव मूलत्वात्। नचैकत्वस्यजातित्वे द्वयमिदं द्रव्यमित्यादिवत् द्वयमिदमेकमित्यपि प्रतीतिः स्यादितिवाच्यम्। एकत्वस्य प्रतिव्यक्तिभिन्नगुणत्वेपि द्वयमिदंरूपवदितिप्रतीतिवद्द्वयमिदंमेकमितिप्रतीतेर्दुर्वारत्वात्।

अथ द्वित्वाद्यसमवायिकारणतया एकत्वस्य गुणत्वसिद्धिः, असमवायिकारणत्वं गुणकर्मणोरेवेति नियमेन जातेस्तदसमवायिकारणत्वाऽसंभवादिति चेन्न। परिमाणस्यैव तत्राऽसमवायिकारणत्वस्य सुवचत्वात्, भावकार्याणां सासमवायिकारणकत्वनियमस्याप्रयोजकतया द्वित्वादेरसमवायिकारणत्वविरहेपि क्षतिविरहाच्चेति पूर्वपक्षोपि निरस्तः। घटादिनाशे घटादिवृत्येकत्वस्यापि नाशप्रत्ययात्, एकत्वस्य जातित्वे तत्र संख्यात्वजातिसत्त्वाऽसंभवाच्चेति।

ननु अस्तु एकत्वं गुणः, तथापि तत्सकलवृत्तिएकमेव लाघवात्, नतु प्रतिव्यक्तिविभिन्नमितिचेत्—तद्धि नित्यमनित्यं वा। आद्ये जातितया तत्र संख्यात्वजातेरसंभवात्। अन्त्ये आश्रयभेदेन भेदस्यावश्यकत्वात्, अन्यथा समवायिकारणीभूतानां यावद्रव्याणामेकदाऽभावेन क्वाप्येकत्वोत्पत्तेरसंभवात्, यत्किंचिद्द्रव्यनाशेनैव सकलद्रव्यवृत्तिएकत्वनाशप्रसंगाच्च। नच तथापि सर्वेषां नित्यानामेकमेव एकत्वमस्तु इति वाच्यम्। नित्यवृत्तिएकत्वस्य नित्यतयाऽनेकसमवेतत्वे तत्र संख्यात्वजातेरसंभवात्, नित्यानेकसमवेतधर्मस्य जातिशून्यत्वनियमात्। नच तथापि युगपदुत्पन्नविनष्टद्रव्याणामेकमेव जन्यैकत्वमस्तु लाघवादिति वाच्यम्। तथासति युगपदुत्पन्नविनष्टद्रव्याणामेकजातीयरूपादेरपि एकत्वप्रसंगात्। इति १०६

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नित्येषु नित्यमेकत्वमनित्येऽनित्यमिष्यते।

द्वित्वादयः परार्धान्ता अपेक्षाबुद्धिजा मताः ॥१०७॥

नित्येष्विति। नित्येषु परमाण्वादिषु एकत्वं नित्यम्। अनित्ये घटादौ एकत्वमनित्यमित्यर्थः। द्वित्वादयस्तु व्यासज्यवृत्तिसंख्या अपेक्षा-बुद्धिजन्याः ॥१०७॥

घट आदि में वह एकत्व संख्या अनित्य है। और द्वित्व-त्रित्व आदि जो दो-तीन आदि व्यासज्यवृत्ति पदार्थ में रहने वाली परार्द्ध पर्यन्त संख्या है वह सब अनित्य है—कारण कि वह द्वित्व आदि संख्या अपेक्षा बुद्धि से जन्य है ॥१०७॥

अनित्ये घटादाविति। तथाच एकत्वसंख्यां प्रति स्वाश्रयः समवायिकार-णम्। अवयगतैकत्वमसमवायिकारणम्। केचित्तुद्रव्यस्यैव कारणत्रितयजन्यत्वनिय-माद् भावकार्यमात्रस्य तादृशजन्यत्वे मानाभावादेकत्वस्याऽसमवायिकारणजन्यत्वा-भावेपि क्षतिविरहादित्याहुः। व्यासज्यवृत्तिसंख्याइति। एकत्वान्यसंख्याइत्यर्थः। तथाच द्वित्वसंख्यां प्रति द्वित्वाश्रयः समवायिकारणम्। एकत्वद्वयमसमवायिकार-णम्। अयमेकः—अयमेकःइत्याकारकापेक्षाबुद्धिर्निमित्तकारणम्। एवं त्रित्वं प्रत्यपि स्वाश्रयः समवायिकारणम्। समवायिकारणगतं एकत्वत्रयमसमवायिकारणम्। अयमेकःअयमेकःअयमेकःइत्यपेक्षाबुद्धिर्निमित्तकारणम्। एवं सर्वत्र संख्यान्तरेषु समवायिकारणगतयावदेकत्वमसमवायिकारणं बोध्यम्।

अत्रेदं बोध्यम्। अनेकसंख्या—अनेकपृथक्त्वपरत्वाऽपरत्वानि अपेक्षाबुद्धि-जन्यानि अन्यथा समवाय्यसमवायिनोरेव केवलं तेषामसाधारणकारणत्वेऽपेक्षाबुद्धि-विरहेपि घटादिषु द्वौत्रयः इत्यादिप्रत्यक्षस्यापत्तेः। सिद्धान्ते अपेक्षाबुद्धेर्द्वित्वादिव्यंज-कत्वानभ्युपगमात्, द्वित्वद्विपृथक्त्वादिव्यक्त्योः परस्परविलक्षणाऽपेक्षाबुद्ध्यजन्यत्वे द्वित्वोत्पत्तिकाले द्विपृथक्त्वोत्पत्तिः, द्विपृथक्त्वोत्पत्तिकाले च द्वित्वोत्पत्तिश्च स्यात्। द्वित्वद्विपृथक्त्वयोः परस्परविलक्षणाऽपेक्षाबुद्धिजन्यत्वोपगमे तु यद्द्वित्वव्यक्त्युत्पत्ति-काले स्वजनकापेक्षाबुद्धिविरहान्न द्विपृथक्त्वोत्पत्तिः, द्विपृथक्त्वव्यक्त्युत्पत्तिकाले च स्वजनकापेक्षाबुद्धिविरहान्न द्वित्वोत्पत्तिरिति।

अथाऽपेक्षाबुद्धेर्द्वित्वादिकं प्रति केनरूपेण कार्यकारणभावः। नच समवाय-संबन्धेन द्वित्वादिकं प्रति विशेष्यतासंबन्धेन एकत्वप्रकारकज्ञानं कारणम् एवमनेक-पृथक्त्वं प्रति एकपृथक्त्वप्रकारकज्ञानत्त्वेनेतिवाच्यम्। नायमेकइति ज्ञानेपि एकइति-निर्धर्मितावच्छेदकज्ञानाद् एकंद्रव्यमितिसामान्यधर्मावच्छिन्नविशेष्यताकज्ञानाच्च द्वित्वोत्पादापत्तेः। तदानीं द्वाविति प्रत्यक्षानुत्पादस्य सर्वसिद्धत्वादिष्टापत्तेरयोगात्। नच द्रव्यद्वयावृत्तिधर्मावच्छिन्नविशेष्यत्वं कारणतावच्छेदकसंबन्ध इति वाच्यम्। एवमपि द्रव्यद्वयावृत्तित्वस्य द्रव्यद्वयासमवेतत्वरूपतया नायमेकइतिज्ञानेपि प्रमेयमेक-मितिज्ञानात्, द्वित्वाद्युत्पादापत्तेः। नायमेकइतिज्ञानेपि रूपवदेकं, गन्धवदेकमिति-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ज्ञानाद्द्वित्वाद्युत्पादापत्तिश्च। अथ इदन्त्वावच्छिन्नविशेष्यताकैकत्वप्रकारकज्ञानत्वेन कारणता, एतद्व्यक्तिसमवेतानेकसंख्यात्वेन कार्यता। अनेकसंख्यात्वं च एकत्वान्यसंख्यात्वम्, जातिविशेषो वा। नचैवमपि एतद्व्यक्तिमात्रे तादृशैकत्वप्रकारकज्ञानादेतद्व्यक्तिसमवेतद्वित्वाद्यापत्तिर्दुर्वारेति वाच्यम्। व्यक्त्यन्तरसमवेतातिरिक्तस्यैतद्व्यक्तिसमवेतद्वित्वादिकस्यालीकतया तत्तद्व्यक्तिसमवेतद्वित्वादिजनकीभूतस्य तत्तद्व्यक्तित्वावच्छिन्नविशेष्यताकैकत्वप्रकारकज्ञानस्याभावादेव तदानीमेतद्व्यक्तौ द्वित्वाद्यनुत्पादादिति चेन्न। तथापि व्यक्तिद्वये एकपुरुषीयापेक्षाबुद्धिद्वयसत्त्वे पुरुषान्तरस्य द्वित्वोत्पादापत्तेर्दुर्वारत्वादिति चेन्न। तद्व्यक्तित्वावच्छिन्नविशेष्यताकैकत्वप्रकारकतत्पुरुषीयज्ञानत्वेन कारणता, तद्व्यक्तिसमवेततत्पुरुषीयद्वित्वत्वेन कार्यतेत्यादिक्रमेण कार्यकारणभावे दोषाभावात्। व्यक्त्यन्तरसमवेतातिरिक्तस्य तद्व्यक्तिसमवेततत्पुरुषीयद्वित्वस्यालीकत्वात् तत्तद्व्यक्त्यन्तरसमवेततत्पुरुषीयद्वित्वसामग्र्या अभावादेव न तद्व्यक्तिमात्रे तत्पुरुषीयैकत्वप्रकारकज्ञानात्तद्व्यक्तिसमवेततत्पुरुषीयद्वित्वोत्पत्तिः।

नच तथापि एवं कार्यकारणभावेऽयमेकोऽयमेकइतिक्रमिकाऽपेक्षाबुद्धिभ्यामपि द्वित्वोत्पादापत्त्या द्वित्वस्य क्षणिकत्वापत्तिः, तद्द्वित्वोत्पत्तिसमकालं प्राथमिकाऽपेक्षाबुद्धेर्नाशोत्पत्तौ बाधकाभावेन तन्नाशादेव तन्नाशात्, नहि स्वजनकयावदपेक्षाबुद्धिनाशत्वेन द्वित्वादिनाशकत्वम्, अतएव समूहालंबनाऽपेक्षाबुद्धिरेव द्वित्वादिजनिकेति भाष्यकारादय इति वाच्यम् अपेक्षाबुद्धेरुत्पत्तिसंबन्धेन हेतुतया क्रमिकाऽपेक्षाबुद्धिभ्यां द्वित्वोत्पत्तेरेवाऽसंभवात्। अन्यथा भाष्यकारादिमतेपि विनश्यदवस्थसमूहालंबनापेक्षाबुद्धिजद्वित्वादेः क्षणिकत्वापत्तेर्दुर्वारत्वात्। नाशसामान्यं प्रत्येव सहवर्त्तिनाशस्य हेतुतया सामान्यकार्यकारणभावादेव तद्द्वित्वस्य क्षणिकत्वाऽसंभवाच्च। विनश्यदवस्थसमवायिजन्यद्वित्वादिवत्तादृशद्वित्वस्यापि क्षणद्वयमात्रस्थायित्वस्य चेष्टत्वात् तत्र द्व द्रव्ये इति विशिष्टवैशिष्ट्यप्रत्ययाभावस्य भाष्यकारादेरपि संमतत्वात् स्वप्रतियोगिसहवर्त्तित्वे सति स्वप्रतियोगिजन्यत्वरूपस्य फलोपधानात्मकस्वप्रतियोगिजन्यत्वस्यैव लाघवादपेक्षाबुद्धेर्द्वित्वादिनाशकतावच्छेदकसंबन्धतया प्राथमिकापेक्षाबुद्धिव्यक्तिनाशेन तत्द्वित्वस्य क्षणिकत्वक्षणद्वयमात्रस्थायित्वयोरुभयोरेवासंभवाच्च। किन्तु अपेक्षाबुद्धिनाशेन चतुर्थक्षणे एव तन्नाशः।

नच द्वित्वादेस्तत्पुरुषीयत्वं दुर्वचमितिवाच्यम्। तत्पुरुषीयपदोपलक्षितस्य तत्पुरुषीयापेक्षाबुद्धिजद्वित्वादिमात्रवृत्तिद्वित्वादिव्याप्यजातिविशेषस्य कार्यतावच्छेदकत्वात्। पुरुषभेदेनैव द्वित्वादौ कार्यतावच्छेदकतया जातिभेदाभ्युपगमात्।

नच तथापि अत्रैकत्वम्, अत्रैकत्वमिति द्रव्यविशेषणैकत्वविशेष्यकज्ञानादपि द्वित्वोत्पत्त्या व्यभिचारोदुर्वार इति वाच्यम्। तत्तद्व्यक्तित्वावच्छिन्नविषयतानिरूपितसांसर्गिकविषयतानिरूपितएकत्वविषयताशालितत्तत्पुरुषीयज्ञानत्वेनानुगतरूपेण द्रव्यविशेष्यकैकत्वविशेष्यकज्ञानयोरुभयोरेव हेतुत्वात्। "यथाकार्याश्रयमुख्यविशेष्यकतया मुक्तिं प्रति आत्मविशेष्यकशरीरादिभिन्नत्वप्रकारकज्ञानमेव हेतुः न तु शरीरादिविशेष्यकात्मभेदज्ञानमिति बौद्धाधिकारे भट्टाचार्यैरभिहितम्। तथैव कार्यीभूतद्वित्वाश्रयमुख्यविशेष्यकतया द्रव्यविशेष्यकज्ञानस्यैव हेतुत्वाच्च। यदि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सेनावनादौ द्वित्वत्रित्वादीनामुत्पादानुरोधेन निर्धर्मितावच्छेदककमपि अपेक्षाज्ञानं कारणमिति वक्ष्यमाणमाचार्यमतमाद्रियते तदा तत्तद्व्यक्तित्वावच्छिन्नत्वमपहाय तत्तद्व्यक्तिनिष्ठत्वमुपादेयम् ।

न चैतादृशकार्यकारणभावे त्रित्वाद्यधिकसंख्योत्पादकाले नियतद्वित्वादिन्यूनसंख्योत्पादापत्तिः, व्यक्तित्रयादिविशेष्यकापेक्षाबुद्धिदशायां व्यक्तिद्वयादिविशेष्यकापेक्षाबुद्धेरावश्यकत्वात्, इष्टापत्तौ अनन्तद्वित्वादिकल्पनापत्तेरितिवाच्यम् । तत्पुरुषीयद्वित्वाद्युत्पत्तौ तत्पुरुषीयत्रित्वादिसामग्रीत्वेन द्वित्वादीतरतत्पुरुषीयापेक्षाबुद्धिजसंख्यासामग्रीत्वेन वा प्रतिबन्धकत्वात् । अतएव न्यूनसंख्योत्पत्तौ अधिकसंख्यासामग्रीप्रतिबन्धिकेतिगीयते । वस्तुतः त्रित्वाद्यधिकसंख्योत्पत्तिकाले नियमतोद्वित्वादिन्यूनसंख्योत्पत्तिरिष्टैव, अनन्तद्वित्वादिकल्पनायाः प्रामाणिकत्वादिति ।

प्राञ्चस्तु तत्तद्व्यक्तित्वावच्छिन्नविशेष्यतानिरूपितैकत्वप्रकारताशालित्वे सति तत्तद्व्यक्तित्वावच्छिन्नविशेष्यतानिरूपितैकत्वप्रकारताशाली यो ग्रहस्तत्त्वेनकारणता तद्व्यक्तिसमवेतद्वित्वत्वेन कार्यता इत्यादिक्रमेण कार्यकारणभावः, न तु पुरुषभेदेन जातिभेदः—कार्यकारणभावभेदो वा । सर्वत्राऽयमेकोऽयमेकइत्यादिसमूहालंबनज्ञानादेव द्वित्वाद्युत्पत्तिः नतु क्वचिदपि क्रमिकज्ञानद्वयात् । यदि च निर्धर्मितावच्छेदककापेक्षाज्ञानमपिकारणम्, तदा तत्तद्व्यक्तित्वावच्छिन्नत्वमपहाय तद्व्यक्तिनिष्ठत्वमुपादेयमित्याहुः । तच्चिन्त्यम् ।

नव्यास्तु सामान्यतोऽपेक्षाबुद्धेरेवानेकसंख्याजनकत्वे तन्नाशस्याऽनेकसंख्यादिनाशकत्वे मानाभावः, किन्तु स्वसमानाधिकरणयावदेकत्वानामसमवायिकारणानामुत्पत्त्यनन्तरमेव तेषामुत्पादात् । रूपादिकं प्रति रूपादेरिव पर्याप्तिसंबन्धेन द्वित्वादिकं प्रति द्वित्वादेः प्रतिबन्धकतया च न द्वित्वादिधारोत्पत्तिः । अपेक्षाबुद्धेर्जनकत्वेपि पर्याप्तिसंबन्धेन तत्पुरुषीयद्वित्वादिकं प्रति तत्पुरुषीयद्वित्वादेः प्रतिबन्धकत्वस्यावश्यकतया तदपेक्षयाऽतिलाघवात् । आश्रयनाशादेव च जन्यसमवेतानां तेषां नाशः । अपेक्षाबुद्धिनाशनाश्यत्वे योग्यद्वित्वादेश्चिरस्थायित्वानुरोधेन तदुपधायकापेक्षाबुद्धेश्चिरस्थायित्वावश्यकतया-तदर्थं योग्यविभुविशेषगुणनाशं प्रति द्वित्वादिलौकिकप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वकल्पनापत्तेः । न चैवमपेक्षाबुद्धिविरहेपि यावदाश्रयसन्निकर्षादिसत्वे द्वौ त्रय इत्यादि प्रत्यक्षापत्तिरितिवाच्यम् । मीमांसकानामिवापेक्षाबुद्धेर्द्वित्वादिव्यंजकत्वात् । न चैवं किमपराद्धमपेक्षाबुद्धिजन्यत्वेनेतिवाच्यम् । अपेक्षाबुद्धिजन्यत्वे प्रागुक्तरीत्या द्वित्वत्रित्वादिभेदेनाऽनन्तकार्यकारणभावापत्तेः । स्वीयापेक्षाबुद्धिविरहदशायामपि परकीयापेक्षाबुद्धिजद्वित्वत्रित्वादिकमादाय द्वौ त्रय इत्यादि प्रत्यक्षवारणाय द्रव्यसमवेतत्वविशिष्टलौकिकविषयतासंबन्धेन तत्तत्पुरुषीयप्रत्यक्षोत्पत्तौ च तत्तत्पुरुषावृत्त्यपेक्षाबुद्धिजत्वेन पुरुषभेदविभिन्नानन्तप्रतिबध्यप्रतिबन्धकत्वकल्पनापत्तेश्च । अपेक्षाबुद्धिव्यंग्यत्वे च नद्वित्वत्रित्वादिभेदेनानन्तकार्यकारणभावः, तच्च व्यंजकतानिरूपणे व्यक्तीभविष्यति । नापि पुरुषभेदेन प्रत्यक्षं प्रति अनन्तप्रतिबध्यप्रतिबन्धकभावो वा एकस्यैव द्वित्वादेरपेक्षाबुद्धिसहकारेण सर्वेण पुरुषेण ग्रहणाभ्युपगमात् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

किं च द्वित्वादेरपेक्षाबुद्धिव्यंग्यत्वे एकस्यैव द्वित्वादेरपेक्षाबुद्धिसहकारेण सर्वेण पुरुषेण ग्रहणात्, सामान्यत एव पर्याप्तिसंबन्धेन द्वित्वं प्रति द्वित्वत्वादिना प्रतिबन्धकत्वम्, द्वित्वादेरपेक्षाबुद्धिजन्यत्वे तु पर्याप्तिसंबन्धेन तत्पुरुषीयद्वित्वं प्रति तत्पुरुषीयद्वित्वत्वादिना प्रतिबन्धकत्वमिति द्वित्वादिकं प्रति द्वित्वादेरपि पुरुषभेदेनाऽनन्तप्रतिबध्यप्रतिबन्धकभावापत्तेः। नच द्वित्वादेरपेक्षाबुद्धिजन्यत्वमतेपि सामान्यत एव द्वित्वादिकं प्रति द्वित्वादेः प्रतिबन्धकत्वमितिवाच्यम्। तथासति एकपुरुषीयापेक्षाबुद्धिजद्वित्वसत्वे पुरुषान्तरस्य द्वौ इतिप्रत्ययस्यानुपपत्तेः, द्वित्ववति द्वित्वान्तरोत्पादाऽसंभवात्, परकीयापेक्षाबुद्धिजद्वित्वादेश्च तन्मते परस्याऽयोग्यत्वात्, अन्यथास्वस्यापेक्षाबुद्धिविरहदशायामपि परकीयापेक्षाबुद्धिजद्वित्वमादाय द्वावितिप्रत्ययः स्यादित्याहुः तच्चिन्त्यम्। यतः कारणगुणक्रमेणोत्पद्यमानतयाऽभ्युपगतं द्व्यणुकादौ द्वित्वादिकं एकत्ववदव्यासज्यवृत्ति स्यात्। यत्कारणगुणपूर्वकं तदव्यासज्यवृत्ति एकत्ववदितिव्याप्तेः। संयोगादेरनेकवृत्तित्वेपि न व्यासज्यवृत्तित्वम्, एकस्मिन्नपि संयुक्तविभक्तव्यवहारादिति न व्यभिचारः। कारणगुणपूर्वकत्वेपि व्यासज्यवृत्तिताप्रयोजकत्वसत्वे व्यासज्यवृत्तित्वं दुर्वारमित्युक्तनियमोऽप्रयोजकइत्यपि न समीचीनम्। एवमपि द्व्यणुकादौ त्रित्वाद्यनुत्पत्तिः स्यात्, स्वाश्रयसमवायिकारणीभूते परमाणुद्वये त्रित्वाभावात्। नच परमाणुद्वयमात्रे त्रित्वाद्यभावेपि तद्वृत्तिएकत्वाभ्यां द्वित्वेनेव वा द्व्यणुके त्रित्वाद्युत्पत्तिरितिवाच्यम्। कारणगुणानां कार्यवृत्तिसजातीयगुणं प्रत्येव स्वाश्रयसमवेतत्वसंबन्धेन जनकत्वमितिसिद्धान्तात्। स्ववृत्तित्रित्वादौ स्वसमवायिपर्याप्तत्रित्वादिकमेव हेतुश्चेदुच्यते तदैवेदं दूषणम्, तदेवन–स्वाश्रयस्वानाश्रयसाधारणत्रित्वादिनैव स्वस्मिन् त्रित्वादेर्जननादित्यपि न मनोहरम्। स्वानाश्रयद्रव्याणां स्वं प्रत्यकारणत्वात्, स्वसमवेतत्रित्वादेः स्वकारणमात्रगुणपूर्वकत्वानुपपत्तिः। नच कारणगुणपूर्वकत्वमेव स्वीक्रियते नतु तन्मात्रगुणपूर्वत्वम्, एवंच कारणाकारणगतत्रित्वादिभ्यः कार्याकार्यगतत्रित्वादयः स्युः कारणाकारणगतसंयोगात्कार्याकार्यगतसंयोगवदितिवाच्यम्। परमाणुसमवेतैरेकत्वैःस्तदारब्धगतैकत्वम्, तैरेव परमाणुगतद्वित्वादिकं जन्यते इति महदसंमजसम्, सामग्र्यविशेषे कार्यवैचित्र्यानुपपत्तेः। नच परमाणुकार्ये "द्व्यणुकं" सहकारीकृत्यैकत्वम्, परमाणुमपेक्ष्य द्वित्वादिकं जन्यते, तथाचैकत्वस्य द्वित्वादेश्च सामग्र्योर्विशेष इतिवाच्यम्। परमाणुद्रव्यमन्तर्भाव्यापि परमाणौ द्वित्वाद्यभ्युपगमात्। एवंच द्वित्वसामग्र्यामधिकसमवायिकारणतदेकत्वप्रवेशेऽपि एकत्वसामग्र्यां समवायिकारणतदेकत्वाप्रवेशाद् द्वित्वस्य एकत्वसामग्रीप्रभवत्वेनैव द्वित्वमेकत्वात्मकं स्यात्। एवं नित्यद्रव्यतत्कार्यवृत्तियां द्वित्वसामग्री सा नित्यद्रव्यतत्कार्यवृत्तित्रित्वेपीतितयोरभेदप्रसंगश्च। नच त्रित्वेऽतिरिक्तैकत्वव्यक्तितदाश्रययोरपेक्षितत्वान्नाभेद इति वाच्यम्। तथापि त्रित्वस्य द्वित्वविशेषापत्तेर्दुर्वारत्वात्। अस्मन्मते तु द्वित्वत्रित्वजनकापेक्षाबुद्धोर्वैचित्र्यादेव न त्रित्वस्य द्वित्वसामग्रीजन्यत्त्वम् नित्यवृत्तिद्वित्वादिकं नित्यमेव न तु तत्र समानाधिकरणैकत्वमसमवायिकारणमितिचेद्–तथा सति जातिलक्षणाक्रान्ततया गुणत्वव्याघातात्। ननु तत्सामग्रीजन्यत्वं न तदभेदप्रयोजकमपि तु तत्सामग्रीमात्रजन्यत्वम्, तथाच

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अनेकाश्रयपर्याप्ता एते तु परिकीर्तिताः।
अपेक्षाबुद्धिनाशाच्च नाशस्तेषां निरूपितः ॥१०८॥

अनेकेति। यद्यपि द्वित्वादिसमवायः प्रत्येकं घटादावपि वर्तते तथापि

और वह द्वित्व आदि संख्या अनेक आश्रय में पर्याप्ति सम्बन्ध से रहती है—अपेक्षा बुद्धि के नाश से द्वित्वादि संख्या का भी नाश हो जाता है। यह कारिकार्थ हुवा।

प्रश्न—जब कि द्वित्व आदि संख्या का समवाय अर्थात् समवाय सम्बन्ध से द्वित्व आदि संख्या प्रत्येक घट में रह सकती है तो उसके लिये पर्याप्ति सम्बन्ध की क्या आवश्यकता है।

नित्यवृत्तिद्वित्वादिकमनित्यमेवाऽपेक्षाबुद्धिस्तु न तत्र कारणमित्यपि आपातरमणीयमेव। अनित्यत्वे सततोत्पत्तिप्रसंगः। ननु समवाय्यसमवायिकारणयोः सदातनत्वेपि निमित्तकारणान्तराभावादेव नोक्तप्रसंग इतिचेत्—तादृशकारणस्याऽपेक्षाबुद्धिभिन्नस्याऽसंभवात्, अपेक्षाबुद्ध्यघटिताया एव समवायिकारणाऽसमवायिकारणात्मकसामग्र्यास्तदुत्पादकत्वेन त्वया स्वीकारात्। समवायिकारणस्य नित्यद्रव्यस्याऽसमवायिकारणस्य च सर्वदैव सत्वादितिभावः। अपेक्षाबुद्ध्यात्मककारणनाशानाश्यत्वोपगमेऽविनाशप्रसंगाच्च। अत्रेदं बोध्यम्। आश्रयनाशकालीनगुणनाशे आश्रयनाशो हेतुः—तदन्यगुणस्यनाशे क्वचिन्निमित्तनाशः—यथा चरमशब्दादेः। क्वचिच्चस्वोत्तरवर्त्तिगुणोत्पादो हेतुः—यथा शब्दजनकशब्दस्य पूर्वज्ञानादेश्च प्रकृते च भवतां कस्यापि तादृशस्य नाशकस्याभावादितिध्येयम्।

ननु अपेक्षाबुद्धेर्द्वित्वादिहेतुत्वेऽपेक्षाबुद्धिद्वितीयक्षणे द्वित्वाद्युत्पत्तिवत् तृतीयक्षणेपि कथं न द्वित्वान्तरोत्पत्तिःकारणसत्वादितिचेन्न। तत्पुरुषीयापेक्षाबुद्धिजन्यद्वित्वादिकं प्रति तादृशद्वित्वादेः प्रतिबन्धकत्वात्, तथाच तदभावरूपकारणाभावादेवाऽपेक्षाबुद्धितृतीयक्षणे द्वित्वाद्युत्पत्तेरापादनाऽसंभवात्। १०७

अनेकाश्रयपर्याप्ता इपि मूलाद् द्वित्वादीनां पर्याप्तिसंबन्धेनव्यक्तिद्वयादिषु एव वर्तमानत्वं नत्वेकव्यक्तौ इत्यर्थोलभ्यते तच्चानुपपन्नम्, पर्याप्तौ मानाभावदित्यतः पर्याप्तिसाधनायाऽऽक्षिपति। **यद्यपीति। प्रत्येकं घटादावपीति।** एकैकघटादिव्यक्तावपीत्यर्थः। अपिना घटद्वयादिसमुच्चयः। तथाचाऽयं द्वित्ववानितिवदिमौ द्वौ इति प्रतीत्युपपत्तौपर्याप्तिस्वीकारोनिरर्थक इतिभावः। नन्वेवं तुल्यरीत्या अयं द्वौइत्यपिप्रतीतिः स्यात्, न स्याच्चाऽयं न द्वौवितिप्रतीतिरित्याह। **तथापीति।** समवायेन इमौ द्वौ इतिप्रत्ययोपपत्तावपीत्यर्थः। **प्रत्ययसद्भावाच्चेति।** तथाच पर्याप्त्यनंगीकारे एकोन द्वित्ववानितिप्रत्ययाभाववत्एको न द्वौ इत्यपिप्रत्ययो न स्यात्, एकोद्वित्ववानितिप्रत्ययवत्एकोद्वौइतिप्रत्योपिस्यादतः समवायातिरिक्तः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एको द्वौ इति प्रत्ययाभावात्, एको न द्वौ इति प्रत्ययसद्भावाच्च द्वित्वादीनां पर्याप्तिलक्षणः कश्चित्संबन्धोऽनेकाश्रयोऽभ्युपेयते ।

उत्तर—यह ठीक है तथापि (प्रत्येक में भी यदि द्वित्व रहता है तो "एको द्वौ" यह प्रतीति क्यों नहीं होती है) अतः यह मानना होगा कि "एको द्वौ" यह प्रतीति नहीं होती है–और 'एको न द्वौ' यह प्रत्यय (प्रतीति) होती है–इससे यह सिद्ध हुवा कि द्वित्व आदि संख्याओं का पर्याप्ति नामक कोई सम्बन्ध अवश्य है–जिस पर्याप्ति सम्बन्ध से ये द्वित्व आदि संख्या अनेक आश्रय में ही रहती हैं–प्रत्येक में नहीं ।

पर्याप्तिनामकः विलक्षणसंबन्धः स्वीकार्यइतिभावः । पर्याप्तिलक्षणइति । पर्याप्तिस्वरूपइत्यर्थः कश्चनेति । क्लृप्तसंबन्धातिरिक्तइत्यर्थः । अनेकाश्रय इति । अनेकः आश्रयोयस्येतिव्युत्पत्त्या व्यक्तिद्वयादावेवेत्यर्थः । तथा च एकत्वविशिष्टेपर्याप्तिसंबन्धेन द्वित्वाभावात्तेन संबन्धेन द्वित्ववद्भेदसत्वाच्च एको द्वौ इति प्रतीत्यभावः, एको न द्वौ इतिप्रत्ययश्चोपपद्यतेइतिभावः ।

नचसमवायातिरिक्तपर्याप्तेरंगीकारेपि एको द्वौ इतिप्रत्ययापत्तिर्दुर्वारा इदन्त्वस्य द्वित्वपर्याप्त्यवच्छेदकत्वे बाधकाभावादितिवाच्यम् । द्वित्वादिनिरूपितायाः पर्याप्तेः उभयादिवृत्तिधर्मावच्छिन्नत्वनियमात् । इदन्त्वस्य तन्न्यूनवृत्तितयाऽवच्छेदकत्वाऽसंभवाच्च । नचोक्तप्रतीतेरापादकाभावः, असंसर्गाऽग्रहादेरेवाऽपादकत्वात् । नचाऽसंसर्गाग्रहादिसत्वे भ्रमात्मकताहशप्रतीताविष्टापत्तिरितिवाच्यम् । तस्याः प्रमात्वस्यैवाऽऽपाद्यत्वात् । उक्तप्रतीतेस्तु इदन्त्वावच्छेद्यपर्याप्तिसंबन्धेन द्वित्वावगाहितया प्रमात्वायोगात्, एकव्यक्तेरिदन्त्वावच्छेद्यपर्याप्तिसंबन्धेन द्वित्वरहितत्वात् । अतएव अयं न द्वौ इतिप्रतीतेः प्रमात्वमुपपद्यते, इदन्त्वावच्छेद्यपर्याप्तिसंबन्धेन द्वित्वाभाववति द्वित्वाभावावगाहित्वात् ।

अथवा उक्तप्रत्ययापत्तिवारणाय उद्देश्यतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तिरेवसंसर्गः, एवंच द्वित्वपर्याप्तौ उद्देश्यतावच्छेदकीभूतेन्दत्वव्याप्यत्वविरहान्नापत्तिः । प्रत्युत अयं न द्वौ इति प्रतीतेः प्रमात्वमुपपद्यते उद्देश्यतावच्छेदकीभूतेदन्त्वव्याप्यपर्याप्तिसंबन्धेन योद्वित्वस्याभावस्तद्वति तदवगाहित्वात् । नचोद्देश्यतावच्छेदकव्याप्तिविशिष्टसमवायएवसंसर्गोस्तु इतिवाच्यम् । घटौ इत्यादिवाक्यस्याऽप्रामाण्यापत्तेः । समवायस्यैक्येन घटनिष्ठस्य समवायस्य पटादावपि सत्वेन घटत्वाद्यव्याप्यत्वात् । नचोद्देश्यतावच्छेदकव्याप्य द्वित्वादिसमवाय एव संसर्गआस्ताम्, द्वित्वादिसमवायस्य घटत्वाद्यव्याप्यत्वेपि द्वित्वादेस्तद्व्याप्यतया न "घटौ" इत्यादेरप्रामाण्यमितिवाच्यम् । एवंसति तथाविधद्वित्वादेरेव संबन्धतौचित्यात् । पर्याप्तिरपि द्वित्वादिरूपैवेत्यन्यत्रविस्तरः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रथममपेक्षाबुद्धिस्ततोद्वित्वोत्पत्तिः, ततोविशेषणज्ञानं द्वित्वत्वनिर्विकल्पात्मकं, ततो द्वित्वत्वविशिष्टप्रत्यक्षमपेक्षाबुद्धिनाशश्च ततोद्वित्वनाश इति।

प्रश्न—द्वित्व आदि संख्या का नाश कैसे होता है ।

उत्तर— प्रथम क्षण में "अयमेक अयमेक:" यह अपेक्षा बुद्धि होती है—द्वितीय क्षण में अपेक्षा बुद्धि से द्वित्व की उत्पत्ति हुवी—तृतीय क्षण में "द्वित्व-द्वित्वत्वे" इत्याकारक द्वित्वत्व का निर्विकल्पकरूपविशेषण ज्ञान हुआ। उसके बाद चतुर्थ क्षण में द्वित्वत्व-प्रकारक द्वित्व विशेष्यक सविकल्पक ज्ञान हुवा और अपेक्षा बुद्धि का नाश। फिर पञ्चम क्षण में द्वित्व का कारण जो अपेक्षाबुद्धि उसके नाश से द्वित्व (कार्य) का भी नाश हो जाता है ।

ननु **"अपेक्षाबुद्धिनाशाच्च नाशस्तेषां निरूपितः"** मूलेनाऽपेक्षाबुद्धेर्द्वित्वादिनाशकत्वमुक्तं तन्नोपपद्यते जन्यज्ञानमात्रस्य तृतीयक्षणे नाशेन द्वित्वनिर्विकल्पकक्षणे एवाऽपेक्षाबुद्धेर्नाशाद् द्वित्वादिनाशे द्वित्वत्वादिविशिष्टबुद्धिक्षणेएव द्वित्वनाशसंभवेन विषयाऽसत्त्वेन तादृशविशिष्टबुद्ध्यनुपपत्तेरतोऽपेक्षाबुद्धेस्त्रिक्षणावस्थायित्वं स्वीकृत्य-चतुर्थक्षणेऽपेक्षाबुद्धिनाशात्पंचमक्षणे द्वित्वनाश इतिवैशेषिकप्रक्रियांदर्शयति। **प्रथममिति** । चक्षुरिन्द्रियेण त्वगिन्द्रियेण वा संयुक्तसमवेतसमवायसन्निकर्षे सति एकत्वत्वनिर्विकल्पकानन्तरमित्यर्थः । **अपेक्षाबुद्धिरिति** । संयुक्तसमवायादित्यादिः । अयमेकःअयमेकः इत्याकारिकाअनेकयोरेकत्वावगाहिनीअपेक्षाबुद्धिरित्यर्थः । **तत इति** । अपेक्षाबुद्धिसहकारेणएकत्वाभ्यामित्यर्थः । **द्वित्वोत्पत्तिरिति** एकत्वाश्रययोरित्यादिः । द्वित्वाद्युत्पत्तिरित्यर्थः । तथाच द्वित्वादिकं प्रति अपेक्षाबुद्धिर्निमित्त-कारणम् । द्वित्वाश्रयःसमवायिकारणम् । स्वाश्रयगतैकत्वद्वयमसमवायिकारणम् । अत्रेदं बोध्यम् । यदि द्वित्वमबुद्धिजंस्याद्रूपादिवत्पुरुषान्तरेणापि प्रतीयेत नियमहेतोरभावात्, बुद्धिजत्वे तु यस्य बुद्ध्या यज्जन्यतेतनैवोपलभ्यते इतिनियमोपपत्तिः। प्रयोगस्तु द्वित्वं बुद्धिजंनियमेनैकप्रतिपत्तृवेद्यत्वायन्नियमेनकप्रतिपत्तृवेद्यंतद्बुद्धिजं यथेच्छादिकम्, नियमेनैकप्रतिपत्तृवेद्यं च द्वित्वं तस्मादिदमपि बुद्धिजम्। **तत इति।** द्वित्पोत्पत्त्यनन्तरमित्यर्थः । **विशेषणज्ञानमिति** । तस्मिन् द्वित्वे वर्तमानं यद्द्वित्वत्व-सामान्यं संयुक्तसमवेतसमवायेन तस्य ज्ञानमित्यर्थः। **निर्विकल्पात्मकमिति** । पूर्वं विशेषणज्ञानाभावात्सविकल्पकाऽसंभवादितिभावः **तत इति** । द्वित्वत्वनिर्विकल्पकात्मकज्ञानादित्यर्थः । **अपेक्षाबुद्धिनाशश्चेति** । प्रतियोगितासंबन्धेनाऽपेक्षाबुद्धिनाशं प्रति स्वप्रागभावाधिकरणक्षणवृत्तित्वस्वसमानकालीनत्वोभयसंबन्धेन "निर्विकल्पक" गुणस्य हेतुत्वादितिभावः । **तत इति** । अपेक्षाबुद्धिनाशादित्यर्थः । **द्वित्वनाशइति** । अथ केन रूपेण नाश्यनाशकभावः । नच प्रतियोगितासंबन्धेनाऽनेकसंख्या-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यद्यपि ज्ञानानां द्विक्षणमात्रस्थायित्वं योग्यविभुविशेषगुणानां स्वोत्तरवर्त्तिगुणनाश्यत्वात् ;

प्रश्न—ज्ञान-इच्छा-वगैरह तो दो क्षणमात्र स्थायी हैं—क्योंकि प्रत्यक्षयोग्य जो विभु (आत्मा-आकाश) के विशेषगुण (बुद्धि-सुख-दुःख-इच्छा-द्वेष-प्रयत्न तथा शब्द) हैं. इनका विनाश अपने से उत्तर काल में उत्पन्न हुवे गुणों से होता है ।

नाशं प्रति स्वप्रतियोगिजन्यताविशेषसंबन्धेनाऽपेक्षाबुद्धिनाशः कारणमितिवाच्यम् । आश्रयताशमात्रनाश्यद्वित्वादिव्यक्तौ भगवदपेक्षाबुद्धिजद्वित्वादौ च व्यभिचारापत्तेः । नच सामान्यतोनाशत्वेनैव नाशकता नाशकतावच्छेदकसंबन्धश्च स्वप्रतियोगिजन्यत्वविशेषः, जन्यताविशेषश्च द्वयम्, समवायिजन्यत्वं, अपेक्षाबुद्धिरूपनिमित्तविशेषजन्यत्वं च नान्यत्, नातोघटादौ प्रतियोगित्वसंबन्धेनाऽनेकसंख्यादिनाशापत्तिरितिवाच्यम् । समवायिनाशनाश्यरूपादावपि प्रतियोगितासंबन्धेनाऽनेकसंख्यादिनाशापत्तेः, द्वित्वादिनिष्ठसमवायिजन्यत्वरूपादिनिष्ठसमवायिजन्यत्वयोर्वैलक्षण्याभावादिति । मैवम् । अनेकसंख्यात्वेन नाश्यता सामान्यतोनाशत्वेनैव नाशकता—फलोपधानात्मकस्वप्रतियोगिजन्यत्वविशेषश्च नाशकतावच्छेदकसंबन्धः । स च द्वित्वदिनिष्ठाऽपेक्षाबुद्धिरूपनिमित्तविशेषजन्यत्वं । समवायिनाशनाश्यद्वित्वादिव्यावृत्तप्रतियोगित्वस्य कार्यतावच्छेदकसंबन्धतया च नाश्रयनाशनाश्यद्वित्वादिव्यक्तौ व्यभिचारः । भगवदपेक्षाबुद्धिजद्वित्वादेरपि निमित्तकारणीभूतस्य कालविशेषस्य नाशेनैव नाशान्न तत्रापि व्यभिचारः, द्वित्वादिनिष्ठतज्जन्यताया अपि नाशकतावच्छेदकसंबन्धघटकत्वात्, संबन्धाननुगमस्य चाऽदोषत्वात् । अनेकसंख्यात्वं च एकत्वान्यसंख्यात्वम्, नाश्यतावच्छेदकतया सिद्धोद्वित्वत्वादिव्यापकजातिविशेषो वेतिसिद्धान्तः ।

ज्ञानानामिति । यथेत्यादिः । ज्ञानान्तराणामित्यर्थः । अपेक्षाबुद्ध्यन्यज्ञानानामितियावत् । **द्विक्षणमात्रस्थायित्वमिति** । तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वमित्यर्थः । तत्र हेतुमाह । **योग्यविभुविशेषगुणानां स्वोत्तरवर्त्तिगुणनाश्यत्वादिति** । तथाऽपेक्षाबुद्ध्यात्मकज्ञानस्यापीतिशेषः । द्विक्षणमात्रस्थायित्वमितिपूर्वेणान्वयः । योग्यविभुविशेषगुणाश्च शब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाः । तथाच प्रतियोगितासंबन्धेन योग्यविभुविशेषगुणनाशं प्रति स्वाव्यवहितपूर्ववर्तित्वसंबन्धेन "उत्तरवर्त्ति" गुणः कारणमित्यर्थः ।

ज्ञानस्य तु स्वसमानाधिकरणस्वोत्तरोत्पन्नविशेषगुण एव नाशकः । द्वित्वाद्युपधायकापेक्षाबुद्धेरपि व्यधिकरणस्वोत्तरोत्पन्नविशेषगुणेन तृतीयक्षणे नाशवारणाय स्वसमानाधिकरणत्वं विशेषगुणविशेषणम् । निखिलज्ञानानां क्षणिकत्ववारणाय स्वोत्तरोत्पन्नत्वं तद्विशेषणम् । नच तद्वारणाय स्वोत्तरत्वविशिष्टत्वमेव विशेषगुणविशेषणमस्तु कृतमुत्पत्तिप्रवेशेनेतिवाच्यम् । द्वित्वाद्युपधायकापेक्षाबुद्धेरपि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्वोत्तरवर्त्तित्वविशिष्टेन स्वेनैव स्वोत्पत्तिकालीनसंस्काराद्दष्टेनैव वा तृतीयक्षणे नाशापत्तेः। द्वित्वाद्युपधायकापेक्षाबुद्धेः स्वोत्तरोत्पन्नस्वीयात्मवृत्तिद्वित्वादितः तृतीयक्षणे नाशवारणाय विशेषगुणत्वेनोपादानम्। नच तथापि द्वित्वाद्युपधायकापेक्षाबुद्धेः क्षणत्रयस्थायित्वमनुपपन्नम्, द्वितीयक्षणोत्पन्नानुव्यवसाय, संस्कार-विषयान्तरगोचरज्ञानसुखदुःखादिरूपस्वसमानाधिकरणविशेषगुणेनैव तृतीयक्षणे नाशसंभवादिति वाच्यम्। अपेक्षाबुद्धेराशुतरविनाशित्वाविनाशित्वविचारावसरेऽग्रे-समाधास्यमानत्वात्।

तथाच ज्ञानत्वेन नाश्यता विशेषगुणत्वेन नाशकता। प्रतियोगितासंबन्धेन ज्ञाननाशं प्रति स्वसमानाधिकरणत्वे सति ज्ञाननिष्ठकालिकसंबन्धावच्छिन्नस्व-प्रागभावाधिकरणत्वसंबन्धेन विशेषगुणः कारणम्। विशेषगुणत्वं च मूर्तसमवेताऽ-समवेतधर्मसमानाधिकरणत्वम्, परममहत्त्वत्वस्य जातित्वपक्षे परममहत्त्वसाधारण्येपि क्षतिविरहात्, स्वप्रागभावाधिकरणत्वस्य संबन्धघटकतयैव तद्वारणात्।

केचित्तु ज्ञानादिसहवर्त्तिप्रतियोगिकनाश एव ज्ञानादिद्विक्षणावस्थायिविशेष-गुणनाशकः। नाश्यनाशकभावस्तु तत्तद्व्यक्तित्वेन तत्तद्व्यक्तिसहवर्त्तिप्रतियोगिक-नाशत्वेन, तथाच तत्तद्व्यक्तिनाशं प्रति तत्तद्व्यक्तिसहवर्त्तिप्रतियोगिकनाशः कारणम्। तत्तद्व्यक्तिसहवर्त्तित्वं च कालिकसंबन्धेन तत्तद्व्यक्तिवृत्तित्वम्। प्रतिक्षणं किंचि-द्विनश्यतीतिनियमेन सर्वत्रैव ज्ञानाद्युत्पत्तिद्वितीयक्षणेऽवश्यं कस्यचित्सहवर्त्तिनो-नाशोत्पत्त्या व्यभिचारविरहात्। अतएव द्वित्वादिजनकापेक्षाबुद्धेः क्षणत्रयाव-स्थायित्वमुपपद्यते। ज्ञानादिव्यक्तिभेदेन नाश्यनाशकभावस्य विभिन्नतया द्वित्वादिजनकापेक्षाबुद्धिव्यक्तिषु तत्तृतीयक्षणोत्पन्नत्वेन तत्तृतीयक्षणोत्पन्नव्यक्तिना तद्द्वितीयक्षणध्वंसत्वेन तद्द्वितीयक्षणध्वंसस्य वा नाशकत्वात्।

शब्दनाशस्थले तु पृथगेव कार्यकारणभावः। तथाहि—शब्दोद्विविधः—अन्त्योऽ-नन्त्यश्च—अन्त्यशब्दत्वं शब्दाऽजनकशब्दत्वं—फलोपधायकतासंबन्धेन शब्दवद्भिन्न-शब्दत्वमिति यावत्। अनन्त्यशब्दत्वं च शब्दजनकशब्दत्वम्, फलोपधायकता-संबन्धेन शब्दवच्छब्दत्वमिति यावत्। तत्राऽनन्त्यशब्दस्य कार्यीभूतशब्द एव नाशकः, नाश्यनाशकभावस्तु सामान्यतोऽनन्त्यशब्दनाशत्वेन शब्दत्वेन यत्र प्रतियोगितासंबन्धेनाऽनन्त्यशब्दनाशः तत्र शब्दनिष्ठफलोपधायकतासंबन्धेन शब्द इति। शब्दजनकाभिघातादौ प्रतियोगितासंबन्धेनानन्त्यशब्दनाशापत्तिवारणाय शब्दनिष्ठत्वं फलोपधायकताविशेषणम्। अन्त्यशब्दस्य तु क्षणिकत्वनये उपान्त्य-शब्द एव नाशकः। अतएव पाकजग्रन्थे अन्त्यउपान्त्येनेऽत्याचार्याः। नाश्य-नाशकभावस्तु अन्त्यशब्दनाशत्वेन शब्दत्वेन—यत्र प्रतियोगितासंबन्धेनाऽन्त्यशब्द-नाशः तत्र शब्दानुपधायकत्वविशिष्टजन्यतासंबन्धेन शब्द इति। द्वितीयादिशब्दे प्रतियोगितासंबन्धेनाऽन्त्यशब्दनाशापत्तिवारणाय विशिष्टान्तंजन्यताविशेषणम्।

वस्तुतस्तु अन्त्यशब्दस्यक्षणिकत्वनये तत्र केवलं प्रतियोग्येवनाशकः, नतूपान्त्यशब्दः विशिष्टान्तस्य संबन्धघटकतया गौरवापत्तेः। नाश्यनाशकभावस्तु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अन्त्यशब्दनाशत्वेनाऽन्त्यशब्दत्वेन–यत्र प्रतियोगितासंबन्धेनाऽन्त्यशब्दनाशः तत्र तादात्म्यसंबन्धेनान्त्यशब्द इति। आचार्यलिखनं च गौरवग्रस्तत्वेनानुपादेयम्। यद्वाऽन्त्यशब्दोपि क्षणद्वयावस्थायी तदा तु अनायत्या कारणीभूतोपान्त्यशब्द नाशएवाऽन्त्यशब्दस्य नाशकः, प्रामाणिकगौरवस्याऽदोषत्वात्। कार्यतावच्छेदकं च सामान्यतः शब्दजन्यशब्दनाशत्वम्, कारणतावच्छेदकं च शब्दनाशत्वम्। यत्र प्रतियोगितासंबन्धेन शब्दजन्यशब्दनाशः तत्र स्वप्रतियोगिजन्यत्वसंबन्धेनशब्दनाश इति। शब्दजन्यशब्दत्वं च जन्यतासंबन्धेन शब्दवच्छब्दत्वम्, अतो जन्यत्वस्याननुगमेपि न क्षतिः। ननु अन्त्यशब्दनाशत्वं कार्यतावच्छेदकम्, अन्त्यशब्दत्वस्य शब्दाजनकशब्दत्वरूपतया गौरवापत्तेः। नच शब्दजन्यशब्दनाशत्वस्य कार्यतावच्छेदकत्वे द्वितीयादिशब्दसाधारण्यापत्तिरिति वाच्यम्। तत्साधारण्येपि क्षतिविरहात्, द्वितीयादिमध्यमशब्दानां नाशं प्रति कारणीभूतशब्दनाशस्य कार्यीभूतशब्दस्य चोभयोरेव दण्डचक्रादिवद्धेतुत्वात्। आद्यशब्दनाशानुरोधेनानन्त्यशब्दनाशं प्रति कार्यीभूतशब्दस्य कारणत्वावश्यकत्वादित्याहुः। तच्चिन्त्यम्।

प्राञ्चस्तु सामान्यतोज्ञानभिन्नयोग्यविभुविशेषगुणनाशं प्रति सहवर्त्तिप्रतियोगिकनाश एव हेतुः। प्रतिक्षणं किंचिदुत्पद्यते किंचिद्विनश्यतीति नियमात्। अपेक्षाबुद्धेः क्षणत्रयावस्थायित्वसंपादनाय ज्ञानभिन्नत्वं योग्यविभुविशेषगुणविशेषणम्। नच सहवर्तित्वं कालिकसंबन्धेन स्ववृत्तित्वम्, स्वपदं नाश्यत्वेनाभिमतपरं, तथाच स्वत्वस्य तत्तद्व्यक्तिविश्रान्ततयाऽननुगम इति वाच्यम्। नाशत्वमेव हि नाशकतावच्छेदकम्, ज्ञानभिन्नयोग्यविभुविशेषगुणत्वे सति कालिसंबन्धावच्छिन्नस्वप्रतियोग्यधिकरणत्वं नाशकतावच्छेदकसंबन्धः, स्वपदं नाशकत्वेनाभिमतनाशपरम्। कार्यतावच्छेदकसंबन्धश्चान्त्यशब्दावृत्तिप्रतियोगित्वम्। अन्त्यशब्दस्य क्षणिकतया तन्नाशे व्यभिचारवारणायाऽवृत्यन्तंप्रतियोगिताविशेषणम्। अन्त्यशब्दे पूर्ववदुपान्त्यशब्दोऽन्त्यशब्दमात्रं नाशकमिति प्राहुः।

स्वातन्त्रास्तु सामान्यतोयोग्यविभुविशेषगुणनाशं प्रति योग्यविभुविशेषगुणत्वेनैव प्रतियोगिविधया कारणत्वम्। यत्र प्रतियोगितासंबन्धेन योग्यविभुविशेषगुणनाशः तत्र तादात्म्यसंबन्धेन योग्यविभुविशेषगुणः इति। नचैवं प्रतियोगिमात्रस्यैव नाशकत्वे ज्ञानादीनां क्षणिकत्वापत्तिरिति वाच्यम्। सामान्यतो द्रव्यरूपादिसकलनाशसाधारणनाशत्वावच्छिन्नं प्रत्येव कालिकसंबन्धावच्छिन्नस्वप्रतियोग्यधिकरणत्वसंबन्धेन नाशत्वरूपेण सहवर्त्तिनाशस्य हेतुत्वात्। नचैवं द्रव्यरूपादेर्निखिलकार्यस्यैव क्षणद्वयमात्रस्थायित्वापत्तिः, प्रतिक्षणं किंचिद्विनश्यतीति नियमेन सर्वेषामेव कार्याणामुत्पत्तिद्वितीयक्षणेऽवश्यंकस्यचित्सहवर्त्तिनोनाशादिति वाच्यम्। नाशसामान्यकारणसत्वेपि असमवायिकारणनाशादिरूपविशेषकारणाभावादेव द्रव्याणां तृतीयक्षणे नाशानुत्पत्तेः। तत्सत्वे चेष्टापत्तेः। नचैवं सहवर्त्तिनाशात्मकसामान्यकारणादेव ज्ञानादेस्तृतीयक्षणे नाशसंभवात्, योग्यविभुविशेषगुणनाशं प्रति योग्यविभुविशेषगुणत्त्वेन प्रतियोगिविधया कारणत्वान्तरे मानाभाव

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तथापि अपेक्षाबुद्धेस्त्रिक्षणावस्थायित्वं कल्प्यते। अन्यथा निर्विकल्पककालेऽपेक्षाबुद्धेर्नाशाद् द्वित्वस्यैव नाशः स्यात्।

उत्तर—स्वोत्तरवर्त्ति गुण से नाश्य होने पर भी अपेक्षाबुद्धि को तीन क्षण स्थायी मानते हैं अन्यथा (अर्थात् अपेक्षाबुद्धि को भी यदि दो क्षण ही स्थायी मानेंगे तो) निर्विकल्पककाल में अपेक्षाबुद्धि का नाश हो जाने के बाद द्वित्व का ही नाश हो जायेगा तब फिर

इति वाच्यम्। तदनभ्युपगमेऽसमवायिकारणनाशादिरूपविशेषकारणाभावेन द्रव्यनाशादिरूपकार्यविशेषोत्पत्त्यसंभवेपि नाशसामान्यकारणसत्वेन द्रव्यरूपादौ तृतीयक्षणे नाशसामान्यापत्तेर्दुर्वारत्वात्। द्रव्यादिनाशातिरिक्तस्यापि ज्ञानादिनाशस्यैव प्रसिद्धेः। किंचैतादृशसामान्यकार्यकारणभावानभ्युपगमे आश्रयनाशाज्जात्यादेर्नाशवारणायाऽऽश्रयनाशसमवेतनाशयोः कार्यकारणभावे स्वप्रतियोगिजन्यत्वं स्वप्रतियोगिसमवेतत्वकालिकविशेषणत्वोभयं वा कारणतावच्छेदकसंबन्धत्वेन विवक्षणीयम्, क्षणिकत्वापत्तिभिया द्रव्यपरत्वाऽपरत्वाद्यसमवायिकारणनाशनाश्यमात्रं प्रति असमवायिकारणस्य कार्यसहभावेन हेतुत्वमुपेयम्, स्मृतिजन्यसंस्कारस्य स्मृतिसमकालोत्पन्नसंस्कारस्य च क्षणिकत्वापत्तिभिया स्मृतिसंस्कारयोर्योग्यनाश्यनाशकभावे नाशकतावच्छेदकसंबन्धकोटौ फलोपधायकत्वं निवेशनीयम्, मध्यमरूपादिव्यक्तीनां क्षणिकत्वापत्तिभिया पाकजस्थले स्वसमानाधिकरणत्व-स्वपूर्ववर्त्तित्व-स्ववृत्तिरूपत्वाद्यात्मकत्रितयसंबन्धेनाग्निसंयोगस्यनाशकत्वं कल्पनीयम्। नाशकोत्पादकसंयोगयोर्भेदो वा स्वीकरणीय इत्यादिमहागौरवापत्त्या सामान्यतोनाशसामान्यं प्रति यथोक्ताऽतिरिक्तकार्यकारणभावकल्पनाया एव लघीयस्त्वात् इति प्राहुः।

तथापीति। ज्ञानान्तराणां द्विक्षणमात्रस्थायित्वेपीत्यर्थः। **त्रिक्षणावस्थायित्वमिति।** चतुर्थक्षणवृत्तिध्वंसप्रतियोगित्वमित्यर्थः। **कल्प्यतेइति।** स्वीक्रियते-इत्यर्थः तथाच तदात्मसमवेतविशेषगुणं प्रति तदात्मीयाऽनेकसंख्याऽनेकपृथक्त्वपरत्वाऽपरत्वसामग्रीणां प्रतिबन्धकत्वमितिभावः। एवंच द्वित्वाद्युपधायकापेक्षाबुद्ध्युत्पत्तिद्वितीयक्षणे तत्समवाय्यात्मनि संस्कारादेरुत्पादाऽसंभवात्, नाशकाभावादेव योग्यद्वित्वाद्युपधायकापेक्षाबुद्धेर्न तृतीयक्षणे नाशः। अतएवोपेक्षाबुद्धेरिवापेक्षाबुद्धेरपि संस्काराऽजनकत्वप्रवादः। एतेन स्वोत्तरोत्पन्नस्वसमानाधिकरणविशेषगुणस्य ज्ञानसामान्यनाशकतया कथं तादृशापेक्षाबुद्धेः क्षणत्रयावस्थायित्वसंभवः, द्वितीयक्षणोत्पन्नेन संस्कारानुव्यवसायविषयान्तरगोचरज्ञानसुखदुःखादिना समानाधिकरणविशेषगुणेन तृतीयक्षणे तन्नाशस्य दुर्वारत्वात्, प्रयोजनक्षतिभिया सामग्र्याः कार्यजनने विलंबाऽकरणादितिनिरस्तम्। संख्यादेस्तदात्मीयत्वं च तदात्मवेद्यत्वम्, नतु तदात्मवृत्त्यपेक्षाबुद्धिजन्यत्वम्, गौरवात्। **अन्यथा।** अपेक्षाबुद्धेर्द्विक्षणमात्रावस्थायित्वे। **निर्वि-**

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नतु द्वित्वप्रत्यक्षम्, तदानीं विषयाभावात्। विद्यमानस्यैव चक्षुरादिना ज्ञानजननोपगमात्। तस्माद् द्वित्वप्रत्यक्षादिकमपेक्षाबुद्धेर्नाशकं कल्प्यते।

द्वित्व का प्रत्यक्ष ही नहीं हो सकेगा–क्योंकि द्वित्व प्रत्यक्ष में विषय जो द्वित्व-वह है ही नहीं- विद्यमान विषय ही का चक्षु से प्रत्यक्ष होता है इसलिये द्वित्व का निर्विकल्पकप्रत्यक्ष ही अपेक्षाबुद्धि का नाशक होता है ऐसी कल्पना की जाती है।

कल्पककालेइति। निर्विकल्पकोत्पत्तिकालेइत्यर्थः। अपेक्षाबुद्धेर्नाशादिति। स्वाव्यवहितपूर्ववर्त्तित्वसंबन्धेनगुणात्मककारणसत्वादितिभावः। द्वित्वस्यैवनाशःस्यादिति। द्वित्वस्य नाश एव स्यादित्यर्थः। नतु द्वित्वप्रत्यक्षमिति। द्वेद्रव्येइत्याकारकप्रत्यक्षं नोत्पत्तुमर्हतीत्यर्थः। तदानीं विषयाभावादिति। द्वित्वप्रत्यक्षोत्पत्तिक्षणे विषयरूपकारणाभावादित्यर्थः। ननु तदानीं द्वित्वाभावेपि तत्पूर्वक्षणे द्वित्वरूपकारणसत्वान्न-तत्प्रत्यक्षानुपपत्तिरतआह विद्यमानस्यैवेति। प्रत्यक्षसमानकालीनस्यैवेत्यर्थः। "संबद्धं वर्तमानं च गृह्यते चक्षुरादिना" इत्यनुरोधाल्लौकिकप्रत्यक्षं प्रति द्वित्वादेर्विषयस्य कार्यसहभावेन हेतुत्वादितिभावः। ननु प्रतियोगितासंबन्धेन योग्यविभुविशेषगुणनाशं प्रति स्वाव्यवहितपूर्ववर्त्तित्वसंबन्धेन स्वोत्तरोत्पन्नगुणस्य कारणतयाऽपेक्षाबुद्ध्युत्तरक्षणोत्पन्नस्मृत्या संस्कारेण वाऽपेक्षाबुद्धिनाशः कथं न स्यादित्याशंकां परिहरति तस्मादिति। द्वित्वप्रत्यक्षानुपपत्तेरित्यर्थः। द्वित्वप्रत्यक्षादिकमिति। द्वित्वत्वनिर्विकल्पकमित्यर्थः। आदिना त्रित्वद्विपृथकत्वादिप्रत्यक्षपरिग्रहः। कल्प्यते इति। स्वीक्रियतेइत्यर्थः। तथाच प्रतियोगितासंबन्धेनाऽपेक्षाबुद्धिनाशं प्रति स्वाव्यवहितपूर्ववर्त्तित्व स्वसमानकालीनत्वोभयसंबन्धेन गुणत्वेन हेतुत्वस्य पूर्वोक्तस्याऽऽवश्यकतया तादृशकारणबलात्द्वित्वसविकल्पकक्षणे एवाऽपेक्षाबुद्धेर्नाशात्तादृशसविकल्पकद्वितीयक्षणे एव द्वित्वादिनाशान्न सविकल्पकानुपपत्तिरित्तिभावः।

प्राञ्चस्तु संबद्धं वर्तमानं चेत्यनुरोधात्सामान्यतोयोग्यविभुविशेषगुणनाशं प्रति अनेकसंख्यादिनिर्विकल्पकसामग्र्या एव प्रतिबन्धमत्वं कल्प्यते। अपेक्षाबुद्धिरपि संस्कारजननी, तस्याः संस्काराऽजनकत्वप्रवादश्च निर्युक्तित्वेनानुपादेयः। तत्तदात्मसमवेतविशेषगुणं प्रति तत्तदात्मीयाऽनेकसंख्यासामग्रीत्वेन प्रतिबन्धकत्वमितिपूर्वमते आत्मभेदेनाऽनन्तप्रतिबध्यप्रतिबन्धकभावापत्तिः। प्रागुक्तयुक्त्या सामान्यतोयोग्यविभुविशेषगुणनाशं प्रति सहवर्त्तिनाशस्य हेतुतया तत्तदात्मसमवेतविशेषगुणं प्रति तदात्मीयनेकसंख्यादिसामग्र्याः प्रतिबन्धकत्वकल्पनेपि अपेक्षाबुद्धेस्तृतीयक्षणे सहवर्त्तिनाशेन नाशस्य दुर्वारताचेतिध्येयम्।

अथ निर्विकल्पकसामग्रीत्वं न निर्विकल्पकत्वावच्छिन्नसामग्रीत्वम्, अप्रसिद्धेः। नापि निर्विकल्पकोपधायकसामग्रीत्वं फलोपधायकतासंबन्धेन निर्विक-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्पकविशिष्टत्वं वा—आद्येयावदाश्रयसन्निकर्ष—तत्प्रत्यक्ष—द्वित्व—तत्सन्निकर्ष—तन्निर्विकल्पकप्रागभावानामेव द्वित्वनिर्विकल्पकोपधायकतया तेषां च द्वित्वनिर्विकल्पकसमये तदुत्तरसमयेपि च वर्तमानतया चतुर्थक्षणादावपि अपेक्षाबुद्धेरनाशप्रसंगात्, तत्तन्निर्विकल्पकव्यक्तेः प्रागभावस्य तदानींमसत्वेपि सामान्यतोद्वित्वनिर्विकल्पकप्रागभावस्य तदानीमपि सत्वात्। अन्त्ये निर्विकल्पकपूर्वं निर्विकल्पकाभावेन निर्विकल्पकोत्पत्तिसमयेऽपेक्षाबुद्धेर्नाशस्य दुर्वारत्वादितिचेन्न। निर्विकल्पकसामग्रीत्वं हि स्वसमानाधिकरणत्वे सति स्वाव्यवहितपूर्वोत्पन्नत्वसंबन्धेन एकत्र द्वयमितिरीत्या तादृशोभयसंबन्धेन वा निर्विकल्पकवत्वम्, तस्य च स्वसामानाधिकरण्य विशिष्टोत्पत्तिसंबन्धेन स्वसमानाधिकरणत्व स्वोत्पत्तिमत्वोभयसंबन्धेन वा प्रतियोगिनिष्ठतया प्रतिबन्धकत्वम्। तेन द्वित्वादिनिर्विकल्पकोत्पत्तिसमयेपि तत्पूर्वोत्पन्नज्ञानादेः सत्वेपि न तदनन्तरमपेक्षाबुद्धेर्नाशाऽसंभवः। प्रतिबध्यतावच्छेदकसंबन्धश्च प्रतियोगित्वमेवऽआत्मवत्कालिकेनाऽपेक्षाबुद्धावपि द्वित्वादिनिर्विकल्पकपूर्वोत्पन्नज्ञानसंस्कारादेरुत्पत्तेः।

अथ तथापि अनेकसंख्यानिर्विकल्पकत्वं नाऽनेकसंख्यानिरूपिततत्तन्निर्विकल्पकताख्यविषयिताशालित्वम्, द्वित्वादिनिर्विकल्पकेपि अपेक्षाबुद्धि-यावदाश्रयप्रत्यक्षोपस्थितसंख्यात्वगुणत्वादेर्द्वित्वादौ प्रकारतया भानावश्यकतया तदप्रसिद्धेरिति चेन्न। अनेकसंख्यानिर्विकल्पकत्वं हि अनेकसंख्यात्वव्याप्यजातिनिर्विकल्पकत्वम्, निर्विकल्पकत्वाख्यविषयितासंबन्धेन तादृशजातिमत्वमिति यावत्। अनेकसंख्यात्वमपि अनेकसंख्यात्वव्याप्यमिति न तदसंग्रहः। इत्थं च यत्र द्वित्वाद्युत्पत्तिकाले तत्पूर्वकाले वा द्वित्वत्वादिकं स्मृतमनुभूतं वा ततोविनैव निर्विकल्पकं द्वित्वाद्युत्पत्तिद्वितीयक्षणे विशेषणतावच्छेदकीभूतद्वित्वत्वादिविशिष्टप्रत्यक्षं तत्राऽपेक्षाबुद्धिः क्षणद्वयमात्रस्थायिनी एव। यत्र च द्वित्वोत्पत्तिकाले द्वित्वजनकापेक्षाबुद्धिः ततो द्वित्वत्वनिर्विकल्पकत्रित्वोत्पत्ती ततोद्वित्वत्वविशिष्टबुद्धिरूपं त्रित्वत्वनिर्विकल्पकं तत्र द्वित्वजनकापेक्षाबुद्धिव्यक्तिः क्षणचतुष्टयस्थायिनी। यत्र च तादृशत्रित्वत्वनिर्विकल्पकोत्पत्तिकालेपि चतुष्ट्वोत्पत्तिः तत्र द्वित्वजनिकाऽपेक्षाबुद्धिव्यक्तिः क्षणपञ्चकस्थायिनी, त्रित्वजनकाऽपेक्षाबुद्धिश्च क्षणचतुष्टयस्थायिनी। एवमेकानेकसंख्याव्यक्तिनिर्विकल्पकोत्पत्तिकालेऽपरानेकसंख्याव्यक्त्युत्पत्तिचिन्तया पूर्वपूर्वसंख्याव्यक्त्युपधायकापेक्षाबुद्धेरधिकाधिकक्षणावस्थायित्वमवसेयम्। न च द्वित्वोपधायकाऽपेक्षाबुद्धिनाशं प्रति द्वित्वत्वनिर्विकल्पकसामग्री प्रतिबन्धिका, त्रित्वजनकाऽपेक्षाबुद्धिनाशं प्रति त्रित्वत्वनिर्विकल्पकसामग्रीत्यादिरीत्या विशिष्यैव प्रतिबध्य प्रतिबन्धकभावोस्तु किमधिकाधिकक्षणस्थायित्वाभ्युपगमेनेति वाच्यम्। द्वित्वत्रित्वादिभेदेनानन्तप्रतिबध्यप्रतिबन्धकभावापत्तेः। द्वित्वाद्युपधायकापेक्षाबुद्धिनाशं प्रति द्वित्वत्वादिनिर्विकल्पकसामग्र्याः प्रतिबन्धकत्वेपि द्वित्वाद्युपधायकापेक्षाबुद्धिषु सामान्यसामग्रीमर्यादया तृतीयक्षणे प्रतियोगितासंबन्धेन योग्यविभुविशेषगुणनाशसामान्यापत्तेर्दुर्वारत्वाच्चेत्याहुः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भट्टाचार्यानुयायिनस्तु सामान्यतो योग्यविभुविशेषगुणनाशं प्रति द्वित्वत्वादि-निर्विकल्पक-तद्विशिष्टसाक्षात्कार–तद्विशिष्टवैशिष्ट्यसाक्षात्कारसामग्रीसाधारणाऽनेक-संख्यादिलौकिकप्रत्यक्षसामग्रीत्वेनैव प्रतिबन्धकत्वं कल्प्यते, लाघवात्, प्रत्यासत्तिः पूर्ववत्। यद्वा सामान्यतोयोग्यविभुविशेषगुणनाशं प्रति स्वसमानाधिकरणत्वे सति स्वोत्पत्तिसंबन्धेन तादृशोभयसंबन्धेन वा प्रतियोगिनिष्ठतया अनेकसंख्यादिलौकिक-प्रत्यक्षमेव केवलं कार्यसहभावेन प्रतिबन्धकम्, न तु पूर्ववर्त्तितया, तेन द्वित्वादि-लौकिकप्रत्यक्षोत्पत्त्युत्तरमपि नापेक्षाबुद्धिनाशाऽसंभवः। न चाऽनेकसंख्यादिलौकिक-प्रत्यक्षसामग्रीत्वादिना सामान्यतोयोग्यविभुविशेषगुणनाशं प्रति प्रतिबन्धकत्वे द्वित्वत्वादिनिर्विकल्पकस्यापि क्षणत्रयावस्थायित्वापत्तिरिति वाच्यम्। इष्टत्वा-दिति प्राहुः।

स्वतन्त्रास्तु ज्ञानान्तरवद् योग्यद्वित्वाद्युपधायकापेक्षाबुद्धिरपि क्षणद्वयमात्र-स्थायिनी एव। अतिरिक्तप्रतिबध्यप्रतिबन्धकभावकल्पने गौरवात्। विषयान्तर-वदपेक्षाबुद्धिजगुणस्यापि लाघवात् पूर्ववर्तिमात्रेणैव स्वप्रत्यक्षहेतुतया च न द्वित्वत्वादिनिर्विकल्पकक्रमेण द्वे द्रव्ये इत्युपनीतविशिष्टवैशिष्ट्यप्रत्यक्षानुपपत्तिः। न चैवं "सबद्धंवर्तमानं च गृह्यते चक्षुरादिनेत्यनेन" विरोध इति वाच्यम्। तत्र वर्तमानपदस्याव्यवहितपूर्ववर्तमानपरतया चक्षुरादिसंबद्धं सदव्यवहितपूर्वकाले-वर्तमानमेव चक्षुरादिना गृह्यते इत्येवलाघवेन तदर्थात्। न च द्वित्वादेः पूर्ववर्त्तिता-मात्रेण प्रत्यक्षहेतुत्वेपि अपेक्षाबुद्धेः क्षणद्वयमात्रस्थायित्वे द्वित्वत्वनिर्विकल्पकक्रमेण द्वे द्रव्ये इति लौकिकविशिष्टवैशिष्ट्यप्रत्यक्षानुपपत्तिर्दुर्वारैव, विशेषणतावच्छेदकी-भूतद्वित्वत्वप्रकारकप्रत्यक्षोत्पत्तिक्षणे एव निर्विकल्पककालोत्पन्नापेक्षाबुद्धिनाशेन द्वित्वनाशादिति वाच्यम्। द्वित्वादेः पूर्ववर्त्तितामात्रेण हेतुत्वे विशेष्ये विशेषणमिति न्यायेन निर्विकल्पकोत्पत्तिद्वितीयक्षणे एव तादृशलौकिकविशिष्टवैशिष्ट्यप्रत्यक्ष-संभवात्, तादृशविशिष्टनिरूपितवैशिष्ट्यप्रत्यक्षस्य च नियमेनाऽलौकिकत्वादित्याहुः।

अत्रेदं तत्वम्। योग्यद्वित्वाद्युपधायकापेक्षाबुद्धेरपि ज्ञानान्तरवत्क्षणद्वयमात्र-स्थायित्वे यस्य पुंसोऽपेक्षाबुद्धितो द्वितीयक्षणे द्वित्वोत्पत्तिसमकालं न द्वित्वत्व-सामान्यज्ञानं तस्य द्वित्वोत्पत्यनन्तरं चतुर्थक्षणे द्वे द्रव्ये इति द्वित्वत्वविशिष्टद्वित्व-वैशिष्ट्यावगाहिलौकिकप्रत्यक्षानुपपत्तेः। अपेक्षाबुद्धिरथद्वित्वोत्पत्तिः ततोयुगपदेव द्वित्वत्वनिर्विकल्पकापेक्षाबुद्धिनाशौ ततो विशेषणतावच्छेदकीभूतद्वित्वत्वविशिष्ट-द्वित्वप्रत्यक्षोत्पत्तिसमये एवाऽपेक्षाबुद्धिनाशेन द्वित्वनाशात्, विषयस्य विषयनिष्ठतया सन्निकर्षस्य वा लौकिकप्रत्यक्षहेतुत्वेन द्वित्वनाशानन्तरं द्वित्वलौकिकप्रत्यक्षाऽ-संभवात्। नचाऽपेक्षाबुद्धिरथद्वित्वमपेक्षाबुद्ध्यन्तरं च, बाधकाभावात्, ततो युगपदेव पूर्वापेक्षाबुद्धिनाश–द्वित्वत्वनिर्विकल्पक–द्वित्वान्तराणि अथोदीच्यद्वित्वे द्वित्वत्वप्रकारकप्रत्यक्षं पूर्वद्वित्वनाशश्च इदानीं च पूर्वापेक्षाबुद्धिनाशान्नोदीच्य-द्वित्वनाशः, पूर्वापेक्षाबुद्धेरुदीच्यद्वित्वपूर्ववर्तित्वेपि तदुपधायकत्वाभावात्, अपेक्षा-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नचाऽपेक्षाबुद्धिनाशात् कथं द्वित्वनाश इति वाच्यम् । कालान्तरे द्वित्वप्रत्यक्षाऽभावात् । अपेक्षाबुद्धिस्तु तदुत्पादिका, तन्नाशात्तन्नाश इति कल्पनात् । अत एव तत्पुरुषीयाऽपेक्षाबुद्धिजन्यद्वित्वादिकं तेनैव गृह्यते इति कल्प्यते ।

प्रश्न—अपेक्षाबुद्धि के नाश से कैसे द्वित्व का नाश होता है ।

उत्तर—यह प्रश्न आपका उचित नहीं है--क्योंकि कालान्तर (अपेक्षाबुद्धि शून्य काल) में द्वित्व का प्रत्यक्ष नहीं होता है--इसलिये अपेक्षाबुद्धि ही द्वित्व का उत्पादिका है--और अपेक्षाबुद्धि के नाश से ही द्वित्व का नाश होता है इस प्रकार की कल्पना की जाती है । इसीलिये तत्पुरुषीय अपेक्षाबुद्धिजन्य द्वित्व आदि का प्रत्यक्ष तत्पुरुष ही को होता है (पुरुषान्तर को नहीं) ।

बुद्धेरुत्पत्तिसंबन्धेन द्वित्वादिजनकत्वात्, अव्यवहितपूर्ववर्त्तित्वमपेक्ष्य लाघवेन स्वकारणत्व स्वसहवर्तित्वोभयसंबन्धेनापेक्षाबुद्धिनाशस्य द्वित्वनाशं प्रति कारणत्वात् । अथोदीच्यद्वित्वमादायैव द्वे द्रव्ये इति विशिष्टवैशिष्ट्यलौकिकप्रत्यक्षमितिरीत्या तस्यापि पुरुषस्य द्वे द्रव्ये इतिलौकिकप्रत्यक्षसंभव इति वाच्यम् । अपेक्षाबुद्धेरुत्पत्तिसंबन्धेन हेतुत्वेपि प्रतिपुरुषं धारावाहिकाऽपेक्षाबुद्धिजन्यानन्तधारावाहिकद्वित्वतद्ध्वंसतदुभयकार्यकारणभावकल्पनापत्त्या पर्याप्तिघटितसामानाधिकरण्यप्रत्यासत्त्या तत्पुरुषीयबुद्धिजसंख्यात्वावच्छिन्नं प्रति तत्पुरुषीयबुद्धिजसंख्यायाः प्रतिबन्धकत्वावश्यकतया एकद्वित्वसत्वे विभिन्नापेक्षाबुद्धितोपिसमानवृत्तिकसमानपुरुषीयद्वित्वोत्पत्तेरसंभवात् । प्रतिपुरुषमनन्तद्वित्वतद्ध्वंसतदुभयकार्यकारणभावकल्पनामपेक्ष्य प्रतिपुरुषमेकैकप्रतिबध्यप्रतिबन्धकभावकल्पनाया एवन्याय्यत्वात्, तस्माद् द्वित्वत्वनिर्विकल्पकादिक्रमोत्पन्नस्य द्वे द्रव्ये इति प्रत्यक्षस्य लौकिकत्वान्यथानुपपत्त्या द्वित्वाद्युपधायकापेक्षाबुद्धेः क्षणत्रयावस्थायित्वाभ्युपगम इति ध्येयम् ।

ननु अपेक्षाबुद्धिनाशस्याऽनेकसंख्यानाशकत्वे मानाभावः, आश्रयनाशादेव जन्यसमवेतानामेकत्वादीनां नाशस्य क्लृप्ततया तेनैव द्वित्वादीनां नाशसंभवादित्याशंकते । **नचेति** । **कथं द्वित्वनाश** इति । किमर्थं द्वित्वनाश इत्यर्थः । स्वीकार्य इति शेषः । एकत्वनाशस्येव आश्रयनाशादेव द्वित्वादिनाशसंभवादिति भावः । **कालान्तरे** इति । अपेक्षाबुद्धिनाशानन्तरमित्यर्थः । **द्वित्वप्रत्यक्षाभावादिति** । द्वित्वविषयकलौकिकप्रत्यक्षानुत्पत्तेरित्यर्थः । ननु अपेक्षाबुद्धिनाशस्यैव द्वित्वादिनाशकत्वे किं मानमित्यत आह । **अपेक्षाबुद्धिस्त्विति** । अपेक्षाबुद्धिरेवेत्यर्थः । **तदुत्पादिका** द्वित्वाद्युत्पादिका । **तन्नाशात्** अपेक्षाबुद्धिनाशात् । **तन्नाशः** द्वित्वादिनाशः । **इति कल्पनादिति** । इत्याकारककल्पनाया आवश्यकत्वादित्यर्थः । ननु व्यासज्यवृत्तिधर्मकारणनाशस्य कार्यनाशहेतुतायाः क्लृप्तत्वादिति भावः । ननु व्यासज्यवृत्तिधर्मप्रत्यक्षेयावदाश्रयसन्निकर्षादेरपेक्षितत्वेन परकीयाऽपेक्षाबुद्धिजन्यद्वित्वादेः परस्य कुतोऽतीन्द्रियत्वम्, यावदाश्रयसन्निकर्षादेरविशिष्टत्वात् । न च तस्य परातीन्द्रियत्वे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मानाभावः, यावदाश्रयसन्निकर्षसत्वे पुरुषान्तरीयद्वित्वादेरपि पुरुषान्तरेण गृह्यतं एवेति वाच्यम्। तथासति स्वस्याऽपेक्षाबुद्धिविरहेपि परकीयाऽपेक्षाबुद्धिविषये घटादौ द्वौ त्रयः इत्यादिप्रत्यक्षापत्तेः। परकीयाऽपेक्षाबुद्धिजद्वित्वादेः सत्वात्, स्वस्यापेक्षाबुद्धिविरहदशायां तादृशप्रत्यक्षानुत्पादस्य सकलप्रमाणसिद्धत्वादित्यत आह। **अतएवेति**। पूर्वोक्तयुक्त्याऽपेक्षाबुद्धेर्द्वित्वादिहेतुत्वस्याऽऽवश्यकत्वादेवेत्यर्थः। **तनैवेति**। न तु तद्भिन्नेनेत्यर्थः। तथाचाऽनेकसंख्यात्वादिविशिष्टलौकिकविषयतासंबन्धेन तत्पुरुषीयप्रत्यक्षं प्रति तादात्म्यसंबन्धेन तत्पुषीयाऽपेक्षाबुद्धिजाऽनेकसंख्यादेर्हेतुतया परकीयाऽपेक्षाबुद्धिजद्वित्वादेर्न परेण ग्रहणमिति भावः। तत्पुरुषीयबुद्धिजत्वं च फलोपधानात्मकजन्यतासंबन्धेन तत्तत्पुरुषीयबुद्धिमत्त्वम्, तेन तत्पुरुषीयाऽपेक्षाबुद्धेः परकीयाऽपेक्षाबुद्धिजद्वित्वादिकं प्रत्यपि स्वरूपयोग्यत्वेपि न क्षतिः। नवा द्वित्वत्रित्वादिभेदेन जन्यताया विभिन्नतयाऽननुगमो दोषाय। न च द्वित्वत्वादिविशिष्टलौकिकविषयतासंबन्धेन तत्तत्पुरुषीयप्रत्यक्षं प्रति तादात्म्यसंबन्धेन तत्तत्पुरुषीयद्वित्वत्वादिनैव हेतुत्वमस्तु लाघवात्, तत्तत्पुरुषीयद्वित्वत्वादिकं हि तत्तत्पुरुषीयापेक्षाबुद्धिजन्यतावच्छेदकतया सिद्धोजातिविशेष इति वाच्यम्। द्वित्वत्रित्वादिभेदेन बहुतरकार्यकारणभावापत्तेः।

वस्तुतस्तु अनेकसंख्यात्वविशिष्टलौकिकविषयतासंबन्धेन तत्तत्पुषीयप्रत्यक्षं प्रति फलोपधानात्मकजन्यतासंबन्धेन तत्तत्पुरुषीयबुद्धित्वेनैव कारणत्वम्, लाघवात्। अतएवद्वित्वादेरपेक्षाबुद्धिव्यंग्यत्वप्रवादोपि साधुसंगच्छते। अत एव च संबद्धं वर्तमानं च गृह्यते चक्षुरादिनेत्यस्य श्रुतित्वाभावेपि द्वित्वत्वादिनिर्विकल्पकक्रमेण द्वे द्रव्ये इति विशिष्टवैशिष्ट्यानुरोधेन योग्यद्वित्वाद्युपधायकाऽपेक्षाबुद्धेश्चिरस्थायित्वमावश्यकम्। इयांस्तु विशेषः यन्नैयायिकनये जन्यतासंबन्धेनापेक्षाबुद्धेर्द्वित्वादिव्यंजकत्वम्, मीमांसकनये च न तेन संबन्धेन, तच्चाऽपेक्षाबुद्धेर्व्यञ्जकतानिरूपणे स्फुटीभविष्यति।

नव्यास्तु द्रव्यसमवेतवृत्तिलौकिकविषयतासंबन्धेन तत्पुरुषीयप्रत्यक्षं प्रति तत्तत्पुरुषाऽवृत्तिबुद्धिजत्वेन प्रतिबन्धकत्वम्, प्रतिबन्धकता च तादात्म्येन। अवृत्त्यन्तं बुद्धिविशेषणम्। बुद्धिजत्वं च फलोपधानात्मकजन्यतासंबन्धेन बुद्धिमत्वम्। नच समानकालीनविभिन्नपुरुषीयाऽपेक्षाबुद्धिजद्वित्वादीनां समदेशानां लाघवेनैक्याभ्युपगमात्तत्प्रत्यक्षे व्यभिचार इति वाच्यम्। अतएव बाधकबलात्तादृशद्वित्वादीनामपि नानात्वाभ्युपगमात्। नचैवमनन्तद्वित्वादितद्ध्वंसकल्पनापत्तिरिति वाच्यम्। तत्कल्पनस्यफलबललभ्यत्वात्। तत्तत्पुरुषीयाऽपेक्षाबुद्धिजन्यतावच्छेदकपुरुषभेदविभिन्नद्वित्वत्वादिव्याप्यजातीनां परस्परं सांकर्यापत्त्या तेषां नानात्वस्य सर्वमते एवाऽऽवश्यकत्वाच्च। चित्रद्वित्वाभ्युपगमे बहूनां प्रतिबध्यप्रतिबन्धकभावानां च कल्पनापत्तेः। द्वित्वादेरपेक्षाबुद्धिव्यंग्यत्वप्रवादश्च अपेक्षाबुद्धिप्रयोज्यलौकिकप्रत्यक्षविषयत्वनिबन्धनः, द्वित्वादिप्रत्यक्षे द्वित्वाद्युत्पत्तिद्वाराऽपेक्षाबुद्धेः प्रयोजकत्वादिति प्राहुः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अत्र प्रकाशकृतः परकीयाऽपेक्षाबुद्धिजद्वित्वादेर्न परस्यातीन्द्रियत्वम्, अपेक्षाबुद्धिसत्त्वे पुरुषान्तरीयद्वित्वादेरपि पुरुषान्तरेण ग्रहणात्। तदानीं द्वौ त्रय इत्यादिप्रत्यक्षे परकीयाऽपेक्षाबुद्धिजद्वित्वादेरभानस्य शपथमात्रनिर्णेयत्वात्। नचैवं स्वस्याऽपेक्षाबुद्धिविरहेपि परकीयाऽपेक्षाबुद्धिजद्वित्वत्रित्वादिमादाय द्वौ त्रय इत्यादिप्रत्यक्षापत्तिरिति वाच्यम्। अपेक्षाबुद्धेर्द्वित्वादिजनकत्ववद् द्वित्वादिव्यंजकत्वस्याभ्युपगमात्। नच व्यंग्यव्यंजकभावाभ्युपगमे तत्र वक्ष्यमाणरीत्याऽनेकसंख्याभिन्नविषयकप्रत्यक्षं प्रति अनेकसंख्यात्वेन प्रतिबन्धकत्वमप्यावश्यकम्, तथाच व्यंग्यव्यंजकभावप्रतिबध्यप्रतिबन्धकभावयोरुभयोः कल्पनामपेक्ष्य परकीयापेक्षाबुद्धिजानेकसंख्यायाः परायोग्यत्वकल्पनमेव साधीयः। नव्यमतोक्तरीत्या एकेनैव प्रतिबध्यप्रतिबन्धकभावेन निर्वाहादिति वाच्यम्। परकीयाऽपेक्षाबुद्धिजद्वित्वादेः पराऽयोग्यत्वे एकपुरुषीयद्वित्वादिसत्त्वेऽन्यपुरुषस्य द्वौ इति प्रत्यक्षानुपपत्तेः, परकीयद्वित्वादेः पराऽयोग्यत्वात्, द्वित्ववति द्वित्वान्तरोत्पत्तेरसंभवेन परकीयद्वित्वसत्त्वे स्वीयद्वित्वोत्पत्तेरसंभवात्। अन्यथा यावदपेक्षाबुद्धिसत्वं द्वित्वादिधारोत्पादापत्तेः, धारावाहिकाऽपेक्षाबुद्ध्युत्पत्त्याधारावाहिकद्वित्वाद्युत्पादापत्तेश्च। नच पर्याप्तिघटितसामानाधिकरण्यप्रत्यासत्त्या सामान्यतो द्वित्वत्वावच्छिन्नं प्रति द्वित्वत्वेन, अनेकसंख्यात्वावच्छिन्नं प्रति अनेकसंख्यात्वेन वा न प्रतिबन्धकत्वम्, अपितु तादृशप्रत्यासत्त्या तत्तत्पुरुषीयद्वित्वत्वावच्छिन्नं प्रति तत्तत्पुरुषीयद्वित्वत्वादिना, तत्तत्पुरुषीयबुद्धिजानेकसंख्यात्वावच्छिन्नं प्रति अनेकसंख्यात्वेन वा प्रतिबन्धकत्वमतो भिन्नपुरुषीयद्वित्वत्वादिसत्त्वेपि स्वस्य द्वित्वोत्पत्तिसंभव इति वाच्यम्। पुरुषभेदेनाऽनन्तप्रतिबध्यप्रतिबन्धकभावकल्पनापत्तेः। नचैवं वैशेषिकमतेपि द्वित्वादेः साक्षादपेक्षाबुद्धिव्यंग्यतया मीमांसकमताविशेष इति वाच्यम्। मीमांसकैर्द्वित्वादेरपेक्षाबुद्धिव्यंग्यत्वमात्रोपगमात्। वैशेषिकमतेचाऽपेक्षाबुद्धिव्यंग्यत्वतज्जन्यत्वयोरुभयोरेवोपगमात्।

अथाऽपेक्षाबुद्धिव्यंग्यत्वाभ्युपगमे तज्जन्यत्वाभ्युपगमोऽव्यर्थः, स्वस्याऽपेक्षाबुद्धिविरहदशायां परकीयापेक्षाबुद्धिजद्वित्वत्रित्वादिकमादायद्वौत्रय इति प्रत्यक्षवारणस्य तत्प्रयोजनस्यापेक्षाबुद्धिव्यंग्यत्वाभ्युपगमेनैव निरासात्। नचाऽपेक्षाबुद्धेरजनकत्वे तन्नाशेन द्वित्वादिनाशाऽसंभवात् तज्जनकत्वाभ्युपगमः। स्वप्रतियोगिजन्यत्वसंबन्धेनैवाऽपेक्षाबुद्धिनाशस्य द्वित्वादिनाशजनकत्वादिति वाच्यम्। एकत्वादिवदाश्रयनाशादेव कार्यवृत्तिद्वित्वादेरपि नाशस्य सुवचत्वात्। नित्यमात्रवृत्तिद्वित्वादेश्च ज्ञानादिवत्सहवर्त्तिनाशादेव नाशस्य सुवचत्वात्। तस्यातीन्द्रियतयाक्षणद्वयमात्रस्थायित्वेपि क्षतिविरहात् इति चेन्न। द्वित्वद्विपृथक्त्वयोः परस्परविलक्षणापेक्षाबुद्ध्यजन्यत्वे द्वित्वोत्पत्तिकाले द्विपृथक्त्वस्य द्विपृथक्त्वोत्पत्तिकाले द्वित्वस्योत्पत्तिसंभवादिति। ननु अपेक्षाबुद्धेर्द्वित्वादिहेतुत्वे मानाभावः। नचैवं सति अपेक्षाबुद्धिशून्यकालेपि द्वित्वोत्पत्तिसंभवेन एकत्वप्रत्यक्षमिव सर्वदा सन्निकर्षबलाद् द्वित्वादिप्रत्यक्षमपि कुतो नोत्पद्यते इति वाच्यम्। तत्प्रत्यक्षं प्रत्येव तस्याः हेतुत्वादित्याशंकते।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नचाऽपेक्षाबुद्धेर्द्वित्वप्रत्यक्षेकारणत्वमस्तु इति वाच्यम्। लाघवेन द्वित्वं प्रति कारणत्वस्यैवोचितत्वात्।

प्रश्न—अपेक्षाबुद्धि को द्वित्वोत्पत्ति के प्रति कारण न मानकर द्वित्वप्रत्यक्ष के प्रति ही कारण क्यों न मान लिया जावे।

उत्तर—लाघवात् द्वित्व के प्रति ही अपेक्षाबुद्धि को कारण मानना उचित है--(क्योंकि द्वित्वप्रत्यक्षत्व की अपेक्षया द्वित्वत्व को कार्यतावच्छेदक मानने में लाघव है)।

नचेति। कारणत्वमस्तु इति। तथाच अपेक्षाबुद्धिर्द्वित्वादिव्यंजिका इति भावः। द्वित्वादिव्यंजकत्वं च द्वित्वादिविषयकलौकिकसाक्षात्कारजनकत्वम्। द्वित्वादौ अपेक्षाबुद्धिव्यङ्ग्यत्वं चापेक्षाबुद्धिजन्यसाक्षात्कारविषयत्वम्। अपेक्षाबुद्धिर्द्वित्वादिव्यंजिका नतूत्पादिकेतिमीमांसकमतम्। कार्यकारणभावस्तु तद्व्यक्तिसमवेताऽनेकसंख्याप्रत्यक्षं प्रति तद्व्यक्तित्वावच्छिन्नविशेष्यकापेक्षाबुद्धिः कारणम्, कार्यताकारणताऽवच्छेदकसंबन्धस्तुसमवाय एव। अपेक्षाबुद्धित्वं च एकत्वप्रकारकबुद्धित्वम्। नचैवं तद्व्यक्तिमात्रविशेष्यकाऽपेक्षाबुद्धिदशायामपि तद्व्यक्तिसमवेतद्वित्वादिप्रत्यक्षापत्तिरिति वाच्यम्। तद्व्यक्तिसमवेतद्वित्वादेर्व्यक्त्यन्तरसमवेतत्वनियमेन तद्व्यक्तिसमवेतद्वित्वादिप्रत्यक्षसामग्रीविरहादेव तदानीं तद्व्यक्तिसमवेतद्वित्वादेः प्रत्यक्षानुत्पत्तेः। नच तथापि अपेक्षाबुद्धिविरहदशायां तद्व्यक्तिमात्रविशेष्यकापेक्षाबुद्धिदशायां वा तद्व्यक्तिसमवेतद्वित्वादेः प्रत्यक्षं मास्तुसन्निकर्षादिसामान्यसामग्रीमर्यादयातद्व्यक्तिसमवेतद्वित्वादौ द्रव्यसमवेतत्वविशिष्टलौकिकविषयतया चाक्षुषादिलक्षणसामान्यकार्यापत्तिस्तु दुर्वारेति वाच्यम्। द्रव्यसमवेतचाक्षुषं हि द्विविधम्–तद्व्यक्तिसमवेताऽनेकसंख्याविषयकम्, तद्भिन्नविषयकं च। आद्यमपि द्विविधं–तद्व्यक्तिसमवेताऽनेकसंख्याविषयकं तद्व्यक्त्यसमवेताऽनेकसंख्याविषयकं च। तत्र प्रथमस्य तदानीं तत्र नोत्पत्तिसंभवः, उक्तयुक्तेः। अतएव न द्वितीयस्यापि, तत्तद्व्यक्त्यन्तरवृत्त्यनेकसंख्याविषयकातिरिक्तस्य तत्तद्व्यक्त्यसमवेतानेकसंख्याविषयकप्रत्यक्षस्यालीकत्वात्। नापि द्वितीयस्य–अनेकसंख्याभिन्नविषयकप्रत्यक्षं प्रति अनेकसंख्यायास्तादात्म्येन प्रतिबन्धकत्वाभ्युपगमादिति केचित्। तदसत्। घटविशेष्यकाऽपेक्षाबुद्धिविरहेपि घटकुड्यवृत्तिद्वित्वप्रत्यक्षदशायां घटपटवृत्तिद्वित्वेपि सन्निकर्षादिसामान्यसामग्रीमर्यादया द्रव्यसमवेतवृत्तिलौकिकविषयतासंबन्धेन चाक्षुषादिलक्षणसामान्यकार्यापत्तेः। घटकुड्यवृत्त्यनेकसंख्याप्रत्यक्षसामग्र्या एव सत्वे नोक्तरीत्या यावद्विशेषसामग्रीबाधाऽसंभवात्।

प्राञ्चस्तु तदेतद्वृत्तिद्वित्वप्रत्यक्षं प्रति तदेतद्व्यक्तित्वावच्छिन्नविशेष्यकापेक्षाबुद्धिर्हेतुः–तदुभयैतद्वृत्तित्रित्वप्रत्यक्षं प्रति तदुभयैतद्व्यक्तित्वावच्छिन्नविशेष्यकापेक्षाबुद्धिर्हेतुरित्यादिक्रमेण बोध्यम्। तदेतद्वृत्तिद्वित्वादिप्रत्यक्षं प्रति तादात्म्यसंबन्धेन तदेतद्वृत्तिद्वित्वादिकम्, अनेकसंख्याभिन्नविषयकप्रत्यक्षं प्रति अनेक-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संख्याभेदश्च विषयनिष्ठतया हेतुरितिनोक्तस्थलेसन्निकर्षादिसामान्यसामग्रीमर्यादया निरुक्तलौकिकविषयतासंबन्धेन चाक्षुषादिलक्षणसामान्यकार्यापत्तिर्यावद्विशेषसामग्रीबाधादित्याहुः। तदसत्। अनन्तकार्यकारणभावप्रसंगात्।

अन्येतु अनेकसंख्यावृत्तिलौकिकविषयतासंबन्धेन तत्पुरुषीयप्रत्यक्षं प्रति निखिलतत्तद्व्यक्तित्वावच्छिन्नविषयताव्यक्तिसंबन्धावच्छिन्नप्रतियोगिताकतत्पुरुषीयापेक्षाबुद्धिप्रतियोगिकविलक्षणाभावव्यक्तेः स्वाश्रयसमवेतत्वसंबन्धेनप्रतिबन्धकत्वमेवाऽपेक्षाबुद्धेर्द्वित्वादिव्यंजकत्वम्, न पुनरपेक्षाबुद्धेर्द्वित्वादिप्रत्यक्षजनकत्वं तद्व्यंजकत्वम्। प्रतियोगितावच्छेदकसंबन्धादेरननुगमेपि क्षत्यभावात्। अतएव कारणतावच्छेदकसंबन्धादेरननुगमोपि न दोषायेति प्राचीनैरपि गीयते। अस्तु वा स्वरूपतो द्रव्यद्वयाऽवृत्तिद्रव्यवृत्तिधर्मावच्छिन्नविशेष्यतात्वेन तत्तद्व्यक्तित्वावच्छिन्नविशेष्यत्वानामनुगमः। भवति हि तत्तद्व्यक्तित्वं द्रव्यद्वयावृत्तिद्रव्यवृत्ति, तत्तद्व्यक्तिमात्रवृत्त्यधिकरणताविशेष्यतादिव्यक्तीनां तत्त्वेदंत्वरूपत्वात्। नच सामान्यतो विशेष्यतासंबन्धावच्छिन्नप्रतियोगिताकाभाव एव प्रतिबन्धकोस्तु किमवच्छिन्नान्तेनविशेष्यताविशेषणेनेति वाच्यम्। निर्धर्मितावच्छेदककापेक्षाबुद्धावपि द्वित्वादिप्रत्यक्षापत्तेः, भावाऽभावसाधारणाभावत्व-नानावृत्त्यधिकरणताविशेष्यतादिधर्मितावच्छेदककापेक्षाबुद्धेर्वारणायाऽवृत्त्यन्तम्। अवृत्तित्वं च स्वरूपेण विवक्षितम्। द्रव्यत्वसत्वादिधर्मितावच्छेदककस्य समवायत्व-नानागुणादिवृत्त्यधिकरणताविशेष्यतादिधर्मितावच्छेदककस्यचापेक्षाबुद्ध्यात्मकज्ञानस्यवारणाय वृत्त्यन्तम् वृत्तित्वं स्वरूपेण ग्राह्यम्। अधिकरणमेकं, विशेष्यमेकमित्याद्यधिकरणतात्वविशेष्यतात्वादिरूपेण नानाधिकरणत्वविशेष्यत्वधर्मितावच्छेदकपेक्षाबुद्धेर्वारणाय स्वरूपत इति। द्रव्यान्तरनिष्ठेदन्तादिधर्मितावच्छेदककभ्रमरूपापेक्षाबुद्धिस्तु संग्राह्यैव। नचैवं तादृशप्रतिबन्धकाभावस्य द्वित्वादिवत्तत्समानाधिकरणसंयोगादावपि सत्वात्तत्राऽनेकसंख्यावृत्तिलौकिकविषयतासंबन्धेन तत्पुरुषीयप्रत्यक्षापत्तिरिति वाच्यम्। तादृशविषयतासंबन्धेन प्रत्यक्षं प्रति तादात्म्यसंबन्धेनाऽनेकसंख्यात्वेनापि कारणत्वात्। एवमनेकसंख्याभिन्नविषयकप्रत्यक्षं प्रति तादात्म्यसंबन्धेनाऽनेकसंख्यापि प्रतिबन्धिकावक्तव्या। तेनाऽपेक्षाबुद्धिविरहदशायां न द्वित्वादौ सन्निकर्षादिसामग्रीमर्यादया द्रव्यसमवेतत्वविशिष्टलौकिकविषयतासंबन्धेन चाक्षुषादिलक्षणसामान्यकार्यापत्तिः, यावद्विशेषसामग्रीबाधादित्याहुः।

नव्यास्तु अनेकसंख्यात्वविशिष्टलौकिकविषयतासंबन्धेन तत्पुरुषीयप्रत्यक्षं प्रति व्याप्यतासंबन्धेन तत्पुरुषीयाऽपेक्षाबुद्धिरेव हेतुः। व्याप्यत्वं च स्वीययथोक्तानुगतविशेष्यतावत्पर्याप्तत्वम्, स्वीययथोक्तानुगतविशेष्यतावदन्याऽसमवेतत्वम् वा। स्वपदं कारणीभूतापेक्षाबुद्धिव्यक्तिपरम्। सर्वत्र यावदाश्रयविषयकसमूहालंबनात्मकापेक्षाबुद्ध्यनन्तरमेव द्वित्वप्रत्यक्षं नतु प्रत्येकाश्रयमात्रविषयकविभिन्नापेक्षाबुद्धिभ्यामित्युपगमाच्च न व्यभिचारः। अनेकसंख्यात्वविशिष्टलौकिकविषयता-

 CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अतीन्द्रिये द्व्यणुकादौ अपेक्षाबुद्धिर्योगिनाम्। सर्गादिकालीनपरमाण्वादौ ईश्वरीयापेक्षाबुद्धिः ब्रह्माण्डान्तरवर्त्तियोगिनामपेक्षाबुद्धिर्वा द्वित्वादिकारणमिति। १०८

प्रश्न—द्व्यणुक आदि अतीन्द्रिय पदार्थों में किसकी अपेक्षाबुद्धि से द्वित्वोत्पत्ति होगी।

उत्तर—अतीन्द्रिय द्व्यणुक आदि में योगिलोगों की अपेक्षाबुद्धि से द्वित्वोत्पत्ति होती है। और सृष्टि के आदिकालीन परमाणु आदि में ईश्वरीय अपेक्षाबुद्धि से अथवा ब्रह्माण्डान्तर में रहने वाले योगियों की अपेक्षाबुद्धि को ही द्वित्वोत्पत्ति में कारण मानना उचित है॥ १०८॥.

संबन्धेन प्रत्यक्षं प्रति तादात्म्येनाऽनेकसंख्यायाः कारणत्वम्, अनेकसंख्याभिन्नविषयकप्रत्यक्षं प्रति तादात्म्येनाऽनेकसंख्यायाः प्रतिबन्धकत्वं च वक्तव्यमतोनोक्तातिप्रसंगः। वस्तुतस्तु एकत्र द्वयमितिन्यायेन स्वव्याप्यत्वस्ववृत्त्यनेकसंख्यात्वोभयसंबन्धेनैवाऽपेक्षाबुद्धेः कारणत्वं वक्तव्यम्, तथाचाऽनेकसंख्यात्वविशिष्टलौकिकविषयतासंबन्धेन प्रत्यक्षं प्रति अनेकसंख्यायाः पृथक्कारणत्वं नोपेयम्। स्ववृत्तित्वं चानेकसंख्यात्वस्य कालिकसंबन्धेनेति न काप्यनुपपत्तिरिति प्राहुः।

आशंकांनिरस्यति। **लाघवेनेति**। द्वित्वप्रत्यक्षत्वापेक्षया द्वित्वत्वस्यकार्यतावच्छेदकत्वे लाघवादिति भावः। अत्रेदं बोध्यम्। द्वित्वादिकं प्रति अपेक्षाबुद्धेः कारणत्वाऽनङ्गीकारे एकत्वस्येव नित्यगतद्वित्वादेर्नित्यत्वापत्तिः, तथाच परमाण्वाकाशद्वित्वानामनन्तानामेकदैकत्र समावेशापत्तिः, एवं घटाद्युत्पत्त्यनन्तरं एकत्वोत्पत्तिवत् यावत्यो घटादिद्रव्यव्यक्तयः तावद्व्यक्तिसंख्यासमसंख्याकद्वित्वानामुत्पत्त्यापत्तिः, एवं घटोत्पत्तिद्वितीयक्षणे एव तस्मिन्नेव घटे कोटिकोटिद्वित्वादीनामुत्पत्त्यापत्तिः, समवायिकारणसत्वात्, असमवायिकारणसत्वात्, ईश्वरादृष्टादिरूपनिमित्तकारणसत्वाच्च। इत्थं चैकैकस्मिन्द्रव्ये एककालावच्छेदेनाऽप्रामाणिककोटिकोटिद्वित्वाद्युत्पत्तिस्वीकारापेक्षया नित्यमात्रनित्यद्वित्वादीनां अनन्तानां कल्पनापेक्षया चाऽतिलाघवाद् द्वित्वादावेवाऽपेक्षाबुद्धेः कारणत्वं प्रामाणिकम्। एवं च ययोरेवाऽपेक्षाबुद्धिस्तयोरेव द्वित्वोत्पत्तिस्वीकारात्राऽप्रामाणिकाऽनन्तद्वित्वादिकल्पनाप्रसक्तिः। अतएव तस्याऽखिलैकत्वेभ्योऽनेकविषयबुद्धिसहितेभ्योनिष्पत्तिः, तन्नाशाच्चतन्नाशइतिभाष्योक्तिरपि संगच्छते इति।

ननु परमाण्वादावतीन्द्रियद्रव्ये द्वित्वादिप्रत्यक्षस्याऽपेक्षाबुद्धेश्चाननुभाविकतया प्रमाणाभावेन क्लृप्तकारणाभावेन च न तत्र द्वित्वाद्युत्पत्तिसंभवः। न चेष्टापत्तिः। द्व्यणुकपरिमाणं प्रति परमाणुगतद्वित्वसंख्याया एवाऽसमवायिकारणतयापरमाणौ तदभावात् द्व्यणुके परिमाणाभावप्रसंगात्, परमाणुद्वयमितिप्रामाणिकव्यवहारानुपपत्तिप्रसंगाच्च। एवं द्व्यणुके त्रित्वानुत्पत्तौ द्व्यणुकगतत्रित्वं विना त्र्यणुके परिमाणानुत्पत्तिश्चेत्यतआह। **अतीन्द्रिये द्व्यणुकादाविति**। आदिना परमाणु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

परिग्रहः। तथाच सर्वज्ञयोगिनामपेक्षाबुद्ध्यैव परमाण्वादिषु द्वित्वाद्युत्पत्तिसंभवान्नोक्तदोष इति भावः। सर्गादौ योगिनामभावादाह। **सर्गादिकालीनेति**। आदिना प्रलयपरिग्रहः। **ईश्वरीयाऽपेक्षाबुद्धिरिति**। अस्य द्वित्वादिकारणमित्यनेनाऽन्वयः। आदिनात्रित्वपरिग्रहः। नच ईश्वरीयाऽपेक्षाबुद्धेर्द्वित्वोत्पादकत्वे तद्द्वित्वस्य नित्यत्वापत्तिर्भगवतोऽपेक्षाबुद्धेर्नित्यत्वादितिवाच्यम्। तत्तत्कार्यं प्रति तत्तत्क्षणविशेषस्यापि कारणतया कारणीभूतक्षणविशेषनाशादेव द्वित्वादिनाशसंभवात्।

ननु भगवतोऽपेक्षाबुद्धेर्द्वित्वादिजनकत्वे मानाभावः। नच सर्वत्र भगवदपेक्षाबुद्धिरेवं द्वित्वादिजनिका, नान्यस्येतिकल्पयितुमुचितम्, लाघवादिति वाच्यम्। तथासति स्वीयाऽपेक्षाबुद्धिजद्वित्वादिकं स्वयं गृह्णातीतिस्वभावस्य वक्तुमशक्यतया स्वस्याऽपेक्षाबुद्धिविरहदशायामपि यावदाश्रयसन्निकर्षादिसत्वे द्वौ त्रय इत्यादिप्रत्यक्षापत्तेस्तादवस्थ्यात्। अथ भगवदपेक्षाबुद्धेः परत्वापरत्वद्विपृथक्त्वजनकत्वे चतुष्ट्वादिसंख्याजनकत्वे च मानाभावेपि द्वित्वत्रित्वजनकत्वमावश्यकमेव। अन्यथा सर्गाद्यकालीनपरमाणुषु कथं द्वित्वोत्पत्तिस्तदानीं कथं द्व्यणुकेषु त्रित्वोत्पत्तिः। नच तदानीं परमाण्वादिषु द्वित्वानुत्पत्तावपि न क्षतिरिति वाच्यम्। सर्गाद्यकाले परमाणौ द्वित्वानभ्युपगमे तदानीन्तनतदारब्धद्व्यणुकेषु अणुपरिमाणानुत्पत्तेः, परमाणुनिष्ठद्वित्वस्यैव तत्राऽसमवायिकारणत्वात्, सर्गाद्यकाले द्व्यणुकेषु त्रित्वानभ्युपगमे तदानीन्तनतदारब्धत्र्यणुकेषु च महत्वानुत्पत्त्यापत्तेः, द्व्यणुकत्रित्वस्यैव तत्राऽसमवायिकारणत्वादित्यतआह। **ब्रह्माण्डान्तरवर्त्तियोगिनामिति**। तथाच महाप्रलये मानाभावात् सकलब्रह्माण्डानामेकदा नाशानङ्गीकाराच्च एकसर्गोत्पत्तिकाले तस्य प्रलयकाले वा ब्रह्माण्डान्तरवर्त्तियोगिनामपेक्षाबुद्धिबलात्परमाणुषु द्वित्वोत्पत्तौ बाधकाभाव इतिभावः।

अत्रेदं विभावनीयम्। ईश्वरीयाऽपेक्षाबुद्धेः परमाणुद्व्यणुकाऽवृत्तिद्वित्वत्रित्वजनकत्वे मानाभावः, एवं भगवदपेक्षाबुद्धेर्द्वित्वादिजनकत्वेपि तज्जन्याऽनेकसंख्यां प्रति पूर्वोक्तकालविशेषस्य हेतुत्वावश्यकतया केवलं तादृशकालविशेषस्यैव सर्गाद्यकाले परमाण्वादौ द्वित्वादिजनकत्वस्य सुवचत्वाच्च। तज्जन्यतावच्छेदकं च तादृशकालविशेषोत्पन्नद्वित्वादिमात्रवृत्तिजातिविशेषः। भगवदपेक्षाबुद्धेर्हेतुत्वेपि जातिविशेषस्यैव कार्यतावच्छेदकत्वात्। वस्तुतः सर्गाद्यकाले परमाण्वादिषु द्वित्वाद्युत्पत्तावेव मानाभावः द्व्यणुकनिष्ठाऽत्यन्ताऽपकृष्टाणुपरिमाणं प्रति परमाणुनिष्ठोत्कृष्टाणुपरिमाणस्यैवाऽसमवायिकारणत्वात्, त्र्यसरेणुनिष्ठात्यन्तापकृष्टमहत्वं प्रति द्व्यणुकनिष्ठात्यन्तापकृष्टाणुपरिमाणस्यैवाऽसमवायिकारणत्वात्। अन्यथा सर्गाद्यकाले परमाण्वादावनन्तद्वित्वादिकल्पनापत्तेः, तत्र कालविशेषस्य हेतुत्वकल्पनापत्तेः, अत्यन्तापकृष्टाणुपरिमाणं प्रति स्वपर्याप्त्यधिकरणसमवेतत्वसंबन्धेन परमाणुद्वित्वत्वेन, अत्यन्तापकृष्टमहत्वं प्रति स्वपर्याप्त्यधिकरणसमवेतत्वसंबन्धेन द्व्यणुकनिष्ठत्रित्वत्वेन हेतुत्वे कारणतावच्छेदकगौरवापत्तेश्च। सामान्यतो द्वित्वत्व-त्रित्वत्वाभ्यां जनकत्वे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अनेकैकत्वबुद्धिर्या साऽपेक्षाबुद्धिरिष्यते ।

अपेक्षाबुद्धिः केत्यत आह । **अनेकैकत्वेति** । अयमेकोऽयमेक इत्याकारिकेत्यर्थः । इदं तु बोध्यम् । यत्राऽनियतैकत्वज्ञानं तत्र त्रित्वादिभिन्ना-बहुत्वसंख्योत्पद्यते, यथा सेनावनादाविति कन्दलीकारः । आचार्यास्तु

प्रश्न—अपेक्षाबुद्धि क्या वस्तु है ।

उत्तर—अनेकों में जो "अयमेकः" "अयमेकः" इत्याकारक एकत्व का अवगाहन करने वाली जो बुद्धि उसे अपेक्षाबुद्धि कहते हैं । यहाँ पर यह जानना चाहिये कि जहाँ एकत्वज्ञान अनियत है वहाँ एकत्व-द्वित्व आदि से भिन्न एक विलक्षण बहुत्व संख्या की उत्पत्ति हो जाती है--जैसे सेना-वन आदि स्थल में—यह कन्दलीकार का मत है । और उदयनाचार्य इस विषय में

घटादावपि कपालादिवृत्तिद्वित्वत्रित्वाभ्यां तादृशपरिमाणोत्पादापत्तेः, समवायि-कारणस्य तत्तद्व्यक्तित्वेन कारणतया तदतिप्रसंगवारणे परिमाणं प्रति असमवायि-कारणस्य व्यर्थतापत्तेः । भावकार्याणां सासमवायिकारणकत्वनियमस्यापि अप्रयोजकत्वमुवचत्वात् । नच तवापि त्र्यसरेणुषु त्रित्वजन्यमहत्वापत्तिर्दुर्वारेति वाच्यम् । महत्वाजन्यस्य त्रित्वजन्यमहत्वस्यालीकतया यावद्विशेषसामग्रीबाधादेव त्र्यसरेणौ तदनुपपत्तेः । अन्यथा तवापि त्र्यसरेणौ द्वित्वसामान्यजन्यमहत्वापत्ते-र्दुर्वारत्वात् । नचाणुपरिमाणस्यापि जनकत्वे "कारणत्वंचान्यत्रपारिमाण्डल्यादिभ्य" इति सिद्धान्तविरोधः । तत्सिद्धान्तस्य निर्युक्तिकत्वेन गौरवग्रस्तत्वेन चानुपादेय-त्वात् । पारिमाण्डल्यपदस्य मनोनिष्ठाणुपरिमाणपरत्वेनापि सिद्धान्तोपपत्तेश्चेति ध्येयम् । १०८

अयमेक इति । इदन्त्वावच्छिन्नविशेष्यतानिरूपितैकत्वप्रकारताशालिनी बुद्धिरपेक्षाबुद्धिरित्यर्थः । **यत्रेति** । यद्द्रव्यविशेष्यकमित्यर्थः । **अनियतैकत्व-ज्ञानमिति** । संख्यात्वव्याप्यद्वित्वत्वाद्यवच्छिन्नाप्रकारकप्रत्यक्षमित्यर्थः । **तत्रेति** । तत्तद्द्रव्ये इत्यर्थः । **त्रित्वादिभिन्नेति** । त्रित्वादिपरार्धत्वान्यतमभिन्नेत्यर्थः । **त्रित्वादिकमेवेति** । एवकारेणतद्भिन्नत्वव्यवच्छेदः । तथाच बहुत्वसंख्या न त्रित्वा-दिपरार्धत्वान्तान्यतमभिन्ना किन्तुतदात्मिकैवेति भावः । **तथाचेति** । बहुत्वसंख्या-यास्त्रित्वाद्यभिन्नत्वे चेत्यर्थः । **त्रित्वत्वादिव्यापिकेति** । त्रित्वत्वादिपरार्धत्वान्य-तमव्यापिकैवेत्यर्थः । नन्वेवं सति नियतैकत्वप्रकारकज्ञानस्येवाऽनियतैकत्वप्रकारक-ज्ञानस्यापि त्रित्वाद्युत्पादकत्वावश्यकतया सेनावनादौ तादृशाऽनियतैकत्वादिज्ञाना-त्त्रित्वाद्युत्पत्तिः स्यात्, इष्टापत्तौ च त्रित्वत्वाद्यवच्छिन्नप्रकारताशालिप्रत्यक्षा-पत्तिरत आह । **सेनावनादाविति** । **उत्पन्नेपि त्रित्वादाविति** । अनियतैकत्व-ज्ञानस्यापि त्रित्वाद्युत्पादकत्वादिति भावः । **दोषात्** । नियतानेकैकत्वज्ञानाभावात् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

परिमाणं भवेन्मानव्यवहारस्य कारणम्। १०६
अणु दीर्घं महद्ध्रस्वमिति तद्भेदईरितः।

त्रित्वादिकमेवबहुत्वं मन्यन्ते। तथाच त्रित्वत्वादिव्यापिका बहुत्वत्वजातिर्नातिरिच्यते। सेनावनादौ उत्पन्नेपि त्रित्वादौ त्रित्वत्वाद्यग्रहो दोषात्। इत्थंचेतो बहुतरेयं सेनेतिप्रतीतिरुपपद्यते, बहुत्वस्य संख्यान्तरत्वे तु तत्तारतम्याभावादित्यवधेयम्।

ऐसा कहते हैं कि त्रित्व-चतुष्ट्व-आदि संख्या ही बहुत्व है (अर्थात् त्रित्व आदि संख्या का ही दूसरा नाम बहुत्व है--त्रित्व-चतुष्ट्व आदि संख्या के अतिरिक्त बहुत्व संख्या कोई चीज नहीं है--इसी प्रकार जहाँ सेना में हजार का व्यवहार होता है वहाँ सहस्रत्व संख्या से भिन्न बहुत्व संख्या नहीं है) इससे फलित अर्थ यह हुआ कि त्रित्व-चतुष्ट्व--संख्यारूप ही बहुत्व है त्रित्वत्व एवं चतुष्ट्वत्व आदि जाति का व्यापिका ही बहुत्वत्व जाति है--अतिरिक्त नहीं है। सेना-वन आदि स्थल में त्रित्व आदि संख्या के उत्पन्न होने पर भी उस त्रित्व संख्या में त्रित्वत्व जाति का जो ज्ञान नहीं होने पाता है--वह केवल दोषवशात्। बहुत्व संख्या त्रित्व-चतुष्ट्व आदि संख्या से अतिरिक्त नहीं है इसी लिये "इतः (सेनातः) इयं सेना बहुतरा" यह प्रतीति भी उपपन्न हो जाती है—अन्यथा यदि बहुत्व को त्रित्व आदि संख्या से भिन्न मानें तो कन्दलीकार के मत में स्व की अपेक्षा स्व में न्यूनाधिक्यरूप तारतम्य बनेगा नहीं—अतः उक्त प्रतीति अनुपपन्न हो जावेगी (और त्रित्व-चतुष्ट्व-आदि रूप मानने पर तो त्रित्व की अपेक्षया चतुष्ट्व में तारतम्य है—चतुष्ट्व की अपेक्षया में तारतम्य है अतः वह प्रतीति (इतो बहुतरेयं सेना) उपपन्न हो जावेगी)।

परिमाण का निरूपण करते हैं—'यह छोटा परिमाण है' यह बड़ा परिमाण है" इत्याकारक परिमिति (परिमाण) के व्यवहार का असाधारण जो कारण—उसे परिमाण कहते हैं। वह परिमाण अणु-महत्—दीर्घ—ह्रस्व भेद से चार प्रकार का है। १०६ ॥

अनियतानेकैकत्वज्ञानात्त्रित्वोत्पत्तावपि त्रित्वांशे त्रित्वत्वप्रकारकप्रत्यक्षे नियताऽनेकैकत्वज्ञानस्यैव हेतुतया तं विना न त्रित्वत्वादिप्रकारकप्रत्यक्षमिति भावः। इत्थंचेति। बहुत्वस्य त्रित्वादिरूपतास्वीकारे एवेत्यर्थः। इतो बहुतरेयं सेनेति। इयं सेना इतोबहुतरेत्यर्थः। इति प्रतीतिरुत्पद्यते इति। इतिप्रतीतेः प्रमात्वमुत्पद्यते इत्यर्थः। चतुष्ट्वादिरूपबहुत्वे त्रित्वादिरूपस्वसजातीयनिरूपितोत्कर्षस्य सत्वादिति तादृशप्रतीतेः प्रमात्वमुपपद्यते इति भावः। संख्यान्तरत्वे-त्रित्वाद्यतिरिक्तसंख्यात्वे। तारतम्याभावादिति। बहुत्वत्वजातेरेकत्वात्तद्व्याप्यानेकवैजात्यानङ्गीकारेण बहुत्वे स्वसजातीयोत्कर्षाभावादितिभावः। नच बहुत्वस्य त्रित्वादिरूपत्वेबहुत्वनिश्चये कथं त्रित्वादिसंशय इति वाच्यम्। समानप्रकारकनिश्चयस्यैव संशयप्रतिबन्धकतया बहुत्वप्रकारकनिश्चयस्यत्रित्वत्वादिप्रकारकसंशयाऽविरोधित्वादिति ध्येयम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् । ११०
संख्यातः परिमाणाच्च प्रचयादपि जायते ।
अनित्यं द्व्यणुकादौ तु संख्याजन्यमुदाहृतम् । १११

परिमाणं निरूपयति । परिमाणमिति । मानव्यवहाराऽसाधारणं कारणं परिमाणमित्यर्थः । १०६ तच्चतुर्विधम् । अणु-महत्-दीर्घम्-ह्रस्वं चेति । तत्-परिमाणम् । नित्यमित्यत्र परिमाणमित्यनुषज्यते । ११०

और वह परिमाण अनित्यपदार्थों में अनित्य है—और नित्यों में नित्य है । ११० ॥
अनित्यपरिमाण संख्या से—परिमाण से—प्रचय से उत्पन्न होता है ।
संख्या से उत्पन्न परिमाण को बतलाते हैं—द्व्यणुक—त्रसरेणु आदि का जो परिमाण वह अनित्य है तथा संख्याजन्य है । यह कारिकार्थ हुवा ।

कालादिवारणायाऽसाधारणमिति । तथाचाऽयंमहानितिशब्दनिष्ठवाच्यतासंबन्धावच्छिन्नकार्यतानिरूपितसमवायसंबन्धावच्छिन्नकारणतावत्त्वं परिमाणलक्षणमित्यर्थः । अत्रापिताद्दशकारणतासमानाधिकरणरूपाव्याप्तिजातिमत्त्वंलक्षणार्थः । एवं परिमाणवदशक्यतावच्छेदकतयासिद्धपरिमाणत्वजातिमत्त्वम् लक्षणं बोध्यम् । अत्राऽणुत्वं परिमाणम्, महत्वं परिमाणमित्याद्यनुगतप्रतीत्या परिमाणत्वजातिसिद्धिः । एवमणुत्वं महत्वं ह्रस्वत्वं दीर्घत्वमित्यनुगतप्रतीत्याऽणुत्वत्वादिजातिरपि सिध्यति । १०६ अथ परिमाणं द्रव्यमेव, द्रव्याग्रहेतद्बुद्ध्यभावादितिचेन्न । दूराद्द्रव्यग्रहणेऽपि तत्परिमाणविशेषस्याऽग्रहणात् । अतएव महानपि अणुरिवभ्रान्त्या दृश्यते । यदि च घटादिस्वरूपं परिमाणं स्यात्, महदानयेत्युक्ते घटमात्रमानयेत्, घटमानयेत्युक्ते यत्किंचिन्महदानयेत् । घटशब्दाद् घटनिश्चयवत् परिमाणनिश्चयोपि स्यात्, परिमाणसन्देहवद् घटसंशयोपि स्यादितितर्के इत्याचार्याः । भाष्योक्तक्रमेण विभागमाह । तच्चतुर्विधमिति । अण्वादिशब्दानां भावप्रधाननिर्देशः । अणुत्वं महत्वं ह्रस्वत्वं दीर्घत्वं चेत्यर्थः । तेनाऽण्वादिशब्दानां द्रव्यतरत्वेपि न क्षतिः । नच ह्रस्वत्वदीर्घत्वयोरणुत्वमहत्वभिन्नपरिमाणत्वे प्रमाणाभावात् परिमाणस्य द्वैविध्यमेवेति वाच्यम् । घटाद्यवधिकाणुतया प्रतीयमानेपि दण्डादौ घटाद्यवधिकह्रस्वत्वव्यवहाराभावात्, दण्डावधिकमहत्ववत्तया प्रतीयमानेपि घटादौ तदवधिकदीर्घत्वव्यवहाराभावाच्च ह्रस्वत्वदीर्घत्वयोः अणुत्वमहत्वातिरिक्तपरिमाणत्वावश्यकतया परिमाणस्य चातुर्विध्यावश्यकत्वात् । तत्र महत्वं द्विविधम्, नित्यमनित्यं च । नित्यमाकाशकालदिगात्मसु तदेव परममहत्वमित्युच्यते । अनित्यं महत्वं त्र्यणुकाद्यन्त्यावयविपर्यन्तेषु । एवमणुत्वमपि द्विविधम्, नित्यमनित्यं च नित्यमणुत्वपरिमाणं-परमाणुमनस्सु, उत्पत्तिविनाशकारणाभावात् । तच्च पारिमाण्डल्यमुच्यते । पारिमाण्डल्यं च सर्वापकृष्टपरिमाणम् । अनित्यमणुत्वपरिमाणं द्व्यणुके एव, तदपि पारिमाण्डल्यशब्देनोच्यते । तथाचाऽणुपरिमा-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

परिमाणं घटादौ तु परिमाणजमुच्यते।
प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते। ११२
परिमाणं तूलकादौ,

जायते इत्यत्रापि परिमाणमित्यनुवर्त्तते। अनित्यमितिपूर्वेणाऽन्वितम्। तथाचाऽनित्यपरिमाणं संख्याजन्यं-परिमाणजन्यं-प्रचयजन्यं-चेत्यर्थः। तत्र संख्याजन्यमुदाहरति। अनित्यमिति। द्व्यणुकस्य त्रसरेणोश्च परिमाणं प्रति परमाणुपरिमाणं द्व्यणुकपरिमाणं वा न कारणम्, परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वनियमात्, द्व्यणुक-

द्व्यणुक और त्रसरेणु के परिमाण के प्रति क्रमशः परमाणुपरिमाण—अथवा द्व्यणुक परिमाण कारण नहीं है—क्योंकि परिमाण अपने समानजातीय तथा उत्कृष्टपरिमाण का जनक होता है—सो द्व्यणुकादि का परिमाण परमाणु के अणुत्व की अपेक्षा अर्थात् परमाणु के अणुपरिमाण की अपेक्षया उत्कृष्ट नहीं है।

विशेष एव परमाणुपरिमाणम्। महत्परिमाणविशेषश्च परममहत्परिमाणम्। अन्यथा परमशब्देन विशेषणायोगात्। यत्खलु परिमाणं रूपसहायंस्वाश्रयंप्रत्यक्षयति-तस्यमहदिति व्यपदेश, यच्च न प्रत्यक्षयतितत्राणुत्वाव्यवहारः। आकाशकाल-दिक्परिमाणस्य तु प्रत्यक्षहेतुत्वाभावेपि महत्वमेवेति ॥११०॥ संख्याजन्यमिति। संख्यामात्रजन्यमित्यर्थः। परिमाणजन्यमिति। परिमाणमात्रजन्यमित्यर्थः। प्रलयजन्यमिति। प्रलयपरमाणोभयजन्यमित्यर्थः। तत्र। उक्तपरिमाणेषु मध्ये। संख्याजन्यमिति। संख्यामात्रजन्यपरिमाणमित्यर्थः। द्व्यणुकस्येति। अस्य परिमाणं प्रतीत्यनेनाऽन्वयः। तथाच त्र्यणुकपरिमाणं प्रति परमाणुपरिमाणं नाऽसम-वायिकारणमितिसमुदितार्थः। एवं त्रसरेणुपरिमाणं प्रति द्व्यणुकपरिमाणं नाऽसमवायि कारणमित्यर्थः। तत्रहेतुमाह। परिमाणस्येति। एतद्व्याख्यानं "पारिमाण्डल्यभिन्नानांकारणत्वमुदाहृतम्" इतिमूलव्याख्यानावसरे प्रपञ्चितम्। इदमुपलक्षणम्। परमाणौ द्व्यणुके ना न शिथिलसंयोगसंभवः परमाणोर्निरवयव-द्रव्यत्वात्, द्व्यणुकानां च सावयव द्रव्यरब्धत्वाभावात्, द्व्यणुकत्र्यणुकपरिमाणयोः प्रचयाऽसमवायिकारणकत्वे मानाभाव इत्यपिबोध्यम्। अत इति। उक्तरीत्या द्व्यणुकत्र्यणुकपरिमाणयोः परिमाणप्रचयाऽसमवायिकारणकत्वाऽसंभवादित्यर्थः। परमाणौ द्वित्वसंख्येति। परमाणुसमवेतद्वित्वसंख्यैवेत्यर्थः। द्व्यणुकपरिमाण-स्येति। असमवायिकारणमित्युत्तरेणान्वयः। द्व्यणुके त्रित्वसंख्याचेति। तत्स-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्याऽणुपरिमाणं तु परमाणवणुत्वापेक्षया नोत्कृष्टम्, त्रसरेणुपरिमाणं तु न सजातीयम्, अतः परमाणौ द्वित्वसंख्या द्व्यणुकपरिमाणस्य द्व्यणुके त्रित्वसंख्या च त्रसरेणुपरिमाणस्यासमवायिकारणमित्यर्थः ॥१११॥ परिमाणजकं परिमाणमुदाहरति। परिमाणंघटादाविति। घटादिपरिमाणं कपालादिपरिमाणजन्यम्। प्रचयजन्यमुदाहर्तुंप्रचयं निर्वक्ति। प्रचयइति ॥११२॥

और त्रसरेणु का परिमाण उसके सजातीय नहीं है। अतः द्व्यणुक के परिमाण के प्रति परमाणुगतद्वित्वसंख्या कारण है और त्रसरेणु परिमाण के प्रति द्व्यणुकगतद्वित्वसंख्या असमवायिकारण है। १११॥

परिमाणजपरिमाण को उदाहरण द्वारा बतलाते हैं कि घट आदि में जो परिमाण है वह परिमाण से जन्य (जायमान) है।

मवेतत्रित्वसंख्यैवेत्यर्थः। परिमाणौ द्वित्वसंख्या द्व्यणुकेषु त्रित्वसंख्याचेश्वरीयाऽपेक्षा बुद्धिजन्य अस्मदादीनामपेक्षाबुद्धेरसंभवात्। साच संख्या द्व्यणुके त्र्यणुके वा रूपाद्युत्पत्तिसमकालं अणुत्वं महत्व च करोति। अत्रेदं बोध्यम्। त्रसरेणुपरिमाणस्य द्व्यणुकगता बहुत्वसंख्यैवाऽसमवायिकारणम्, अन्यस्याऽसंभवात्। तथाहि। नतावद्व्यणुकवृत्तयो रूपरसगन्धाः त्रसरेणुपरिमाणस्याऽसमवायिकारणानि, तेषां समानजातीयगुणान्तरारम्भे, सामर्थ्यदर्शनात्, वायौ रूपस्य व्यभिचारात्, रसस्य तेजसि, गन्धस्याऽबादिषुव्यभिचाराच्च। नापि स्पर्शस्तथातस्यापि समानजातीयगुणान्तरारम्भे सामर्थ्यदर्शनात्, प्रकर्षाननुविधानाच्च, नहि स्पर्शप्रकर्षात्परिमाणप्रकर्षोदृष्टइति। नापि परमाणुपरिमाणं द्व्यणुकपरिमाणकारणं नित्यद्रव्यपरिमाणत्वात् आकाशादिपरिमाणवत्, अणुपरिमाणत्वाद्वामनः परिमाणवत्। एवं त्रसरेणुपरिमाणं प्रति द्व्यणुकाणुपरिमाणानांचारंभकत्वेत्र्यणुकस्याऽणुत्वमेव स्यात्, न महत्वम्, परिमाणास्वसमानजातीयस्यैव परिमाणस्योत्पत्त्यवगमात्। अस्ति च त्रसरेणौ महत्वं भूयोऽवयवारब्धत्वाद् घटादिवत्। न चाऽसमवायिकारणं बिना भावकार्यमुत्पद्यते, अतः संख्याया एवात्र कारणत्वम्। त्रसरेणुपरिमाणं "बहुत्व" संख्याजन्यं परिमाणप्रचयाऽजन्यत्वे सति जन्यपरिमाणत्वात् तुल्यपरिमाणककपालद्वयारब्धघटपरिमाणात् प्रकृष्टतादृशकपालत्रयारब्धघटपरिमाणवदित्यनुमानमपि बोध्यम्। अयंभावः—यत्र तुल्यपरिमाणानां पञ्चानां कपालानां द्वाभ्यामेकोघटः त्रिभिश्चापरोघटोजातः, तत्र कपालद्वयारब्धघटपरिमाणात् कपालत्रयारब्धघटपरिमाणस्य वैलक्षण्यं प्रत्यक्षसिद्धम्, उभयत्र कपालपरिमाणस्य हेतुत्वे तादृशवैलक्षण्यं न निर्वहति, परिमाणस्याऽविशेषात्इति तादृशविलक्षणपरिमाणे त्रित्वसंख्याया एव हेतुत्वं न तु परिमाणस्य। अस्तु तर्हि सर्वत्र संख्यैव कारणं क्लृप्तत्वादिति चेन्न। क्षुद्रपरिमाणकपालद्वयारब्धघटपरिमाणात् बृहत्परिमाणकपालद्वयारब्धघटपरिमाण

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नाशस्त्वाश्रयनाशतः।

परिमाणं चाऽऽश्रयनाशादेव नश्यतीत्याह। नाशइति। अर्थात्परिमाणस्यैव।

प्रश्न—घट का परिमाण किसके परिमाण से जायमान है।

उत्तर—घट आदि का परिमाण कपाल आदि के परिमाण से जन्य है।

प्रचय जन्य परिमाण को उदाहरणद्वारा बतलाते हैं—कि "परिमाणं तूलकादौ" अर्थात् तूलका (रुई) आदि में जो परिमाण है वह शिथिलाख्य संयोगरूपप्रचय से जन्य है। ११२॥

आश्रय के नाश से परिमाण का नाश हो जाता है—इसी बात को दिखलाते हैं—"नाशस्त्वाश्रयनाशतः"।

वैलक्षण्यं प्रत्यक्षसिद्धम्, तादृशवैलक्षण्यस्य संख्यायाः कारणत्वे अनिर्वाहप्रसंगात्, उभयत्र संख्याया एकरूपत्वात्। परिमाणस्य कारणत्वेतु उभयत्र कारणीभूतकपालपरिमाणवैलक्षण्यात्कार्यीभूतघटपरिमाणस्य वैलक्षण्यं निर्वहतीति। परन्तु यत्र समानसंख्यैः, समानपरिमाणैश्च कार्यमारब्धम्, तत्र महत्त्वोत्पत्तौ उभयोरपि कारणत्वम्, प्रत्येकमुभयोरपि सामर्थ्यदर्शनात्। अपरे तु समानजातीयात्कार्योत्पत्तिसंभवे विजातीयकारणकल्पनाऽनवकाशात्परिमाणस्यैव कारणतामाहुः॥ १११॥ कपालादिपरिमाणजन्यमिति। कपालादिपरिमाणमात्रजन्यमित्यर्थः। न तु कपालगतद्वित्वसंख्याजन्यं, द्वित्वसंख्याया महत्वाऽजनकत्वात्, अन्यथा द्व्यणुकेपि महत्वोत्पादापत्तेः। नापि प्रचयजन्यं, अप्रचितकपालपरिमाणाद्घटपरिमाणोत्पत्तेः। प्रचयत्वं चाऽवयवसमवेतसंयोगनिष्ठो जातिविशेषः, तादृशजातिविशेषावच्छिन्न एव शिथिलशब्देनोच्यते। स तु द्वितूलके महत्वमारभते, द्वयोस्तूलक पिण्डयोर्वर्तमानः पिण्डारम्भकावयवप्रशिथिलसंयोगापेक्षः। तथाच यत्र पिण्डयोः संयोगः प्रशिथिलः, पिण्डावयवसंयोगा अपिप्रशिथिलाः तत्र पिण्डाभ्यामारब्धे द्रव्ये अत्यन्तनिविड़परस्परावयवसंयोगपिण्डद्वयारब्धद्रव्यापेक्षया महत्वातिशयदर्शनात् पिण्डयोः प्रशिथिलः इतरेतरपिण्डावयवसंयोगापेक्षो महत्वस्य कारणमितिभावः। यदि हि संख्यैव कारणम्, समानसंख्यैः प्रशिथिलसंयोगै र्निविड़संयोगैश्चाऽऽरब्धयोर्द्रव्ययोः प्रशिथिलसंयोगारब्धे निविड़संयोगारब्धापेक्षया महत्वातिशयो न स्यात्करणसंख्याया उभयत्रापि तुल्यत्वात्। तथा यदि महत्वं कारणं तुल्यपरिमाणैः प्रचितैरप्रचितैश्चारब्धयोर्द्रव्ययोरप्रचितारब्धापेक्षया प्रचितारब्धे परिमाणातिशयो न भवेदतो न संख्या कारणं नापि महत्वमिति संक्षेपः॥ ११२॥

परिमाणं तूलकादौ अस्य जन्यते इतिपूर्वेणाऽन्वयः। नाशस्त्वाश्रयनाशत इतिमूलेऽवधारणार्थकतुशब्दस्य नाशत इत्युत्तरं योजनया आश्रयनाशादेव नाश इत्यर्थोलभ्यते, कस्येत्याकाङ्क्षायामाह-अर्थात्परिमाणस्यैवेति। अर्थादिति। परिमाणनिरूपणस्य प्रकृतत्वादित्यर्थः। अथ समवायिकारणनाशगुणनाशयोः केन

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रूपेण कार्यकारणभावः, न तावत्समवायिनाशत्वेन समवेतनाशत्वेन, दण्डादिनाशादपि घटादेर्घटादिवृत्तिरूपादेश्च नाशापत्तेः। नापि स्वसमवायिनाशत्वेन स्वसमवेतनाशत्वेन—स्वत्वाननुगमात्। न च तन्नाशत्वेन तत्समवायिनाशत्वेन कार्यकारणभावः, तत्पदेन विशिष्याश्रयनाशनाश्यसमवेतव्यक्तीनामेवोपादान्न पाकादिजन्यरूपनाशे व्यभिचार इति वाच्यम्। गुणकर्मात्मकतत्तन्नाश्यव्यक्तिभेदेनाऽनन्तनाश्यनाशकभावापत्तेरिति चेन्न। तन्नाशत्वेन कारणत्वम्, तत्समवेतनिखिलगुणकर्मसाधारणतन्नाशवत्तत्समवेतनाशत्वं च कार्यतावच्छेदकम्। घटादिसत्त्वेपि अपेक्षाबुद्धिनाशादिना घटादिवृत्तिद्वित्वनाशात् तत्र व्यभिचारवारणाय तन्नाशवत्वं तत्समवेतनाशविशेषणम्। तच्च कालिकसंबन्धेन। न च तत्र व्यभिचारवारणाय कालिकेन तद्वद्भिन्नत्वमेव तत्समवेतनाशविशेषणमुच्यतामिति वाच्यम्। तन्नाशमपेक्ष्य तद्वद्भेदस्य गुरुत्वात्। यत्र प्रतियोगितासंबन्धेन तादृशतत्समवेतनाशः-तत्रस्वप्रतियोगिजन्यत्वसंबन्धेन स्वप्रतियोगिसमवेतत्वकालिकोभयसंबन्धेन वा तन्नाश इतिकार्यकारणभावः।

नव्यास्तु स्वप्रतियोगिसमवेतत्वसंबन्धेन नाशत्वेनैव नाशकता, स्वप्रतियोगिसमवेतत्व—कालिकोभयसंबन्धेन यो नाशवान् तत्प्रतियोगिकनाशत्वेन कार्यता। अपेक्षाबुद्धिनाशजन्ये आश्रयसत्वकालीनद्वित्वादिनाशे व्यभिचारवारणायकालिकप्रवेशः। यत्र प्रतियोगितासंबन्धेन नाशवत्प्रतियोगिकनाशः तत्र स्वप्रतियोगिसमवेतत्वसंबन्धेन नाशःइति कार्यकारणभावः। कालिकसंबन्धमात्रोक्तौ वस्तुमात्रस्याऽऽशुविनाशित्वप्रसंगः, अव्यावर्तकत्वेन तादृशकार्यकारणभावस्य व्यर्थतापत्तेश्च। सत्वेन ध्वंसत्वेन प्रतियोगिध्वंसयोः कार्यकारणभावसत्वादेव तन्नाशानन्तरं न तत्समवेतजातौ प्रतियोगितासंबन्धेन नाशवत्प्रतियोगिकनाशापत्तिः।

वस्तुतस्तु स्वप्रतियोगिसमवेतत्वसंबन्धेनैव कारणत्वम्, नतुकालिकस्य प्रवेशः, नवा सत्वेन ध्वंसत्वेन कार्यकारणभावान्तरकल्पनम्। न चैवं तन्नाशानन्तरं तत्समवेतजातौ प्रतियोगितासंबन्धेन नाशवत्प्रतियोगिकनाशापत्तिरितिवाच्यम्। ज्ञानादिद्विक्षणस्थायिपदार्थनाशस्थले प्रतियोगितासंबन्धेन सामान्यतोनाशत्वावच्छिन्नं प्रति कालिकसंबन्धावच्छिन्नस्वप्रतियोग्यधिकरणत्वसंबन्धेन सहवर्तिप्रतियोगिकनाशस्य जनकतायाः क्लृप्ततया जातौ तेन संबन्धेन नाशाभावादेव प्रतियोगितयानाशवत्प्रतियोगिकनाशाऽसंभवात्। सामान्यसामग्रीसहिताया एवविशेषसामग्र्याःफलोपधायकत्वादित्याहुः।

केचित्त स्वप्रतियोगिसमवेतत्वसंबन्धेन नाशत्वेनैव नाशकत्वम्, सत्ववन्नाशत्वेन च कार्यत्वम्। सत्ववत्ताचाऽऽश्रयनाशानाश्यसद्व्यावृत्तप्रतियोगिताव्यक्तिभिःसंबन्धैर्विवक्षिताऽतोनव्यभिचारः। शेषंदर्शितदिशाऽवसेयमितिप्राहुः।

शंकते। **न चेति। कथंपरिमाणनाशकइति।** नपरिमाणनाशकारणमित्यर्थः। व्यतिरेकव्यभिचारमाह। **सत्यपि अवयविनीति।** अवयविनाशरूप

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नचाऽवयविनाशः कथं परिमाणनाशकः, सत्यप्यवयविनि त्रिचतुरादिपरमाणुविश्लेषे तदुपचये चाऽवयविनः प्रत्यभिज्ञानेपि परिमाणान्तरस्य प्रत्यक्षसिद्धत्वादितिवाच्यम् । परमाणुविश्लेषे हि द्व्यणुकस्य नाशोऽवश्यमभ्युपेयः; तन्नाशे च त्र्यणुकनाशः एवंक्रमेण महावयविनो नाशस्याऽऽवश्यकत्वात्, सति च नाशकेऽनभ्युपगममात्रेणाऽपलपितुमशक्यत्वात् । शरीरादावयवोपचयेऽसमवायिकारणनाशस्याऽऽवश्यकत्वादवयविनाश आवश्यकः ।

प्रश्न—अवयवी (आश्रय) के नाश से परिमाण का नाश कैसे होता है— क्यों कि अवयवी में से तीन—चार परमाणु निकाल लिये जायें—अथवा उसमें तीन चार परमाणु और मिलादिये जावें—तब भी अवयवी की यह वही अवयवी है इत्याकारक प्रत्यभिज्ञा होने से (अवयवी का विनाश नहीं हुवा यह तो स्पष्टही है) और परिमाणान्तर प्रत्यक्षसिद्ध है (क्योंकि तीन चार परमाणुवों के उपचय होने पर परिमाण बढ़ेगा—और विश्लेष होने पर घटेगा)।

उत्तर—यह कथन ठीक नहीं है—क्यों कि परमाणुओं के (विश्लेष) हटजाने पर अर्थात् परमाणुवों का परस्पर संयोग नष्ट होजाने पर द्व्यणुक का नाश अवश्य स्वीकार करना होगा—द्व्यणुक के नाश होने पर त्रसरेणु का नाश अवश्य मानना होगा—इस क्रम से महावयवीपर्यन्त विनाश आवश्यक है । नाशक के मौजूद होने पर अवयवी के नाश का अपलाप करना अनुचित है । इसी प्रकार शरीर आदि में भी अवयवों के उपचय (बढ़ना) होने पर असमवायिकारण अवयवसंयोग का विनाश अवश्य होता है यह मानना होगा—और असमवायिकारण के नाश से अवयवी (शरीर आदि) का विनाश भी अवश्य मानना होगा—

इससे यह सिद्ध हुवा कि अवयवी के नाश से ही परिमाण का नाश होता है ।

कारणाभावेपीत्यर्थः । त्रिचतुरादिपरमाणुविश्लेषे । त्रिचतुरादिपरमाणुविभागे । तदुपचये वेति । त्रिचतुरादिपरमाणुसंयोगे वेत्यर्थः । अस्य च परिमाणान्तरस्य प्रत्यक्षसिद्धत्वादित्यनेनाऽन्वयः । तथाचाऽऽश्रयविनाशो न परिमाणविनाशकारणं परिमाणध्वंसवन्निष्ठभेदप्रतियोगितावच्छेदकत्वात् । परिमाणध्वंसवत्ता च प्रतियोगितासंन्धेन । तादृशावच्छेदकताच—स्वप्रतियोगिजन्यत्वकालिकोभयसंबन्धेनेति । नचतत्राऽऽश्रयनाशोपिस्वीकार्य इत्याह। अवयविनः प्रत्यभिज्ञानेपीति। तथाचसोयंघटइतिप्रत्यभिज्ञाबलेनाऽऽश्रयविनाशोनस्वीकर्तुं शक्यते इतिभावः । व्यतिरेकव्यभिचारमुद्धरति । परमाणुविश्लेषे हीति । अवश्यमभ्युपेयइति । असमवायिकारणनाशे कार्यद्रव्यनाशावश्यकत्वादिति भावः । तन्नाशेचेति । द्व्यणुकनाशे चेत्यर्थः । तन्नाशाधीनत्र्यणुकसंयोगनाशो चेत्यपि बोध्यम् । एवंक्रमेणेति । असमवायिकारणीभूताऽवयवसंयोगनाशेनेत्यर्थः । महावयविनोनाशस्यावश्यकत्वादिति । तथा च नोक्त-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न च पटाऽविनाशेपि तत्त्वन्तरसंयोगात्परिमाणाधिक्यं न स्यादिति वाच्यम् । तत्रापि वेमाभिघातेनाऽसमवायिकारणतन्तुसंयोगनाशात्पटनाशस्याऽऽवश्यकत्वात् ।

किंच तन्त्वन्तरस्य तत्पटावयवत्वे पूर्वं तत्पट एव न स्यात्, तत्त्वन्तररूपकारणाऽभावात्, तन्त्वन्तरस्याऽवयवत्वाभावे च न तेन परिमाणाधिक्यं, संयुक्तद्रव्यान्तरवत् । तस्मात्तत्र तन्त्वन्तरसंयोगे सति पूर्वं पटनाशस्ततः

प्रश्न—(आपने जो पहिले कहा था कि अवयवों के उपचय होने पर असमवायिकारण के नाश से अवयवी का नाश अवश्य मानना होगा—सो हम देखते हैं कि पटात्मक अवयवी के साथ) तन्त्वन्तरों के संयोग से अर्थात् और तन्तुवों के जोड़ देने से पट का विनाश तो नहीं होता है प्रत्युत परिमाण का आधिक्य हो जाता है—अब वह नहीं होना चाहिये-(कारण कि आपके मत से बिना पटनाश हुवे पूर्व परिमाण का नाश नहीं होगा, बिना पूर्वपरिमाण नाश हुवे दूसरा परिमाण अर्थात् परिमाणाधिक्य कैसे होगा इससे आश्रयानाश सिद्ध हुवा अर्थात् सिद्धान्ती ने जो पहिले आश्रयनाश से परिमाणनाश बतलाया था वह सिद्धान्ती का कथन तुच्छ है ऐसा पूर्वपक्षी बोलता है) ।

उत्तर—उस स्थल में भी वेमा आदि के अभिघात से (पट के समवायिकारण जो पूर्वतन्तु उनका विभाग हो जाने से) पट के असमवायितन्तुसंयोग का नाश हो जाता है-और उसके नाश से पटका नाश प्रत्यक्ष सिद्ध है । (किञ्च) और दूसरी बात यह है कि जिन तन्त्वन्तरों को उस पट में जोड़ा गया है—वे तन्त्वन्तर यदि उस पट के अवयव हैं तो तन्त्वन्तर के जोड़ने पर जो वह पट है उसके पूर्व में वह पट ही नहीं था—क्योंकि तन्त्वन्तर के जोड़ने पर जो वह पट है उसके पूर्व में वह पट ही नहीं था—क्योंकि तन्त्वतररूपकारण पूर्व में नहीं थे । और तन्त्वतरों को यदि उस पट का अवयव नहीं मानते हो तब उन तन्त्वतरों से परिमाण का आधिक्य नहीं हो सकता है—कारण कि वे तन्त्वतर तो उस पट के साथ ऐसे संबद्ध हैं जैसे एक द्रव्य के साथ कोई द्रव्यान्तर संयुक्त हो -(उस संयुक्त द्रव्यान्तर से परिमाण का आधिक्य

व्यभिचारइतिभावः । ननु उक्तप्रत्यभिज्ञाविरोधः, प्रत्यक्षविरोधश्चेत्यतआह । सति च नाशकइति । महावयविनाशकारणे च विद्यमाने सतीत्यर्थः । अनभ्युपगममात्रेणेति । अस्वीकारमात्रेणेत्यर्थः । अपलपितुमिति । अन्यथपितुमित्यर्थः । अशक्यत्वादिति । तथा च सोयंघटइति प्रत्यभिज्ञायाः साजात्यविषयकत्वम्, "अवयविनः प्रत्यभिज्ञानं तु" इत्यादिनास्वयमेव वक्ष्यतीतिभावः । ननुअवयविनाशो न परिमाणविनाशकारणं-पटादिसत्वेऽपि तत्र तन्त्वन्तरसंयोगजन्यपरिमाणान्तरस्यप्रत्यक्षसिद्धत्वात्, यदि अवयविनाशः परिमाणनाशकारणं स्यात्तदा पटसत्वे तन्त्वन्तरसंयोगात्परिमाणान्तरं न स्यात्, तथाच व्यतिरेकव्यभिचारः स्फुट एवेत्याशंक्ये । नचेति ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संख्यावत्तु पृथकत्वं स्यात्पृथक्प्रत्ययकारणम् । ११३

पटान्तरोत्पत्तिरित्यवश्यं स्वीकार्यम् । अवयविनः प्रत्यभिज्ञानं तु साजात्येन दीपकलिकादिववत् । न च पूर्वतन्तव एव तन्त्वन्तरसहकारात्पूर्वपटे सत्येव पटान्तरमारभन्तामितिवाच्यम् । मूर्तयोःसमानदेशताविरोधात्तत्र पटद्वयासंभवात्, एकदा नानाद्रव्यस्य तत्रोपलंभस्य बाधितत्वाच्च । तस्मात्पूर्वद्रव्यस्य प्रतिबन्धकस्य विनाशे द्रव्यान्तरोत्पत्तिरित्यस्यावश्यमभ्युपेतव्यत्वात् ।

पृथक्त्वं निरूपयति । संख्यावदिति । पृथक्प्रत्ययाऽसाधारणकारणं पृथकत्वम् । तन्नित्यतादिकं संख्यावत्–तथाहि–नित्येषु एकत्वं नित्यम्, अनित्येषु अनित्यम्, अनित्यमेकत्वमाश्रयद्वितीयक्षणे चोत्पद्यते, आश्रय-

नहीं होता है) । अतः वहाँ तन्त्वन्तरों का संयोग होने पर पूर्वपट का नाश और पटान्तर की उत्पत्ति अवश्य ही माननी होगी । और "स एवायं पटः" यह जो प्रत्यभिज्ञा होती है—वह दीपकलिका (दीपशिखा) की तरह साजात्य का अवलम्बन करती है ।

प्रश्न—वहाँ पर यही क्यों न मान लिया जाय कि पूर्वतन्तु ही दूसरे तन्तुवों की सहायता से पूर्वपट के रहते हुवे ही दूसरे पट को उत्पन्न कर देते हैं ? उत्तर—दो मूर्त्तद्रव्यों की समान देशता सर्वथा विरुद्ध है, अर्थात् दो मूर्त्तद्रव्य समान देश (एक अधिकरण) में नहीं रह सकते हैं, अतः वहाँ दो पट नहीं रह सकते हैं, [अर्थात् पूर्वपट भी रहे और तन्त्वन्तर के सहकार से पटान्तर भी रहे यह बिल्कुल असंभव है]

और दूसरी बात यह है कि एक ही काल में एकत्र अवयवों में नानाद्रव्यों की उपलब्धि भी सर्वथा बाधित है । इसलिये प्रतिबन्धक पूर्वपटात्मकद्रव्य के विनाश हो जाने पर ही द्रव्यान्तर की उत्पत्ति हो सकेगी । और द्रव्यान्तर की उत्पत्ति होने पर परिमाणान्तर की उत्पत्ति भी अनुभवसिद्ध है यह भी आवश्य ही स्वीकार करना होगा ।

समाधत्ते तत्रापीति । आवश्यकत्वादिति । तथा च न व्यभिचार इतिभावः । दीपकलिकादिवदिति । यथा प्रतिक्षणं दीपकलिकाया विनाशेपि सैवेयंदीपकलि-केतिप्रत्यभिज्ञायाः सजातीयविषयकत्वम्, तथा सोयं घटइत्यादिप्रत्यभिज्ञायाअपि-साजात्यविषयकत्वंबोध्यम् । विरोधादिति । द्रव्यान्तरोत्पत्तिं प्रति समवायेन द्रव्यस्य प्रतिबन्धकत्वादितिभावः । द्रव्यान्तरोत्पत्तिरिति । द्रव्यान्तरोत्पत्तौ सत्यां परिमाणा-न्तरोत्पत्तिरितिपरिमाणनाशंप्रति आश्रयनाशस्य कारणत्वं सिद्धमेवेतिभावः ।

कालादिवारणायाऽसाधारणेति । तथाचाऽयमस्मात्पृथगितिप्रत्ययनिष्ठविशेष्यता-संबन्धावच्छिन्नकार्यतानिरूपितसमवायसंबन्धावच्छिन्नकारणत्वम्, तादृशकारणतास-मानाधिकरणरूपावृत्तिजातिमत्त्वं वा लक्षणं बोध्यम् । एवं पृथक्त्वपदशक्यता-वच्छेदकजातिमत्त्वं लक्षणं बोध्यम् । आश्रयद्वितीयक्षणेइति । आद्ययोत्पत्तिद्वितीय-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नाशान्नश्यति, तथा एकपृथक्त्वमपि। द्वित्वादिवच्च द्विपृथक्त्वादिक-मपीत्यर्थः। ११३

पृथक्त्व का निरूपण करते हैं कि—घट पट से पृथक् है इस प्रकार के व्यवहार का असाधारण कारण पृथक्त्व है। उसकी नित्यता और अनित्यता संख्या की तरह समझना। तथा हि—जैसे नित्यद्रव्यों में रहने वाली एकत्वसंख्या नित्य है और अनित्यद्रव्यों में रहने वाली एकत्वसंख्या अनित्य है, अनित्य एकत्व संख्या आश्रयद्वितीयक्षण में उत्पन्न होती है, और आश्रयके नाश से नाश्य होती, ऐसे ही एकपृथक्त्व को भी जानना, और ठीक द्वित्वसंख्या के समान द्विपृक्त्व को भी जानना ॥११२-११३॥

क्षणेइत्यर्थः। आश्रयोत्पत्तिक्षणे एकत्वाद्युत्पत्तौ आश्रयस्य समवायिकारणत्वानुपपत्तिः, सव्येतरविषाणवत्किं कस्य कारणमितिव्यवस्था च न स्यादतोद्वितीयक्षणे इत्युक्तम्। अतएवोत्पन्नं द्रव्यं क्षणमगुणं निष्क्रियं चतिष्ठतीतिवृद्धाः। योजनया उत्पद्यते चेति चकारेण आश्रयाऽवयवगतैकत्वाऽसमवायिकारणकं चेति समुच्चीयते। तथैकपृथक्त्वमपीति। एकसमवेतपृथक्त्वमित्यर्थः। एकत्वं चात्र व्यक्तिद्वयाऽसमवेतत्वम्। तेन द्विपृथक्त्वस्य प्रत्येकसमवेतत्वेपि न क्षतिः। अयंभावः—एकपृथक्त्वं द्विविधम्—एकसमवेतपृथक्त्वं—एकावधिकपृथक्त्वं च। आद्यं यथा अयमस्मा-त्पृथगिति। द्वितीयं यथा—इमौ अस्मात्पृथगिति यथोक्तार्थकरणेन द्वितीयस्य व्यावृत्तिः, अयमाभ्यां पृथगित्यस्य च संग्रह इति ध्येयम्। द्वित्वादिवच्चेति। द्वित्वादिकं प्रति यथा स्वाश्रयः समवायिकारणम्, स्वाश्रयगतमेकत्वद्वयादिकम-समवायिकारणम्। अयमेकः अयमेकः इत्याद्यपेक्षाबुद्धिःनिमित्त कारणम, एवं अपेक्षा-बुद्धिनाशः, क्वचिच्च आश्रयनाशः कारणम्, तथा द्विपृथक्त्वादिकंप्रत्यपि स्वाश्रयः समवायिकारणम्, स्वाश्रयगतैकपृथक्त्वद्वयादिकमसमवायिकारणम्, अयं पृथक् अयं पृथगित्याद्यपेक्षाबुद्धिः निमित्त कारणम्। द्विपृक्त्वादिकमपीति। द्विपृथक्त्वं चात्र नोभयसमवेतपृथक्त्वम्, किन्तु त्रितयाऽसमवेतत्वे सति उभयसमवेतत्वम्। तेन त्रिपृथक्त्वादेरुभयसमवेतत्वेपि न क्षतिः। इदमत्ररहस्यम्—जन्यैकपृथक्त्व-सामान्यं प्रत्येव स्वाश्रयसमवेतत्वसंबन्धेन एकपृथक्त्वम्, अनेकाश्रितपृथक्त्वमात्रं प्रति च एकार्थसमवायेन एकपृथक्त्वं हेतुः। तत्रैकपृथक्त्वत्वं न पृथक्त्वत्वावान्तरं वैजात्यं घटःपटादेकपृथगित्यादिप्रतीत्या तस्यागुणत्वेन परम्परातद्व्याप्यजातिमत्व-साधनस्य चाऽप्रयोजकत्वात्, किन्तु उभयाऽसमवेतपृथक्त्वम्। तदुक्तं भाष्यकारैः-एतावांस्तुविशेषोयदेकत्वादिवदेकपृथक्त्वत्वाद्यपरसामान्याभावः संख्यायास्तु विशिष्य तद्विशिष्टव्यवहारदर्शनादिति। आचार्याः पुनः एकपृथक्त्वत्वादिकं पृथक्त्वत्वा-वान्तरवैजात्यमूरीचक्रुः। नच तद्धर्मावच्छिन्नावधिताकस्यैकस्यैव पृथक्त्वस्य लाघवेन तदितरयावन्निष्ठतौचित्यादेकमात्राश्रितं पृथक्त्वमसिद्धमिति वाच्यम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अन्योन्याभावतो नास्य चरितार्थत्वमिष्यते ।
अस्मात्पृथक्, इदंनेति प्रतीति र्हि विलक्षणा । ११४

ननु अयमस्मात्पृथगित्यादौ अन्योन्याभावो भासते तत्कथं पृथक्त्वं गुणान्तरं स्वीक्रियते । नच पृथक्त्वमेवास्तु नतु अन्योन्याभाव इति वाच्यम् । रूपं न घट इति प्रतीत्यनापत्तेः । नहि रूपे घटावधिकं पृथक्त्वं गुणान्तरमस्ति, नवा घटे घटावधिकं पृथक्त्वमस्ति येन परंपरासंबन्धः कल्प्यते इत्यत आह । अस्मादिति ।

प्रश्न—जब कि "अयम् अस्मात् पृथक्" यहां पर अन्योन्याभाव ही (पृथक्त्व के रूप में) भास रहा है तो फिर पृथक्त्व अन्योन्याभावस्वरूप होने के नाते गुणान्तर कैसे स्वीकार किया जा रहा है । यदि यह कहें कि हम पृथक्त्व को ही मानते हैं, अन्योन्याभाव को नहीं ।

उत्तर—'रूपं न घटः' 'घटो न पटः' इत्यादि प्रतीतियों की अनापत्ति (अनुपत्ति) हो जावेगी । (क्यों कि यह प्रतीति घट में रूप के भेद का अवगाहन करने पर तो बन जाती है, परन्तु अन्योन्याभाव को न मानने पर अथवा अन्योन्याभाव को पृथक्त्वरूप से मानने पर सर्वथा अनुपपन्न हो जावेगी) क्यों कि न तो रूप में ही कोई घटावधिक (घट की अपेक्षया) पृथक्त्व गुणान्तर है (कारण कि रूप भी गुण है और पृथक्त्व भी गुण है, गुण में गुण कैसे रहेगा–गुणे गुणानङ्गीकारात्) अथवा न घट में ही घटावधिक पृथक्त्व रहता हैं जिससे कि घट में रहने वाले पृथक्त्व को एकार्थसमवाय सम्बन्ध से रूप में रखने के लिये एकार्थसमवायरूप परंपरा सम्बन्ध की कल्पना की जावे । इसी उत्तरभूतपक्ष को "अस्मात्पृथगिदं नेति प्रतीतिर्हि विलक्षणा" इस कारिका से बतलाया है, कि "अयमस्मात् पृथक्" और 'इदंन' अर्थात् 'घटः पटोन' ये प्रतीतियां सर्वथा भिन्न हैं । (अतः पृथक्त्व को अन्योन्याभावस्वरूप न मानकर गुणान्तर मानना ही आवश्यक है)

तत्तद्घटभिन्नत्वावच्छिन्नावधिताकस्यैव पृथक्त्वस्य तत्तद्घटमात्रनिष्ठस्य तथात्वसंभवात्, तत्राऽवधितावच्छेदकभेदेनेव सामान्याश्रयभेदेन पृथक्त्वभेदे विनिगमकाभावाच्च, एकस्मिन्नेव च तद्व्यक्तिनिष्ठपृथक्त्वे तदवृत्तिधर्मावच्छिन्नावधिकत्वकल्पने बाधकाभावात् ।

अथाऽस्तु एकाश्रितं पृथक्त्वम्, तथापि अनेकाश्रिते तत्र प्रमाणाभावः, घटपटौ मठात्पृथगित्यादिप्रतीतेः प्रत्येकपर्यवसिताभ्यामेव पृथक्त्वाभ्यामुपपत्तेः । अन्यथा घटपटौ मठात्परौ नीलौ वा इत्यादिप्रतीत्यनुरोधेनोभयसमवेतस्य परत्वरूपादेरपि सिद्धिप्रसंगात् इति चेन्न । द्वयमेतस्मात्पृथक्, घटपटोभयं घटात्पृथगित्यबाधितप्रतीतेर्द्वित्वावच्छिन्नघटादिनिष्ठाधिकरणताकस्य घटत्वावच्छिन्नावधिकपृथक्त्वस्याऽवश्योपेयत्वात् । गुणद्वेषिभिरपि द्वित्वावच्छिन्नाधिकरणताकसामान्याभावमवगाह्य तादृशप्रतीतेः प्रमात्वस्वीकारादिति । ११३

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ननु शब्दवैलक्षण्यं ननु अर्थ वैलक्षण्यमिति चेन्न । विनाऽर्थभेदं घटात्पृथगितिवद्घटोनेत्यत्रापिपञ्चमीप्रसङ्गात् । तस्माद्यदर्थकयोगे पञ्चमी सोर्थोनञर्थाऽन्योन्याभावतोभिन्नो गुणान्तरं कल्प्यते इति । ११४

प्रश्न—'अयमस्मात् पृथक्" इदं न' इन दोनों प्रतीतियों में शब्दमात्र का ही वैलक्षण्य (अन्तर) है, न कि अर्थ का कोई वैलक्षण्य है ?

उत्तर—यदि इन प्रतीतियों के अर्थ में कोई भेद नहीं हैं तो जैसे 'घटात्पृथक्' यहां पर पृथक् के योग में पञ्चमी होती है वैसे ही 'घटोन पटः' यहां पर भी पञ्चमी विभक्ति हो जानी चाहिये । इसलिये यह मानना होगा कि जिस अर्थ के योग में पञ्चमी होती है वह अर्थ नञर्थ जो अन्योन्याभाव उससे भिन्न है और वह गुणान्तर हैं ॥११४॥

नच घटादयं पृथगित्यादिप्रतीतेर्घटाद्यन्योन्याभावविषयकत्वेनैवोपपत्तौ अतिरिक्तपृथक्त्वगुणे प्रमाणाभाव इति वाच्यम् । सप्रतियोगिकस्याऽन्यान्याभावस्य सावधिकत्वानुपपत्तेः, गुणानामेव तथात्वस्य दृष्टचरत्वात्, अन्यथा घटस्याऽन्योन्याभाववानित्यादिवद्घटादन्योन्याभाववानसौ इत्यादिप्रत्ययापत्तेरित्याशयेनाह । **अन्योन्याभावत इति** । घटो न पट इत्याद्यन्योन्याभावादित्यर्थः । **अस्य**—पृथक्त्वस्य । **चरितार्थत्वम्**—गतार्थत्वम् । **नेष्यतेइति** । नेष्टइतिभावः । **अयमस्मात्पृथगित्यादा विति** । इत्यादिप्रत्ययइत्यर्थः । आदिना इमौअस्मात्पृथगित्यादिप्रत्ययपरिग्रहः । **अन्योन्याभाव इति** । अन्योन्याभावएवेत्यर्थः । **भासते इति** । विषयतावानित्यर्थः । तथाचाऽन्योन्याभाव एव तादृशप्रत्ययीयविषयतावानितिभावः । **तत्** तस्मात् । उक्तप्रतीतरेन्योन्याभावविषयकत्वादिति यावत् । **स्वीक्रियते इति** । तथाच पृथक्त्वे तस्य गुणत्वे च प्रमाणाभावादितिभावः । ननु घटोनेति प्रतीतेर्घटावधिकपृथक्त्वविषयकत्वेनेवोपपत्तौ अन्योन्याभावे एव प्रमाणाभावादित्याशंकते । **नचेति** । **पृथक्त्वमेवास्तु इति** । घटोनेत्यादिप्रतीतौ पृथक्त्वमेव विषयोस्तु इति भावः । एवकारव्यवच्छेद्यंस्पष्टयति । **नन्विति** । समाधत्ते । **रूपंनघट इति** । **प्रतीत्यनापत्ते इति** । प्रतीत्यनुपपत्तेरित्यर्थः । तत्र हेतुमाह **नहीति** । **गुणान्तरमस्तीति** । गुणे गुणानंगीकारादितिभावः । ननु समवायेन गुणे गुणाऽसत्वेपि समवायघटितसमानाधिकरण्यसंबन्धेन तत्र तत्सत्वे बाधकाभावः, तथाच समवायेन घटनिष्ठपृथक्त्वं विषयीकृत्यैव रूपंनघट इति प्रतीत्युपपत्तौ अन्योन्याभावे प्रमाणाभावादित्याशंकां निरस्यति । **नचेति** । अस्याऽस्तीत्यनेनसहाऽन्वयः । घटोघटात्पृथगितिप्रतीत्यभावादितिभावः । **परंपरासंबन्ध इति** । सामानाधिकरण्यसंबन्धइत्यर्थः । एवंचातिरिक्तस्याऽन्योन्याभावस्याभ्युपगम आवश्यक इति भावः । मूले **अस्मात्पृथगिति**

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

घटात्पृथगितिप्रतीतिरित्त इत्यर्थः । इदंनेतिप्रतीतिरित्यर्थः । द्वियतः विलक्षणेति । वैलक्षण्यवतीत्यर्थः । वैलक्षण्यं च सर्वानुभवसिद्धमितिहृदयम् । अथ तथापि पृथक्त्वाऽन्योन्याभावयोरभेदएव अस्मात्पृथक्, इदंनेति प्रतीत्योर्वैलक्षण्यस्यशब्दवैलक्षण्यकृतत्वेनाऽर्थवैलक्षण्यकृतत्वाभावेन वस्तुनोर्भेदाऽसाधकत्वादित्याक्षिप्य परिहरति । नन्विति । शब्दवैलक्षण्यमेवेति । प्रतीतिवैलक्षण्यमित्यादिः । शब्दवैलक्षण्यकृतमेवेत्यर्थः । एवकारव्यवच्छेद्यं स्वयमाह । नत्वर्थवैलक्षण्यमिति । नत्वर्थवैलक्षण्यकृतमित्यर्थः । अर्थवैलक्षण्यमपि अवश्यमङ्गीकार्यमित्याशयेन समाधत्ते । विनार्थभेदमिति । अर्थवैलक्षण्यानङ्गीकारे इत्यर्थः । पञ्चमीप्रसंगादिति । पृथक्त्वाऽन्योन्याभावयोरैक्ये घटः पटान्नेतिप्रयोगापत्तिरितिभावः । अन्यारादितरर्तेइति सूत्रेणाऽन्यार्थकस्येवाऽन्योन्याभावार्थकस्यापि योगे पञ्चम्यनुशासनात् । अन्यथा घटादितरो, घटाद्भेदइत्यादौ पञ्चम्यनुपपत्तेः । अतएव भेदादिशब्दस्याऽन्यार्थकत्वविरहात्तद्योगे पञ्चमीप्राप्त्यर्थमेवेतरत्वपरस्येतरपदस्योपादानमपि उक्तसूत्रे संगच्छते । अन्यथाऽन्यार्थपरेणान्यशब्देनैव इतरपदस्यापि लाभसंभवात्स्वातंत्र्येणैतदुपादानवैयर्थ्यापत्तेः । वस्तुतस्तु नञोऽन्योन्याभावार्थकत्वेपि तदर्थधर्मिकस्वार्थान्वितप्रतियोगित्वप्रकारकान्वयबोधजनकत्वलक्षणस्य तद्योगस्य पटादिपदे विरहात्ततः पञ्चम्यसंभवात्, नञर्थेऽन्योन्याभावादौ प्रतियोगित्वसंबन्धेनैव घटादेरन्वयसंभवेन तत्र प्रतियोगित्वस्याऽप्रकारत्वात्, निपातातिरिक्तस्थले एव नामार्थयोर्भेदेनाऽन्वयस्याऽव्युत्पन्नतया घटाद्भेदइत्यादौ तदसंभवेन तत्रैव घटादिपदानामन्योन्याभावार्थक भेदादिपदेन समंतादृशयोगसंभवात् । व्युत्पत्तेः प्रयोगानुरोधितया नञाद्यतिरिक्तस्यैवा न्योन्याभावार्थकपदस्य योगे पञ्चम्यनुशासनसंभवाच्च । अतएवात्यन्ताभावार्थकपदयोगे षष्ठ्याः प्रतियोगित्ववाचकत्वाऽविशेषेपि घटस्याऽत्यन्ताभाववानित्यादेरिव घटस्य शून्योयमित्यादिको न प्रयोगः, शून्यादिभिन्नैरेवात्यन्ताभावार्थकपदैर्योगे षष्ठ्या अनुशास्यत्वात् । शून्यादिपदोपस्थाप्येऽत्यन्ताभावे प्रतियोगिविधया नामार्थस्यान्वये तृतीयान्तत्वं तन्त्रमतोघटस्य शून्यइत्यादिको न प्रयोगः किन्तु घटेन शून्यइत्यादिरेवेति समः समाधिः । तस्मात्समाधिसौकर्यार्थं पृथक्त्वमन्योन्याभावादतिरिच्यते इति ध्येयम् ।

केचित्तु समस्तमेव पृथक्त्वं नित्यम्, उत्पादविनाशयोः कल्पनायां गौरवान्मानाभावाच्च । नचेदेवं—आद्यक्षणे घटः पटान्न पृथगित्यपि प्रमा स्यात्, न स्याच्च घटस्तदानीं पटात्पृथगिति प्रमा । जन्ये समवेतस्येव तादृशगुणस्यापि जन्यताव्याप्तेर्बहुशोऽव्युदस्तत्वात् । पृथक्त्वेषु गुणत्वसमवेतत्वयोरसिद्धेः, अन्यथा रूपं रसात्पृथक् पटाभावो घटाभावात्पृथगित्यादिप्रत्ययानामप्रामाण्यापत्तिः । नित्यानेकसमवेतानां च जातिशून्यानामेव मिथः सांकर्यं नोपेयते, तादृशानामेव जातिपदार्थत्वात् । यदि च घटः पटात्पृथगित्यादिप्रतीतौ पटादेः प्रतियोगित्वमेव भासते नावधिकत्वं, नञादियोगे षष्ठ्या इव पञ्चम्या अपि निराकांक्षत्वादेव घटान्नेत्यादिको न प्रयोगः, पाकाय यतते इत्यादाविव द्वितीयायाः, अन्यथा पाकं तनुते—

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

करोतीत्यादाविव यत्नार्थकधातुयोगस्याऽविशिष्टत्वेन तत्र पाकादिपदोत्तरं विषयित्वार्थकद्वितीयापत्तेः। अत एव साध्यवदन्यावृत्तित्वमिति व्याप्तिनिरुक्तौ साध्यवतोऽन्यस्मिन् वृत्तिर्यस्यतत्वाभाव इत्यादिक्रमेण पंचमीमन्तर्भाव्य विग्रहं वर्णयन्ति तान्त्रिकाः। तत्राऽन्यपदस्याऽन्योन्याभाववदर्थकत्वात्। अन्यथा पृथक्त्वाख्यगुणवत्परत्वे सत्तावत्त्वावच्छिन्नावधिकपृथक्त्वगुणाऽप्रसिद्धया सत्तासाध्यकसद्धेतावव्याप्त्यपत्तेः। न च तत्र साध्यवतामन्यस्मिन् वृत्तिर्यस्येति प्रतियोगित्वार्थिकां षष्ठीमन्तर्भाव्यैव विग्रहोवर्णनीय इति वाच्यम्। तथा सति वन्हिमतामन्योह्रद इति प्रयोगापत्तेः, उक्तनिरुक्त्यनुरोधेनाऽन्योन्याभावार्थकपदयोगेपि प्रतियोगित्वार्थकपंचम्याः स्वहस्तिततत्त्वादिति विभाव्यते—तदाऽन्योन्याभाव एव पृथक्त्वम्, न तु सावधिकं गुणान्तरं तथा अस्तु वा धर्मिकल्पनातोधर्मकल्पनाया लघुत्वेन घटादिप्रतियोगिकतयाऽनुभूयमानस्य घटादेरन्योन्याभावस्यैव घटाद्यवधिकत्वमपि, घटः पटोनेत्यादिवत्, घटः पटात्पृथगित्यपि प्रतीतेर्दुर्वारत्वात्, समवायेन पृथक्त्वबुद्धेः भ्रमात्वस्य स्वसिद्धान्तवासनामात्रसिद्धत्वात्, नञादियोगे च पंचम्याः प्रागेव निरस्तत्वादित्यास्तां विस्तरः।

यद्यपि पृथक्पदस्याऽन्योन्याभावार्थकत्वानंगीकर्तृप्राचीनमतेपि घटादन्य इति दृष्टान्तेन घटो नेत्यत्र पंचम्यापादनसंभवात्तत्पक्षे दोषमनुद्भाव्य पृथक्पदस्यान्योन्याभावार्थकत्वांगीकर्तृनवीनमते एव तादृशदोषापादने, घटादन्य इति दृष्टान्तमपहाय घटात्पृथगिति दृष्टान्तानुसरणे च बीजाभावः। तथापि प्राचां मते न्यारादितरर्त्ते अ इति सूत्रस्थान्यपदस्य अन्योन्याभावार्थकविभक्तिमच्छब्दपरत्वस्वीकारेण नञ्पदस्यातादृशतया घटोनेत्यत्र पंचम्याऽऽपादनाऽसंभवान्नवीनमते एव एतद्दूषणमभिहितम्। नव्यमते च सूत्रेऽन्यपदस्य तादृशशब्दपरत्वे घटात्पृथगिति प्रयोगानुपपत्तिः, पृथक्शब्दस्यान्योन्याभावार्थकत्वेपि विभक्तिमत्वाभावेन पंचम्यप्रसक्तेः। अतः सूत्रस्थाऽन्यपदस्याऽन्योन्याभावार्थकपदसामान्यपरत्वस्यैव स्वीकार्यतया घटोनेत्यत्र पंचम्यापत्तिरूपदोषसंगतिः। विभक्तिशून्याऽन्योन्याभावार्थकपृथक्शब्द योगे यथा पंचमी तथा नञादयोगेपि पंचम्यापत्तिरिति तुल्यदृष्टान्तप्रदर्शनाय घटादन्य इत्यस्य दृष्टान्ततयोपेक्षितम्।

न च घटस्यान्योन्याभाव इत्यादौ उक्तसूत्रबलान्मतद्वयेपि पंचम्यापादनसंभवे तदुपेक्ष्य घटोनेत्यत्रपंचम्यापादने किं बीजमिति वाच्यम्। सूत्रस्थाऽन्यपदस्य प्रतियोगितात्वावच्छिन्नविषयतानिरूपितऽन्योन्याभावत्वावच्छिन्न विषयताशान्तिवोधतात्पर्येणोच्चरितत्वात्, अन्योन्याभाव इति शब्दश्रवणे कस्याऽन्योन्याभाव इति संबन्धाकांक्षाया एवोदयेन संबन्धत्वावच्छिन्नविषयतानिरूपिताऽन्योन्याभावात्वावच्छिन्नविषयताशालिबोधस्यैव जायमानत्वात्सूत्रस्थान्यपदेनाऽन्योन्याभावपदस्य ग्रहणाऽसंभवेन घटस्याऽन्योन्याभाव इत्यत्र मतद्वयेपि पंचम्यापादनाऽसंभवाद्घटोनेत्यत्रैव तदापादनं कृतमितिध्येयम्।

तस्मादिति। पृथक्शब्दस्याऽन्योन्याभावार्थकत्वे घटोनेत्पत्र पंचम्यापत्तिदोषादित्यर्थः। **सोऽर्थ इति**। तादृशोर्थे इत्यर्थः। **कल्प्यते इति**। घटः पटात्पृथगिति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः
कीर्तितस्त्रिविधस्त्वेष आद्योऽन्यतरकर्मजः ॥११५॥
तथोभयक्रियाजन्योभवेत्संयोगजोऽपरः
आदिमः श्येनशैलादिसंयोगः परिकीर्तितः ॥११६॥
मेषयोः सन्निपातोयः स द्वितीय उदाहृतः

संयोगं निरूपयति। अप्राप्तयोरिति। तं विभजते। कीर्तित इति। एषः—संयोगः ११५ संनिपातः—संयोगः। द्वितीयः—उभयकर्मजः।

संयोग का निरूपण करते हैं—"अप्राप्तयोः" इत्यादिग्रन्थ से। का० अ० पृथग्भूत दो द्रव्यों के परस्पर मिलने को संयोग कहते हैं। वह संयोग तीन प्रकार का है आद्य अन्यतर (दोनों में से एक) की क्रिया से उत्पन्न होने वाला, अपर (दूसरा) उभय क्रिया जन्य, तीसरा संयोग से जायमान संयोग। आदिम श्येन (बाजपक्षी) और शैल (पर्वत) का संयोग अन्यतर के अन्तर्गत श्येन क्रिया जन्य है। युद्धय मान दो मेषों (मेढ़ों) का जो सन्निपात (संयोग) वह अपर (उभय क्रिया जन्म) संयोग है।

प्रतीत्या विषयीक्रियते इत्यर्थः। तथाचाऽन्योन्याभावपृथक्त्वयोरैक्ये घटोनेत्पत्र पंचम्यापत्त्या पृथक्त्वं गुणान्तरमेवेतिभावः। अथ पृथक्त्वस्याऽन्योन्याभावार्थकत्वाभावे तद्योगे पञ्चम्यनुपपत्तिरिति चेन्न। पृथग्विनानानाभिस्तृतीयान्यतरस्यामिति सूत्रेण वैकल्पिकपंचमीविधानादिति तत्वम्।

प्राभाकरास्तु कार्यद्रव्येषु पृथक्त्वं नानुमन्यन्ते—तदाहुः—

"पृथक्त्वं तु गुणोनित्यद्रव्येषु परमाणुषु।
भवेद्व्यावर्त्तकोधर्मः कार्यद्रव्येषु नेष्यते॥"

अद्वैतवादिनस्तु स्तम्भात्कुम्भोभिन्न इति कुम्भभेदावगमस्य तत्पूर्वभाविस्तम्भभेदावगमनिबन्धनत्वात्, स्तम्भभेदावगमस्य च तत्पूर्वभाविकुम्भभेदावगमाधीनत्वात् भेदप्रतिपत्तिमेवदुरुपपादां मन्यमानाः "नेहनानास्तिकिंचन" इत्यादिवाक्यानां विरोधपरिहाराय पृथक्त्वं गुणान्तरं परमार्थतोनास्तीत्याहुः।

शिरोमणिना पदार्थतत्वनिरूपणे पृथक्त्वमपि न गुणान्तरं, अन्योन्याभावादेव पृथक्त्वव्यवहारोपपत्तेः। पृथक्त्वप्रतीतिस्तु न सावधित्वालंबना, मानाभावात्। "घटात्पटः पृथक् इतरेभ्योऽन्यः, भिन्नः, अर्थान्तरमित्यादौ च तच्छब्दविशेषप्रयोगे पञ्चम्यानुशासनकी" इति ग्रन्थेन पृथक्त्वस्य गुणान्तरत्वं निराकृतम् ॥११४॥

इतिपृथक्त्वनिरूपणम्।

संयोगस्वरूपमाह। **अप्राप्तयोरित्यादिना। अप्राप्तयोः**—असंबद्धयोरित्यर्थः। तेन समवायव्यावृत्तिः। **प्राप्तिः**—संबन्धः। असंबद्धत्वेन वर्तमानयोः संबन्धःसंयोग

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कपालतरुसंयोगात्संयोगस्तरुकुम्भयोः ॥११७॥
तृतीयः स्यात्, कर्मजोपि द्विधैव परिकीर्तितः
अभिघातोनोदनं च शब्दहेतुरिहादिमः ॥११८॥
शब्दाऽहेतुर्द्वितीयः स्यात्,

११७ तृतीय इति। संयोगजसंयोग इत्यर्थः। तृतीयः स्यादिति पूर्वेणान्वितम्। आदिमः—अभिघातः। ११८ द्वितीयोनोदनाख्यसंयोग इत्यर्थः।

इति संयोगनिरूपणम्

कपाल और वृक्ष के संयोग से जायमान जो घट और वृक्ष का संयोग वह तीसरा संयोगजसंयोग कहा है। और कर्म (क्रिया) से जन्य जो संयोग वह भी दो प्रकार का-अभिघात तथा नोदन संज्ञक। अभिघाताख्यसंयोग होता है जिसमें शब्द कार होवे। (जैसे दोनों हाथों से तालिका बनाने के समय होने वाले हस्तद्वय संयोग में शब्द कारण है) और नोदनाख्यसंयोग वह है जिसमें शब्द हेतु न हो। (जैसे सर्पप्रभृति जीव के भूमि से होने वाले संयोग में शब्द कारण नहीं है)यह कारिकार्थ हुवा।

इति यावत्। लक्षणन्तु संयोगत्वजातिमत्वं बोध्यम्। अव्याप्यवृत्तिर्द्रव्यश्रयश्चायम्। तथा च संयोगस्त्रिविधः—एकः अन्यतरकर्मजः यथा श्येनशैलादिसंयोगः। उभयकर्मजोऽपरः—यथा मेषद्वयसंयोगः। संयोगजसंयोगस्तृतीयः। यथा कपालतरुसंयोगज घटतरुसंयोगः। एवं च कारणाकारणसंयोगात्कार्याकार्यसंयोगःफलितः। कार्याकार्यसंयोगश्च क्वचिदेकस्मात्, क्वचिद् द्वाभ्यां, क्वचिद्बहुभ्यश्च संयोगेभ्योभवति, तत्र कपालतरुसंयोगजो घटतरुसंयोगः-द्वाभ्यां तन्त्वाकाशसंयोगाभ्यां द्वितन्तुकपटस्याकाशसंयोगः-बहुभ्यस्तुरीतन्तुसंयोगेभ्यः एकः पटतुरीसंयोगः इति क्रमेणोदाहरणानि। क्वचिदेकस्मात्संयोगात्संयोगद्वयमुत्पद्यते यथा पार्थिवपरमाणुना जलपरमाणोः संयोगाज्जलद्व्यणुके पार्थिवपरमाणुसंयोग इव पार्थिवद्व्यणुकेपिजलपरमाणुसंयोगः। क्वचिदकारणसंयोगादपि संयोगः यथा यानोत्तरदेशसंयोगात्पुरुषोत्तरदेशसंयोगः।

न च पुरुषकर्मणा तत्संयोगः। पुरुषे कर्मण प्रत्यक्षबाधात्। एतेन केशतरुसंयोगजः कायतरुसंयोगोपि व्याख्यातः। तथा यानपूर्वदेशविभागात्पुरुषपूर्वदेशविभागोपि। **कन्दली कृतस्तु** कचित्कर्मसंयोगौ मिलित्वापि संयोगमुत्पादयतः—चरणेक्रिया ततोविभागः—श्येनावयविनि कर्मेत्येकः कालः—चरणविभागेन पूर्वसंयोगनाशोऽवयविकर्मणा च विभागः इत्येकः कालः—ततश्चरणस्थाणुसंयोगः श्येनविभागात्पूर्वसंयोगनाश इत्येकः कालः—ततश्चरणस्थाणुसंयोगेन श्येनकर्मणा च श्येनस्थाणुसंयोग इत्याहुः। विभुद्वयस्य तु नास्ति परस्परं संयोगः अन्यतरकर्मादेरभावादिति मीमांसकाः। केचित्तु अन्यतरकर्मादीनां परस्परव्यभिचारिणामकारणतया

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ऽऽनन्तर्यमेव कारणमित्यत स्तयोरपिसंयोगोजायते इत्याहुः। अपरे तु तयोरस्त्येव संयोगः किन्तु नित्य एवेति विशेषमाचक्षते।

ननु कारणाकारणसंयोगात्कार्याकार्यसंयोगोत्यादे दण्डशाखासंयोगादपि कुतो न घटशाखासंयोगोत्पत्तिः, दण्डस्योपि घटकारणत्वादिति चेन्न। तत्र कारणाकरणपदं तत्समवायितत्समवायिभिन्नपरम्, तथा च तत्समवायितत्समवायिभिन्नयोः संयोगात्तत्तद्भिन्नयोः संयोगो जायते इत्यर्थः। न च कपाल दण्डसंयोगाद् घटदण्डसंयोगवद् घटपटयोरपि संयोगापत्तिः, घटभिन्नत्वस्य दण्डे इव पटेऽप्यविशेषादिति वाच्यम्। यत्र तद्भिन्नत्वविशिष्टसमवायेन तदीयसंयोगोत्पत्तिः तत्र तत्समवायिभिन्नत्वविशिष्टसमवायसंबन्धेन तत्समवायिसंयोग इति सामान्यनधिकरण्यप्रत्यासत्या तत्समवायिसंयोगत्वेन तदीयसंयोगत्वेन हेतुहेतुमद्भावात्। संयोगस्य द्विष्ठतया तदीयसंयोगस्य समवायसंबन्धेत तस्मिन्नपि उत्पादात्तत्र च तत्तत्समवायिसंयोगविरहाद्व्यभिचारवारणाय कार्यतावच्छेदकसंबन्धे तद्भिन्नत्वविशिष्टत्वं समवायविशेषणम्। एतल्लाभायैवचाऽकार्यपदोपदानम्। तत्समवायिन्यपि तत्समवायिसंयोगसात्वेन तत्रापि तदीयसंयोगोत्पत्तिवारणाय कारणतावच्छेदकसंबन्धे तत्समवायिभिन्नत्वविशिष्टत्वं समवायविशेषणम्। अत एव कपालद्वयसंयोगान्न घटकपालसंयोग इत्यन्यत्र विस्तरः।

अथ क्रियासंयोगयोः केव रूपेण कार्यकारणभावः। न तावत्कर्मत्वसंयोगत्वाभ्याम्, संयोगजसंयोगे व्यभिचारात्।

न च विलक्षणसंयोगत्वं कार्यतावच्छेदकं, वैलक्षण्यं च कर्मजन्यतावच्छेदकतया सिद्धः संयोगजसंयोगव्यावृत्तो जातिविशेष इति वाच्यम्। तथापि तत्र कालिकसामानाधिकरण्यमात्रं प्रत्यासत्तिः समवायघटितसामानाधिकरण्यं वा। नाद्यः—यस्य कस्य चित्क्रियात एव निष्क्रिययोरपि घटपटाद्योरपि संयोगापत्तेः। अनन्तसंसारे सर्वदैवावश्यं कस्य चित्कर्मसत्वेनाऽव्यावर्त्तकतया वैलक्षण्याभ्युपगमस्य तादृशकार्यकारणभावस्य च वैयर्थ्यापत्तेः। न द्वितीयः—अंगुल्यादिकर्मणा निष्क्रियेपि शाखादौ संयोगोत्पत्त्या व्यभिचारात्। न च समवायेन कर्मत्वेन कारणता विलक्षणसंयोगत्वेन कार्यता, स्वाव्यवहितपूर्ववर्त्तिक्रियावद्वृत्तित्वविशिष्टसमवायश्च कार्यतावच्छेदकसंबन्धः, नातोव्यभिचार इति वाच्यम्। तावतापि विलक्षणसंयोगः केवल समवायेन कचिदेव जायते कचिच्च नेत्यत्र नियामकालाभात्। अत्रप्राञ्चः। क्रियात्वेन कारणता विलक्षणसंयोगत्वेन कार्यता, यत्र तादात्म्येन विलक्षणसंयोगस्तत्रस्वसमवायिसमवेतत्वसंबन्धेन क्रियेति सामानाधिकरण्यं प्रत्यासत्तिः। नचैवं कर्मणः कार्यनिष्ठतया कारणत्वे कार्याव्यवहितपूर्वं कार्याभावेन व्यभिचारापत्तिः, यत्र कार्यतावच्छेदकसंबन्धेन कार्यं तत्र-तदव्यवहितपूर्वक्षणे कारणतावच्छेदकसंबन्धेन कारणमिति नियमादिति वाच्यम्। अन्यत्र तथाविधनियमस्य सत्त्वेपि प्रकृते यदा यत्र तादात्म्यसंबन्धेन विलक्षणसंयोगः तदा तत्र तदव्यवहितपूर्वक्षणावच्छिन्नसमवायाधारतावत्समवेतत्वसंबन्धेन कर्मेति नियमः, कार्यभेदेन कारणताभेदात्। क्रियोत्पत्तिसमकालं संयोगोत्पत्तिवारणाया-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ऽवच्छिन्नान्तमाधारताविशेषणम्। पूर्वसंयोगस्य प्रतिबन्धकत्वादेव तदानीं संयोगोत्पत्ति वारणसंभवेनानुपादेयमेव वा तदित्याहुः। नव्यास्तु तत्तत्क्रियात्वेन कारणता तत्तत्क्रियाधीनसंयोगत्वेन च कार्यता—यत्र तद्व्यक्तिवृत्तित्वविशिष्टसमवायसंबन्धेन तत्तत्क्रियाधीनसंयोगोत्पत्तिः तत्र समवायसंबन्धेन तत्तत्कर्मेति प्रत्यासत्तिः। तत्तत्क्रियाधीनसंयोगत्व च तत्तत्कर्मव्यक्तिजन्यसंयोगमात्रवृत्तिजातिविशेषः। न चोक्तदैशिकसामानाधिकरण्यप्रत्यासत्त्या तत्कर्मणां कारणत्वे तत्तत्कर्मविरहदशायां तत्तद्देशवृत्तित्वविशिष्टसमवायसंबन्धेन तत्तत्क्रियाधीनसंयोगो मा जनिष्ट समवायसंबन्धसामान्येन कुतो न जायते इति वाच्यम्। तत्तत्क्रियाधीनसंयोगस्य तत्तद्देशवृत्तित्वविशिष्टसमवायसंबन्धेनानुत्पत्त्या समवायसंबन्धेनोत्पत्तेरलीकतया तत्तद्देशवृत्तित्वविशिष्ट समवायसंबन्धेनोत्पत्तिं प्रत्येव समवायसंबन्धेन कर्मणां नियामकतया तत्तत्क्रियाधीनतत्तद्देशसंयोगः क्वचिदेवोत्तरदेशे जायेत क्वचिन्नेत्यत्र किं नियामकम्। न च तत्तत्क्रियाधीनसंयोगत्वावच्छिन्नोत्पत्तिं प्रति तादृशसंयोगप्रागभाव एव नियामक इति वाच्यम्। प्रागभावानभ्युपगमादिति चेन्न। तत्तत्क्रियाधीनसंयोगत्वरूपजातिविशेषावच्छिन्नं प्रति तत्तदुत्तरदेशव्यक्तीनां तादात्म्येन हेतुत्वात्, तत्तद्देशवृत्तित्वविशिष्टसमवायस्य कार्यतावच्छेदकसंबन्धत्वाच्च न व्यभिचारः। वस्तुतस्तु कार्यतावच्छेदकावच्छिन्नाः यावत्यो व्यक्तयः तत्प्रत्येकाधिकरणयत्किञ्चिन्निष्ठाभावाप्रतियोगित्वरूपं कारणत्वम्। एवं च समवायेन संयोगं प्रति समवायेन क्रियायाः कारणत्वम्। एतादृशकार्यकारणभावोलोके क्रियासंयोगन्यायेन कार्यकारणभाव इति गीयते इति प्राहुः।

इदमत्रावधेयम्। तत्तत्क्रियात्वेन तत्तत्क्रियाधीनसंयोगत्वेन कार्यकारणभावे केवल "कालिकघटित" सामानाधिकरण्यं प्रत्यासत्तिः, न तु समवायतद्देशवृत्तित्वविशिष्टसमवायोभयघटितदैशिकसामानाधिकरण्यं, गौरवात्, देशान्तर्भावे प्रयोजनविरहाच्च। तत्तद्व्यक्तित्वविशिष्टसमवायसंबन्धेन सत्त्वावच्छिन्नोत्पत्तिं प्रति तत्तद्व्यक्तित्वेन समवायिकारणत्वस्यैवसमवायेनोत्पत्तिनियामकत्वात्। तद्व्यक्तिसमवेतातिरिक्तस्य तत्तत्क्रियाधीनसंयोगस्यालीकत्वात्। निरुक्तदैशिकसामानाधिकरण्यस्य प्रत्यासत्तित्वेपि तादृशसमवायिकारणत्वस्यैवोत्तरदेशविशेषे संयोगोत्पत्तिनियामकत्वात्। तथा च कारणाकारणसंयोगस्य कार्याकार्यसंयोगजनकत्वे मानाभावः। न चैवं यत्र शाखासंयुक्तकपाले घटोत्पत्तिस्तत्र तदनन्तरं घटशाखासंयोगो न स्यात, घटे क्रियाविरहात्, घटशाखासंयोगस्य च प्रत्यक्षसिद्धत्वादिति वाच्यम्। क्रियायाः क्षणतयाऽ नन्तसंसारे सर्वदैवावश्यं कुत्रचित्परमाण्वादौ कर्मसत्वेन तत एव घटशाखासंयोगसंभवात्। क्रियासंयोगयोः कार्यकारणभावे दैशिकसामानाधिकरण्यस्याऽघटकत्वात्। जातिविशेषरूपस्य तत्क्रियाधीनत्वस्य फलबलकल्प्यतया व्यधिकरणसंयोगेपि तत्सत्वस्य सुवचत्वात्। न च संयोगं प्रति कर्मणः केवलकालिकप्रत्यासत्त्या कारणत्वेऽसमवायिकारणत्वानुपपत्तिरिति वाच्यम्। निमित्तकारणत्वस्यैवाभ्युपगमात्। एवं तत्तत्क्रियात्वेन तत्तत्क्रियाधीनविभागत्वेन क्रियाविभागयोः कार्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कारणभावेपि केवलकालिकघटितसामानाधिकरण्यमेव प्रत्यासत्तिः, न तु समवायतद्देशवृत्तित्वविशिष्टसमवायोभयघटितदैशिकसामानाधिकरण्यं प्रत्यासत्तिः। तथा च कारणविभागस्य कार्याकार्यविभागजनकत्वे मानाभावः। न चैवं यत्र शाखासंयुक्तकपाले कर्मोत्पत्तिः घटोत्पत्तिश्चेत्येकः कालः-ततः कपालशाखाविभागः-तदनन्तरं घटशाखाविभागो न स्यात्, घटेकर्मविरहादिति वाच्यम्। व्यधिकरणयत्किंचित्परमाण्वादिक्रियात एव तत्र घटशाखाविभागसंभवात्। तत्तद्व्यक्तित्वेन समवायिकारणत्वस्यैवातिप्रसंगभञ्जकत्वात्, तत्तद्व्यक्तिसमवेतातिरिक्तस्य तत्तत्क्रियाधीनविभागस्यालीकत्वादिति।

संयोगो नवद्रव्यवृत्तिः। संयोगनाशस्तु विभागात्, समवायिकारणनाशाच्च। तथा च प्रतियोगितासंबन्धेन संयोगध्वंसं प्रति स्वसमवायिसमवेतत्वसंबन्धेन विभागः कारणम्। आश्रयनाशसंयोगनाशयोः कार्यकारणभावः समवायिकारणनाशत्वेन गुणनाशत्वेन यदि तदा दण्डादिनाशाद् घटीयरूपादेर्नाशापत्तेः। नापि स्वसमवायिनाशत्वेन समवेतनाशत्वेन, स्वत्वाननुगमात्। न च तन्नाशत्वेन तत्समवायिनाशत्वेन कार्यकारणभावः, तत्पदेन विशिष्याऽऽश्रयनाशनाश्यसमवेतसमवेतव्यक्तीनामेवोपादानान्न पाकादिजन्यरूपनाशे व्यभिचार इति वाच्यम्। गुणकर्मात्मकतत्तन्नाश्यव्यक्तिभेदेनानन्तनाश्यनाशकभावापत्तेरिति चेदत्र सांप्रदायिकाः-तन्नाशत्वेन कारणत्वम्, तत्समवेतनाशत्वेन निखिलगुणकर्मसाधारणतत्समवेतनाशत्वं च कार्यतावच्छेदकम्। न च घटादिसत्वेपि अपेक्षाबुद्धिनाशात् घटादिवृत्तिद्वित्वादिनाशे व्यभिचार इति वाच्यम्। तत्समवेतनाशे तन्नाशवत्वस्य विशेषणीयत्वात्। नाशवत्ता च कालिकेन। अनुगमस्तुनाशविशिष्टनाशं प्रति वस्तुनाशः कारणम्। नाशे नाशवै० स्वसमानकालीनत्व स्वप्रतियोगिसमवेत प्रतियोगिकत्वोभयसंबन्धेन।

यत्तु कालिकेन तद्वद्भिन्नत्वमेव तत्समवेतनाशे विशेषणीयम्। तन्न। आश्रयनाशसामग्रीकालोत्पन्नाऽऽरम्भकसंयोगनाशाऽपेक्षाबुद्धिनाशो—त्तरदेशसंयोगादिजन्ये आश्रयनाशकालोत्पन्नद्रव्य-द्वित्वादि-कर्मनाशे व्यभिचारापत्तेः, तत्राऽऽश्रयनाशानन्तरं तृतीयक्षणे एवं द्वित्वादिनाशोपगमे क्षणैकापलापापत्तेः, अणुरपीतिन्यायेनक्षणैकापलापस्यापि असति बाधके विनिगमकत्वात्। तन्नाशमपेक्ष्य तद्वद्भेदस्य गुरुत्वाच्चेतिध्येयम्। यत्र प्रतियोगितासंबन्धेन तादृशतत्समवेतनाशोत्पत्तिः—तत्र स्वप्रतियोगिसमवेतत्व कालिकोभयसंबन्धेन तन्नाश इति सामानाधिकरण्यं प्रत्यासत्तिः। स्वप्रतियोगिसमवेतत्वमात्रस्य कारणतावच्छेदकसंबन्धत्वे तन्नाशानन्तरं तत्समवेतगुणादाविव तत्समवेत जातावपि प्रतियोगितासंबन्धेन तादृशतत्समवेतनाशापत्तिः, स्वप्रतियोगिसमवेतत्वसंबन्धेन तन्नाशस्य तत्रापि सत्वात् अतः कालिक प्रवेशः। जातेश्च नित्यतया कालत्वाभावान्नतत्र कालिकेनाश्रयनाशः। वस्तुतस्तु लाघवात् स्वप्रतियोगिसमवेतत्वमात्रं संबन्धः, न तु कालिकोपि—प्रतियोगितासंबन्धेन ध्वंसत्वेन तादात्म्येन सत्वेन कार्यकारणभावान्तरसत्वादिति वदन्ति।

नव्यास्तु स्वप्रतियोगिसमवेतत्व—कालिकोभयसंबन्धेनयो नाशवान्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विभागोपि त्रिधाभवेत्

एक कर्मोद्भवस्त्वाद्यो द्वयकर्मोद्भवोपरः ॥११९॥
विभागजस्तृतीयः स्यात्तृतीयोपि द्विधा भवेत् ।
हेतुमात्रविभागोत्थो हेत्वहेतुविभागजः ॥१२०॥

विभक्तप्रत्ययकारणं विभागं निरूपयति । विभागोपीति । एक कर्मेति । तदुदाहरणं तु श्येनशैलविभागादिकं पूर्ववद्बोध्यम् ॥११९॥

विभक्तप्रत्यय के असाधारण कारण विभाग का निरूपण करते हैं—विभागोऽपि इत्यादि ग्रन्थ से । इस तीन प्रकार के विभाग का भी उदाहरण भी पहिले (संयोग) की तरह हो (अर्थात् दो उस विभाग में एक का तो बाज की क्रिया ही कारण है । और दोनों मेंढ़ों के युद्ध से विरामात्मकविभाग में दोनों मेंढ़ों की क्रिया कारण है) ।

"गुणकर्म" तत्प्रतियोगिकनाशंप्रति स्वप्रतियोगिसमवेतत्वसंबन्धेननाशः कारणम् । अपेक्षाबुद्धिनाशजन्ये आश्रयसत्वकालीन द्वित्वादिनाशे, आश्रयनाशसामग्रीकालोत्पन्नापेक्षाबुद्धिनाशजन्याश्रयनाशकालोत्पन्नद्वित्वादिनाशे च व्यभिचारवारणाय कालिकसंबन्धप्रवेशः । यत्र प्रतियोगितासंबन्धेन नाशवत्प्रतियोगिनाशः तत्र स्वप्रतियोगिसमवेतत्वसंबन्धेन नाश इति सामानाधिकरण्यं प्रत्यासत्तिः । कालिकसामानाधिकरण्यमात्रस्य प्रत्यासत्तित्वे वस्तुमात्रस्यैवाशुविनाशित्वापत्तेः, अन्यथा वर्त्तकत्वेन तादृशकार्यकारणभावस्य व्यर्थत्वापत्तेश्चेत्याहुः ।

एका संयोगव्यक्तिः, एका च विभागव्यक्तिः, उभयोर्द्रव्ययोर्वर्तते इत्यनेकाश्रितत्वमितिकन्दलीकारः । मीमांसकमतेसंयोगः प्रत्याश्रयं भिन्नः ।

इतिसंयोगनिरूपणम् ।

विभागं लक्षयति । विभक्तप्रत्ययकारणमिति । इमौ विभक्तौ इति प्रत्ययकारणमित्यर्थः । प्रतिपाद्यतासंबन्धेन तादृशप्रत्ययं प्रति समवायेन विभागस्य कारणत्वादिति भावः ।

तथा च प्रतिपाद्यतासंबन्धावच्छिन्नतादृशप्रत्ययत्वावच्छिन्नकार्यतानिरूपितसमवायसंबन्धावच्छिन्नकारणतासमानाधिकरणरूपावृत्तिजातिमत्वं विभागस्य लक्षणम् । तेन यादृशविभागाश्रये विभक्तप्रत्ययः कस्यापि न जातस्तत्र नाव्याप्तिः । विभागत्वजातिमत्वं वा बोध्यम् । कारिकायां—विभागोपीति । अपिना संयोगसमुच्चयः । संयोगवद्विभागोपि त्रिविध इत्यर्थः । त्रैविध्यमाह । कारिकायां-एककर्मोद्भव इत्यादि । अन्यतरकर्मजोभयकर्मज-विभागजभेदात्त्रिविधोविभाग इति भावः । विभागजविभागोपि द्विविधः-कारणमात्रविभागजन्यः कारणाकारणविभागजन्यश्च । तथा च विभागश्चतुर्विधः-अन्यतरक्रियाजन्यः उभयक्रियाजन्यः-कारणमात्रविभागजन्यः कारणाकारणविभागजन्यश्चेति । तत्र कारणमात्रविभागात्कारणाकारणविभागः, कारणाकारणविभागात्कार्याकार्यविभाग इति विवेकः । तदुदाहरणन्त्विति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तृतीयोपि विभागजविभागः कारणमात्रविभागजन्यः कारणाकारण-विभागजन्यश्चेति द्विविधः । आद्यस्तावत् यत्रैककपाले कर्म ततः कपालद्वय-विभागः ततोघटारम्भकसंयोगनाशः ततोघटनाशः ततस्तेनैव कपालविभागेन सकर्मणः कपालस्याकाशविभागोजन्यते तत आकाशसंयोगनाशः तत उत्तरदेशसंयोगः ततः कर्मनाश इति ।

और तीसरा विभाग है विभागजविभाग, वह दो प्रकारका है—कारणमात्र के विभाग से जायमान विभाग, तथा कारण और अकारण के विभाग से जायमान । अद्य (कारणमात्र विभागजन्य) विभाग वह है जहाँ कि कपाल में होने वाली क्रिया से दोनों कपालों का विभाग हुवा, उसके बाद घटारंभक (घटोत्पादक) संयोग का नाश, फिर घट नाश, इसके बाद उसी कपालद्वयविभाग से सकर्म कपाल का आकाश से विभाग होता है । फिर आकाश का जो कपाल के साथ संयोग था उसका नाश हुवा, और कपाल का उत्तर–देश के साथ संयोग हो गया, उसके बाद कर्म का नाश हो गया ।

अन्यतरकर्मजोभयकर्मजविभागोदाहरणन्वित्यर्थः श्येनशैलविभागादिकमिति । आदिना मेषद्वयविभागोवोध्यः । अत्र प्राञ्चः—संयोगवद्विभागोपि त्रिविध एव-अन्यतरकर्मजः उभयकर्मजः कारणाकारणविभागश्चेति भेदात् । कारणमात्रविभागज-विभागोनाङ्गीक्रियते । न चैवं कारणाकारणविभागस्यैव कार्याकार्यविभागजनकत्वे कपालकर्मजनितादारम्भकसंयोगप्रतिद्वन्द्विकपालद्वयविभागात्कथं कपालाकाशविभाग इति वाच्यम् । तत्र कपालकर्मणैव कपालद्वयविभागवत्तत्समकालं कपालाकाश-विभागस्यापि जननादविशेषादित्याहुः । तत्र कारणमात्रविभागजन्यं कारणाकारण-विभागमुपपादयति । आद्यस्तावदिति । यत्र । यदा । एककपालेकर्मेति । अदृष्टवदात्मसंयोगादित्यादिः । ततः । तदनन्तरं । घटारम्भकसंयोगनाश इति । कपालद्वयसंयोगनाश इत्यर्थः ततः-घटनाशानन्तरम् । तेनैव कपालविभागेनेति । तेन कपालविभागेनैवेत्यर्थः । एवकारेण कर्मणोव्युदासः । सकर्मण इति । तदानीं-कर्मनाशकस्वोत्तरसंयोगस्याभावात् , उत्तरसंयोगस्यैव स्वजनककर्मनिवर्त्तकत्वादिति-भावः । कपालस्याऽऽकाशविभागोजन्यते इति । अयमेव कारणाकारणविभागः । तथा च कारणाकारणविभागानंगीकारेऽ नित्याऽवयवात्मकाश्रयनाशादनित्यावयव-विभुसंयोगनाशसंभवेपि नित्यावयवविभुसंयोगस्य नाशकाभावेन नित्यत्वापत्त्या तादृशविभागाङ्गीकारआवश्यक इति भावः ।

अथ कपालक्रियया कपालद्वयविभागवत् कपालाकाशविभागोपि जन्यता-मित्याशंकते । न चेति । तेन कर्मणैवेति । कपालद्वयविभागजनककर्मणैवेत्यर्थः । एवकारेण कारणमात्रविभागस्य कारणत्वव्यवच्छेदः । देशान्तरविभागः कपाला-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न च तेन कर्मणैव कथं देशान्तरविभागो न जन्यते इति वाच्यम्। एकस्य कर्मण आरम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्या ऽनारम्भकसंयोग-प्रतिद्वन्द्विविभागजनकत्वस्य च विरोधात्। अन्यथा विकसत्कमलकुड्मल-भङ्गप्रसङ्गात्। तस्माद्यदीदमनारम्भकसंयोगप्रतिद्वन्द्विविभागं जनयेत्, तदाऽऽरम्भकसंयोगप्रतिद्वन्द्विविभागं न जनयेत्।

प्रश्न—कपाल और आकाश का विभाग कपालद्वय के विभाग का कारण जो सर्वप्रथम कपालगत कर्म उसी से क्यों न मान लिया जाय।

उत्तर—एक ही कर्म घट का आरम्भक (उत्पादक) जो संयोग कपालद्वय का संयोग उसका प्रतिद्वंद्वी (विरोधी) जो विभाग (कपालद्वय का विभाग उसका जनक तथा घट का अनारम्भक जो कपाल और आकाश का संयोग उसके प्रतिद्वंद्वी विभाग (कपालाकाश विभाग) का जनक नहीं हो सकता है, कारण कि वे दोनों विभागों का परस्पर विरोध है, [क्योंकि आरम्भ संयोग प्रतिद्वन्द्वी विभाग कपालद्वय में है, और अनारम्भक संयोग प्रति-द्वन्द्वी विभाग कपालाकाश में है]। अन्यथा (एक ही कर्म को यदि दोनों विभागों का कारण माना जावेगा तो) विकसत् (खिलते हुवे) कमल के कुड्मल (कोष) का भङ्ग हो जायगा। [अर्थात् अनारम्भक संयोग का प्रतिद्वन्द्वी जो विभाग तज्जनक कर्म को ही यदि आरम्भक संयोग के प्रतिद्वन्द्वी विभाग का भी जनक मान लिया जाता है तो विकसत् कमल के कुड्मल (कोष) का नाश हो जायगा, अथवा यह कह दीजिये कि विकसत् (खिलते हुवे) कमल का तथा उसके कोष का इन दोनों का नाश हो जायगा। कारण कि कमल पत्रों का अग्रभाग में होने वाला जो द्रव्यानारम्भक संयोग है उस संयोग के विरोधी विभाग का कारणीभूत जो पत्तों में होने वाला कर्म है उसी कर्म से मूलावच्छेदेन (मूल में होने वाला) जो कमल पत्रों का जो कमलोत्पादक संयोग उस संयोग के विरोधी विभाग की भी यदि उत्पत्ति हो जायेगी तो उस विभाग से फिर कमल के आरम्भक संयोग का नाश हो जायगा, उसके बाद कमल का भी नाश हो जायेगा]

इसलिये यह (कपाल में होने वाला) कर्म अनारम्भक संयोग के प्रतिद्वन्द्वी विभाग को उत्पन्न करेगा तो वह कर्म घट के आरम्भक संयोग के प्रतिद्वन्द्वी विभाग को उत्पन्न नहीं करेगा।

काशविभागः। आरम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्येति। आरम्भक-संयोगः कपालद्वयसंयोगः तत्प्रतिद्वन्द्वी तद्विरोधी तन्नाशक इति यावत् योविभागस्त-ज्जनकत्वस्येत्यर्थः। अनारम्भकसंयोगः कपालाकाशसंयोगः तत्प्रतिद्वन्द्वी तद्विरोधी योविभागस्तज्जनकत्वस्येत्यर्थः। विरोधादिति। आरम्भकसंयोगप्रतिद्वन्द्विविभाग-जनककर्मत्वस्य अनारम्भकसंयोगप्रतिद्वन्द्विविभागाजनकत्वव्याप्यत्वादिति भावः। तादृशव्याप्त्यनभ्युपगमे बाधकमाह। अन्यथेति। तादृशव्याप्त्यनंगीकारे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इत्यर्थः । **विकसदिति** । अग्रावच्छेदेनानारम्भकसंयोगप्रतिद्वन्द्विविभागजनकं कर्म विकासः । तद्वत्कमलस्यकुड्मलस्यापि नाशप्रसंगादित्यर्थः । तत्राग्रावच्छेदेनानारम्भकसंयोगप्रतिद्वन्द्विविभाजनक कर्मणः सत्वात्, तेन कर्मणा मूलावच्छेदेनाऽऽरम्भकसंयोगविरोधिविभागस्याप्युत्पत्त्या तेन च विभागेनाऽऽरम्भकसंयोगनाशः ततः कमलनाशः स्यादिति भावः । **तस्मादिति** । कमलकुड्मलभंगप्रसंगपरिहाराय अनारम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्व आरम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वयोर्विरोधस्वीकारावश्यकत्वादित्यर्थः । तथा च कपालसंभवेतं कर्म न कपालाकाशविभागजनकं कपालद्वयविभागजनकत्वात् यद्यदारम्भकसंयोगप्रतिद्वन्द्विविभागजनकं तन्नाऽनारम्भकसंयोगप्रतिद्वन्द्विविभागजनकं यथा विकसत्कमलकुड्मलकर्मेति सामान्यव्याप्त्या कपालादिकर्मणि कपालाकाशविभागजनकत्वाभावसिद्धौ कारणमात्रविभागजविभागसिद्धिर्निराबाधेति भावः । कपालद्वयविभागजनकत्वमस्तु कपालाकाशविभागजनकत्वाभावोमास्तु इति व्यभिचारशंकानिवर्तकतर्कमाह । **यदीदमिति** । कपालसमवेतं कर्मेत्यर्थः । **जनयेदिति** । कपालाकाशविभागंजनयेदित्यर्थः । **न जनयेदिति** । कपालद्वयविभागजनकं न भवेदित्यर्थः । न चेष्टापत्तिः । घटस्यनित्यत्वापत्तेः ।

न च तथापि कारणसमवेतकर्मणा द्रव्याऽऽरम्भकसंयोगनाशककारणद्वयविभागजननसमकालं कारणस्याऽऽकाशाद्यकारणेन समं विभागजनने किं बाधकम्, एवं कमलदलविकसनकर्मणा ऽनारंभकसंयोगनाशकविभागजननसमकालं आरंभकसंयोगप्रतिद्वन्द्विविभागस्यापिजनने किं बाधकम् न हि व्याप्तिभङ्गभियैव सामग्री कार्यं नार्जयतीति वाच्यम् । आरम्भकसंयोगविरोधविभाग–तादृशसंयोगाविरोधिविभागौ प्रति परस्परविरुद्धवैजात्याभ्यां कर्मणः कारणत्वात् । कमलदलविकसनकर्मणा कमलनाशप्रसंगवारणायानात्या तथैव कल्पनात् । न चाऽनारम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वं कर्मणः कर्मत्वेनैव, आरम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वन्तु कमलदलविकसनादिकर्मव्यावृत्तकर्मत्वव्याप्यवैजात्येनेत्येवास्तु तावतैव कमलदलविकसनकर्मणा कमलभङ्गप्रसंग वारणसंभवात् तथाचाऽऽरम्भकसंयोगविरोधिविभागजनककर्मणापि विरोधिविभागजननसमकालमविरोधिविभागजनने बाधकाभावः, सामग्र्या कार्यजनने व्याप्तेरबाधकत्वात्, विकसनादिकर्मव्यावृत्तवैजात्येन विरोधिविभागजनकत्वादेव कमलभंगप्रसंगवारणादुक्तव्याप्तौमानाभावाच्चेति वाच्यम् । अवयवकर्मणाऽऽरम्भकसंयोगविरोध्यवयवद्वयविभागवत्तत्समकालमवयवेन समाकाशाद्यनवयवदेशानामपि विभागजनने आरम्भकसंयोगनाशसमकालमवयविनि तद्विभागाधीनानन्तव्यक्तिकल्पनापत्तिः, विनश्यदवस्थेपि अवयविनि कारणाकारणविभागेन कार्याकार्यविभागजनने बाधकाभावात् । अतोलाघवाद्विरोधि (विभाग) जनककर्मव्यावृत्तवैजात्येनैवाविरोधिविभागजनकत्वं कल्प्यते । तत्कल्पनेचाऽऽरंभकसंयोगविरोध्यवयवद्वय विभागस्यैव तत्रावयवेन समाकाशात्मादेर्विभागं प्रति जनकतया नावयविनि तेन विभागेन विभागोत्पत्तिसंभवः, समवायिकारणस्य कार्यसहभावेन हेतुत्वात् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न च कारणविभागेनैव द्रव्य नाशात्पूर्वं कुतोदेशान्तरविभागो न जन्यते इति वाच्यम्। आरम्भकसंयोगप्रतिद्वन्द्विविभागवतोऽवयवस्य सति द्रव्ये देशान्तरविभागाऽसंभवात्।

प्रश्न—घट का कारण जो कपालद्वय विभाग उससे ही घटात्मकद्रव्य के नाश के पहिले ही देशान्तर (कपाल और आकाश) का विभाग क्यों नहीं हो जाता है।

उत्तर—आरम्भ संयोग का प्रतिद्वन्द्वी जो विभाग उस विभाग वाले कपालादि रूप अवयवों में जब तक घटादि रूप मौजूद है तब तक उन कपालों का देशान्तर (आकाश) से विभाग नहीं हो सकता है।

न चावयवकर्मोत्पत्तिसमयेऽ वयविन्यपि तदवच्छेदेन कर्मोत्पत्तेरावश्यकत्वेनाऽवयवद्वयविभागोत्पत्तिकालेऽ वयविकर्माधीनस्यावयविन्याकाशादिदेशविभागस्योत्पादान्न तदुत्तरक्षणे कारणाकारणविभागजोऽवयविन्याकाशादिदेशविभागः, विभागवति समानवृत्तिकविभागान्तरानुत्पत्तेरिति वाच्यम्। तथापि यत्रावयवकर्मोत्पत्तिसमयेऽ वयव्युत्पत्तिः तत्रावयविनि आरम्भकसंयोगनाशकाले कारणाकारणविभागजानन्ताकाशात्मादिविभागव्यक्तिकल्पनाया दुर्वारत्वात्। न च कारणमात्रविभागस्य कारणाकारणविभागं प्रति अनन्तकारणत्वकल्पनां तदुभयनिष्ठकारणत्वकार्यतावच्छेदकानन्तवैजात्यकल्पनां चापेक्ष्य विभागव्यक्तिकल्पनैव लघीयसीति वाच्यम्। अनन्तविभागतद्ध्वंसतदुभयकार्यकारणभावकल्पनामपेक्ष्य कारणमात्रविभागकारणाकारणविभागयोरनन्तकार्यकारणभावादिकल्पनाया एव ज्यायस्त्वादिति।

इदमत्रावधेयम्। कर्मनिष्ठातिरिक्तवैजात्यकल्पनामपेक्ष्य लाघवात् कर्मत्वेनैवाऽविरोधिविभागजनकत्वस्योचितत्वात्। अनन्तविभागकल्पनायाः फलमुखत्वात्। आरम्भकसंयोगविरोधिविभागजनककर्मस्थले आरम्भकसंयोगविरोधिअवयवद्वयविभागस्यैवाऽवयवाकाशात्मादेर्विभागं प्रति जनकत्वाभ्युपगमे यत्रारम्भकसंयोगविरोध्यनयवद्वयविभागोत्पत्तिकाले खण्डावयव्युत्पत्तिः तत्र तदुत्तरक्षणे तदवयविनि कारणाकारणसंयोगजानन्ताकाशात्मादिदेशसंयोगव्यक्तीनां दुर्वारतया विभागव्यक्तिकल्पनागौरवस्य तुल्यत्वात्। कारणमात्रविभागकारणाकारणविभागयोरनन्तकार्यकारणभावादिकल्पनायाः पुनरधिकत्वात्।

न च तत्रावयवकर्मण एव कारणाकारणविभागजनकत्वाभ्युपगमे व्युक्तस्थले विनश्यदवस्थाऽवयवाकाशसंयोगेभ्योऽवयविन्याकाशसंयोगव्यक्तयोदुर्वारा इति वाच्यम्। कारणाकरणसंयोगस्य कार्यसहभावेन हेतुत्वोपगमादेव तद्वारणसंभवात्, तस्मात्प्राचीनमतमेव साधीय इति विभावनीयम्।

अथोक्तरीत्या कपालद्वयविभागस्य कपालाकाशविभागाऽसमवायिकारणत्वस्वीकारे आरम्भकसंयोगनाशकाले एव कपालाकाशविभागः कथं नोत्पद्यते इत्याशंकते। **नचेति। कारणविभागेनैवेति।** कपालद्वयविभागेनैवेत्यर्थः। द्रव्यना-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

R625x7,1,1 152K0-1

शात्पूर्वं—घटात्मकद्रव्यनाशात्पूर्वं । **देशान्तरविभागं**—कपालाकाशविभागं । जन्यते इति कारणसत्वादिति शेषः। तथा च पूर्वोक्तं घटनाशस्ततः कपालाकाशविभागो जन्यते इत्यसंगतमिति भावः। **आरम्भकसंयोगप्रतिद्वन्द्विविभागवत** इति। कपालद्वयविभागवत इत्यर्थः। अनेन कपालाकाशविभागाऽसमवायिकारणसत्वं सूचितम्। **अवयवस्ये**ति। कपालस्येत्यर्थः। अनेन तत्समवायिकारणसत्वं सूचितम्। **सतिद्रव्ये**—सतिघटे। अनेन द्रव्याभावरूपनिमित्तकारणासत्वं सूचितम्। **देशान्तरविभागाऽसंभवादिति**। कपालाकाशविभागऽसंभवादित्यर्थः। तथा च समवायिकारणाऽसमवायिकारणयोः सत्वेपि तत्र समवायेन द्रव्यस्य प्रतिबन्धकतया तदभावरूपकारणाभावान्न घटनाशात्पूर्वं कपालाकाशविभागापत्तिरिति भावः।

अथ कारणमात्रविभागकारणाकारणविभागयोः केन रूपेण कार्यकारणभावः। न च विभागत्वेन कारणमात्रविभागत्वेन कार्यकारणभावः। कर्मजविभागे कारणाकारणविभागजकार्याकार्यविभागे च व्यभिचारापत्तेः। न च विलक्षण विभागं प्रति कारणमात्रविभागः कारणम्, वैलक्षण्यं च आरंभकसंयोगविरोधिविभागजन्यतावच्छेदकतया सिद्धः कर्मजविभागादिव्यावृत्तोजातिविशेष इति वाच्यम्। तत्र कालिकसामानाधिकरण्यं प्रत्यासत्तिः, समवायघटितसामानाधिकरण्यं वा—**नाद्यः**—असमवायिकारणत्वानुपपत्तेः, कपालद्वयविभागतस्तु शाखाद्योरपि विभागापत्तिः, अनन्तसंसारे सर्वदैवावश्यं कुत्रचिदारम्भकसंयोगप्रतिद्वन्द्विविभागसत्वेनाऽव्यावर्त्तकतया वैलक्षण्याभ्युपगमस्य तादृशकार्यकारणभावस्य व्यर्थत्वापत्तेश्च। **न द्वितीयः**—द्रव्यनाशककपालद्वयविभागजकपालशाखादिविभागस्य शाखादावपि सत्वेन व्यभिचारापत्तेः, द्रव्यनाशककपालद्वयविभागात् सक्रियकपालस्येव तादृशविभागवतोनिष्क्रियकपालस्यापि शाखादिदेशाद्विभागापत्तेश्च। **अत्रनव्याः**। द्रव्यारम्भकसंयोगविरोधिविभागव्यक्तीः प्रातिस्विकरूपेणोपादाय तत्तद्विभागव्यक्तित्वेन कारणता, तत्तद्विभागव्यक्त्यधीनविभागत्वेन च कार्यता वाच्या। यत्र तत्तद्देशवृत्तित्वविशिष्टसमवायसंबन्धेन तत्तद्विभागोत्पत्तिः तत्र तत्तद्देशवृत्तित्वविशिष्टसमवायसम्बन्धेन तत्तद्विभाग इति स्वसमानाधिकरण्यं प्रत्यासत्तिः। कालिकसामानाधिकरण्यमात्रस्य प्रत्यासत्तित्वेऽसमवायिकारणत्वानुपपत्तेः।

द्रव्यनाशककपालद्वयविभागजकपालशाखादिविभागस्य शाखादावप्युत्पादात्र व्यभिचारवारणाय कार्यदिशिसंबन्धकोटौ विशिष्टान्तं समवायविशेषणम्। द्रव्यनाशककपालद्वयविभागात् सक्रियकपाल इव तादृशविभागवति निष्क्रियकपालेपि तद्देशवृत्तित्वविशिष्टसमवायेन शाखादिदेशाद्विभागापत्तिवारणाय कारणदिशिसंबन्धकोटौ विशिष्टान्तं समवायविशेषणम्। तत्तद्देशपदं च सर्वत्र सक्रियावयवपरम्। तत्तद्विभागाधीनविभागत्वं च तत्तद्विभागव्यक्तिजन्यतावच्छेदकतयासिद्धोजातिविशेषः, नातोऽधीनत्वस्य दुर्वचत्वमिति प्राहुः।

SRI JAGADGURU VISHWARADHYA JNANA SIMHASAN JNANAMANDIR LIBRARY Jangamwadi Math, VARANASI. 1934

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

द्वितीयस्तावत्—यत्र हस्तक्रियया हस्ततरुविभागः ततः शरीरेपि विभक्तप्रत्ययोभवति, तत्र च शरीरतरुविभागे हस्तक्रिया न कारणं व्यधिकरणत्वात् । शरीरे तु क्रियानास्त्येव अवयविकर्मणोयावदयववकर्मनियतत्वात् ।

द्वितीयस्तावत् । जहाँ हस्तक्रिया से हस्ततरु विभाग हुवा, तब उस हस्ततरु विभाग से शरीर का भी तरु से विभाग होता है वहाँ शरीर और तरु (वृक्ष) के विभाग में हस्तक्रिया कारण नहीं है क्योंकि दोनों व्यधिकरण (भिन्न-भिन्न अधिकरण में रहने वाले) हैं। (अर्थात् हस्तक्रिया शरीरतरु विभाग के प्रति कारण तब हो सकती थी यदि दोनों का सामानाधिकरण्य होता क्योंकि 'ययोः सामानाधिकरण्यंतयोरेव कार्यकारणभावः'') और शरीर में स्वतन्त्र क्रिया है ही नहीं, क्योंकि सम्पूर्ण अवयवों के कर्मों से नियत अवयवी का कर्म होता है, अर्थात् शरीर आदि रूप अवयवी के प्रत्येक अवयव में जब तक कि क्रिया न होगी तब तक अवयवी में क्रिया कदापि नहीं हो सकती है ।

हेत्वहेतुविभागजविभागमाह । द्वितीयस्ताबदिति । कारणाकारण विभागजन्यकार्याकार्यविभागो यथा इत्यर्थः । शरीरेपि विभक्तप्रत्यय इति । इमौ "शरीरतरू" विभक्तौ इत्याकारकइत्यर्थः । तत्र चेति । निरुक्तप्रत्ययेचेत्यर्थः । सप्तम्यर्थोविषयत्वं, विभागेऽन्वितम् । एवकारार्थकचशब्दस्य नञाऽन्वयः । न कारणमिति । नैवकारणमित्यर्थः । व्यधिकरणत्वादिति । हस्तक्रियायाः समवायेन शरीराऽवृत्तित्वादित्यर्थः । ननु शरीरक्रियैव शरीरतरुविभागे कारणमस्तु अत आह । शरीरेत्विति । अवधारणार्थकस्तुशब्दोनास्तीत्युत्तरं योजनीयः नास्तीति । नास्त्येवेत्यर्थः । तत्र हेतुमाह । अवयविकर्मण इति । घटादिकर्मण इत्यर्थः यावदवयवकर्मनियतत्वादिति । यावदवयवघटकप्रत्येकावयवसमवेता यावत्यः क्रियास्तावत्प्रत्येकनिरूपितजन्यतावत्वादित्यर्थः । तथाच शरीरोद्यवयविसमवेतं कर्म शरीराद्यवयवयावद्घटकप्रत्येकसमवेतयावत्क्रियाप्रत्येकनिरूपितजन्यतावत् शरीरादिसमवेतकर्मत्वात्, यत्र शरीराद्यवयविसमवेतकर्मत्वं तत्र तादृशजन्यत्वमिति व्याप्तिः ।

कर्मणोदैशिकाऽव्याप्यवृत्तित्ववारणायोक्तव्याप्तेरावश्यकतया एकावयवसमवेतक्रियामात्रेण शरीरे न क्रियोत्पत्तिसंभवः । यत्किंचिदवयवावच्छेदेनाऽभिघातदशायां घटश्चलतीति प्रत्ययस्य परंपरयाऽवयवकर्मविषयकत्वात् समवायसंबन्धेन तत्प्रत्ययस्य भ्रमत्वात्, कर्मणा विनाऽप्यवयवपूर्वदेशविभागोऽवयवोत्तरसंयोगाभ्यामेव घटपूर्वदेशविभागतदुत्तरसंयोगयोः संभवात् । अत एव क्वचित्कर्मापि अव्याप्यवृत्ति यत्र यत्किंचिदवयवावच्छेदेनाऽवयविनि अभिघातादिस्तत्रावयविनि तदवयवावच्छेदेन कर्मोत्पत्तौ बाधकाभावात्, अवच्छेदकतासंबन्धावच्छिन्नाऽसि-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अतस्तत्र कारणाकारणविभागेन कार्याकार्यविभागोजन्यते इति। अत एव विभागोगुणान्तरम्, अन्यथा शरीरे विभक्तप्रत्ययो न स्यात् अतः संयोगनाशेन विभागो नान्यथासिद्धोभवति ॥ १२० ॥

इति विभागनिरूपणम्।

प्रश्न—शरीरतरु विभाग के प्रति न हस्तक्रिया कारण है क्योंकि व्यधिकरण होने से। शरीर में कोई स्वतन्त्र क्रिया ही नहीं है तब फिर शरीर तरु विभाग के प्रति कौन कारण है।

उत्तर—इसी लिये वहाँ कारण और अकारण के विभाग से (अर्थात् शरीर का कारण जो हस्त, और शरीर का अकारण जो तरु उन दोनों के विभाग से) कार्य और अकार्य का विभाग (अर्थात् हस्त का कार्य जो शरीर और अकार्य जो तरु उन दोनों का विभाग) होता है यही मानना पड़ेगा।

इसी कारण से विभाग को (संयोगध्वंसरूप न मानकर) गुणान्तर ही मानना होगा। अन्यथा (संयोगध्वंसरूप विभाग को मानने पर) शरीर-तरु विभाग नहीं बनेगा। अतः संयोगनाश (ध्वंस) से विभाग अन्यथा सिद्ध नहीं हो सकता है ॥११९–१२०॥

घाताभावस्य स्वाश्रयसमवेतत्वसंबन्धेन प्रतिबन्धकत्वकल्पने, यत्किंचिदवयवावच्छिन्नाभिघातादिव्यावृत्तवैजात्येन जनकत्वकल्पने वा महागौरवात्। अतएवाग्रे वृक्षश्चलति न मूले इत्याद्यनुभवोपि उपपद्यते इत्यपास्तम्। यदि हि तत्रावयविनि कर्मोत्पादस्तदा सर्वावयवावच्छेदेनैव कुतो न तदुत्पादः, विनिगमकाभावात्, इष्टापत्तौ च कुतोऽव्याप्यवृत्तित्वम्, कुतोवाऽभिघातादिशून्यावयवावच्छेदेन चक्षुरादिसंयोगेपि न तत्कर्मणः प्रत्यक्षम्। न च समानावच्छेदकत्वप्रत्यासत्त्याऽभिघातादेः कर्मजनकतया यदवयवावच्छेदेनाभिघातः तदवच्छेनैवेव कर्मोत्पत्तिरिति कारणताकल्पनमेव लघु इति वाच्यम्। क्रियाया अव्याप्यवृत्तित्वे अवच्छेदकभेदेन पूर्वसंयोगोत्तरसंयोगयोरनन्तप्रतिवध्यप्रतिबन्धकभावापत्त्या तदपेक्ष्यातिरिक्तप्रतिवध्यप्रतिबन्धकभावकल्पनाया लघुत्वात्, तच्च तद्विचारावसरे एव स्फुटम्। अवयविकर्मोत्पत्तोयविदवयवकर्मोत्पत्तिनियततया विनापि प्रतिबन्धकत्वादिकल्पनं पावदवयवकर्मोत्पत्तिसामग्रीविरहादेव तत्रावयविनि कर्मानुत्पादसंभवाच्च। अग्रे वृक्षश्चलतीति प्रत्ययाऽवयवकर्मविषयक एव। नचैवं संयोगादेरपि अव्याप्यवृत्तित्वविलोपापत्तिः, अग्ने वृक्षः संयोगीत्यादिप्रत्ययस्यावयवसंयोग एव विषय इत्यस्य सुवचत्वादिति वाच्यम्। अवयवसंयोगेऽवयविन्यपि संयोगजसंयोगस्य दुर्वारत्वात्। कार्यकारणयोः सहोत्पत्त्यसंभवेनावयविसंयोगोत्पत्तोयविदवयवसंयोगोत्पत्तिनियमस्य वक्तुमशक्यत्वादिति संक्षेपः।

अतः इति। शरीरे कर्मविरहादित्यर्थः। कर्मणोव्याप्यवृत्तित्वादिति यावत्। तत्र। शरीरे। **कारणाकारणविभागेन।** हस्ततरुविभागेनैव। **कार्याकार्यविभागः।** शरीरतरुविभागः। **जन्यते इति।** अयश्यं स्वीकार्य इत्यर्थः। तथा च विभागजविभागसिद्धिइति भावः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

परत्वंचाऽप रत्वं च द्विविधं परिकीर्तितम् ।
दैशिकं कालिकं चेति मूर्त एव तु दैशिकम् ॥१२१॥

पराऽपरव्यवहारनिमित्ते परत्वापरत्वे निरूपयति । परत्वंचापरत्वं चेति । दैशिकमिति । १२१ ।

तदुभयसमवेतसंयोगनाश एव तदुभयोर्विभक्तप्रत्ययविषयो न तु विभागो गुणान्तरं इमौ विभक्तौ इत्यस्यापिइमौ एतदुभयसमवेतसंयोगनाशवन्तौ इत्यर्थः। न च ययोराश्रययोर्नाशानन्तरं तत्समवेतसंयोगनाशः, तयोर्विभक्तप्रत्ययापत्तिरिति वाच्यम्। द्रव्यध्वंसाजन्यत्वस्य नाशे विशेषणीयत्वात्। आश्रयनाशानन्तरं सति संयोगनाशज्ञाने विभागप्रत्यये इष्टापत्तिरेव। न च तथापि एकसंयोगनाशानन्तरं पुनः संयुक्तेपि विभक्तप्रत्ययप्रसंगोदुर्वार इति वाच्यम्। स्वप्रतियोगिसमानाधिकरणसंयोगानधिकरणकालविशिष्टत्वस्य, संयोगनाशे विशेषणीयत्वात्। वस्तुतः सामानाधिकरण्यमपहाय व्यापकत्वं निवेशनीयम्। तेन द्रव्यान्तरे संयोगदशायामपि विभक्तप्रत्ययोपपत्तिः। व्यापकताचाऽवच्छेदकतासंबन्धेन। तेनाऽवच्छेदकान्तरे तत्संयोगसत्वेपि तेन समं विभक्तप्रत्ययोनानुपपन्नः। न चैवमुत्तरसंयोगानन्तरं निवृत्तेपि कर्मणि विभक्तप्रत्ययप्रसंग इति वाच्यम्। सति निरुक्तसंयोगनाशज्ञाने इष्टत्वात्। स्वजनककर्मविशिष्टत्वेन वा संयोगोविशेषणीयः। न च निरुक्तसंयोगनाशो वा विभागः-स्वप्रतियोगिव्यापकविभागानधिकरणकालविशिष्टोविभागप्रागभावो वा संयोग इत्यत्र विनिगमकाभावाद्विभागसिद्धिरिति वाच्यम्। घटपटयोर्विभिन्नदेशायामपि भाविविभागप्रागभावमाराय संयुक्तप्रत्ययप्रसंगात्। कदाचिदपि अविभक्तयोरपि त्वगिन्द्रियशरीराद्योः संयोगप्रत्ययाच्चेति विभागस्य संयोगनाशरूपत्ववादिनां मतं निरसितुं प्रथमतः स्वसिद्धान्तंव्याचष्टे। अतएवेति। विभागजविभागाङ्गीकारादेवेत्यर्थः। विभागः-विभागपदार्थः। गुणान्तरमिति। सावधारणम्। न संयोगध्वंसरूप इति यावत्। अन्यथा। संयोगध्वंसरूपत्वे। शरीरे-अन्त्यावयविमात्रे। विभक्तप्रत्ययोनस्यादिति। शरीरं विभक्तं-शरीरंतरू विभक्तौ इति वा प्रत्ययो न स्यादित्यर्थः। यत्र हस्तक्रियया हस्ततरुविभागः तत्र शरीरे विभक्तप्रत्ययः सर्वानुभवसिद्ध स च विभागं (विषयं) विनानोपपद्यते। न च शरीरतरुसंयोगनाश एव तद्विषयः। विभागानंगीकारे शरीर तु न हस्तक्रिया शरीरतरुसंयोगनाशिका व्यधिकरणत्वात्। न हि तत्र हस्तक्रिया शरीरतरुसंयोगनाशिका व्यधिकरणत्वात्, अतस्तत्र हस्ततरुविभागेन शरीरतरुविभागोजन्यते इत्येव वाच्यम्। तथा च विभागसिद्धिः। तथा च प्रतियोगितासंबन्धेन नाशाऽजन्यसंयोगनाशं प्रति "आश्रयनाशनाश्यव्यावृत्तप्रतियोगितासंबन्धेन सामान्यतः नाशं प्रति वा" संयोग निष्ठफलोपधायकतासंबन्धेन विभागः कारणम्। न हि विभागमन्तरेण सति आश्रयेऽन्यत्संयोगनाशकारणं संभवनीति। अतः-विभक्तप्रत्ययानुपपत्तेः। विभागोनान्यथासिद्धो भवतीति। विभागनिराकरणं न संभवतीत्यर्थः ॥ १२० ॥

इतिविभागनिरूपणम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

परत्वं मूर्तसंयोगभूयस्त्वज्ञानतोभवेत्
अपरत्वं तदल्पत्वबुद्धितः स्यादितीरितम् ॥१२२॥

दैशिकंपरत्वंबहुतरमूर्तसंयोगान्तरितत्वज्ञानादुत्पद्यते। एवं तदल्पीयस्त्वज्ञानादपरत्वमुत्पद्यते। अत्राऽवधित्वार्थं पञ्चम्यपेक्षा, यथा पाटलिपुत्रात्काशीमपेक्ष्य प्रयागः परः। पाटलिपुत्रात्कुरुक्षेत्रमपेक्ष्य प्रयागोऽपर इति। १२२।

पर तथा अपर व्यवहार के निमित्तकारण परत्व अपरत्व का निरूपण करते हैं "परत्वं चापरत्वं च" इस ग्रन्थ से। वह दैशिक और कालिक भेद से दो प्रकारक है॥ १२१॥ जहां दो पदार्थों के बीच में बहुत से मूर्त्तपदार्थों का संयोग हो जावे उस संयोग के अन्तरितत्व ज्ञान से उत्पन्न होने वाला परत्व दैशिकपरत्व कहलाता है। और अल्पतरित्व ज्ञान मूर्त्तपदार्थों के संभोगन्तरितत्वज्ञान से उत्पन्न होने वाला परत्व दैशिक अपरत्व कहलाता है। जैसे—पटना से काशी की अपेक्षया प्रयाग पर (अधिक दूर) है। और पटना तथा कुरुक्षेत्र के बीच में जितने मूर्त्तपदार्थों का संयोग है—उसकी अपेक्षया पटना तथा प्रयाग के बीच अल्पतरमूर्त्तपदार्थों का संयोग होने के नाते प्रयाग अपर (नजदीक) है। "पाटलिप्रत्रात्" यहाँ पर अवधित्वरूप अर्थ के ज्ञानार्थ अवधिवाचकपञ्चम्यन्तपद का प्रयोग आवश्यक है॥ १२२॥

निरूपयतीति। अयमस्मात्परः, अयमस्मादपरइति इत्याकारकशब्दनिष्ठप्रतिपाद्यतासंवन्धावच्छिन्नकारणताश्रयीभूतं परत्वं अपरत्वं च निरूपयतीत्यर्थः। लक्षणं तु तादृशकारणतावत्त्वम्, तादृशकारणतासमानाधिकरणरूपाऽवृत्तिजातिमत्त्वं वा। तादृशकारणतावच्छेदकतया, परत्वाऽपरत्वपदशक्यतावच्छेदकतया च परत्वत्वादिजातिसिद्धिः। तत्र परत्वमपरत्वं च द्विविधम्। दैशिककालिकभेदात्। दैशिकं परत्वं दूरत्वव्यवहारकारणम्। कालिकं च ज्येष्ठत्वव्यवहारकारणम्। एवं दैशिकमपरत्वं सन्निकृष्टव्यवहारकारणम्। कालिकं कनिष्ठव्यवहारकारणम्। मूले—मूर्त एव तु दैशिकम्। दैशिकं परत्वमपरत्वं च मूर्तद्रव्ये एव इति तदर्थः। विभुद्वयसंयोगाऽस्वीकारेण विभौ दिक्संयोगरूपाऽसमवायिकारणाभावादिति भावः। वस्तुतो विजातीयदिक्संयोगस्य तत्राभावो बोध्यः। दैशिकपरत्वस्य निमित्तकारणमाह। बहुतरमूर्तसंयोगान्तरितत्वज्ञानादिति। मूर्तसंयुक्तसंयुक्तादिक्रमेण संयोगवहुतरत्वज्ञानादित्यर्थः। विप्रकृष्टत्वज्ञानादिति यावत्। विप्रकृष्टोऽयमिति ज्ञानमपेक्षाबुद्ध्यात्मकम्। तदल्पीयस्त्वज्ञानादिति। संयोगाल्पीयस्त्वज्ञानादित्यर्थः। दैशिकपरत्वं दूरव्यवहारकारणम्। कालिकं च ज्येष्ठव्यवहारकारणम्। एवं दैशिकमपरत्वं सन्निकृष्टव्यवहारकारणम्। कालिकं च कनिष्ठव्यवहारकारणम्। एकस्यां दिशि अवस्थितयोः पिण्डयोः सन्निकृष्टमवधिं कृत्वाऽयमस्माद्विप्रकृष्ट इत्येवं परत्वाधारे बुद्धिरुत्पद्यते। एवं विप्र-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तयोरसमवायी तु दिक्संयोगस्तदाश्रये
दिवाकरपरिस्पन्दभूयस्त्वज्ञानतोभवेत् ॥१२३॥
परत्वमपरत्वन्तु तरीयाल्पत्वबुद्धितः
अत्र त्वसमवायी स्यात्संयोगः कालपिण्डयोः ॥१२४॥
अपेक्षाबुद्धिनाशेन नाशस्तेषां निरूपितः ।

तयोः देशिकपरत्वाऽपरत्वयोः । असमवायी—असमवायिकारणम् । तदाश्रये—देशिकपरत्वापरत्वाश्रये । दिवाकरेति । अत्र परत्वमपरत्वं च कालिकं ग्राह्यम् । यस्य सूर्यपरिस्पन्दापेक्षया यस्य सूर्यपरिस्पन्दोऽधिकः स ज्येष्ठः, यस्य न्यूनः स कनिष्ठः । १२३

कालिकपरत्वापरत्वे जन्ये एव । अत्र—कालिकपरत्वापरत्वयोः । १२४

तेषां—कालिकदैशिक- परत्वाऽपरत्वानाम् ।

इति परत्वाऽपरत्वनिरूपणम् ।

और दैशिक परत्वापरत्व का जो असमवायिकारण दैशिकपरत्व-अपरत्व के आश्रय (देश) के साथ दिशा का संयोग उसे माना है । कालिक परत्व—अपरत्व दिखलाते हैं—"दिवाकर" इत्यादि ग्रन्थ से । जिस पुरुष के उत्पत्तिकाल से लेकर वर्त्तमानकाल पर्यन्त होने वाली सूर्य क्रिया की अपेक्षया जिस दूसरे पुरुष की उत्पत्तिकाल से लेकर वर्त्तमानकालपर्यन्त होने वाला सूर्यपरिस्पन्द अधिक है वह, ज्येष्ठ कहलाता है । और जिसके न्यून है वह कनिष्ठ है ॥ १२३-१२४ ॥

कृष्टमवधिं कृत्वाऽ यमस्मादपर इत्यपरत्वाधारे बुद्धिरुत्पद्यते = तदेवाह । अत्रावधित्वार्थमिति । १२२ "तयोरसमवायी तु" इति मूले तच्छब्दस्य परत्वाऽपरत्वसामान्यपरत्वे दिक्संयोगस्य कालिकपरत्वादौ असमवायिकारणत्वाभावादसंगतिः, अतः षष्ठ्यन्ततत्पदं परत्वादिविशेषपरतया व्याचष्टे । दैशिकपरत्वापरत्वयोरिति । दैशिकपरत्वाऽपरत्वाश्रये इति । तथा च दिक्पिण्डसंयोगः दैशिकपरत्वाऽपरत्वयोरसमवायिकारणमिति भावः ।

अयं भावः । एकस्यां दिशि अवस्थितयोः पिण्डयोः संयुक्तसंयोगाल्पत्वलक्षणसन्निकृष्टत्वाश्रयमवधिं कृत्वा संयुक्तसंयोगबहुत्वलक्षणविप्रकृष्टत्वाश्रये द्रष्टुर्विप्रकृष्टोयमिति बुद्धिरुत्पद्यते, तां बुद्धिमपेक्ष्य परपिण्डेन सह दिक्संयोगात्परत्वोत्पत्तिः । तत्र परत्वाश्रयीभूतं पिण्डं समवायिकारणम् । पिण्डेन सह दिक्संयोगोऽसमवायिकारणम् । संयुक्तबहुत्वलक्षणविप्रकृष्टत्वज्ञानमपेक्षाबुद्ध्यात्मकं निमित्तकारणम् ।

एवं विप्रकृष्टमवधिं कृत्वा एतस्मात्सन्निकृष्टोयमिति बुद्धि रुत्पद्यते तां बुद्धि-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मपेद्याऽपरपिण्डेन सह दिक्संयोगादपरत्वोत्पत्तिः । तत्राऽपरत्वाश्रयीभूतं पिण्डं समवायिकारणम् । पिण्डेन सह दिक्संयोगोऽसमवायिकारणम् । संयुक्तसंयोगाल्पत्वलक्षणसन्निकृष्टत्वज्ञानमपेक्षाबुद्ध्यात्मकं निमित्तकारणमिति ।

कालिकपरत्वादौ असमवायिकारणनिमित्तकारणे आह । मूले—दिवाकरेति । अत्र । कारिकायां । सप्तम्यर्थोघटकत्वम् । एतत्कारिकाघटकमित्यर्थः । कालिकं ग्राह्यमिति । तेन पूर्वं दैशिकपरत्वादेरेवोपस्थितत्वेपि न क्षतिः । मूलस्थपरत्वादिशब्दस्य कालिकपरत्वाद्यर्थकत्वात् । यस्य न्यून इति यस्य सूर्यपरिस्पन्दापेक्षया इत्यादिः । जन्यद्रव्ये एवेति । नित्ये तत्पूर्वोत्पन्नत्वरूपज्येष्ठत्वबुद्धेः, तदुत्तरोत्पन्नत्वरूपकनिष्ठत्वबुद्धेः (निमित्तकारणस्य) कालसंयोगरूपाऽसमवायिकारणस्य चाऽभावादिति भावः । मूले—अत्र त्विति । कालिकपरत्वादावित्यर्थः । असमवायी स्यादिति । असमवायीअस्तीत्यर्थः । संयोगः कालपिण्डयोरिति । कालजन्यद्रव्ययोरित्यर्थः । तथा च कालिकपरत्वादिकंप्रतिजन्यद्रव्यकालसंयोगस्यासमवायिकारणतया जन्यगुणादौ समवायेन तादृशाऽसमवायिकारणाभावेन न तादृशपरत्वाद्युत्पत्तिरिति भावः । इदमुपलक्षणम् । भावकार्यं प्रति द्रव्यस्यैव समवायिकारणतया जन्यगुणादौ तादात्म्येन द्रव्याभावान्न गुणोत्पत्त्यापत्तिरित्यपि बोध्यम् ।

अयंभावः । एकस्य द्रष्टुरनियतदिगवस्थितयो युवस्थविरयोर्युवानमवधिं कृत्वा स्थविरे बहुतरतपनपरिस्पन्दान्तरितजन्यत्वरूप विप्रकृष्टत्वबुद्धिः (अयमस्माद्विप्रकृष्टइतिबुद्धिर्वा) उत्पद्यते तांबुद्धिमपेक्ष्य स्थविरकालसंयोगात्स्थविरे परत्वोत्पत्तिः । तत्रपरत्वाश्रयीभूतं पिण्डं समवायिकारणम् । पिण्डेन सह कालसंयोगोऽसमवायिकारणम् । अस्मात्प्रचुरतरकालजन्मेत्यपेक्षाबुद्धिर्निमित्तकारणम् ।

एवं यून्यपि स्थविरमवधिं कृत्वा अल्पतरतपनपरिस्पन्दान्तरितजन्मत्वरूपसन्निकृष्टत्वबुद्धि "अयमस्मादल्पतरतपनपरिस्पन्दान्तरितजन्मेत्याकारिकाऽपेक्षाबुद्धि" उत्पद्यते ततो यूना सह कालसंयोगात् यूनि अपरत्वोत्पत्तिः । तत्राऽपरत्वाश्रयीभूतं पिण्डं समवायिकारणम् । पिण्डेन सह कालसंयोगोऽसमवायिकारणम् । तादृशाऽपेक्षाबुद्धिर्निमित्तकारणमिति । १२३-१२४ ।

मूले-अपेक्षाबुद्धिनाशेनेति । यथा आदौ अपेक्षाबुद्धिः ततः परत्वोत्पत्तिः । ततः परत्वपरत्वत्वे इति निर्विकल्पकम् । ततः परत्वत्वविशिष्टपरत्वबुद्धिरपेक्षाबुद्धिनाशश्च । ततः परत्वत्वविशिष्टपरत्वविशिष्टबुद्धिः परत्वनाशश्चाऽपेक्षाबुद्धिनाशादिति । इदमुपलक्षणम् । संयोगनाशादपि तन्नाशः । यथा अपेक्षाबुद्धिसमकालं परत्वाधारे कर्म तत्कर्मणा दिक्पिण्डयोर्विभागः परत्वोत्पत्तिश्च । ततः परत्वतत्वयोनिर्विकल्पकं दिक्पिण्डयोः संयोगनाशश्च । ततोयस्मिन् काले परत्वत्वविशिष्टपरत्वबुद्धिः तदैव दिक्पिण्डसंयोगनाशात्परत्वनाशोऽपेक्षाबुद्धिनाशश्चेति । एवमाश्रयनाशादपि । यथापरत्वाश्रयाऽवयवे कर्म तयोऽवयवविभागकालेऽपेक्षाबुद्ध्यु-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

बुद्धेः प्रपञ्चः प्रागेव प्रायशो विनिरूपितः ॥१२५॥
अथावशिष्टोऽप्यपरः प्रकारः परिदृश्यते ।
अप्रमा च प्रमाचेति ज्ञानं द्विविध मिष्यते ॥१२६॥
तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता ।
क्रमप्राप्तां बुद्धिं निरूपयति–बुद्धेरिति ॥१२५–१२६॥

तत्राप्रमां निरुपयति–तच्छून्ये इति तदभाववति तत्प्रकारकं ज्ञानं भ्रम इत्यर्थः । तत्प्रपञ्चो ऽप्रमाप्रपञ्चः ॥१२७॥

क्रमाप्राप्त बुद्धि का निरूपण कहते हैं–"बुद्धेः प्रपञ्चः" इत्यादि ग्रन्थ से । अप्रमाज्ञान का निरूपण करते हैं–तच्छून्य में जो तद्बुद्धि वही अप्रमा ज्ञान है ॥१२५-१२६-१२७॥

त्पत्तिः । ततोऽवयवसंयोगनाशपरत्वोत्पत्ती । ततो द्रव्यनाशपरत्वतत्वनिर्विकल्पके । ततः परत्वनाश इति । एवं द्वाभ्यां द्वाभ्यां सर्वेभ्यश्च विनाशः सप्तधा आचार्यैरुक्तोवेदितव्यः ।

वस्तुतः परत्वाऽपरत्वयोरेव मानाभावः । विप्रकृष्टत्वसन्निकृष्टत्वरूपसंयुक्तभूयस्त्व-तदल्पीयस्त्वयोरेव दैशिकपरत्वाऽपरत्वव्यहारः । तज्ज्येष्ठत्वं तत्प्रागभावाधिकरणक्षणवृत्तित्वम् । तदुत्पत्तिक्षणवृत्तिध्वंसप्रतियोगिसमयवृत्तित्वं वा । तत्कनिष्ठत्वं च तदधिकरणक्षणवृत्तिप्रागभावप्रतियोगित्वम् । तदधिकरणक्षणध्वंसाधिकरणक्षणोत्पत्तिकत्वमिति विभावनीयम् ।

इति परत्वाऽपरत्वनिरूपणम् ।

क्रमप्राप्तामिति । उद्देशक्रमप्राप्तामित्यर्थः । प्रसंगसंगत्येति भावः । बुद्धिर्ज्ञानम् । सांख्यास्तु सत्वरजस्तमसां साम्यावस्था प्रकृतिः, सा चैकैव । पुरुषास्तु भिद्यन्ते । प्रकृतेः सत्वप्रधानं प्रथमं परिणामं महदाख्यं अन्तःकरणविशेषं बुद्धिमाहुः । बुद्धेर्विषयाकारपरिणतिभेदः घटः पटः इत्यादिज्ञानमाहुः । तन्न । मनोभिन्नेऽन्तःकरणे मानाभावात् । यदि च बुध्यतेऽनेनेति व्युत्पत्त्या बुद्धिपदेन मन इत्युच्यते तदा इष्टापत्तिः । बुद्धिकरणत्वस्य मनसि स्वीकारात् । किं च मया बुद्धः अहं जानामीत्यनुव्यवसायबलाल्लौकिकप्रत्यक्षविषयस्य बुद्ध्यादेर्नान्तःकरणरूपत्वम्, अन्तःकरणस्याऽतीन्द्रियत्वात् । अत एव न धर्मः, तस्याऽऽत्मधर्मतया प्रत्यक्षसिद्धत्वात् ।

सा चेयं बुद्धिरतीन्द्रियेति भाट्टाः । स्वप्रकाशेति प्राभाकराः । बुद्धिर्द्विविधा विद्याचाऽविद्याचेति वैशेषिकाः इति संक्षेपः ।

मूले-**बुद्धेः** ज्ञानस्य । **प्रपञ्चः** विस्तारः । **प्रागेव** आत्मनिरूपणावसरे एव । **विनिरूपितः** कथितः । तथाहि बुद्धिर्द्विविधा नित्या अनित्या च । नित्या ईश्वरस्य । अनित्या जीवानाम् । पुनश्च सा द्विविधा स्मृतिरनुभवश्च । प्रत्यक्षादि-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तत्प्रपञ्चो विपर्यासः संशयोऽपि प्रकीर्त्तितः ॥१२७॥
आद्योदेहेष्वात्मबुद्धिः शङ्खादौ पीततामतिः ।
भवेन्निश्चयरूपा या ।

आद्य इति। विपर्यास इत्यर्थः। शरीरादौ निश्चयरूपं यदात्मत्व-प्रकारकं ज्ञानं गौरोऽहमित्याकारम्, एवं शङ्खादौ 'पीतःशङ्खः' इत्याकारकं यज्ज्ञानं निश्चयरूपं तद्भ्रम इति।

भ्रम का उदाहरण दिखलाते हैं–"आद्योदेहेष्वात्बुद्धिः" इत्यादि से। शरीर आदि में निश्चयात्मक जो आत्मत्वप्रकारक "गौरोऽहम" इत्याकारक ज्ञान, एवं शङ्ख आदि में जो पीत: शंखः" इत्याकारक जो निश्चयात्मक ज्ञान उसे भ्रम कहते हैं ॥१२८॥

मित्युपमितिशाव्दभेदादनुभवोपि चतुर्विधः। ते च भेदा अपि निरूपिताः। अथ कतिपयप्रकारेनिरूपितेपि। अवशिष्टः आत्मग्रन्थेऽनिरूपितः। अपरः अप्रमात्वादिरूप इत्यर्थः। प्रकारः बुद्धिधर्मे इत्यर्थः। परिदृश्यते निरूप्यते। निरूपयति अप्रमाचेति। प्रमालक्षणस्य भ्रमभिन्नत्वघटितस्याऽप्रे वक्तव्यतया तस्याऽप्रमात्वघटितत्वेन तदुपस्थितिं विना विशिष्टलक्षणज्ञानाऽसंभवेन "अप्रमा च प्रमाचेति विभागः कृतः ॥१२५-१२६॥

अप्रमायालक्षणमाह। मूले- तच्छून्ये इति। तदभाववतीत्यर्थः। तन्मतिरिति। तत्प्रकारकं ज्ञानमित्यर्थः। तदेवाह तदभाववतीति। इदं च प्रमायामतिव्याप्तिवारणाय। तदभाववद्विशेष्यकतदभावाऽप्रकारकप्रमायामतिव्याप्ति-वारणाय तत्प्रकारकमिति। इच्छायामतिव्याप्तिवारणाय ज्ञानमिति। विशेष्यता-विशिष्टविशेष्यतानिरूपकत्वमिति यावत्। वै० स्वतादात्म्य-स्वाश्रयनिष्ठाधिकरणता-निरूपितनिरूपकतावदन्यप्रकारताकत्वोभयसं०। निरूपकतावत्ता च प्रसिद्धचतुष्टय-संबन्धेनेति। संबन्धव्यावृत्तिःस्वयमूह्या।

अप्रमांविभजते। मूले-तत्प्रपञ्च इति। तस्याः-अप्रमायाः प्रपञ्चः-विभाजकधर्म इत्यर्थः। तथाचाऽप्रमां लक्षयित्वा विपर्ययत्वसंशयत्वाभ्यांविभज्यते इति भावः। इदमुपलक्षणम् तर्कोपि अप्रमाया भेद एव ॥१२७॥

आद्य इति। विपर्ययइत्यर्थः। स च तदभाववन्निष्ठविशेष्यतानिरूपित-तन्निष्ठप्रकारताशाली निश्चयः। देहेष्वात्मबुद्धिरिति। देहे आत्मत्वप्रकारकः आत्मनि देहत्व प्रकारकः, देहोहमहंदेह इत्याकारकविनिश्चय इत्यर्थः। इदमुपल-क्षणम्। देहे आत्मत्वं आत्मनि देहत्वमित्यपि बोध्यम्। शंखादा-विति। आदिना वराटिकादेः परिग्रहः। संशयोथ प्रदर्श्यते इति। संशयोदाहरणं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संशयोऽथ प्रदर्श्यते ॥१२८॥
किंस्विन्नरो वा स्थाणुर्वेत्यादिबुद्धिस्तु संशयः ।
तद्भावाप्रकाराधीस्तत्प्रकारा तु निश्चयः ॥१२९॥

किंस्विदिति । किंस्विदिति वितर्के । निश्चयस्य लक्षणमाह–तदभावेति । तदभावाप्रकारकं तत्प्रकारकं ज्ञानं निश्चयः ॥१२८–१२९॥

संशय का लक्षण करते हैं–"स संशयः' इससे । एम धर्मी में विरुद्ध भावाभाव प्रकारक ज्ञान को संशय कहते हैं ।

प्रदर्श्यंत इत्यर्थः । १२८ नरोवेति । नरत्वतदभावकोटिक इत्यर्थः । स्थाणुर्वेति । स्थाणुत्वतदभावकोटिकेत्यर्थः । यथाश्रुते भावद्वयकोटिकसंशयाऽप्रसिद्ध्याऽसंगत्यापत्तेः । निश्चयस्यलक्षणमाहेति । प्रसंगादित्यादिः । तद्भावाऽप्रकारकमिति । इदं च संशयेऽतिव्याप्तिवारणाय । निर्विकल्पकेऽतिव्याप्तिवारणाय तत्प्रकारकमिति । इच्छायामतिव्याप्तिवारणाय ज्ञानमिति । निश्चय इति । तन्निश्चय इत्यर्थः । ह्रदो वन्ह्यभाववान् पर्वतोवन्हिमानितिसमूहालंबनात्मकनिश्चयसंग्रहाय एकधर्मिविशेष्यकत्वमपि निवेशनीयम् । तथा च तत्संबन्धावच्छिन्नतद्धर्मावच्छिन्नप्रकारताविशिष्टज्ञानत्वं तन्निश्चयत्वम् । ज्ञाने प्रकारतावै० स्वनिरूपित धर्मितावच्छेकावच्छिन्नविशेष्यताकत्व-स्वावच्छेदकसंबन्धावच्छिन्नस्वावच्छेदकावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नप्रकारतानिरूपितधर्मितावच्छेदकावच्छिन्नविशेष्यताशून्यत्वोभयसं० ।

अत्रेदं बोध्यम् । संशये एकांशे धर्मितावच्छेदकसामानाधिकरण्यं भासते, एकांशे च धर्मितावच्छेदकावच्छेद्यत्वम्, उभयत्र वा धर्मितावच्छेदकावच्छेद्यत्वम् भासते । समुच्चये तु धर्मितावच्छेदकसामानाधिकरण्यमेवोभयत्र भासते । तथा च धर्मितावच्छेदकावच्छेदेन निश्चयत्वस्य तत्सामानाधिकरण्येन निश्चयत्वस्य भिन्नतया विभिन्नरूपेणैव तयोर्निवेशः । तत्र सामानाधिकरण्येन निश्चयत्वं च तद्धर्मावच्छिन्नप्रकारताविशिष्टज्ञानत्वम् । ज्ञाने प्रकारतावै० स्वनिरूपिता या प्रकारतावच्छेदकसंसर्गतावच्छेदकीभूतधर्ममात्रावच्छिन्नसंसर्गता तन्निरूपितधर्मितावच्छेदकावच्छिन्नविशेष्यताकत्व स्वरूपत्व धर्मितावच्छेदकव्यापकतद्धर्मावच्छिन्नाभावप्रतियोगिकत्वोभयधर्मावच्छिन्नसंसर्गतानिरूपितधर्मितावच्छेदकावच्छिन्नविशेष्यताशून्यत्वोभयसंबन्धेन । अवच्छेदावच्छेदेन तन्निश्चयत्वं तु तादृशप्रकारताविशिष्टज्ञानत्वम् । वै० स्वनिरूपितधर्मितावच्छेदकव्यापकतद्धर्मावच्छिन्नप्रतियोगिकत्व-प्रकारतावच्छेदकसंसर्गतावच्छेदकोभयधर्मावच्छिन्नसंसर्गतानिरूपितधर्मितावच्छेदकावच्छिन्नविशेष्यताकत्व स्वावच्छेदकीभूतधर्मावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नप्रकारतानिरूपितधर्मितावच्छेदकावच्छिन्नविशेष्यताशून्यत्वोभयसं० । तथा च पर्वतोवन्हिमान् वन्ह्यभाववांश्चेति समुच्चये सामानाधिकरण्येन वन्हिनिश्चयत्वसत्वान्न तस्य निश्चयत्वानुपपत्तिः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स संशयो मतिर्या स्यादेकत्राभावभावयोः।

संशयं लक्षयति—स संशय इति। एकधर्मिकविरुद्धभावाभावप्रकारकं ज्ञानं संशय इत्यर्थः।

वस्तुतः प्रकारतावच्छेदकावच्छिन्नप्रकारताविशिष्टविशेष्यताशालिज्ञानत्वमेव निश्चयत्वम्। वै० स्वनिरूपितत्व स्वान्यप्रकारत्वानिरूपितत्वोभयसं०। तेन घटः प्रमेयः इत्यादौ प्रमेयभेदस्य प्रमेयत्वात्यन्ताभावस्य चाऽप्रसिद्धत्वेपि न क्षतिः। पर्वतोवन्हिमान् वन्ह्यभाववांश्चेत्यादिसमुच्चयस्यापि निश्चयत्वोपपत्तिः, समुच्चये प्रकारताद्वयनिरूपितविशेष्यताद्वयोपगमात्। एतेन भावद्वयकोटिकसंशयस्वीकर्तृमते पर्वतोवन्हिमान्धूमवान्वेति संशयस्य निश्चयत्वापत्तिः, तादृशपर्वतत्वावच्छिन्न-विशेष्यताकत्व वन्ह्यभावप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशून्यत्वयोः सत्वेनप्रकारतावच्छेदकावच्छिन्नप्रकारताविशिष्टज्ञानत्वसत्वादित्यपि निरस्त मित्यन्यत्र विस्तरः।

न च समुच्चयस्य निश्चयरूपत्वे तदुत्पत्तिरेव कथं स्यात्, तदभावनिश्चय-तन्निश्चययोः कार्यसहभावेन तत्तदभावविशिष्टबुद्धिप्रतिबन्धकत्वादिति वाच्यम्। घटतदभावादेरपि अव्याप्यवृत्तित्वग्रहदशायामेव समुच्चयसंभवात्। अव्याप्य-वृत्तित्वग्रहाभावविशिष्टस्यैवतदभावादिनिश्चयस्य तद्विशिष्टबुद्धौ प्रतिबन्धकत्वात्, विशेष्यतावच्छेदकसामानाधिकरण्येन तत्तदभावविशिष्टबुद्ध्योः परस्पराऽविरोधितया संभवाच्चेति। १२६। मूले—संशयंलक्षयति। स संशय इति। एकत्रेति। सप्तम्यर्थोविशेष्यकत्वम्। एकधर्मिविशेष्यकेत्यर्थः। ह्रदपर्वतौवन्हितदभाववन्तौ इति ज्ञानेऽतिव्याप्तिवारणाय तत्। घटोद्रव्यं पृथिवीचेति ज्ञानवारणाय भावाभावप्रकार-केति। वृक्षः कपिसंयोगवान् तदभाववांश्चेति समुच्चायवारणाय विरुद्धेति। विरोधावगाहीत्यर्थः। तथा च वन्हिमान् वन्हिविरुद्धवन्ह्यभाववान् वा पर्वतः वन्ह्यभाववान् वन्ह्यभावविरुद्धवन्हिमान् वा पर्वत इत्याकारकः संशयः। अव्याप्य-वृत्तित्वज्ञानाभावरूपं यद्विरोधिभासकं तत्प्रयोज्यमेव संशयत्वमिति ध्येयम्।

नचानुपस्थितस्य विरोधस्य प्रकारतयाभानाऽसंभव इति वाच्यम्। विरोध-संबन्धेन एककोट्यंशेऽपरस्य प्रकारतयाभानोपगामात्।

वस्तुतस्तु पर्वतोवन्हिमान्नवेति संशये वन्हेः प्रतियोगितानिरूपितानुयो-गितासंसर्गत्वास्याऽभावांशे भाने तादृशानुयोगितानिष्ठसांसर्गिकविषयतायां विरो-धस्याऽवच्छेदकत्वं स्वीक्रियते, न तु स्वातन्त्र्येण तस्य संसर्गता। एतेन संशयानां विरोधसंबन्धेनैककोट्यंशेऽपरकोटेर्भानोपगमे विरोधसंबंधेन वन्हिविशिष्टवन्ह्यभाववान् वन्हिमान् वा इत्याकारकतायां वन्ह्यभावविशिष्टवन्हिमान् वन्ह्यभाववान् वेत्याकारक-तायाः प्रसंगोनिरस्तः।

विरोधिसंयोगत्वेन, विरोधिस्वरूपत्वेन वा संसर्गतेत्यपि केचित्। एतन्मते विरोधावच्छिन्नसंयोगादिनिष्ठसंसर्गताकपर्वतोवन्हिमान्नवेति संशयो बोध्यः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

परे तु तत्कोटिप्रकारतानिरूपितविशेष्यत्व—तदभावकोटिप्रकारतानिरूपितविशेष्यतयोरवच्छेद्यावच्छेदक भावः तथा च तादृशविशेष्यत्वावच्छिन्न तादृशविशेष्यताशालिज्ञानत्वं संशयत्वमिति प्राहुः।

विषयिताविशिष्टविषयिताशालिज्ञानं संशय इति तु भट्टाचार्याः। वै० स्वसामानाधिकरण्य—स्वावच्छिन्नप्रतिवध्यतानिरूपितप्रतिवन्धकतावच्छेदकत्वोभयसंबन्धेन। विरोधिज्ञानद्वयस्य संशयत्ववारणाय प्रथमसंबन्धनिवेशः द्वितीयसंबन्धनिवेशात्समुच्चयस्य वारणम्। आहार्यादिज्ञानस्यापि वारणम्।

घटस्यसंशयइत्यादौषष्ठ्यर्थनिरूपितत्वस्य स्वरूपसंबन्धेन द्वितीयविषयितायामन्वयः। तथा च विषयिताविशिष्टघटीयविषयिताश्रय इति बोधः। षष्ठ्यर्थस्य प्रथमविषयितायामन्वये तु घटीयविषयिताविशिष्टविषयिताश्रय इत्येव बोधः स्यात्।

अत्रेदं बोध्यम्। प्रथमविषयितायां षष्ठ्यर्थान्वये तु पर्वतोवन्हिमान् वन्हिव्याप्यवान्नवेति संशयस्य वन्हेः संशयत्वापत्तिः। तादृशोभयसंबन्धेन वन्हिविषयिताविशिष्टायाः वन्ह्यभावव्याप्यविषयितायास्तत्र सत्वात्। न च चरमविषयितायां तस्याऽन्वयेपि वन्ह्यभावव्याप्यांशे सन्दिग्धाऽप्रामाण्यकपर्वतोवन्हिमान्न वा वन्ह्यभावव्याप्यवांश्चेति संशयस्य वन्ह्यभावव्याप्यसंशयत्वापत्तिः, निरुक्तोभयसंबन्धेन वन्हित्वावच्छिन्नविषयिताविशिष्टा या तादृशव्याप्यविषयिता तद्वत्वस्य तादृशज्ञाने सत्वात्। यदि चरमविषयितायां कोटित्वादिकं निवेश्यते तदा प्रथमविषयितायामपि तन्निवेश्य सामंजस्ये नोक्तदोषतादवस्थ्यमिति वाच्यम्। तस्याऽनाहार्यत्वानभ्युपगमात्। तदभ्युपगमे तु तद्वारणप्रकारोपि चिन्तनीयः।

न च स्वावच्छिन्नप्रतिवन्धकतानिरूपितप्रतिवध्यतावच्छेदकत्व स्वसामानाधिकरण्योभयसंबन्धेन विषयितावैशिष्ट्यनिवेशादुक्तज्ञानस्य संशयत्ववारणमिति वाच्यम्। एवमपि पर्वतोवन्हिमान्वन्ह्यभावव्याप्यवान्नवेतिसंशयस्य वन्हेः संशयत्वापत्तेः। तादृशोभयसंबन्धेन वन्ह्यभावव्याप्यविषयिताविशिष्टायाः वन्हिविषयितायास्तत्र सत्वात्। प्रथमविषयितायामन्वयेतु तस्य लक्षणान्तरत्वमित्यस्मद्गुरुचरणाः।

यतु संशयत्वं जातिरिति। तन्न। चाक्षुषत्वादिना संकरात्। संशयत्वस्य जातित्वे एकस्यैवज्ञानस्य धर्मांशेपि संशयत्वापत्तेश्चेत्यन्यत्र विस्तरः।

जगदीशमते तद्धर्मावच्छिन्नप्रकारतानिरूपिता अथ च प्रतियोगित्वसंबन्धावच्छिन्नतद्धर्मावच्छिन्नप्रकारतानिरूपिताऽभावत्वावच्छिन्नप्रकारतानिरूपिता या विशेष्यता तन्निरूपकत्वं तत्संशयत्वम्। भट्टाचार्यमते तद्धर्मावच्छिन्नप्रकारतानिरूपितविशेष्यत्वावच्छिन्ना या प्रतियोगित्वसंबन्धावच्छिन्नतद्धर्मावच्छिन्नप्रकारतानिरूपितविशेष्यता तन्निरूपकत्वं तत्संशत्वमिति संक्षेपः।

लक्षितसंशयस्य "कारण" सामग्रीमाह। मूले—साधारणादीति। आदिनाऽसाधारणधर्मपरिग्रहः। साधारणपदार्थमाह। उभयसाधारणोयोधर्म इति। कोटिद्वयसहचरितत्वेन ज्ञायमानोयोधर्म इत्यर्थः। तेन वन्हितदभावसहचरितमवानय-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

साधारणादिधर्मस्य ज्ञानं संशयकारणम् ॥१३०॥

साधारणेति । उभयसाधारणो यो धर्मस्तज्ज्ञानं संशयकारणम् । यथोच्चैस्तरत्वं स्थाणुपुरुषसाधारणं ज्ञात्वाऽयं स्थाणुर्नवेति संदिग्धे । एवसाधारणधर्मज्ञानमपि कारणम् । यथा शब्दस्य नित्यानित्यव्यावृत्तत्वं शब्दे गृहीत्वा शब्दोनित्योनवेति संदिग्धे । विप्रतिपत्तिस्तु शब्दोनित्योनवेत्यादिशब्दात्मिका न संशयकारणं, शब्द–व्याप्तिज्ञानादीनां निश्चयमात्रजनकत्वस्वभावात्, किन्तु तत्र शब्देन कोटिद्वयज्ञानं जन्यते । संशयस्तु मानस एवेति ।

उभयसाधारण जो धर्म उस धर्म का ज्ञान संशय का कारण होता है। जैसे उच्चैस्तरत्वधर्म को स्थाणु-पुरुष रातत् उभय साधारण जानकर "यह स्थाणु है या नहीं" ऐसा संदेह कर बैठता है। इसी प्रकार असाधारणधर्म का ज्ञान भी संशय का कारण होता है–जैसे–"शब्दों नित्यः शब्दत्वात्" यहां पर शब्दत्वात्मक असाधारणधर्म को नित्य (आकाश–काल आदि) पदार्थों, तथा अनित्य (घट-पट आदि) पदार्थों से व्यावृत्त जानकर यह संदेह होता है कि 'शब्दोंनित्य न वा ।' और "शब्दोंनित्यो न वा" इत्यादि शब्दस्वरूपा विप्रनिपत्ति संशय का कारण नहीं है। क्योंकि शब्द और व्याप्तिज्ञान आदि निश्चय मात्र के कारण होते हैं। किन्तु वहां शब्द से अर्थात् शब्दस्वरूपा विप्रापत्ति से भाव–अभावात्मक दो कोटियों का ज्ञान होता है और उसके बाद संशय मानसही होता है।

मितिभ्रमादयं वन्हिमान्नवेति संशयोपपत्तिः । तद्ज्ञानमिति । तत्प्रकारकनिश्चय इत्यर्थः । एतादृशनिश्चयस्य संशयहेतुतास्थलं दर्शयति । यथेति । उच्चैस्तरत्वमिति । स्थाण्वस्थाणुसाधारणमुच्चैस्तरत्वमिति योजना । एवं पुरुषाऽपुरुषसाधारणमुच्चैस्तरत्वमिति योजना । तथा च स्थाणुत्वतदभावसहचरितमुच्चैस्तरत्वम्, पुरुषत्वतदभावसहचरितमुच्चैस्तरत्वमित्यर्थः । गृहीत्वेति । संशयधर्मिणीत्यादिः तथा च स्थाणुत्वतदभावसहचरितोच्चैस्तरत्ववानयं—पुरुषत्वतदभावसहचरितोच्चैस्तरत्ववानयमिति निश्चित्येत्यर्थः । सन्दिग्धे इति । अयंस्थाणुर्न वा, अयं पुरुषोन वेति संशयं करोतीत्यर्थः ।

मूले साधारणाऽऽदीत्यादिपदग्राह्यमाह । एवमिति । असाधारणधर्मज्ञानमिति । कोटिद्वयाऽसमानाधिकरणत्वेन ज्ञायमानधर्मप्रकारकनिश्चय इत्यर्थः । एतादृशनिश्चयस्य संशयहेतुतास्थलमुदाहरति । यथेति । नित्याऽनित्यव्यावृत्तत्वमिति । नित्याऽनित्ययोरवृत्तित्वमित्यर्थः । गृहीत्वेति । नित्यत्वाधिकरणावृत्ति-अनित्यत्वाधिकरणाऽवृत्तिशब्दत्ववानयमिति निश्चयोत्तरमित्यर्थः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवं ज्ञाने प्रामाण्यसंशयाद् विषयसंशयः ।

इसी प्रकार ज्ञान में प्रामाण्य के संशय से विषय में भी संशय हो जाता है। [अभिप्राय यह है कि—"अयं घटः" इस घटत्व प्रकारकज्ञान में "इदं घटत्वप्रकारकं ज्ञानं घटत्ववति (घटे) घटत्वप्रकारकं न वा" इसरूप से प्रामाण्य का संशय हो जाने से "अयं घटो न वा" इस रूप से घटात्मक विषय का संशय बन जाता है]

उभयकोटिप्रतिपादकवाक्यरूपविप्रतिपत्तिज्ञानादपि कोटिद्वयोपस्थितिद्वारा संशय आवश्यकः, एवं संशयात्मकशाब्दबोधोऽप्यवश्यमङ्गीकार्य इति मतं निराकरोति। **विप्रतिपत्तिस्त्विति** । एवकारार्थकस्तु शब्द नेत्युत्तरं योजनीयः। तथा च शब्दोनित्योनवेतिशब्दात्मिका विप्रतिपत्तिर्नैव संशयकारणमित्यर्थः। विरुद्धार्थविषयकबोधजनकवाक्यं विप्रतिपत्तिः। तथा च तादृशविप्रतिपत्तेः संशयजनकताविरहेण, प्रमाणाभावेन संशयात्मकशाब्दबोधोपि नाङ्गीकर्तव्य इति भावः। निरुक्तविप्रतिपत्तेः संशयजनकत्वाऽसंभवं दर्शयति। **शब्दव्याप्तिज्ञानादीनामिति** । आदिनाऽतिदेशवाक्यार्थज्ञानपरिग्रहः। तत्र व्याप्तिज्ञानाऽतिदेशवाक्यार्थज्ञानयोरुपादानं दृष्टान्तार्थमिति बोध्यम्। **निश्चयमात्रजनकत्वस्वभावादिति** । प्रत्यक्षान्यनिश्चयमात्रजनकत्वादित्यर्थः। एवं च शब्दज्ञानं न संशयजनकं प्रत्यक्षान्यनिश्चयकारणत्वाद् व्याप्तिज्ञानवदित्यनुमानेन विप्रतिपत्तेः संशयाऽजनकत्वसिद्धिरिति भावः। विप्रतिपत्तेः संशयाऽजनकत्वं व्यवस्थाप्य संशयप्रयोजकत्वं व्यवस्थापयति। **किन्त्विति** । तत्र । विप्रतिपत्तिस्थले। **शब्देन** । शक्तिज्ञानसहकृतशब्दज्ञानेन। **कोटिद्वयज्ञानमिति** । भावाऽभावरूपकोटिद्वयस्मरणमात्रमित्यर्थः। **जन्यते** इति। तथा च सत्प्रतिपक्षस्थले विरोधिव्याप्यवत्ताज्ञानाद्यथाऽनुमितिसामान्यानुत्पत्तिः, तथाभावाभावरूपकोटिद्वयविषयकशाब्दसामग्रीसत्वे एकैकशाब्दंप्रति अपरशाब्दसामग्र्याः प्रतिबन्धकत्वाद्विप्रतिपत्तिस्थले शाब्दबोधानुत्पत्तिरिति भावः। ननु तत्राऽनुभूयमानसंशयस्याऽपलापप्रसंग इत्यत आह। **संशयस्त्विति** । संशयोपीत्यर्थः। **मानस एवेति** । एवकारेण विप्रतिपत्तिकरणकत्वव्यवच्छेदः। तथा च संशये कोटिद्वयसहकृतमनः करणं न तु विप्रतिपत्तिरिति तत्वम्।

वस्तुतोऽसाधारणधर्मदर्शनजन्यकोट्यु पस्थितेरेव संशयहेतुत्वाद् विप्रतिवाक्यप्रयोज्यत्वमपि नादरणीयम्। अथ विप्रतिपत्तिवाक्यात्कथं न संशयोभवति। न च संशयत्वस्य प्रत्यक्षत्वव्याप्यतया शाब्दसामग्रीकाले प्रत्यक्षसामग्रीविरहेण न तत्संभव इति वाच्यम्। तादृशस्थले शाब्दबोधानुत्पादेन शाब्दसामग्र्याः कल्पयितुमशक्यत्वादिति चेत् सत्यम् तादृशस्थले मानससामग्र्याः एव सत्वेन शाब्दसामग्र्या अभावादेव शाब्दबोधोत्पादविरहात्। अन्ततस्तादृशप्रत्यक्षसामग्र्या एव समानविषयकप्रत्यक्षसामग्रीविधया शाब्दबोधप्रतिबन्धिकायाः शाब्दसामग्रीविघटनसंभवादिति ध्येयम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवं व्याप्यसंशयादपि व्यापकसंशय इत्यादिकं बोध्यम् । किन्तु संशये धर्मिज्ञानं धर्मिन्द्रियसन्निकर्षो वा कारणम् ॥१३०॥

ऐसे ही धूमात्मक व्याप्य संशय से भी वन्हिस्वरूप व्यापक का संशय होता है इत्यादि भी जानना चाहिए। किन्तु संशय में धर्मी का ज्ञान तथा धर्मी के साथ इन्द्रियसन्निकर्ष भी की कारण होता है ॥१३०॥

एवमिति । ज्ञाने । घटवद्भूतलमितिज्ञाने, घटवद्भूतलमितिज्ञानधर्मिका-दित्यर्थः । प्रामाण्यसंशयादिति । घटवद्भूतलमितिज्ञानं प्रमा न वेति संशया-दित्यर्थः । विषयसंशय इति । भूतलं घटवन्नवेतिसंशय इत्यर्थः । इदमुपलक्षणम् । ज्ञानेऽप्रामाण्यसंशयादपि विषयसंशयोबोध्यः । नचाऽप्रामाण्यसंशयस्य घटाभावो-पस्थितिरूपतया तदुत्तरं विषयसंशयसंभवेपि प्रामाण्यसंशयस्य घटवद्विशेष्यकत्व-विशिष्टघटप्रकारकत्वतादृशप्रकारकत्वाभावरूपकोटिविषयकतया घटाभावविषयकत्वा-भावेन घटाभावोपस्थितिविरहेण कथं तदुत्तरं विषय संशय इति वाच्यम् । विषय-संशये प्रामाण्यसंशयस्य स्वातन्त्र्येण हेतुत्वात् । घटाभावोपस्थितिकालीन प्रामाण्य-संशयादित्यपरे । भ्रमभिन्नत्वतदभावरूपप्रामाण्यतदभावकोटिकसंशयादित्यर्थ इति केचित् ।

व्याप्यसंशयादपीति । पर्वतोवन्हिव्याप्यधूमवान्नवा-धूमवान्नवेतिसंशया-दपीत्यर्थः । व्यापकसंशय इति । पर्वतोवन्हिमान्नवेतिसंशय इत्यर्थः । किन्त्विति । संशये । संशयसामान्ये । तथा च धर्मिज्ञानजन्यत्वं न संशयत्वविभाजकमतो न न्यूनतेतिभावः । धर्मिज्ञानं विनापि "धर्मिज्ञानक्षणे" धर्मीन्द्रियसन्निकर्षे संशय-स्येष्टत्वादित्याशयेनाऽऽह । धर्मीन्द्रियसन्निकर्षोवेति । सन्निकर्षश्च संयोग-संयुक्त-समवाय-संयुक्तसमवेतसमवायादिरूपोग्राह्यः ।

स्वप्नोपि अप्रमाभेदः । यद्यपि क्वचिद् यथार्थ स्वप्नभानं भवति—यथाऽहं इह शय्यायां संविष्टस्तिष्ठामीति । तथापि निद्रादोषसहकारेण तत्र शय्यान्तरमेव भासते इति सांप्रदायिकाः । वस्तुतः तदंशे प्रमात्वेपि तत्रचाक्षुषत्व शाब्दत्वादीनां भ्रमत्वमेव । अत एव चक्षुरादिव्यापारं विनापि स्वप्नज्ञाने चक्षुषा पश्यामि श्रोत्रेण शृणोमीत्याद्यनुव्यवसायः । अत एवोक्तमाचार्यैः—इन्द्रियद्वारकता तत्राऽयथार्थैवेति । भाष्येपि उपरतेन्द्रियग्रामस्य प्रलीनमनस्कस्येन्द्रियद्वारैवयदनुभवनं मानसं तत्स्वप्नज्ञानमित्युक्तम् ।

वैशेषिकमते अनध्यवसायोपि चतुर्थी विधा अयथार्थस्य । तथा च प्रशस्त पादभाष्यम् "तत्राऽविद्या चतुर्विधा संशयविपर्ययाऽनध्यवसायस्वप्नलक्षणा" । गते प्रसिद्धे राजनि कोप्यनेन यथा गत इति ज्ञानमात्रमनवधारितविशेषमिति, कन्दलीकाराः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दोषोऽप्रमायाजनकः, प्रमायास्तु गुणो भवेत् ।

दोष इति । अप्रमां प्रति दोषः कारणम् । प्रमां प्रति गुणः कारणम्। तत्रापि पित्तादिरूपादोषा अननुगताः, तेषां कारणत्वमन्वयव्यतिरेकाभ्यां सिद्धम् । गुणस्य प्रमाजनकत्वं तु अनुमानात् सिद्धम् । यथा प्रमा ज्ञान-सामान्यकारणभिन्नकारणजन्या जन्यज्ञानत्वात् अप्रमावत् ।

अप्रमाज्ञान के प्रति दोष, और प्रमाज्ञान के प्रति गुण कारण होता है। दोषों में भी पित्त आदि दोष अननुगत हैं, दोषों को अप्रमाज्ञान के प्रति प्रकार कारणत्व अन्वय-व्यतिरेक से सिद्ध है। [अर्थात् दोषसत्त्वेऽप्रमाज्ञानसत्त्वं-दोषाभावेऽप्रमाज्ञानाभावः] और गुण को प्रमाज्ञान के प्रति कारणत्वं अनुमान से सिद्ध है। जैसे—प्रमाज्ञान-आत्ममनः संयोग तथा-त्वङ्मनः संयोग रूप जो ज्ञान सामान्य का कारण उस से भिन्न सन्निकर्षादि रूप गुणात्मक कारण जन्य है—जन्य ज्ञान होने से—अप्रमा ज्ञान की तरह ।

"अनुपलब्धसपक्षविपक्षसहचारस्याऽसाधारणधर्मस्य दर्शनात् पनसादौ किंचिदय मिति ज्ञानमनेककोटिकमनध्यवसायः, संशयभिन्नोविषयभेदात्" इति न्यायलीलावतीप्रकाशे वर्द्धमानोपाध्यायाः ।

"पनसादौ किंस्विदिदमिति ज्ञानमसाधारणधर्मजन्यमनध्यवसायः। स च वैशेषिकमते संशयाद् भिन्नः" कण्ठाभरणे शंकरमिश्राः ।

संशय एवायमिति भूषणः । नैवम् । "विरुद्धनानाधर्मप्रकारकं एकधर्मिकं ज्ञानं संशयः, विशेषतोविरुद्धकोट्यनुल्लेखान्नानध्यवसायः, अनुल्लिखितनाना-विरुद्धकोट्यु ल्लेखे हि सः, अत्र पनसस्य किंचित्त्वेन विरोधिनानाकोटेरुल्लेखात्" इति न्यायलीलावतीप्रकाशकृतः ।

"अनुपलब्धसपक्षविपक्षसंस्पर्शस्य धर्मस्य दर्शनात् विशेषत उपलब्धानुप-लब्धकोटिकं ज्ञानमनध्यवसायः । अत एवायं संशयाद् भिद्यते, स हि उपलब्ध-सपक्षविपक्षसंस्पर्शधर्मदर्शनादुत्पद्यते, उपलब्धाऽव्यवस्थितकोटिविषय इति लोक प्रसिद्धिः, तदनुसारित्वाच्च परीक्षकाणामि" त्याचार्याः ॥१३०॥

एतावता अप्रमां विभज्य तत्कारणं निरूपयति । अप्रमांप्रतीत्यादि। प्रसंगात्प्रमासामग्रीमपि अत्रैव दर्शयति प्रमांप्रतिगुणः कारणमिति । तत्रापि। कारणीभूतष्यपिष्वपि । पित्तादीति । आदिना तिमिर—मण्डूकवसाञ्जनादयोदोषाः ग्राह्याः । अननुगता इति । पित्तत्वादिरूपनानाधर्मावच्छिन्ना इत्यर्थः । तथा चाऽप्रमासामान्यं प्रति यावन्तोदोषास्तावदन्यतमत्वेन, यादृशदोषोत्तरं यादृशाऽप्रमा प्रामाणिकी तत्तदप्रमां प्रति तत्तदोषत्वेन वा हेतुत्वमिति भावः । ईदृशकार्यकारणभावे प्रमाणं दर्शयति । तेषामिति । दोषाणामित्यर्थः । अन्वयव्यतिरेकाभ्यामिति।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न च दोषाभाव एव कारणमस्त्विति वाच्यम् ।

प्रश्न—प्रमाज्ञान के प्रति गुण को कारण न मानकर दोषाभाव को ही कारण मान लिया जाय ?

अन्वयव्यतिरेकसहचारज्ञानसहकृतप्रत्यक्षप्रमाणादित्यर्थः । दोषसत्वे अप्रमासत्व-मित्यन्वयसहचारः । दोषाभावेऽप्रमाऽभाव इति व्यतिरेकसहचारः । अन्वयव्यति-रेकाभ्यामिति सावधारणम । अन्वयव्यतिरेकसहचारज्ञानसहकृतप्रत्यक्षप्रमाणा-देवेत्यर्थः एवकारादनुमानप्रमाणव्यवच्छेदः । यद्यपि अप्रमा ज्ञानसामान्यकारण-भिन्नकारणजन्या जन्यज्ञानत्वादित्यनुमानादपि दोषाणामप्रमाकारणत्वं सिद्ध्यति । प्रमायाः गुणजन्यत्वसिद्धेः प्राक् अन्वयदृष्टान्तविरहेपिं परमाण्वादिनित्यानां व्यतिरेकदृष्टान्तत्वसंभवात् तथापि प्रमायाः गुणजन्यत्वसिद्धेः प्राक्प्रमायां "साध्य-संशयाधीन" व्यभिचारसंशयसंभवान्नानुमानात्तत्सिद्धिरिति बोध्यम् । गुणस्य प्रमाजनकत्वे प्रमाणमाह । **गुणस्येति । प्रमाजनकत्वं तु** इति । तु शब्दोऽप्यर्थकः । अनुमानादित्युत्तरं योजनीयः । **अनुमानात्सिद्धमिति ।** अनुमानादपि सिद्ध-मित्यर्थः । **अनुमानात्** "गुणसत्वेप्रमासत्वम् गुणाऽभावेप्रमाऽभावः इत्यन्वय-व्यतिरेकसहचरज्ञानसहकृत" प्रत्यक्षप्रमाणादपीति यावत् । अनुमानं दर्शयति **यथेति । प्रमेति ।** समवायकालिकोभयसम्बन्धेन तद्वति तत्प्रकारकज्ञानत्वरूपप्रमा-त्वाश्रयइत्यर्थः । तेनाऽवच्छेदकावच्छेदेनसाध्यत्वे भगवद्ज्ञाने न व्यभिचारः । ज्ञानसामान्यकारणभिन्नकारणजन्यत्वं साध्यम् । ज्ञानसामान्यस्य यत्कारणमात्ममनः-संयोगादिः तद्भिन्नं यत्कारणं गुणः "चक्षुःसंयोगादिः" स्तज्जन्येत्यर्थः । तथा च कालिकसमवायोभयसम्बन्धेनज्ञानत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदका याव-न्तोधर्मास्तत्तद्व्यक्तिभेदकूटविशिष्टधर्मावच्छिन्नकारणतानिरूपितजन्यतावतीतियावत् । तेन ज्ञानत्वस्य नित्यज्ञानवृत्तित्वेऽपि न क्षतिः । **जन्यज्ञानत्वादिति ।** नित्यज्ञाने व्यभिचारवारणायजन्येति । कालिकसमवायोभयसम्बन्धेनज्ञानत्ववत्वादिति तदर्थः । **अप्रमावदिति ।** शंखविशेष्यकपीतरूपादिप्रकारकज्ञानवदित्यर्थः । तत्र ज्ञानसामान्यकारणभिन्न "दोषरूप" कारणजन्यत्वादिति भावः । इदमुपलक्षणम् । पक्षैकदेशोपि दृष्टान्तो बोध्यः । अथ दोषसत्वे प्रमानुत्पत्त्या तत्र दोषाणां प्रतिबन्धकत्वं वाच्यम्, तथा च दोषाभावस्य प्रतिबन्धकाभावविधया कारणत्वं क्लृप्तमेवेति दोषाभावजन्यत्वमादायाऽर्थान्तरमित्याशंकते । **नचेति । दोषाभाव एवेति ।** एवकारेण गुणव्यवच्छेदः । प्रमां प्रति दोषस्याऽप्रतिबन्धकत्वेन प्रतिबन्धकाभाव-विधया दोभावस्य न तत्र कारणत्वमित्यतोव्यतिरेकव्यभिचार इत्याशयेन समाधत्ते । **पीतः शंख इति ज्ञानस्थले** इति । तादृशज्ञानविशेष्यीभूतशंखे इत्यर्थः । **पित्तदोषसत्त्वादिति ।** स्वाश्रयसंयुक्तत्वसंबन्धेन पित्ततारूपदोषसत्वादित्यर्थः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पीतः शंख इति ज्ञानस्थले पित्तदोषसत्त्वात् शंखत्वप्रमानुत्पत्तिप्रसङ्गात्, विनिगमनाविरहादनन्तदोषाभावस्य कारणत्वमपेक्ष्य गुणस्य कारणताया न्याय्यत्वात्।

उत्तर—"पीतः शंखः" इस ज्ञानस्थल में पित्त दोष के सत्त्व होने से शंख का भी प्रमाज्ञान नहीं हो सकेगा। [अभिप्राय यह है कि 'पीतः शंखः' यहाँ पर शंख का ज्ञान तो प्रमा है–किन्तु शंख में पीत का ज्ञान अप्रमा है। अब यदि प्रमाज्ञान की उत्पत्ति में दोषाभाव को कारण माना जायगा तो 'पीतः शंखः' यह ज्ञान पित्त दोष के कारण ही हो रहा है, अतः दोषाभाव रूप कारण न रहने से प्रमात्मक ज्ञान रूप कार्य भी न हो सकेगा, क्योंकि कारणाभावात् कार्याभावः] [दूसरी बात यह है कि कोई विनिगमना (युक्ति) आपके (दोषाभाव को कारणता वादी के) मत में नहीं है कि दोषाभाव ही को कारण माना जाय और गुण को न माना जाय और दोषा भाव को कारण मानने पर भी अनन्त दोषाभावों को कारण मानना होगा] अतः विनिगमना विरह होने के नाते अनन्तदोषाभावों को कारण मानने की अपेक्षया गुण को ही प्रमाज्ञान के प्रति कारण मानना न्याय्यपक्ष है।

शंखत्वप्रमानुत्पत्तिप्रसंगादिति। शंखत्वप्रकारकप्रमानुत्पत्तिप्रसंगादित्यर्थः। यथा पित्तरूपदोषसत्वे श्वैत्यप्रमानुत्पत्तिस्तथा शंखत्वप्रकारकप्रमानुत्पत्तिप्रसंगादिति भावः। एवं च तादृशप्रमोत्पादाच्च तत्र दोषःप्रतिबन्धकः, न वा दोषाभावस्य कारणत्वमिति यावत्। ननु पित्तदोषसत्वे शुक्लत्वप्रकारकप्रमाया एवाऽनुत्पादात्, शुक्लत्वप्रकारकप्रमां प्रत्येव दोषाभावस्य कारणत्वं स्वीक्रियते इति तादृशदोषसत्व शंखत्वप्रकारकप्रमोत्पत्तौ बाधकाभावादित्यत आह। **विनिगमनाविरहादिति**। गुणस्यापि हेतुत्वस्वीकारादिति शेषः। प्रमायां दोषाभावः कारणं गुणोवेत्यत्र विनिगमनाविरहादिति भावः। प्रत्युत गुणस्य हेतुत्वे एव लाघवं विनिगमकमित्याह। **अनन्तदोषाभावस्य कारणत्वमपेक्ष्येति**। अनन्ताः ये दोषास्तेषां तत्तद्धर्मावच्छिन्नप्रतियोगिताकाभावस्य तेन रूपेण तत्तत्प्रमां प्रति हेतुत्वापेक्षयेत्यर्थः। **गुणस्येति**। विशेषणवद्विशेष्यसन्निकर्षस्य साध्यवत्पक्षविशेष्यकसाध्यव्याप्यवत्तापरामर्शस्य अयंगोसदृश इति सादृश्यप्रकारकज्ञानस्य, तात्पर्यज्ञानस्येत्यर्थः। **कारणताया** इति। क्रमेण प्रत्यक्षानुमित्युपमितिशाब्दबोधनिरूपितकारणताया इत्यर्थः। **न्याय्यत्वादिति**। लाघवरूपप्रमाणसिद्धत्वादित्यर्थः। तथा च प्रत्यक्षादिप्रमाचतुष्टये गुणानां कार्यकारणभावचतुष्टयाङ्गीकार एवोचित इति भावः। गुणस्य कारणत्वमाक्षिपति। **नचेति**। **गुणसत्वेपीति**। शुक्लरूपवच्छंखेन्द्रियसंयोगरूपगुणसत्वेपीत्यर्थः। **पित्तेन**। पित्तत्वरूपदोषेण। **प्रतिबन्धादिति**। श्वैत्यप्रमानुत्पादादित्यर्थः। श्वेतःशंख इति प्रमानुत्पादादिति भावः। **शंखे न श्वैत्यज्ञानमिति**। तथाचाऽन्वयव्यभिचार इति भावः। **अत इति**। शंखेन्द्रिय-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न च गुणसत्त्वेऽपि पित्तेन प्रतिबन्धाच्छङ्खे न श्वैत्यज्ञानमतः पित्तादिदोषाभावानां कारणत्वमवश्यं वाच्यं तथा च किंगुणस्य हेतुत्वकल्पनेति वाच्यम्। तथापि अन्वयव्यतिरेकाभ्यां गुणस्यापि हेतुत्वसिद्धेः। एवं भ्रमं प्रति गुणाभावः कारणमित्य स्यापि सुवचत्वात् ।

प्रश्न—शंख में शुक्ल रूप के साथ चक्षुः संयुक्त समवायात्मक सन्निकर्षस्वरूप गुण मौजूद होने पर भी पित्त दोष प्रयुक्त उसका प्रतिबन्ध हो जाने से फिर भी तो शंख में श्वैत्य (शुक्लता) का ज्ञान नहीं हो पा रहा है अतः इस अन्वय व्यभिचार को दूर करने के लिये पित्त आदि दोषों के अभावों को कारण अवश्य ही मानना चाहिये, तब फिर गुण में कारणता की कल्पना करना व्यर्थ है।

उत्तर—कारणता ग्राहक अन्वय-व्यतिरेक से गुण को कारणत्व अनुभव सिद्ध है। (क्योंकि सन्निकर्षात्मक गुण के रहने पर ही प्रमाज्ञान होता है और न रहने पर नहीं होता है) दूसरी बात यह है कि जैसे तुम प्रमाज्ञान के प्रति गुण को कारण न मानकर दोषाभाव को कारण मानते हो ऐसे ही भ्रम के प्रति भी दोष को कारण न मामकर दोषाभाव को कारण मानना यह भी तो सुवच हो सकता है।

संयोगरूपगुणात्मककारणसत्वेपिशुक्लत्वप्रमानुत्पत्तिवशादित्यर्थः। पित्तादिदोषाभावानामिति । प्रमां प्रतीत्यादिः। वाच्यमिति । अन्यथानुपपत्त्या पारिशेष्यादिति शेषः। तथा च दोषाभावानां हेतुत्वस्यावश्यकत्वे च। हेतुत्वकल्पनेनेति । गुणस्य हेतुत्वाङ्गीकारेण किं प्रयोजनमित्यर्थः। तथा चाऽऽवश्यकदोषाभावेनैव निर्वाहे गुणस्य न हेतुत्वमन्यथासिद्धत्वादिति भावः। आक्षेपं निराकरोति। तथापीति । दोषाभावानां हेतुत्वस्याऽऽवश्यकत्वेऽपीत्यर्थः। अन्वयव्यतिरेकाभ्यामिति । पटादौ पीतरूपात्मकविशेषणवद्विशेष्येन्द्रियसन्निकर्षरूपगुणसत्वात्, पीतः घट इति पीतरूपप्रकारकप्रमोत्पत्तिः, एवं तेजोंशसुवर्णस्य पीतरूपवत्वाभावेन तत्र पीतत्वविशेषणवद्विशेष्येन्द्रियसन्निकर्षात्मकगुणाभावेन पीतत्वप्रकारकप्रमाया अभावः इत्यन्वयव्यतिरेकाभ्यामित्यर्थः। गुणस्यापीति । तथा च निरुक्तान्वयव्यतिरेकाभ्यां गुणस्यापि हेतुत्वावश्यकतया न तेन गुणस्यान्यथासिद्धिरिति भावः। वस्तुतोपित्तादिदोषाभावसत्वेपि विशेषणवद्विशेष्येन्द्रियसन्निकर्षरूपगुणाभावान्न शंखपीत इति प्रमा, अतोदोषाभावेनन गुणस्यान्यथासिद्धिरितितत्वम् ।

एवमिति । एवं सतीत्यर्थः। अन्वयव्यतिरेकसत्वेपि अन्यथासिद्धत्वे सतीत्यर्थः। गुणाभाव इति सावधारणम्। गुणाभाव एव न तु दोषा इत्यर्थः। इत्यस्यापीति । इत्याकारक भ्रमगुणाभावयोः कार्यकारणभावस्यापीत्यर्थः। सुवचत्वादिति । अवश्यं वाच्यत्वादित्यर्थः। अन्यथा पित्तादिदोषस्याऽविशिष्टत्वेपि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पित्तदूरत्वादिरूपो दोषो नानाविधः स्मृतः ॥१३१॥
प्रत्यक्षे तु विशेष्येण विशेषणवता समम् ।
सन्निकर्षो गुणस्तु स्यादथ त्वनुमितौ गुणः ॥१३२॥
पक्षे साध्यविशिष्टे तु परामर्शो गुणो भवेत् ।
शक्ये सादृश्यबुद्धिस्तु भवेदुपमितौ गुणः ॥१३३॥
शाब्दबोधे योग्यतायास्तात्पर्यस्याथवा प्रमा ।
गुणः स्याद्,

तत्र दोषाः के इत्याकांक्षायामाह—पित्तेति क्वचित् पितादिभ्रमे पित्तं दोषः, क्वचिच्चन्द्रादेः स्वल्पपरिमाणभ्रमे दूरत्वं दोषः, क्वचिच्च वंशोरगभ्रमे मण्डूकवसाञ्जनमित्येवंरूपा दोषा अननुगता एव भ्रान्तिजनका इत्यर्थः ॥१३१॥

अथ के गुणा ? इत्याकांक्षायां प्रत्यक्षादौ क्रमशो गुणान् दर्शयति-प्रत्यक्षेत्विति । प्रत्यक्षे विशेषणवद्विशेष्यसन्निकर्षो गुणः । अनुमितौ साध्यवतिसाध्यव्याप्यवैशिष्ट्यज्ञानं गुणः । एवमग्रेऽपि ॥१३२–१३३॥

इति अप्रमानिरूपणम् ।

प्रश्न—दोष कितने हैं ?

उत्तर—कहीं तो अर्थात् 'पीतः शंखः' यहाँ पर शंख में जो पीत भ्रम है उसके प्रति 'पित्त' को दोष माना है । कहीं पर अर्थात् चन्द्रमा के स्वल्पपरिमाण के भ्रम में दूरत्व दोष माना गया है । और कहीं बाँस में सर्प भ्रम के प्रति मण्डूक (मेंढ़क) की बसा (मज्जा) के अञ्जन को ही दोष माना है । [सुना है कि मेंढक की मज्जा का अञ्जन बनाकर यदि आँखों में उसे लगा लिया जाय तो सब बाँस सर्प ही के रूप में दीखने लगते हैं] इस प्रकार अननुगत (अनन्त) दोषों को ही भ्रम का कारण मानना होगा ॥१३१॥

शंखादाविव पीतपटादौ पीतरूपप्रकारकप्रमायः भ्रामत्वापत्तिः "तथाचाऽन्वयव्यभिचारः" स्यादिति भावः । तथा च भ्रामं प्रति "विशेषणवद्विशेष्येन्द्रियसन्निकर्षरूप" गुणस्य प्रतिबन्धकत्वं तदभावस्य तत्र हेतुत्वं वाच्यं, पीतपटादौ तु तादृशप्रतिबन्धकाभावरूपकारणाभावान्न तदापत्तिरिति । अत्र प्रत्यक्षप्रमां प्रत्येव पित्तादिदोषाभावस्यापि उक्तदोषवारणाय हेतुत्वं वाच्यम्, एवं प्रत्यक्षभ्रामं प्रत्येव गुणाभावस्यापि उक्तदोषवारणाय हेतुत्वं वाच्यम् नत्वनु मित्यादाविति ध्येयम् ॥ १३१ ॥

एवमग्रेपीति । उपमितौ शक्यविशेष्यकसादृश्यप्रकारकज्ञानं गुणः । शाब्दबोधे योग्यतायाः तात्पर्यस्य वा प्रमा गुणः ।

इति अप्रमानिरूपणम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यत्र तु भूयोदर्शनादपि शंका नापैति तत्र विपक्षे बाधकस्तर्कोऽपेक्षितः । तथा हि वन्हिविरहिण्यपि धूमः स्यादिति यद्याशंका भवति, तदा सा वन्हिधूमयोः कार्यकारणभावस्य प्रतिसंधानान्निवर्त्तते । यद्ययं वन्हिमान्न स्यात्तदा धूमवान्न स्यात्, कारणं विना कार्यानुत्पत्तेः । यदि च क्वचित्

और जहाँ भूयोदर्शन से भी व्यभिचारशंका की निवृत्ति न हो वहाँ विपक्ष (व्यभिचार से शंका) निवर्त्तकतया तर्क अपेक्षित होता है । तथा हि—'वन्हिशून्य देश में भी धूम उत्पन्न होता है' यह यदि व्यभिचार शंका हो तो उसे वन्हि धूम के कार्यकारण भाव के निश्चयात्मक तर्क से निवृत्त कर दी जाती है । जैसे—धूमवत्तया निश्चित यह पर्वत यदि वन्हिवाला नहीं है तब धूम वाला भी नहीं हो सकता है, क्योंकि कारण के बिना कार्य की उत्पत्ति नहीं

अत्र सकृद्दर्शनं न व्याप्तिग्राहकं, रासभवन्ह्योः सकृत्सहचारदर्शने व्याप्त्यग्रहात्, किं तु भूयोदर्शनम् तथा, एवं च वन्हिशून्यदेशेपि रासभदर्शनेन भूयोदर्शनरूपकारणाभावात् न व्याप्तिग्रह इति केषांचिन्मतं निरस्यति । भूयोदर्शनमिति । भूयस्सु स्थानेषु साध्यसाधनसहचारदर्शनम्, भूयसां साध्यानां साधनानां च सहचारदर्शनम्, भूयस्त्वविशिष्टं साध्यसाधनसहचारदर्शनं चेत्यर्थः । न कारणमिति । न व्याप्तिनिश्चयकारणमित्यर्थः । व्यतिरेकव्यभिचारादिति भावः । व्यतिरेकव्यभिचारमाह । व्यभिचाराऽस्फूर्ताविति । व्यभिचाराऽस्फूर्तावित्यर्थः । व्यभिचारनिश्चयाऽभावसत्वे इति यावत । क्वचिदिति । एतद्रूपवान् एतद्रसादित्यादौ इत्यर्थः । व्याप्तिग्रहादिति । एतद्रूपव्याप्यमेतद्रसमिति व्याप्तिग्रहादित्यर्थः । भूयस्त्वस्य त्रिचतुरादित्वेन त्रिचतुरादिभेदेनाऽननुगमाच्च, शतशः सहचरितयोरपि पार्थिवत्वलोहलेख्यत्वयोर्हीरके व्यभिचारदर्शनाच्चेत्यपि बोध्यम् । भूयोदर्शनस्याऽकारणत्वेपि प्रयोजकत्वमावश्यकमित्याह । क्वचिदिति । व्याप्तिग्रहविशेषे इत्यर्थः । व्यभिचारशंकाविधूनद्वारेति । हेतुः साध्याभाववद्वृत्तिर्नवेति व्यभिचारसंशयनिरसनं कृत्वाइत्यर्थः । उपयुज्यते इति । पूर्ववर्त्तित्वरूपप्रयोजकतावद् भवति इत्यर्थः । यत्र तु न व्यभिचारशंका तत्र नोपयुज्यते इति भावः ।

इति व्याप्तिग्रहोपायनिरूपणम् ।

शंका व्यभिचारशंका । नापैति । न निवर्त्तते । विपक्षे साध्याभाववति । बाधकतर्कइति । हेतोः सत्वबाधके तर्के इत्यर्थः । व्यभिचारशंकानिवर्तकतर्क इति यावत् । अपेक्षित इति । अवश्यं संपादनीय इत्यर्थः । व्यभिचारशंकाया व्याप्तिज्ञानप्रतिबन्धकत्वादिति भावः । प्रथमतोव्यभिचारशंकां दर्शयति । तथाहीति । धूमोऽस्तुवन्हिर्मास्तु इति शंकास्वरूपम्, तदाह वन्हिविरहिण्यपीति । विपक्षे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इत्यर्थः। धूमःस्यादिति। अनेन हेतुसत्त्वंप्रतिपादितम्। धूमोवन्ह्यभाववद्वृत्तिर्नेति फलितम्। यद्याशंका भवतीति। इत्यांशंका यदि भवतीति योजना। तदा सेति। निरुक्तव्यभिचारशंकेत्यर्थः। व्यतिरेकव्यभिचारशंकेति यावत्। यत्र साध्याभावस्तत्र हेत्वभाव इति व्यतिरेकसहचारः साध्याभाववति हेतुसत्वं व्यतिरेकव्यभिचारः। प्रतिसन्धानादिति। धूमोवन्हिजन्यः वन्हिर्धूमजनक इति कार्यत्वस्य कारणत्वस्य च निश्चयादित्यर्थः। तर्कमाह। यदीति। अयमिति। धूमवान् पर्वत इत्यर्थः। वन्हिमान्नस्यादिति। वन्हिमद्भेदवान् स्यादित्यर्थः। वन्ह्यभाववान् स्यादिति यावत्। धर्मिभेदधर्मात्यन्ताभावयोरैक्यादिति भावः। तदा धूमवान् न स्यादिति। धूमवद्भेदवान् स्यादित्यर्थः। धूमाभाववान् स्यादिति यावत्। तथा च धूमो यदि वन्हिव्यभिचारीस्यात्तदा वन्हिजन्यो न स्यादितितर्काकारोबोध्यः। यथाश्रुतस्य तादृशतर्कस्य विषयशोधकत्वेपिं व्याप्तिग्रहानुपयोगित्वेनाऽसंगत्यापत्तेः।

अयं भावः व्याप्यारोपेण व्यापकारोपस्तर्कः। तदर्थस्तु व्याप्यस्य वन्ह्यभावस्य। आरोपेण आहार्यज्ञानेन। व्यापकस्य धूमाभावस्य। आरोपः आहार्यज्ञानमित्यर्थः। आहार्यव्याप्यवत्ताभ्रमजन्याऽऽहार्यव्यापकवत्ताभ्रम इत्यर्थः। आहार्यं च बाधकालीनेच्छाजन्यं ज्ञानम्। प्रकृते बाधनिश्चयश्च वन्हिधूमयोः पर्वतादौ निश्चयः, तत्कालीनेच्छा वन्हिव्याप्यधूमवति पर्वते वन्ह्यभावज्ञानं धूमाभावज्ञानं च जायतामित्याकारिका तज्जन्यज्ञानं पर्वतो यदि वन्ह्यभाववान् स्यात् धूमाभाववान् स्यादिति ज्ञानम् तदेव तर्कः।

अत्रेदं बोध्यम्। तर्कं प्रति यथाऽऽपाद्यव्यतिरेकनिश्चयः कारणं—तथाऽऽपाद्यव्याप्याऽऽहार्याऽऽपादकवत्तानिश्चयः कारणम्। अतोधूमो यदि वन्हिव्यभिचारी स्यात्तदा वन्हिजन्यो न स्यादित्यापत्तिं प्रति धूयोवन्हिजन्यः इति निश्चयो यथा कारणं तथा वन्हिजन्यत्वाभावव्याप्यवन्हिव्यभिचारित्ववान् धूम इति वन्हिव्यभिचारित्वांशे आहार्यनिश्चयोपि कारणम्। न च तद्वत्ताबुद्धिं प्रति तदभाववत्तानिश्चयस्य प्रतिबन्धकत्वात् धूमे वन्हिजन्यत्वनिश्चयसत्वे कथं धूमे वन्हिजन्यत्वस्यापत्तिः संभवतीति वाच्यम्। अनाहार्यतद्वत्ताबुद्धिं प्रत्येव तदभावनिश्चयस्य प्रतिबन्धकत्वात्। आपत्तेस्तु आहार्यतया बाधनिश्चयाऽप्रतिबध्यत्वात्। अत्राऽऽपाद्याऽऽपादकयोर्व्याप्ति द्विविधा—आपादकव्यापकाऽऽपाद्यसामानाधिकरण्यरूपाऽ न्वयव्याप्तिः। आपाद्याभावव्यापकीभूताभावप्रतियोगित्वरूपा व्यतिरेकव्याप्तिश्च। तथा धूमोयदि वन्हिजन्योन स्यात् वन्हिव्यभिचारीस्यादित्यापत्तिरपि संभवात्। तत्र वन्हिव्यभिचारित्वव्यापकवन्हिजन्यत्वाभावसमानाधिकरणवन्हिव्यभिचारित्ववान् धूम इत्यन्वयव्याप्त्यवगाहिनिश्चयः कारणम्। एवं वन्हिजन्यत्वाभावाभावव्यापकीभूताभावप्रतियोगिवन्हिव्यभिचारित्ववान् धूम इति व्यतिरेकव्याप्त्यवगाहिनिश्चयोपि कारणम्। तथा च तर्कपूर्वं धूमे वन्हिजन्यत्वनिश्चयः आपाद्यव्यतिरेकनिश्चयविधयाऽस्ति, वन्हिव्यभिचारित्वव्यापकवन्हिजन्यत्वाभावसमानाधिकरण वन्हिव्यभिचारित्ववान् धूम इत्यन्वयपरामर्शो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कारणं विनापि कार्यं भविष्यति, तदाऽहेतुक एव भविष्यति, इति तत्राप्याशंका भवेत् तदा सा व्याघातादपसारणीया ।

हो सकती है । [प्रकृत में वन्हिरूपकरण के बिना धूमात्मक कार्य की भी उत्पत्ति कैसे हो सकती है] और यदि कहो कि कारण के बिना भी कार्य उत्पन्न हो सकता है यह यदि शंका हो तो उसे व्याघात से दूर कर देना चाहिये ।

विषयतया वन्हिजन्यत्वाभावे वन्हिव्यभिचारित्वव्यापकत्वनिश्चयोपि वर्तते । धूमव्यापकत्वेन गृहीतस्य वन्हेरभावस्य ह्रदे निश्चये ह्रदे धूमवत्ताबुद्धिर्न जायते, तथा वन्हिव्यभिचारित्वव्यापकत्वेन गृहीतस्य वन्हिजन्यत्वाभावस्याभावनिश्चये धूमे वन्हिव्यभिचारित्ववत्ताबुद्धिरनाहार्या न जायते । तद्वत्ताबुद्धिं प्रति तद्व्यापकत्वेनगृहीतधर्मस्याभावप्रकारकनिश्चयस्य विरोधित्वात् । एवं वन्हिजन्यत्वाभावाभाव "वन्हिजन्यत्व" व्यापकीभूताभावप्रतियोगिवन्हिव्यभिचारित्वान् धूम इति व्यतिरेक परामर्शेविषयतया वन्हिव्यभिचारित्वाभावे वन्हिजन्यत्वाभावव्यापकत्वनिश्चये वन्हिजन्यत्वस्य धूमे निश्चये वन्हिव्यभिचारित्ववत्ताबुद्धिराहार्या न जायते । वन्हिव्यभिचारित्ववत्ताबुद्धिंप्रति वन्हिव्यभिचारित्वाभावधर्मिकवन्हिजन्यत्व व्यापकतानिश्चयविशिष्ट धूमधर्मिकवन्हिजन्यत्वनिश्चयस्य "वन्हिजन्यत्ववान् वन्हिव्यभिचारित्वाभाववान्, वन्हिजन्यत्ववान् धूम इत्याकारकस्य" प्रतिबन्धकत्वम् । अत एव जलव्यापकोवन्ह्यभावः—जलवान् ह्रदः इति निश्चयस्य सत्वे ह्रदोवन्हिमानिति बुद्धिर्न जायते । एवं तर्कं प्रति आपाद्यव्याप्याऽऽपादकवत्वांशे आहार्यनिश्चयः कारणम् । तत्राऽऽहार्यवन्हिव्यभिचारित्ववत्ताबुद्धिं प्रत्येव तर्कस्यविरोधित्वम् । भवति हि आपाद्यस्याऽनिष्टस्य प्रदर्शनेनाऽऽपादकवत्ताबोधस्येच्छाविच्छेद इति आहार्यजनकीभूताऽऽपादकवत्वबोध "रूपद्विष्टसाधनताबोध" विषयकेच्छाविघटकतया तर्कस्याऽऽहार्याऽपादकवत्ताबोधविघटकत्वम् ।

अथ किं तर्केण—तर्कहेतुरापाद्यव्यतिरेकनिश्चयएवाऽऽपादककोटिकशंकां निवर्तयिष्यति, आपादकस्याऽऽपाद्यव्याप्यतयाऽऽपाद्यव्यतिरेकस्याऽऽपादकव्यतिरेकव्याप्यतयाऽऽ पाद्यव्यतिरेकनिश्चयस्य विशेषदर्शनत्वादिति चेन्न । तर्ककारणीभूतज्ञाननाशेपि तर्कसत्वे शंकानुत्पत्त्यनुरोधेन तर्कस्योपयोगित्वात् ।

केचित्तु विशेषदर्शनादनाहार्यसंशयनिवृत्तावपि आहार्यसंशयनिवृत्त्यर्थं तर्कापेक्षा—तथा हि—व्याप्यप्रसंजनेन व्यापकप्रसंजनमाहार्यज्ञानम्, व्यापकप्रसंजनेन दुःखात् तत्र द्वेषात् तत्प्रयोजक व्याप्यप्रसंजनेपि द्वेषादिष्टताधनताज्ञानाभावाच्चेच्छानिवृत्तौ कारणाभावादेवाऽऽहार्यशंकानुत्पाद इति वदन्ति ।

न च तर्कं प्रति आपाद्यव्याप्याऽऽपादकवत्तानिश्चयत्वेन कारणत्वे आपादके आपाद्यव्यभिचारशंकानिवृत्त्यर्थं तर्कान्तरमपेक्षणीयम् । स च तर्कः वन्हिव्यभिचारित्वं यदि वन्हिजन्यत्वाभावव्यभिचारि स्यात् वन्हिजन्यतावच्छेदकं स्यादित्याकारकः । अत्रापि आपादके आपाद्यव्यभिचारसंशयनिवृत्त्यर्थं तर्कान्तरमपेक्षणीयमित्यनवस्थे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यदि हि कारणं विना कार्यं स्यात् तदा धूमार्थं वन्हेस्तृप्त्यर्थं भोजनस्य वा नियमत उपादानं तवैव न स्यात्तस्मात्तदुपादानमेव तादृशशंकाप्रतिबन्धक-

कि यदि कारण के बिना भी कार्य होता हो तो धूम के लिये वन्हि का तथा तृप्ति के लिये भोजन का होने वाला नियम से उपादान (ग्रहण) तुम्हीं को नहीं होना चाहिये।

त्याशंकायामाह । **कारणं विना कार्यानुत्पत्तेरिति** । वन्ह्यभाववति धूमोत्पत्त्य-भावादित्यर्थः। तथा च यदि वन्हिर्न स्यात् धूमोपि न स्यादिति भावः। ननु अत्रापि वन्हिं विनापि धूमोभवतु इत्याशंका, धूमोऽहेतुक एवास्तु इत्याद्याशंका वा तर्कविरोधिनी स्यादिति चेत्तत्राह। **सा—शंका। स्वक्रियाव्याघातादिति** ! **स्वस्य**-तार्किकपुरुषस्य। **याक्रिया**—अन्वयव्यतिरेकानुविधायित्वज्ञानं । क्रियते-प्रवर्ततेऽने-नेतिव्युत्पत्तेः। **तदेवव्याघातो**—विरोधी-प्रतिबन्धकस्तस्मादित्यर्थः। **अपसारणीया**-निरसनीया। धूमेवन्ह्यन्वयव्यतिरेकानुविधायित्वज्ञानसत्वेपि वन्ह्यभाववतिसत्वं-सामा-न्यतोऽहेतुकत्वे शंकेतेति स्पष्टार्थः। अन्वयव्यतिरेकाभ्यां प्रत्यक्षतोवन्हिजन्यत्व-निश्चयस्यैव एतत्तर्कसहकारितया वन्ह्यन्वयव्यतिरेकानुविधायित्वज्ञानस्य पूर्वं अवश्यं सत्वात्। तथा च तर्कप्रतिबन्धकशंकायाः तर्कान्तरेणाऽ निवृत्तौ नाऽनवस्थेति भावः।

ग्राह्याऽभावाऽनवगाहितया निरुक्तान्वयव्यतिरेकानुविधायित्वज्ञानस्योक्तशंका-द्वयाऽप्रतिबन्धकत्वेपि मणिमन्त्रादिन्यायेन शंका प्रतिबन्धकत्वे मानमाह **यदिहीति**। **कारणं विनेति**। गृहीतान्वयव्यतिरेकं हेतुं विनेत्यर्थः। वन्हिं विनेतिभावः। **कार्यंस्यादिति**। धूमः स्यादित्यर्थः। तथा च वन्ह्यभाववतिधूमः स्यादिति समुदितार्थः। अतएवोक्तं तदेव हि आशंक्येत, यस्मिन्नाशंक्यमाने स्वक्रिया-व्याघातोन भवेदिति। तथा च **धूमार्थं वन्हेरिति**। अस्योपादानमित्यनेनाऽन्वयः। एवमग्रेपि। **उपादानं कथं कुर्यादिति**। प्रवृत्तिः कथं भवेदित्यर्थः। तेन विनापि तत्संभवादिति भावः। **तवैवेति**। निरुक्तान्वयव्यतिरेकानुविधायित्वज्ञानस्य तादृश-शंकाद्वयप्रतिबन्धकत्वानंगीकर्त्तुरेवेत्यर्थः। **न स्यादिति**। इति ज्ञानेनसाऽपसारणीये-त्यर्थः। तथा चाऽन्वयव्यतिरेकानुविधायित्वज्ञानस्य तादृशशंकाद्वयप्रतिबन्धकत्वा-नंगीकारे तादृशज्ञानोत्तरं तादृशशंकोत्पत्तिसंभवेन वन्ह्यादौ इष्टसाधनताज्ञानानुत्पत्त्या धूमादिकार्यार्थं वन्ह्यादौ नियमेन प्रवृत्त्यनुपपत्तिः, अतोविरोध्यविषयकस्यापि अन्वय-व्यतिरेकानुविधायित्वज्ञानस्य मणिमन्त्रादिन्यायेन प्रतिवन्धकत्वं स्वीकरणीयम्। **तस्मात्**। तादृशप्रवृत्तिनिर्वाहानुरोधात्। **तदुपादानमेव**। वन्ह्यु पादनं-वन्ह्यन्वय-व्यतिरेकज्ञानम्। तस्योपादनं यस्मादिति व्युत्पत्तेः। एवकारेण तर्कान्तरस्य व्यावृत्तिः। **तादृशशंकाप्रतिबन्धकमिति**। अवन्हेरेव भविष्यति—अहेतुकएवोत्पत्स्यते इति शंकाद्वयप्रतिवन्धकमित्यर्थः। अन्यथा नियतान्वयव्यतिरेकानुविधायित्वज्ञानानन्तरं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मपि यदि शंकास्यात्तदा तृप्त्यर्थं भोजनादौ धूमार्थंवन्ह्यादौ प्रवृत्तिर्न स्यादिति ध्येयम्।

तथा चागृहीतान्वयव्यतिरेकं कारणं विना कार्योत्पत्तिशंका न संभवति। धूमस्य ह्यन्वयव्यतिरेकानुविधायित्वं च पुरोवर्त्तिधूमे निश्चितमेव। तर्हि तदन्वयव्यतिरेकानुविधायित्वमेव तद्व्यभिचारशंकाविघटकमस्तु कृतं तर्केणेति चेन्न। पुरोवर्त्तिधूमे वन्ह्यन्वयव्यतिरेकानुविधायित्वनिश्चयेपि धूमत्वावच्छेदेनतदनिश्चयाद्व्यभिचारशंकाया अनुच्छेदात्। न च तर्केणापि कथं तदुच्छेद इति वाच्यम्। पुरोवर्त्तिधूमे वन्हिजन्यत्वसिद्धौ लाघवाद् धूमत्वावच्छेदेन तत्सिद्धेः। न च लाघवज्ञाने सत्यपि व्यभिचारशंका कथं न प्रतिबन्धिकेतिवाच्यम्। फलबलेन लाघवज्ञानकालीन व्यभिचारशंकाभिन्नाया एव व्यभिचारशंकायाः प्रतिबन्धकत्वोपगमात्। तथा च लाघवज्ञानसहकृतप्रथमोपदर्शिततर्कबलाद् धूमत्वावच्छेदेनवन्हिजन्यत्वसिद्धिः। ततो द्वितीयतर्कबलाद्व्यभिचारनिश्चयः। वस्तुतस्तु वन्ह्यन्वयव्यतिरेकानुविधायित्ववान् वन्हिजन्यत्ववात् वन्ह्यन्वयव्यतिरेकानुविधायित्ववान् धूमः-एवं वन्ह्यन्वयव्यतिरेकानुविधायित्ववान् सहेतुकत्ववान् वन्ह्यन्वयव्यतिरेकानुविधायित्ववान् धूमः इति ज्ञानविशिष्टज्ञानत्वेन वन्ह्यन्वयव्यतिरेकानुविधायित्वज्ञानस्य वन्हिजन्यत्वसंशये अहेतुकत्वसंशये च प्रतिबन्धकत्वात्। सामानाधिकरण्येन वाधनिश्चयस्य सामानाधिकरण्यावगाहिबुद्ध्यप्रतिबन्धकत्वेपि व्यावर्तकधर्मदर्शनमुद्रया सामानाधिकरण्यावगाहिबुद्धिप्रतिबन्धकत्वे बाधकाभावादिति।

व्यभिचारज्ञानाभावस्तर्कश्च स्वरूपसदेव कारणम्, न तु तयोर्ज्ञानम्, तथा सति व्यभिचारज्ञानाभावसत्त्वेपि तन्निश्चयाभावाद् व्याप्तिग्रहानुपपत्तेः। एवं शंकासत्वदशायामपि शंकाविरहानुकूलतर्कयोर्ज्ञानसंभवाद् व्याप्तिग्रहापत्तेरिति ध्येयम्।

अयं भावः—धूमे वन्हिव्यभिचारित्वसन्देहे धूमे वन्हिव्याप्तिग्रहो न जायतेऽतोधूमे वन्हिव्यभिचारित्वसंशयनिरासकतर्कोवाच्यः। स च धूमो यदि वन्हिव्यभिचारी स्यात्तदा वन्हिजन्योन स्यादित्याकारकः। अत्र वन्हिव्यभिचारित्वमापादकम्, वन्हिजन्यत्वाभावः आपाद्यः। तथा च धूमधर्मिकवन्हिव्यभिचारित्ववत्ताबुद्धिं प्रति वन्हिव्यभिचारित्वापादककाऽऽपत्तित्वेन प्रतिबन्धकत्वात्, तादृशापत्त्या वन्हिव्यभिचारित्ववत्ता संशयनिरासात्, वन्हिव्यभिचारित्वाभावरूपव्याप्तिनिश्चयोजायते। तादृशापत्तौ धूमे वन्हिव्याप्यत्वनिश्चयः कारणम्, आपत्तिं प्रति आपाद्यव्यतिरेकनिश्चयस्य कारणत्वात्, निरुक्ततर्कें वन्हिजन्यत्वाभावः आपाद्यः, तस्यव्यतिरेको—वन्हिजन्यत्वमेव। तथा च धूमोयदि वन्हिव्यभिचारीस्यात् वन्हिजन्यो न स्यादित्यापत्तिं प्रति धूमोवन्हिजन्यः इति निश्चयः कारणम्। परन्तु तत्र वन्हिजन्यत्वनिश्चये वन्हिजन्यत्वशंका विरोधिनी तादृशशंकाविरोधी तर्क उक्तो मणिकृतैव।

तथा हि—धूमो यदि वन्ह्यसमवहिताजन्यत्वे सति वन्हिसमवहिताजन्यः स्यात् नोत्पन्नः स्यादिति। अत्र सम्-अव पूर्वक धान् धातोः क्तप्रत्यये धास्थाने हि आदेशेकृते समवहित इति रूपं जातम्। न समवहितः असमवहितः। वन्हिना असमवहितः वन्ह्यसमवहित इति तृतीयातत्पुरुषः। वन्ह्यसमवहितेनाऽजन्यः—वन्ह्यसमवहिताऽजन्यः इति तृतीयातत्पुरुषः। तस्य भावः वन्ह्यसमवहिताजन्यत्वम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तस्मिन्निति व्युत्पत्तिः । वन्हिसमवहितजन्यत्वं च स्वाधिकरणदेशावच्छेदेन वन्हिमत्स्वाव्यवहितपूर्वक्षणकत्वम् । स्वं-धूमः । स्वाधिकरणं च संयोगेन । क्षणे वन्हिमत्वं च कालिकेन । एवं च धूमस्याऽव्यवहितपूर्वोयः क्षण तत्क्षणे धूमाधिकरणं यत्पर्वतादि तदवच्छेदेव कालिकेन वन्हेः सत्वात्, निरुक्तवन्हिसमवहितजन्यत्वं धूमे वर्तते । देशेकालस्येव काले कालिकसंबन्धेनवृत्तेर्देशस्याऽवच्छेदकत्वात् ।

अत्र केवलवन्हिसमवहितजन्यभिन्नत्वस्याऽऽपादकत्वे वन्हिशून्यतादशायां वन्हिदेशोत्पन्नोयोघटः तत्र निरुक्तवन्हिसमवहितजन्यभिन्नत्वस्य सत्वात्, जन्यत्वाभावस्य चाऽसत्वात्तत्र व्यभिचारः, अतो वन्ह्यसमवहिताऽजन्यत्वं वन्हिसमवहितजन्यभिन्नत्वविशेषणम् । वन्ह्यसमवहिताजन्यत्वं च स्वाधिकरणदेशावच्छेदेन वन्ह्यभाववत्स्वाव्यहितपूर्वक्षणकं यद्यत्तदन्यत्वम् । स्वं-धूमः । वन्ह्यभावश्च कालिकसंबन्धावच्छिन्नप्रतियोगिताको ग्राह्यः । तथा च वन्हिशून्यतादशायां वन्ह्यधिकरणदेशोत्पन्नो योघटः तंदव्यवहितपूर्वक्षणे तदधिकरणदेशावच्छेदेन कालिकसंबन्धावच्छिन्नप्रतियोगिताकवन्ह्यभावस्य स्वरूपेण सत्वात् स्वाधिकरणदेशावच्छेदेन वन्ह्यभाववत्स्वाव्यवहितपूर्वक्षणक एव घटस्तदन्यत्वरूपवन्ह्यसमवहिताजन्यत्वस्य तद्घटे विरहान्न व्यभिचारः ।

ननु तद्वत्ता "वन्हिव्यभिचारित्ववत्ता" बुद्धिं प्रति तदापादकक्षापत्तित्वेन प्रतिबन्धकत्वे शुद्धतद्वत्ताबुद्धित्वमेव प्रतिबध्यतावच्छेदकं वक्तव्यम्, अन्यथा रूपं यदि गुणकर्मान्यत्वविशिष्टसत्तावत्स्यात् तदा द्रव्यं स्यादित्यापत्तेरपि रूपधर्मिकसत्तावत्ताबुद्धिप्रतिबन्धकत्वापत्तेः । एवं च वन्ह्यसमवहिताऽजन्यत्वविशिष्ट वन्हिसमवहितजन्यभिन्नत्वापादकक्षापत्तेः कथं वन्हिसमवहितजन्यभिन्नत्ववत्ताबुद्धिप्रतिबन्धकत्वमिति चेन्न । शुद्धतद्वत्ताबुद्धिं प्रति यदि तदापादकाऽऽपत्तित्वमात्रेण प्रतिबन्धकता तदा सामान्यं यदि गुणकर्मान्यत्वविशिष्टसत्तावत्स्यात् द्रव्यं स्यादित्यापत्तेः सत्तावत्त्वबुद्धिप्रतिबन्धकत्वाभावप्रसंगः । एवं च नित्यभिन्नमिदं यदि नित्यभिन्नत्वे सति कार्यद्रव्यं न स्यात् तदा द्रव्यं न स्यादित्यापत्तेरपि कार्यद्रव्यभेदवत्वबुद्धिप्रतिबन्धकत्वाभावप्रसंगः । अतः शुद्धतद्वत्ताबुद्धिं प्रति तदापादकक्षापत्तित्वेनेव विशेष्यवत्ताबुद्धिं प्रति विशेषणवत्तानिश्चयसंहकृतविशेष्यापादकक्षापत्तित्वेनापि प्रतिबन्धकत्वान्तरं वक्तव्यम् । तथा च रूपं यदि गुणकर्मान्यत्वविशिष्टसत्तावत्स्यादित्यापत्तेर्न सत्तावत्वबुद्धिं प्रति प्रतिबन्धकत्वम्, रूपे गुणकर्मान्यत्वरूपविशेषणनिश्चयाभावात् ।

सामान्यं यदि गुणकर्मान्यत्वशिष्टसत्तावत्स्यात् तदा द्रव्यं स्यादित्यापत्तिस्तु सामान्ये सत्तावत्वबुद्धिविरोधिनीभवत्येव, सामान्ये गुणकर्मान्यत्वनिश्चयसत्वात् ।

एवं नित्यभिन्न मिदं यदि नित्यभिन्नत्वे सति कार्यद्रव्यं न स्यात्तदा द्रव्यं न स्यादित्यापत्तिरपि कार्यद्रव्यभेदवत्ताबुद्धि विरोधिनी भवत्येव, इदन्त्वावच्छिन्ने नित्यान्यत्वरूपविशेषणवत्वनिश्चयात् ।

ननु एतादृशतर्को वन्हिसमवहित जन्यभिन्नत्वशंकानिवर्तकोस्तु न तु वन्हिजन्यभिन्नत्वशंकानिवर्त्तक इति एतादृशतर्कस्यधूमो यदि वन्हिव्यभिचारीस्यात्तदा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वन्हिजन्यो न स्यादितियो व्याप्तिग्रहानुकूलस्तर्कः, तत्कारणीभूतोयोवन्हिजन्यत्वनिश्चयः तत्प्रतिबन्धकीभूतोयोधूमेवन्हिजन्यत्वसंशयस्तदनिवर्तकत्वादिति चेन्न। प्रागुक्तवन्हिसमवहितजन्यत्वस्य वन्हिजन्यालोके सत्वात्, तत्र च वन्हिजन्यत्वस्यापि सत्वात्। वन्हिजन्यतावच्छेदकत्वेन गृहीतं यद्वन्हिसमवहितजन्यत्वं धूमे तद्वत्ताज्ञानस्य "वन्हिसमवहितजन्यत्वं वन्हिजन्यतावच्छेदकं वन्हिसमवहितजन्यत्ववान् धूम इत्याकारकस्य" धूमेवन्हिजन्यत्वशंकानिवर्तकत्वात्। तादृशव्यावर्तकधर्मदर्शनसंपादक मूलकृदुक्ततर्कस्य धूमो यदि वन्हिव्यभिचारी स्यात् वन्हिजन्योन स्यादिति व्याप्तिग्रहोपयोगितर्कं प्रति उपयोगित्वान्न मूलोक्ततर्कस्य व्याप्तिग्रहानुपयोगित्वम्।

अत्रकेचित्—यथा धूमोवन्हिव्यभिचारी स्यात् तदा वन्हिजन्योन स्यादिति तर्कोवन्हिव्यभिचारशंकानिवर्तकोभवति तथा धूमो यदि वन्हिव्यभिचारी स्यात्तदा स्वाधिकरणदेशावच्छेदेन वन्हिमत्स्वाव्यवहितपूर्वक्षणकोन स्यादितितर्कोपि व्यभिचारसंशयनिवृत्ति द्वारा व्याप्तिग्रहोपयोगी भवति। तादृशतर्कं आपाद्यव्यतिरेकनिश्चयविधया वन्हिसमवहितजन्यत्वस्य प्रागुक्तस्य निश्चयोहेतुः, तादृशनिश्चयप्रयोज्यतया मूलोक्ततर्कस्य व्याप्तिग्रहोपयोगित्वमिति वदन्ति।

दीधितिकृतस्तु—मूलोक्तवन्हिसमवहितजन्यत्वपदस्य वन्हिजन्यत्वमेवार्थः। वन्ह्यसमवहिताजन्यत्वविशेषणं तु जन्यत्वाभावरूपं यदापाद्यं तत्प्रतियोगियज्जन्यत्वं, तत्रैव। तथा च धूमो यदि वन्हिजन्यो न स्यात्तदा वन्ह्यसमवहिताजन्यत्वे सति जन्यत्वे सति जन्यो न स्यात् इत्येव मूलोक्ततर्कः पर्यवसितः तथा च वन्हिजन्यभिन्नत्ववत्ता बुद्धिं प्रति वन्हिजन्यभिन्नत्वापादकापत्तित्वेन प्रतिबन्धकत्वात्, धूमो यदि वन्हिव्यभिचारी स्यात्तदा वन्हिजन्यो न स्यादित्याकारकतर्कजनकीभूत धूमधर्मिकवन्हिजन्यत्वनिश्चयविरोधिधूम धर्मिकवन्हिजन्यत्वशंकानिवर्तकत्वं मूलोक्ततर्कस्याऽक्षतमेव।

अत्र वन्हिजन्यत्वाभावस्य वन्हिशून्यतादशायां वन्हिदेशोत्पन्नोयोघटस्तत्र सत्वात्, तत्र जन्यत्वाभावस्याऽसत्वाद्व्यभिचारोऽत आपाद्यप्रतियोगिनि वन्ह्यसमवहिताऽजन्यत्वंविशेषणम्। तथा च वन्हिशून्यतादशायां वन्हिदेशोत्पन्नोयोघटस्तत्र प्रागुक्तवन्ह्यसमवहिताऽजन्यत्वस्य स्वाधिकरणदेशावच्छेदेन वन्ह्यभाववत्स्वाव्यवहितपूर्वक्षणकान्यत्वरूपस्य विरहान्न व्यभिचारः।

न च वन्हिशून्यतादशायां वन्हिदेशोत्पन्नोयोघटस्तत्र व्यभिचारवारणार्थं स्वाधिकरणदेशावच्छेदेन वन्हिमत्स्वाव्यवहितपूर्वक्षणकत्वरूपवन्हिसमवहितजन्यत्वस्याऽऽपाद्यप्रतियोगिविशेषणत्वेनैव वारणसंभवादभावद्वयोपादानं व्यर्थमिति वाच्यम्। यत्र वन्ह्यधिकरणे वन्ह्यनधिकरणे च देशे एक एव दीर्घदण्ड उत्पन्नस्तत्र वन्हिजन्यत्वाभावसत्वात्, स्वाधिकरणदेशावच्छेदेन वन्हिमत्स्वाव्यवहितपूर्वक्षणकत्वविशिष्टजन्यत्वाभावस्याऽसत्वाद् व्यभिचारोऽतोऽभावद्वयोपादानम्। तथा च तादृशदण्डस्याऽव्यवहितपूर्वक्षणे स्वाधिकरणदेशावच्छेदेन वन्ह्यभाववत्स्वाव्यवहितपूर्वक्षणकत्वान्यत्वरूपवन्ह्यसमवहिताऽजन्यत्वं नेति तादृशविशेषणविशिष्टस्याभावस्तादृशदीर्घदण्डे वर्तते इति न व्यभिचारः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नन्वेवमपि नान्तरीयकवन्हिके घटे व्यभिचारः, तादृशघटे निरुक्तवन्ह्यसमवहिताजन्यत्वस्य सत्वाद् वन्ह्यजन्यतद्घटे वन्ह्यसमवहिताऽजन्यत्वविशिष्टजन्यत्वस्याऽभावासत्वादिति चेन्न। जन्यत्वं हि स्वाधिकरणदेशावच्छेदेन कालिकसंबन्धावच्छिन्नप्रतियोगिताकवन्ह्यभाववद् वन्हितत्संयोगेतरयावत्कारणाधिकरणकत्वरूपम्। तथा च यावत्सुवन्हितत्संयोगेतरतादृशघटकारणाधिकरणक्षणेषु कालिकसंबन्धावच्छिन्नप्रतियोगिताकवन्ह्यभाववत्वाभावात्। "तादृशयावत्कारणान्तर्गतघटीयचरमकारणाधिकरणक्षणे कालिकसंबन्धावच्छिन्नप्रतियोगिताकवन्ह्यभाववत्वाभावात्" यद्विलंबेन वन्हितत्संयोगोत्पत्तिक्षणे तत्पूर्वं वा तादृशघटादेरनुत्पादो, वन्हितत्संयोगकालीनस्य तादृशकारणस्यापि यावत्तादृशकारणान्तर्गतत्वात्, तादृशकारणाधिकरणक्षणे तादृशवन्ह्यभावविरहादिति कालिकसंबन्धावच्छिन्नप्रतियोगिताकवन्ह्यभाववद्वन्हितत्संयोगेतरयावत्कारणकत्वरूपजन्यत्वविरहेण। नान्तरीयकघटे न व्यभिचारः। अत्र यावत्वविशेष्टेषु वन्हितत्संयोगेतरस्वकारणेषु तादृशवन्ह्यभावकालीनत्वं विधेयम्। तेन नान्यरीयकवन्हिके घटादौ यावन्ति तादृशवन्ह्यभावकालीनानि स्वकारणानि (यत्किंचित्कारणानि) तज्जन्यत्वस्याऽक्षतत्वेपि न व्यभिचारतादवस्थ्यमित्यन्यत्र विस्तरः।

तर्कश्च अनुमित्यौपयिकव्याप्तिनिश्चयप्रतिबन्धकीभूतव्यभिचारशंकायाः निवर्तकः। तत्र तत्र तर्ककारणीभूतस्याऽऽपादकनिष्ठाऽऽपाद्यव्याप्तिनिश्चयस्य विरोधिनी या व्यभिचारशंका तन्निवृत्यर्थमपि तर्कान्तरमुपेयमित्यनवस्थिततर्कधारास्वीकारप्रसंग इत्याशंकां निराकरोति। **यत्रेति।** "यत्साध्यहेत्वोः" व्याप्तिज्ञाने इत्यर्थः। विरोधित्वं सप्तम्यर्थः। तच्च शंकायामन्वेति। **स्वत एवेति।** शंकाजनकसामग्र्यभावादेवेत्यर्थः। **शंका नावतरतीति।** तर्कमूलव्याप्तिनिश्चयविरोधिव्यभिचारशंका नोदेतीत्यर्थः। प्रवृत्तिव्याघातेन शंकानवतारोपिबोध्यः। **तत्रेति।** तादृशव्याप्तिज्ञाने इत्यर्थः। **नतर्कापेक्षापीति।** तर्कं विनैव व्याप्तिनिश्चयसंभवादिति भावः। तथा च तत्रैवविच्छेदान्नानवस्थितिरिति ध्येयम्। तथा च यत्र व्यभिचारशंकासामान्याभावः तर्कभावातिरिक्तकारणाभावप्रयुक्तो "न तु तर्कप्रयुक्तः" तत्र न तर्कापेक्षा, यत्र व्यभिचारशंकायाः तर्काभावेतरसकलकारणसंपत्तिस्तत्र तर्कान्तराभ्युपगम आवश्यक इति समुदितार्थः। **तदिति।** तदेवेत्यर्थः। पूर्वोक्तमेवेतियावत्। **इदमिति।** "तर्कः क्वचिच्छंकानिवर्तक" इति मूलोक्तमित्यर्थः। **क्वचिदिति।** यत्र तर्कमूलव्याप्तौव्यभिचारशंका तत्रैवेत्यर्थः।

तर्कोद्विविधः—सत्तर्कोऽसत्तर्कश्च। दोषत्रयरहितः सत्तर्कः दोषत्रयान्यतमजुष्टोऽसत्तर्कः। दोषाश्च—इष्टापत्ति—व्यभिचार—"विपर्ययानुमाने तत्कोटिमात्राऽपर्यवसायिताः। ह्रदोयदि वन्ह्यभाववान् स्यात् धूमाभाववान् स्यादित्यत्राऽऽद्यः। ह्रदो यदि निर्वन्हिः स्यात् द्रव्यत्वाभाववान् स्यादित्यत्र द्वितीयः। धूमो यदि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मिति। यत्र स्वत एव शंका नावतरति तत्र न तर्कापेक्षापीति तदिदमुक्तं तर्कः क्वचिच्छङ्कानिवर्त्तक इति ॥ १३७ ॥

अतः वन्हिका अन्वयव्यतिरेक ज्ञान ही तादृश शंका का प्रतिबन्धक है और जहाँ स्व ही व्यभिचार शंका का अवतरण नहीं होता है वहाँ तर्क की अपेक्षा भी नहीं है। वही कहा है कि तर्क कहीं स्थलविशेष में ही व्यभिचार शंका का निवर्त्तक होता है ॥१३७॥

वन्हितच्छून्यजन्यान्यतरोन स्यात् जन्योन स्यादित्यत्रतृतीयः। ननु धूमो वन्हि-वन्हित्वशून्यान्यतरजन्यः जन्यत्वादिति विपर्ययानुमाने वन्हिजन्यत्वपर्यवसायित्वाभावः। तद्धर्मावच्छिन्नाभावापादककतर्कस्यैव तदवच्छिन्नशंकाविरोधित्वात्। न च मूलकृन्मतेपि कथं वन्हिजन्यत्वे पर्यवसानम्, अस्यापि तर्कस्य वन्ह्यसमवहितजन्यत्वत्वसाधारणरूपेण वन्हिजन्यत्वपर्यवसायित्वादिति वाच्यम्। वन्ह्यसमवहिताजन्यत्वस्य पक्षीभूते धूमेपि विशेषणत्वेन विशेषणवत्तानिश्चयकालीनविशिष्टाऽभावानुमिते विशेष्याभावमात्रविधेयकत्वात्। आपाद्यप्रतियोगिविशेषणत्वे तु न दोषः।

ऊहत्वं तर्कस्य लक्षणम्। ऊहत्वं च मानसत्वव्याप्योजातिविशेषः, तर्कयामीत्यनुभवसिद्धः। धूमो यदि वन्हिव्यभिचारी स्यात् वन्हिजन्योन स्यादित्यनेन व्यभिचारशंकानिरासे निरंकुशेन व्याप्तिज्ञानेनाऽनुमितिरिति परंपरया तस्याऽनुमितौ उपयोगो बोध्यः प्रकारान्तरेण तर्कः पंचविधः। आत्माश्रयाऽन्योन्याश्रय-चक्रकाऽनवस्था-तदन्यबाधितार्थप्रसंगभेदात्।

तत्र स्वस्य स्वापेक्षित्वनिबन्धनोऽनिष्टप्रसंगः आत्माश्रयः। स चोत्पत्तिस्थितिज्ञप्तिद्वारात्रिविधः। यथा—(१) यद्ययं घट एतद्घटजन्यः स्यात् एतद्घटानधिकरणक्षणोत्तरवर्त्ती न स्यात्। (२) यद्ययं घटः एतद्घटवृत्तिः स्यात्, एतद्घटव्याप्योन स्यात्। (३) यद्ययं घटः एतद्घटज्ञानाऽभिन्नः स्यात् ज्ञानसामग्रीजन्यः स्यात्, एतद्घटभिन्नः स्यादिति वा सर्वत्राऽऽपाद्यम।

तदपेक्षयापेक्षित्वनिबन्धनोऽनिष्टप्रसंगोऽन्योन्याश्रयः। सोपिपूर्ववत् त्रेधा। तदपेक्ष्यापेक्ष्यापेक्षित्वनिबन्धनोऽनिष्टप्रसंगश्चक्रकम्। एवं चतुःकक्षादावपि चक्रकसत्वान्नाधिक्यम्। अन्योन्याश्रय-चक्रकयोरात्माश्रयव्याप्यतया चक्रकस्याऽऽत्माश्रयाऽन्योन्याश्रयव्याप्यतया व्याप्यसत्वेव्यापकसत्वस्याऽवश्यकतया अन्योन्याश्रयसत्वे आत्माश्रयसत्वम्, चक्रकसत्वेद्वयोः सत्त्वम्।

अव्यवस्थितपरंपरारोपाधीनाऽनिष्टप्रसंगोनवस्था। यथा जातिर्यदि जातिमती स्यात् द्रव्यगुणकर्मान्यतमत्ववती स्यात्, 'तादृशान्यतमत्वव्याप्या न स्यादिति वा। तदन्यबाधितार्थप्रसंगस्तु धूमोयदिवन्हिव्यभिचारीस्यात् वन्हिजन्योन स्यादित्यादिः। प्रथमोपस्थितपरत्वोत्सर्ग-विनिगमनाविरह-लाघव-गौरवादिकंतु न तर्कः—किन्तु प्रमाणसहकारित्वरूपसाधर्म्यात्तथा व्यवहार इति संक्षेपः ॥१३७॥

इतितर्कनिरूपणम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा ।
स उपाधिर्भवेत्तस्य निष्कर्षोऽयं प्रदर्श्यते ॥ १३८ ॥

इदानीं परकीयव्याप्तिग्रहप्रतिबन्धार्थमुपाधिं निरूपयति साध्यस्येति। साध्यत्वाभिमतव्यापकत्वे सति साधनत्वाभिमताव्यापकत्वमुपाधित्वमित्यर्थः। ननु स श्यामो मित्रातनयत्वादित्यत्र शाकपाकजन्यत्वं नोपाधिः स्यात्, तस्य साध्यव्यापकत्वाभावात्, श्यामत्वस्य घटादावपि सत्त्वात् ।

उपाधि का निरूपण करते हैं—'साध्यस्य' इस ग्रन्थ से—जो साध्यत्वेन अभिमत का व्यापक हो तथा साधनत्वेन अभिमत का अव्यापक हो उसे उपाधि कहते हैं।

प्रश्न—साध्य का व्यापक और साधन का अव्यापक ऐसा उपाधि का लक्षण करने पर "सश्यामो मित्रातनयत्वात्" यहाँ पर शाकपाकजन्यत्व उपाधि नहीं बनेगी--क्योंकि शाकपाकजन्यत्व उपाधि साध्य का व्यापक ही नहीं है कारण कि श्यामत्व (साध्य) घट में भी है और

इदानीमिति । व्याप्तिग्रहोपायनिरूपणानन्तरमित्यर्थः परकीयव्याप्तिग्रहप्रतिबन्धार्थमिति । यथा परप्रयुक्तहेतौ उपाध्युद्भावने उपाधिज्ञानाद्विजयः, तथास्वीयहेतौ व्याप्तिग्रहोपायसत्वे व्याप्तिनिश्चयाद्विजयः, विजयलक्षणैककार्यानुकूलत्वसंगतिर्बोध्या उपाधिंनिरूपयतीति । तथा च परकीयहेतौ व्याप्तिनिश्चयप्रतिबन्धाय उपाधिरुद्भाव्यः; स्वीयहेतौ व्याप्तिनिश्चयाय उपाधिर्निरस्यः तदुद्भावन-तन्निरासौ च नोपाधिज्ञानं विनेति तन्निरूपणमिति भावः । सत्यन्तदलानुपादाने वन्हिमान्धूमादित्यादौ पर्वतत्वादावतिव्याप्तिः स्यात् । तन्मात्रोपादाने द्रव्यत्वादावतिव्याप्तिः स्यादतउभयोपादानम् । साध्यत्वसाधनत्वे सोपाधिकहेतुस्थले वास्तविकतया न स्तः इत्यतोऽभिमतपदम् । तदपि न लक्षणघटकम्, यत्र न तादृशाभिमानं तत्रत्योपाधावव्याप्तेः। तथा च योयदवच्छिन्नव्यापकत्वे सति यदवच्छिन्नाऽव्यापकः स तदवच्छिन्नसाध्यक तदवच्छिन्नहेतौ उपाधिरित्यर्थः। साधनावच्छिन्नसाध्यव्यापके-पक्षधर्मावच्छिन्नसाध्यव्यापके चोपाधौ अव्याप्तिमाशंकते । नन्विति । सः-काकः । अत्र तच्छन्दस्य मित्रातनयपरत्वे ध्वंसोविनाशी जन्यत्वादित्यनेन पौनरुक्त्यापत्तेः । काकपरत्वे तु अत्रत्योपाधेः साधनावच्छिन्नसाध्यव्यापकत्वादग्रिमस्य साधनरूपपक्षधर्मावच्छिन्नसाधनाव्यापकत्वान्न पौनरुक्त्यम् इत्यत्र । हेतौ तस्य-शाकपाकजत्वस्य । साध्यव्यापकत्वाभावादिति । केवलसाध्यवन्निष्ठाभावाप्रतियोगित्वाभावादित्यर्थः। एतदेवोपपादयति । श्यामत्वस्येति । श्यामत्वरूपसाध्यस्येत्यर्थः । घटादावपीति । आदिना शाकपाकजेतरश्यामद्रव्यमात्रपरिग्रहः । ननु साधनावच्छिन्नसाध्यव्यापकत्वं विवक्षणीम्, तथा च मित्रातनयत्वविशिष्टश्या-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवं वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्त्वं नोपाधिः स्यात्, प्रत्यक्षत्वस्यात्मादिषुसत्वात्तत्र च रूपाभावात् । एवं ध्वंसो विनाशी जन्यत्वादित्यत्र भावत्वं नोपाधिः स्यात्, विनाशित्वस्य प्रागभावेऽपि सत्त्वात्तत्र च भावत्वाभावात् इति चेन्न ।

यद्धर्मावच्छिन्नसाध्यव्यापकत्वं तद्धर्मावच्छिन्नसाधनाव्यापकत्व- मित्यर्थेतात्पर्यात् । मित्रातनयत्वावच्छिन्नश्यामत्वस्य व्यापकं शाकपाकजत्वं, तदवच्छिन्नसाधनाव्यापकंच । एवं पक्षधर्मबहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वस्य

वहाँ शाकपाकजन्यत्व उपाधि नहीं है । एवं 'वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात्' यहाँ पर उद्भूतरूप उपाधि नहीं हो सकेगी—क्योंकि प्रत्यक्षत्व साध्य आत्मा वगैरह में भी है और वहाँ रूप नहीं है । एवं 'ध्वंसो विनाशी जन्यत्वात्' यहाँ पर भावत्व उपाधि नहीं हो सकेगी—क्योंकि विनाशित्व (साध्य) प्रागभाव में भी है और वहाँ भावत्व नहीं है ।

उत्तर—यद्धर्मविशिष्टसाध्य का उपाधि व्यापक हो तद्धर्मविशिष्ट साधन का अव्यापक होनी चाहिये । इस अर्थ में तात्पर्य है । 'स श्यामो मित्रातनयत्वात्' यहाँ पर शाकपाक जन्यत्व रूप उपाधि मित्रातनयत्वरूपयद्धर्मविशिष्टश्यामत्वरूप साध्य का व्यापक है-(क्योंकि शाकपाक जन्यश्याममित्रातनय में श्यामत्वरूप साध्य है, और शाकपाकजन्यत्वरूपउपाधि भी है) और तद्धर्मविशिष्टमित्रातनयत्व रूपहेतु गौरमित्रा तनय में भी है वहाँ शाकपाकजन्यत्वरूप उपाधि नहीं है अतः साधन का अव्यापक यह उपाधि हुवी । एवं 'वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् यहाँ पर वायु रूप पक्ष का धर्म जो वहिर्द्रव्यत्वरूप यद्धर्म विशिष्ट जो प्रत्यक्षत्व रूप साध्य उसका व्यापक उद्भूत रूप उपाधि है । [क्योंकि वहिर्द्रव्यत्वविशिष्ट प्रत्यक्षत्व घट में है और वहाँ उद्भूत रूप उपाधि भी है] और वहिर्द्रव्यत्वविशिष्ट प्रत्यक्षस्पर्शाश्रयत्वरूपहेतु वायु में है वहाँ उद्भूत रूप उक्त उपाधि नहीं है अतः उपाधि साधन का अव्यापक भी है ।

मत्वव्यापकत्वस्य शाकपाकजन्यत्वरूपोपाधौ सत्वान्नोक्ताव्याप्तिरत आह । एवमिति । उद्भूतरूपवत्त्वमिति । अत्रोद्भूतेतिव्यर्थम्, रूपवत्वस्यैवसम्यक्त्वात् । तत्र चेति । आत्मनि चेत्यर्थः । रूपाभावादिति उद्भूतेरूपाभावादित्यर्थः । इदमुप- लक्षणम्-हेतुभूतप्रत्यक्षस्पर्शाश्रयत्वविशिष्टप्रत्यक्षत्वाभावाच्चेत्यपि बोध्यम् । इत्यर्थे तात्पर्यादिति । साध्यस्य व्यापकोयस्तु इत्यादिमूलस्य उक्तार्थ- बोधेच्छया प्रयुक्तत्वादित्यर्थः । तथा च मूलस्थसाध्यपदस्य यद्धर्मावच्छिन्नसाध्य- परत्वात् साधनपदस्यापि यद्धर्मावच्छिन्नसाधनपरत्वादुक्तार्थलाभ इति भावः । न च साधन-पक्षधर्मावच्छिन्नसाध्यव्यापकयोर्नोपाधित्वम् । वक्ष्यमाणरीत्या उभयत्रैव व्यभिचारोन्नायकत्वासत्वात् । उक्तोपाधिषु अव्याप्तिंवारयति । मित्रातनयत्वा-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

व्यापकमुद्भूतरूपवत्त्वम् वहिर्द्रव्यत्वावच्छिन्नसाधनस्याव्यापकं च। एवं ध्वंसो विनाशी जन्यत्वादित्यत्र जन्यत्वावच्छिन्नसाध्यव्यापकं भावत्वं बोध्यम्।

सद्धेतौ तु एतादृशोधर्मोनास्ति यदवच्छिन्नस्य साध्यस्य व्यापकं तदवच्छिन्नस्य साधनस्य चाव्यापकं किंचित् स्यात्। व्यभिचारिणि तु उपाध्यधिकरणं यत्साध्याधिकरणं यच्चोपाधिशून्यं साध्यव्यभिचारनिरूपकमधिकरणं तदन्यतरत्वावच्छिन्नस्य साध्यस्य व्यापकत्वं साधनस्य चाव्यापकत्वमुपाधेरन्ततः संभवति इति ॥१३८॥

एवं "ध्वंसो विनाशी जन्यत्वात्" यहाँ पर 'भावत्व' उपाधि जन्यत्वरूपयद्धर्म विशिष्ट विनाशित्वरूपसाध्य का व्यापक है। [क्योंकि घट में जन्यत्वरूप यद्धर्म विशिष्ट विनाशित्वरूपसाध्य है और उसमें भावत्व भी है] और जन्यत्व हेतु ध्वंस रूप पक्ष में भी है वहाँ भावत्व उपाधि नहीं है अतः साधन की अव्यापक है।

और सद्धेतु में कोई भी ऐसा धर्म नहीं है कि जो यद्धर्मविशिष्टसाध्य का व्यापक और तद्धर्म विशिष्ट साधन का अव्यापक होवे। व्यभिचारिस्थल (धूमवान् वन्हेः) में आर्द्रेन्धनसंयोगरूप उपाधि का अधिकरण जो धूमात्मक साध्य का अधिकरण महानस आदि हैं और जो उपाधिशून्य तथा साध्य के व्यभिचार का अधिकरण अयोगोलक है—उस महानस-अयोगोलकान्यतरत्व को यद्धर्म पद से लेकर उस अन्यतरत्व विशिष्ट साध्य का व्यापक तथा तादृशान्यतरत्व-विशिष्ट साधन का अव्यापक को उपाधि आखीर में कहना होगा। [जैसे 'धूमवान् वन्हे' यहाँ उपाधि का अधिकरण जो धूमात्मक साध्याधिकरण हुआ महानस और आर्द्रेन्धनसंयोगात्मक उपाधि से शून्य तथा साध्य व्यभिचाराधिकरण जो अयोगोलक-इन दोनों में अन्यतरान्तर्गत जो हुवा महानस उस महानसनिष्ठ अन्यतरत्वावच्छिन्न साध्य के महानस-पर्वत आदि अधिकरणों में रहने के नाते उपाधि साध्य की व्यापक हुवी-और अन्यतरान्तर्गत अयोगोलक निष्ठ अन्यतरत्वावच्छिन्न साधन अयोगोलक में है और वहाँ आर्द्रेन्धनसंयोग उपाधि नहीं है-अतः उपाधि साधन की अव्यापक हुवी ॥१३८॥

वच्छिन्नेति। जन्यत्वावच्छिन्नेति। साधनावच्छिन्नेत्यर्थः। अत्र यद्धर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाऽव्यापकत्वमात्रोक्तौ वन्हिमान् धूमादित्यादौ महानसीयेतरवन्हिरुपाधिः स्यात्, पर्वतत्वविशिष्टवन्हिव्यापकत्वस्य महानसीयेतरवन्हौ सत्वात्, अतस्तद्धर्मावच्छिन्नत्वं साधने विशेषणम्। तथा च सद्धेतुमात्रे न दोष इत्याशयेनाह। सद्धेतौ तु इति। व्यभिचारिणि तु इति। व्यभिचारिमात्रे इत्यर्थः। तदन्यतरत्वावच्छिन्नस्येति। महानसाऽयोगोलकान्यतरत्वविशिष्टस्येत्यर्थः। साध्यस्येति। धूमस्येत्यर्थः। तादृशान्यतरत्वविशिष्टस्येत्यादिः साधनस्य। वन्हेः। उपाधेः। आर्द्रेन्धनसंयोगस्य। अन्ततः। तादृशधर्मान्तराऽस्फूर्तौ। उपाधेः। उपाधिसामान्यस्य।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सर्वे साध्यसमानाधिकरणाः स्युरुपाधयः ।
हेतोरेकाश्रये येषां स्वसाध्यव्यभिचारिता ॥१३९॥
व्यभिचारस्यानुमानमुपाधेस्तु प्रयोजनम् ॥

अतएव लक्ष्यमप्युपाधिस्वरूपमेतदनुसारेण दर्शयति—सर्वे इत्यादिना । स्वसाध्येति । स्वमुपाधिः । स्वं च साध्यं च स्वसाध्ये तयोर्व्यभिचारितेत्यर्थः ॥१३९॥

सभी उपाधियाँ (साध्य व्यापक होने के नाते) साध्यसमानाधिकरण होती हैं । और जिन उपाधियों का हेतु के किसी एक आश्रय (अयोगोल) में व्यभिचारित्व तथा साध्य (धूम) का व्यभिचारित्व अवश्य ही होता है अर्थात् 'धूमवान्वन्हेः' में जैसे (वन्हि) के अधिकरण अयोगोलक में न आर्द्रेन्धनसंयोग उपाधि ही है, और न धूम साध्य ही है ॥१३९॥

उपाधि की दूषकता का कारण बतलाते हैं—व्यभिचारस्येति । उपाधिव्यभिचाररूप हेतु के द्वारा हेतु में साध्य के व्यभिचार का अनुमान हो जाना यही उपाधि का प्रयोजन है ।

अत्रेदं बोध्यम् । वायुः प्रत्यक्षः द्रव्यत्वादित्यत्र उद्भूतरूपात्मकोपाधौ अव्याप्तिः स्यात्, प्रत्यक्षत्वरूपसाध्याधिकरणमात्मा, उद्भूतरूपशून्यं साध्यव्यभिचाराधिकरणं गगनं, एतदन्यतरत्वविशिष्टप्रत्यक्षत्वव्यापकत्वाभावात् अत उपाध्यधिकरणमिति । उद्भूतरूपाधिकरणपरमाण्वाकाशान्यतरत्वावच्छिन्नसाध्याऽप्रसिद्ध्याऽव्याप्तितादवस्थ्यमत साध्याधिकरणमिति । उद्भूतरूपाधिकरणं वत्प्रत्यक्षत्वाधिकरणं घटादि तद्वृत्तिद्रव्यत्वावच्छिन्नसाध्यव्यापकत्वाभावात्तद्दोषतादवस्थ्यमतो यच्चोपाधिशून्यं साध्यव्यभिचारनिरूपकाधिकरणमिति । तत्रापि साध्यव्यभिचाराधिकरणपरमाणुघटान्यतरत्वावच्छिन्नद्रव्यत्वात्मकसाधनव्यापकत्वात्तद्दोषतादवस्थ्यमत उपाधिशून्यमिति । उपाध्यधिकरणं साध्याधिकरणं घटः उपाधिशून्यं आत्मा तदन्यतरत्वावच्छिन्नसाध्यव्यापकत्वाभावात्तद्दोषतादवस्थ्यमतः साध्यव्यभिचारनिरूपकाधिकरणमिति ।

अतएवेति । एतादृशोपाधिलक्षणस्य मूलकृदभिमतत्वादेवेत्यर्थः । लक्ष्यमपीति । एतदनुसारेण उपाधिस्वरूपं लक्ष्यमपि दर्शयतीति योजना मूले सर्वे इति । ते सर्वे साध्यसमानाधिकरणाउपाधय इति योजना । भवन्तीतिशेषः । ते के इत्याकांक्षायामाह । हेतोरिति । धूमादिसाध्यकवन्ह्यादिहेतोरित्यर्थः । निष्ठत्वं षष्ठ्यर्थः । एकाश्रये इति । एकस्मिन्नाश्रये इत्यर्थः । एकाश्रयावच्छेदेनेत्यर्थः । येषां । उपाधीनां । तथाचाऽयोगोलकावच्छेदेन वन्हौ आर्द्रेन्धनसंयोगात्मकोपाधेः धूमस्य च व्यभिचारिताऽस्तीति आर्द्रेन्धनसंयोगः उपाधिरिति भावः । वायुः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उपाधे दूंषकताबीजमाह-व्यभिचारस्येति । उपाधिव्यभिचारेण हेतौ साध्यव्यभिचारानुमानमुपाधेः प्रयोजनमित्यर्थः। तथाहि-यत्र शुद्धसाध्यव्यापक उपाधिस्तत्र शुद्धेनैवोपाधिव्यभिचारेण साध्यव्यभिचारानुमानम्। यथा धूमवान् वन्हे रित्यत्र वन्हिर्धूमव्यभिचारी तद्व्यापकार्द्रेन्धनसंयोगव्यभिचारित्वादिति व्यापकव्यभिचारिणोऽव्याप्यव्यभिचारावश्यकत्वात्।

यत्र तु किञ्चिद्धर्मावच्छिन्नसाध्यस्य व्यापक उपाधिस्तत्र तद्धर्मवति उपाधिव्यभिचारेण साध्यव्यभिचारानुमानम्। यथा स श्यामो मित्रातनयत्वात् इत्यादौ मित्रातनयत्वं श्यामत्वव्यभिचारि मित्रातनये शाकपाकजत्वव्यभि-

तथाहि—जहाँ शुद्ध साध्य का व्यापक उपाधि है वहाँ शुद्ध उपाधिव्यभिचाररूप हेतु से ही साध्य के व्यभिचार का अनुमान होता है। जैसे—'धूमवान् वन्हेः' यहाँ पर वन्हिर्धूमव्यभिचारी धूमव्यापक आर्द्रेन्धनसंयोगव्यभिचारित्वात् अर्थात् वन्हि (हेतु) धूम (साध्य) का व्यभिचारी है धूम का व्यापक जो आर्द्रेन्धनसंयोग उसका व्यभिचारी होने से। जो व्यापक का व्यभिचारी होता है वह व्याप्य का व्यभिचारी अवश्य होता है अर्थात् जब कि हेतु साध्य का व्यापक जो उपाधि उसका व्यभिचारी है तब वह उपाधि का व्याप्य जो साध्य उसका व्यभिचारी अवश्य होगा।

और जहाँ पर किञ्चिद्धर्मावच्छिन्न (यत्किञ्चिद्धर्म से विशिष्ट) साध्य-व्यापक उपाधि होती है वहाँ पर यत्किञ्चित् धर्मवत् (मित्रातनय) में उपाधिव्यभिचार से अर्थात् उपाधिव्यभिचाररूप हेतु के द्वारा साध्य के व्यभिचार का अनुमान (पहिले वास्तविक हेतु में) होता है।

प्रत्यक्षः द्रव्यत्वादित्यत्र द्रव्यत्वहेतोः आत्मनि आत्मभिन्नत्वव्यभिचारित्वात्, आकाशाद्यन्तर्भावेण साध्यव्यभिचारित्वाच्च, साध्यसमानाधिकरणत्वाच्चाऽऽत्मभिन्नत्वस्य लक्ष्यतावच्छेदकाक्रान्ततया तदय च पक्षधर्मावच्छिन्नसाधनाऽव्यापकत्वघटितलक्षणाभावादव्याप्तिशंकानिराकरणार्थं एकाश्रये इति। तथा च द्रव्यत्वहेतोरेकाश्रये उभय "साध्योपाधि" व्यभिचारित्वाभावान्न तस्य लक्ष्यत्वमिति भावः। १३९

मित्रातनयेशाकपाकजत्वव्यभिचारित्वादिति। शाकपाकजत्वाभाववन्मित्रातनयवृत्तित्वादित्यर्थः। इदमुपलक्षणम्। प्रत्यक्षस्पर्शाश्रयत्वं प्रत्यक्षत्वव्यभिचारि उद्भूतरूपाभाववद्वहिर्द्रव्यवृत्तित्वात्। जन्यत्वं जन्यत्वविशिष्टविनाशित्वव्यभिचारि भावत्वाभाववद् जन्य ध्वंस वृत्तित्वादित्यपि बोध्यम्। अथ पर्वतेतरत्वे "पक्षेतरत्वे" ऽतिव्याप्तिः, निश्चितसाध्यवतः "महानसादेः" पक्षेतरत्वात्, साधनीभूतधूमादेः पक्षेपि सत्वेन तत्र पक्षेतरत्वविरहादित्यत आह। बाधानुन्नीतपक्षेतरस्त्विति। तुशब्दोवधारणे—बाधानुन्नीतपक्षेतरत्वमेवेत्यर्थः। बाधेन प्रकृतसाध्याभावत्वेन अनुन्नीतः अनिर्णीतोयः पक्षः तदितरत्वमेवेत्यर्थः। अस्य नोपाधिरित्यनेनाऽन्वयः। उपाधि-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चारित्वादिति । बाधानुन्नीतपक्षेतरस्तु साध्यव्यापकताग्राहकप्रमाणाऽभावात् स्वव्याघातकत्वाच्च नोपाधिः । बाधोन्नीतस्तूपाधिर्भवत्येव । यथा वन्हिरनुष्णः कृतकत्वादित्यादौ प्रत्यक्षेण वन्हेरुष्णत्वग्रहे वन्हीतरत्वमुपाधिः ।

जैसे "स श्यामो मित्रातनयत्वात्" यहाँ पर मित्रातनयत्व रूप यद्धर्म से विशिष्ट जो साध्य (श्यामत्व) उसका व्यापक शाकपाकजन्यत्व उपाधि है अतः शाकपाकजन्यत्वरूप उपाधि के व्यभिचाररूपहेतु के द्वारा मित्रातनयत्वरूप हेतु में साध्यव्यभिचारानुमान हो जाता है, कि "मित्रातनयत्वं श्यामत्वव्यभिचारी मित्रातनये शाकपाकजन्यत्वव्यभिचारित्वात्" अर्थात् मित्रातनयत्व (गौरमित्रातनय में) श्यामत्व का व्यभिचारी है (गौर वर्ण वाले) मित्रातनय में शाकपाकजत्व का व्यभिचारी होने से ।

जिस पर्वत आदि पक्ष में पक्षनिष्ठसाध्याभाववत्त्वरूपबाध अनिश्चित हो वहाँ पक्षेतरत्व (पर्वतेतरत्व) उपाधि इसलिये नहीं मानी गयी है कि उस (पक्षेतरत्व) उपाधि में सर्वप्रथम तो साध्य की व्यापकता का ग्राहक कोई प्रमाण ही नहीं है। दूसरी बात यह है कि सब सद्धेतुमात्र में पक्षेतरत्व उपाधि लग जाने से अनुमान का उच्छेद हो जायगा इसलिये उपाधि को वहाँ (पर्वतोवन्हिमान्धूमात्) इत्यादिसद्धेतुस्थल में दूषक ही नहीं माना जायगा-ऐसी परिस्थिति में उपाधि अपना ही व्याघातक बन जायगी-अर्थात् उपाधिव्यभिचार से साध्यव्यभिचारानुमान नहीं हो सकेगा। वही मूल में कहा है कि "स्वव्याघातकत्वाच्च" इति ।

और जिस पक्ष में साध्याभाववत्त्वरूपबाध का निश्चय होता है वहाँ पक्षेतरत्व उपाधि होती ही है। जैसे—"वन्हिरनुष्णः कृतकत्वात्" यहाँ पर वन्हि (पक्ष) में अनुष्णत्वरूप साध्य के अभावस्वरूप उष्णत्व रूप साध्य के बाध का ग्रह (निश्चय) प्रत्यक्ष से हो जाने से

त्वाभावे हेतुमाह। **साध्यव्यापकताग्राहकप्रमाणाभावादिति** । पक्षेतरत्वं साध्यव्यापकमिति योग्रहः तज्जनकसामग्र्यभावादित्यर्थः। पक्षे साध्याभावनिश्चयस्यैव पक्षेतरत्वे साध्यव्यापकतानिर्णायकतया तदभावादिति भावः। **स्वव्याघातकत्वाच्चेति** । उपाधिमात्रस्य दूषकत्वव्याघातकत्वादित्यर्थः । पक्षेतरत्वस्योपाधित्वे सर्वत्रानुमाने पक्षेतरत्वोपाधेः संभवात् अनुमानमात्रोच्छेदापत्त्या व्यभिचारानुमानाधीनस्योपाधेर्दूषकत्वस्याऽसंभवादिति भावः। **नोपाधिरिति** । तथा च पक्षेतरत्वे नातिव्याप्तिरिति भावः। **बाधोन्नीतपक्षेतरस्तु** इति । बाधेन प्रकृतसाध्याभाववत्त्वेन उन्नीतः निर्णीतः निश्चयविशेष्यभूत इति यावत्। एवं भूतोयः पक्षस्तदितरत्वं तु इत्यर्थः । "बाधोन्नीत" पक्षेतरत्वस्योपाधित्वं दर्शयति । **तथेति** । **इत्यादौ** । इत्यादिन्यायस्थलीयहेतौ। अस्य वन्हीतरत्वमित्यनेनाऽन्वयः। प्रत्यक्षेण संयुक्तसमवायसन्निकर्षसहितेन त्वचा। **वन्हावुष्णत्वग्रहे** इति । अनुष्णत्वाभाववान् वह्निरिति बाधनिश्चये सतीत्यर्थः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यस्य तूपाधेः साध्यव्यापकता संदिह्यते स संदिग्धोपाधिः पक्षेतरस्तु संदिग्धोपाधिरपि नोद्भावनीयः, कथकसंप्रदायानुरोधादिति ।

केचित्त सत्प्रतिपक्षोत्थापनमुपाधिफलम् । तथाहि—अयोगोलकं धूमवद् वन्हेरित्यादावयोगोलकं धूमाभाववदार्द्रेन्धनसंयोगाभावादिति सत्प्रतिपक्षसंभवात् । इत्थं च साधनव्यापकोऽपि क्वचिदुपाधिः । यथा

पक्ष जो वन्हि तदितरत्व अर्थात् वन्हीतरत्व उपाधि बन जाती है । और जहाँ पर उपाधि में साध्य की व्यापकता का सन्देह हो वह संदिग्धोपाधि मानी गयी है । पक्षेतरत्व को संदिग्धोपाधि भी भाष्यकार (कथक) के संप्रदाय के अनुरोध से नहीं माना जा सकता है ।

कोई लोग सत्प्रतिपक्ष के उत्थापन को ही उपाधि का फल कहते हैं । तथाहि—अयोगोलकं धूमवद्वन्हेः" यहाँ पर "धूमव्याप्यवन्हिमदयोगोलम्" इस परामर्शकाल में "धूमाभावव्याप्य "आर्द्रेन्धनसंयोगाभाववदयोगोलकम्" इस विरोधी परामर्श के उपस्थित हो जाने से "अयोगोलकं धूमाभाववत् आर्द्रेन्धनसंयोगाभावात्" यह सत्प्रतिपक्ष संभव है । इस मत में अर्थात् सत्प्रतिपक्षोत्थापन उपाधि का फल है जिस मत में उनके यहाँ साधन का व्यापक भी

उपाधिरिति । वन्हीतरत्वे उक्तबाधनिश्चयबलात्साध्यव्यापकत्वनिश्चयादिति भावः ।

उपाधिर्द्विविधः । निश्चितः-सन्दिग्धश्च । साध्यव्यापकत्वेन साधनाऽव्यापकत्वेन च निश्चितः व्यभिचारनिश्चयाधायकः निश्चितोपाधिः । यथा धूमवान्वन्हेरित्यत्राऽऽर्द्रेन्धनसंयोगः । सन्दिग्धोपाधिं लक्षयति । यस्येति । यादृशस्येत्यर्थः । वस्तुतः उपाधित्वविशिष्टस्येति यावत् । साध्यव्यापकतेति । साधनाऽव्यापकतेति च बोध्यम् । सन्दिग्धोपाधिरिति । तथा च यत्र साधनाऽव्यापकत्वसंशयः, साध्यव्यापकत्वसंशयो तदुभयसंशयो वा तत्र सन्दिग्धोपाधिः । मित्रातनयत्वेन श्यामत्वे साध्ये शाकपाकजन्यत्वम् । कथकेति । प्राचीनभाष्यकारादीत्यर्थः ।

उपाधिः स्वव्यतिरेकेण साध्याभावसाधकतया दूषणम् । पक्षेतरत्वव्यतिरेकश्च न साध्याभावसाधकः तस्य पक्षमात्रवृत्तित्वेन सपक्षविपक्षव्यावृत्तत्वरूपाऽसाधारण्यात् । न च हेतौ उपाधिव्यभिचारेण साध्यव्यभिचारानुमापकतया उपाधि दोषः तत्र च नाऽसाधारण्यमिति वाच्यम् । उपाधिव्यभिचारितया साध्यव्यभिचारित्वं हि अनुमेयम् । तुल्ययुक्त्या उपाधिः साध्यव्यापकत्वाभाववान् साध्यव्याप्यहेत्वव्यापकत्वादित्यपि अनुमेयम् । न च हेतुज्ञानं कथं जातमिति वाच्यम् । हेतौ उपाधिव्यभिचारित्वे ज्ञायमाने उपाधावपि हेत्वव्यापकत्वज्ञानस्यावश्यकत्वात् । यथा साध्यस्य उपाधिव्याप्यताग्राहकव्यभिचाराऽदर्शन-सहचारदर्शने स्तः-तथा हेतावपि साध्यव्याप्यताग्राहके स्तः, न हि तदानीं हेतौ साध्यव्यभिचारज्ञानमप्यस्ति, स्फुटे व्यभिचारे उपाध्युपन्यासस्य वैयर्थ्यात् । तस्माद्यथा साध्यव्याप्येन हेतुना साध्यमनुमेयं तथा साध्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

करका पृथिवी कठिनसंयोगवत्त्वादित्यादावनुष्णाशीतस्पर्शवत्त्वम्। नचात्र स्वरूपासिद्धिरेव दूषणमिति वाच्यम्। सर्वत्रोपाधेर्दूषणान्तरसांकर्यात्। अत्र च साध्यव्यापकः पक्षावृत्तिरूपाधिरित्याहुः।

इत्युपाधिनिरूपणम्।

कहीं उपाधि मानी गयी है। जैसे "करका पृथिवी कठिनसंयोगवत्त्वात्" यहाँ पर अनुष्णाशीत-स्पर्शवत्त्व उपाधि कठिनसंयोगवत्त्वरूप हेतु का व्यापक है क्योंकि जहाँ भी पृथिवी (घटपट आदि) में अनुष्णाशीतस्पर्शवत्त्व है वहाँ कठिन संयोग हेतु भी है।

प्रश्न—"करका पृथिवी कठिनसंयोगवत्त्वात्" यहाँ पर करका के पिघल जाने के बाद न उसमें कठिनसंयोगवत्त्वरूप हेतु ही है, और न उसमें पृथिवीत्व साध्य ही है, अतः हेतु के न रहने प्रयुक्तस्वरूपासिद्धि है और साध्य के न रहने प्रयुक्त बाध है, तब फिर इन्हीं स्वरूपासिद्धि तथा बाध दोष से हेतु में दुष्टत्व व्यवहार बन जायेगा, साधन के व्यापक अनुष्णाशीत-स्पर्शवत्त्व को उपाधि क्यों मानना—इसी अभिप्राय से कहते हैं कि—न चात्र स्वरूपासिद्धिरेव दूषणम्" इत्यादि।

उत्तर—सर्वत्र व्यभिचारि स्थल में उपाधि का दूषणान्तरों के साथ सांकर्य होता ही है। विशेषता इतनी ही है कि जो लोग सत्प्रतिपक्षोत्थापन ही उपाधि का फल मानते हैं उनके मत में साध्य का व्यापक पक्षावृत्ति उपाधि मानी गयी है अर्थात् 'साध्यव्यापकत्वे सति पक्षावृत्तित्व' यही उनके मत में उपाधि का लक्षण है।

व्यापकोपाध्यभावेन साध्याभावोऽनुमेय इति सत्प्रतिपक्ष एव दूषकताबीजमिति वदतां मतमुपन्यस्यति। केचित्त्विति। आर्द्रेन्धनाभावादिति। धूमव्यापकेत्यादिः। सत्प्रतिपक्षोत्थापकतया उपाधेर्दूषकत्वपक्षे हेतौ उपाधिव्यभिचारित्वज्ञानस्याऽनपेक्षितत्वेन तुल्यवित्तिवेद्यतया उपाधौ साधनाव्यापकत्वज्ञानस्याप्यनावश्यकत्वमित्याशयेनाह। इत्थं चेति। सत्प्रतिपक्षोत्थापकत्वमात्रेण दूषकत्वे इत्यर्थः। साधनव्यापकोपीति। अपिना साधनाऽव्यापकः समुच्चीयते। तथा च यथा साध्यव्यापकः साधनाऽव्यापक उपाधिस्तथा साध्यव्यापकः साधनव्यापकश्चोपाधिरिति भावः। द्वितीयमुपाधिमुदाहरति। यथेति। अनुष्णाशीतस्पर्शवत्त्वमिति। उपाधिरिति पूर्वेणाऽन्वयः। अस्य पक्षाऽवृत्तित्वात्साध्याभावानुमापकत्वं बोध्यम्। तथा च साध्यव्यापकत्वे सति पक्षावृत्तिरपि उपाधिः। अनुपदमेवदयतिअत्रचेति। शंकते। नचेति। अत्र। कठिनसंयोगवत्त्वहेतौ। दूषणान्तरसांकर्यादिति। तथा च "उपधेयसंकरेऽपि उपाधेरसङ्करादिति न्यायेन एकस्मिन् नानादोषसंकरेबाधकाभावात्। वदन्तीत्यस्वरसः, तद्बीजं तु सत्प्रतिपक्षे यथा सत्प्रतिपक्षान्तरं न स्वीक्रियते एकेनापि भूयसां प्रतिबन्धात् सत्प्रतिपक्षबाहुल्यस्याऽप्रयोजकत्वात्, तथा सत्प्रतिपक्षे-उपाध्युद्भावनमपि न स्यात्, भवन्मते उपाधिमुद्भाव्य सत्प्रतिपक्षान्तरस्यैव

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शब्दोपमानयोर्नैव पृथक् प्रामाण्यमिष्यते ॥१४०॥

शब्दोपमानयोरिति। वैशेषिकाणां मते प्रत्यक्षमनुमानं च प्रमाणम्। शब्दोपमानयोस्तु अनुमानविधयैव प्रामाण्यम्। तथाहि—दण्डेन गामानये-

शब्दोपमानयोरिति।

वैशेषिक लोगों के मत में प्रत्यक्ष और अनुमान दो ही प्रमाण हैं। शब्द तथा उपमान को अनुमान के द्वारा ही प्रामाण्य है, जैसे कि "दण्डेन गामानय" इत्यादि लौकिक पद, एवं "यजेत" इत्यादि- वैदिकवाक्य अभ्रान्तवक्ता के तात्पर्यका विषयीभूत जो शक्ति-लक्षणान्यतरवृत्तिरूपसम्बन्धद्वारा पदों से स्मारित (उपस्थापित) दण्ड-करणत्व-गौ-कर्मत्व-

---

स्वीकरणीयत्वात् तस्य चाऽप्रयोजकत्वादिति। किं च वन्हिरनुष्णः कृतकत्वादित्यत्र वन्हीतरत्वं नोपाधिः स्यात्, साध्याभावसाधने तद्व्यतिरेकस्याऽसाधारणत्वादिति।

ननुउपाधेर्व्यभिचारोन्नायकतयादूषकत्वं दूषितंप्राक्, इदानीं सत्प्रतिपक्षो-न्नायकतयापि दूषकत्वं दूषितंभवता तदा कथमुपाधिर्दोष इति चेन्न। साध्यव्याप्यत्व साध्यव्यापकाव्याप्यत्वयोः साध्यव्यापकत्व–साध्यव्याप्याऽव्यापकत्वयोश्चव्याप्ति-ग्राहकसाम्ये विरोधान्नव्याप्तिनिश्चयः, किंतुउभयत्रव्यभिचारसंशयः तथा च व्यभिचार-शंकाधायकत्वेनोपाधेर्दूषकत्वंबोध्यम्। तदुक्तमिति आचार्यैरितिशेषः। उपाधेरेव व्यभिचारशंकेति। एवकारोव्यभिचारशंकेत्युत्तरं योजनीयः। उपाधे र्व्यभिचार शंकैवेत्यर्थः।

इत्युपाधिनिरूपणम्

मूले—शब्दोपमानयोरिति। अत्र यद्यपि उपमानशब्दयोरित्येववक्तुमुचितम्, तथापि स्वेच्छैवात्र मूलं प्रतिभाति। अनुमानविधयैवेति। अनुमितिकरणत्वेनैवे-त्यर्थः। प्रमाण्यमिति। प्रमाकरणत्वमित्यर्थः। तथा च शब्दोऽनुमानम्, पदार्थ-संसर्गस्याऽनुमानादेव सिद्धेरितिभावः। अनुमानप्रकारमाह। तथा हीत्यादिना। दण्डेन गामभ्याजेति। लौकिकपदानीति। लौकिकवाक्यानीत्यर्थः। विधिवाक्य-स्यैव प्रमाण्याभिप्रायेणाह यजेतेत्यादीति। पक्षता च वाक्यविशेषत्वेन न तु लौकिक-वैदिकत्वादिनेत्यवधेयम्। स्मारितः वृत्तिज्ञानाधीनोपस्थितिविषयीभूतः। एवंभूतोयः पदार्थस्तस्य यस्तात्पर्यविषयः संसर्गः, तस्य या प्रमा तत्पूर्वकत्वं साध्यम्। संसर्गस्य बहुविधत्वेनाऽनभिमतसंसर्गस्यसिद्धयाऽर्थान्तरवारणाय तात्पर्यविषयेतिसंसर्गविशे-षणम्। तस्य तात्पर्याऽविषयत्वाद्वारणम्। नामार्थे पदार्थान्तरसंसर्गप्रमापूर्वकत्व-सिद्धयाऽर्थान्तरवारणाय स्मारितेति पदार्थविशेषणम्। आकांक्षादीति। आकांक्षा-योग्यताऽऽसत्तिमत्पदकदंबत्वादित्यर्थः। अनुमितौ च प्रमाऽवच्छेदकतयासंसर्गसिद्धिः। ननु उक्तानुमानेन पदार्थसंसर्गप्रमापूर्वकत्वसिद्धावपि न पदार्थसंसर्गसिद्धिः, पदार्थ-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्यादिलौकिकपदानि, यजेतेत्यादिवैदिकपदानि वा तात्पर्यविषयस्मारितपदार्थसंसर्गप्रमापूर्वकाणि आकांक्षादिमत्पदकदम्बत्वात् घटमानयेत्यादिपदकदम्बवत्।

यद्वा एते पदार्थाः परस्परं संसर्गवन्तः योग्यतादिमत्पदोपस्थापितत्वात्, तादृशपदार्थवत् । दृष्टान्तेऽपि दृष्टान्तान्तरेण साध्यसिद्धिरिति । एवं

आनयन-कृति-रूप पदार्थों का परस्पर सम्बन्ध, तथा 'यजेत' यहाँपर-याग-इष्टसाधनत्व-कृति-साध्यत्व, बलवदनिष्टाननुबन्धित्वरूप पदार्थों का पारस्परिकसम्बन्ध, उस सम्बन्ध के यथार्थज्ञान-पूर्वक हैं, क्योंकि आकांक्षा-योग्यता आदि वाला पदों का समुदाय होने से "घटमानय" इस पदसमुदाय की तरह । अथवा 'दण्डेन गामानय' यहाँ पर दण्ड-करणत्व-गौ आदि पदार्थ परस्पर सम्बन्धवाले हैं क्योंकि योग्यता आदि वाले पदों के द्वारा उपस्थापित होने से, 'घटमानय' इस वाक्य से बोध्य घट-कर्मत्व आदि पदार्थों की तरह ।

प्रश्न—"घटमानय" इस दृष्टान्त में 'मिथः संसर्गवत्त्व' रूप साध्य की सिद्धि (निश्चय) कैसे आपको हुवी ।

संसर्गप्रमा हि उक्तानुमितेर्विषयः, न तु पदार्थसंसर्गोपि इतिचेन्न । ज्ञानज्ञानस्य तद्विषयविषयकत्वनियमात् । अस्यार्थस्तु ज्ञानस्ययद्ज्ञानं तस्य, ज्ञानगोचरज्ञानस्येत्यर्थः । तस्य योविषयः स एव विषयो यस्य तत् तद्विषयविषयकं तस्य भावोयद्विषयविषयकत्वं तन्नियमादित्यर्थः तद्विषयेत्यत्र प्रथमज्ञानं तच्छब्दार्थः । विषयोयस्येति यच्छब्देन द्वितीयज्ञानं परामृश्यते । तथा च प्रकृते संसर्गप्रमा प्रथमं ज्ञानं तद्विषयिणी प्रकृतानुमिति द्वितीयं ज्ञानम् एवं च प्रथमज्ञानविषयः संसर्गः द्वितीयज्ञानस्यापि विषय इति प्रकृतानुमित्यैव संसर्गसिद्धिरिति भावः । न चोक्तनियमे एव मानाभावः । अनुव्यवसायादौ तथा दर्शनात् ।

अथैवं भ्रान्तिज्ञानस्यापि भ्रमविषयभूताऽसद्वैशिष्ट्यावगाहितया भ्रमत्वप्रसंगः । न चेष्टापत्तिः । ईश्वरस्यापि भ्रान्तत्वापत्तेः । इदं रजतमिति भ्रान्तिमत इव शुक्तौरजतज्ञानवानयमिति ज्ञानवतोपि प्रवृत्त्यापत्तेः । न च विशेषदर्शनादिना तत्र शुक्तौ नाऽसद्वैशिष्ट्यभानमिति वाच्यम् । तथापि उक्तनियमे व्यभिचारस्य दुर्वारत्वादिति चेन्न । न हि असद्विषयकत्वेनज्ञानस्य भ्रमत्वम्, अनभ्युपगमात्, भ्रमविषयाणांशुक्त्यादीनां पारमार्थिकत्वाच्च । किन्तु व्यधिकरणप्रकारताकत्वेन भ्रमत्वम् । न हि भ्रमस्य ज्ञाने व्यधिकरणप्रकारताकत्वमस्ति रजतत्वप्रकारकत्वस्य भ्रमे सत्वात् । एवं च रजतत्वप्रकारताकत्वप्रकारकं भ्रमस्य ज्ञानं न भ्रमः तस्य रजत्वप्रकारतानिरूपकत्वाभावात्, भ्रान्तेस्तु रजतत्वं प्रकारः तच्च व्यधिकरणमिति तस्य भ्रमत्वमिति ध्येयम् ।

पदपक्षकानुमानमुक्त्वा पदार्थपक्षकानुमानमाह यद्वेतिएते पदार्थाइति । पदज्ञानानन्तरं वृत्त्या पदजन्यपदार्थस्मरणे सतीत्यादिः । परस्परमिति ।इदं चोदासीनपदार्थसंसर्गवारणाय । अथ दृष्टान्तेपि कथं साध्यसिद्धिरित्यत आह । दृष्टान्ते

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY.
Jangamwadi Math, VARANASI.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गवयव्यक्तिप्रत्यक्षानन्तरं गवयपदं गवयत्वप्रवृत्तिनिमित्तकम्, असति वृत्त्यन्तरे वृद्धैस्तत्र प्रयुज्यमानत्वात्। असति वृत्त्यन्तरे वृद्धैर्यत्र यत् प्रयुज्यते तत्र तत् तत्प्रवृत्तिनिमित्तकम्, यथा गोपदं गोत्वप्रवृत्तिनिमित्तकम्।

उत्तर—'पटमानय' इस दूसरे दृष्टान्त के द्वारा। [इससे शब्द का अनुमान में अन्तर्भाव कर दिया।]

(इसी प्रकार अब उपमान का अनुमान में अन्तर्भाव करते हैं) "एवं गवयव्यक्ति-के प्रत्यक्ष होने के अनन्तर यह अनुमान होता है कि—"गवयपदं गवयत्वप्रवृत्तिनिमित्तकम् असति वृत्यन्तरे वृद्धैस्तत्रप्रयुज्यमानत्वात्" अर्थात् गवयपदपद गवयत्वप्रवृत्तिनिमित्तक है (गवयपदका शक्यतावच्छेदक गवयत्व है—प्रवृत्तिनिमित्त नाम शक्यतावच्छेदक का है, इसी का स्पष्ट अर्थ है कि गवयपद की गवयरूप अर्थ में शक्ति है, क्योंकि गवयपद की जब कि गवयरूप अर्थ में शक्ति है तो गवयरूप अर्थ गवयपद का शक्य (शक्त्याश्रय) हुवा, और शक्यतावच्छेदक हुवा गवयत्व) इसमें हेतु देते हैं कि—"असति वृत्यन्तरे" इत्यादि, अर्थात् लक्षणावृत्ति के न होने पर भी वृद्ध लोग गवयपद का गवयरूप अर्थ में ही प्रयोग करते हैं। यह नियम है कि लक्षणारूप वृत्त्यन्तर के न होने पर वृद्ध लोग जिस अर्थ में जिस पद का प्रयोग करते हैं वह अर्थ उस पद की शक्ति का आश्रय होता है और उस अर्थ में रहने वाला असाधारणधर्म प्रवृत्तिनिमित्त होता है, जैसे गोपद का प्रवृत्तिनिमित्त गोत्व होता है।

पीति। दृष्टान्तान्तरेणे ति। अनुमानान्तरेणेत्यर्थः। एवं तत्र तत्रापि। न चाऽनवस्था। अनादित्वात्।

भूतले घट इति वाक्यप्रयोगकालेभूतले घटास्तित्वं प्रत्यक्षतो यत्रावगतं तत्र निरुक्तहेतुमति तत्र भूतलास्तित्वविशिष्टघटे दृष्टान्तान्तरापेक्षां विना साध्यस्य प्रात्यक्षिकसिद्धिसंभवात्तद्दृष्टान्तेनाऽन्यवाक्यस्थलेपि तत्तदर्थेषु पूर्वोक्तलिंगेन साध्यानुमितिसंभवाच्च न तदर्थं शब्दस्य पृथक् प्रामाण्यमावश्यकमिति प्रभाकृतः।

इदानीमुपमानस्याऽनुमानान्तर्गतत्वमुपपादयति। एवमिति। गवयत्वप्रवृत्तिनिमित्तकमिति। गवयत्वं प्रवृत्तिनिमित्तं यस्य तत, तस्य भावस्तत्त्वम्। प्रवृत्तिनिमित्तलक्षणं तु वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थितिप्रकारत्वम्। गवयत्वावच्छिन्ने शक्तमितितदर्थः। असतिवृत्त्यन्तरे इति। तत्तद्धर्मावच्छिन्नलाक्षणिकत्वग्रहविशेष्यत्वाभाववत्वेसतीत्यर्थः। वृद्धैः—आप्तैः तत्र-गवयत्वावच्छिन्ने। प्रयुज्यमानत्वादिति। गवयकर्दमस्य प्रक्षालनाभिप्रायेण प्रयुक्ते गवयं प्रक्षालयेति वाक्ये लाक्षणिकगवयपदे गवयत्वप्रवृत्तिनिमित्तकत्वविरहेण व्यभिचारवारणाय, असतिवृत्त्यन्तरे इति। गवयपदं मृगे शक्तमिति शक्तिभ्रमवता पुरुषेण प्रयुक्त गवयपदे व्यभिचारवारणाय वृद्धैरिति। वृद्धश्च स्वप्रयुक्तवाक्यार्थयथार्थज्ञानवान्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यद्वा गवयपदं सप्रवृत्तिनिमित्तकं साधुपदत्वात् इत्यनुमानेन पक्षधर्मताबलाद् गवयत्वप्रवृत्तिनिमित्तकत्वं सिद्ध्यति ॥१४०॥

अथवा "गवयपद सप्रवृत्तिनिमित्तक है (अर्थात् गवयपद का कोई प्रवृत्तिनिमित्त अवश्य है) साधुपद होने से" इस अनुमान के द्वारा पक्षधर्मता (इतरबाधनिश्चय) की सहायता से गवयपद में गवयत्वप्रवृत्तिनिमित्तकत्व सिद्ध हो जाता है। (अभिप्राय यह है कि गवयपद का प्रवृत्तिनिमित्त कोई अवश्य है यह तो निर्विवादविषय है, अब रहा कि वह है कौन गवयपद का प्रवृत्तिनिमित्त, सो घटत्व-पटत्व आदि तो गवयपद के प्रवृत्तिनिमित्तहो नहीं सकते हैं कारण कि घटत्व-पटत्व आदि घट-पट आदि पदों के ही प्रवृत्तिनिमित्त हो सकते हैं अतः गवयपद का प्रवृत्तिनिमित्त गवयत्व को ही मानना होगा।)

भ्रमरहित इति यावत्। अथ विशेषणासिद्धिः, शक्तिज्ञानविरहे वृत्त्यन्तरं विना प्रयोगस्य ज्ञातुमशक्यत्वादिति चेन्न। वृत्त्यन्तरस्यानुपपत्तिगम्यत्वात्तदभावेतदभावस्य निश्चयाद्विशेषणासिद्धेरभावात्। गोसदृशो गवय इत्याप्तवाक्यात् सादृश्यविशिष्टे गवयशब्दवाच्यत्वोपगमाद् गवयत्वविशिष्टे गवयपदप्रयोगोऽसिद्ध इति विशेष्यासिद्धिर्नाशंकनीया—गवयत्वोपस्थितौ तस्य जातित्वेनाखण्डत्वात् गोसादृश्यस्य उपाधित्वेन गुरुत्वात्, अप्रतीतगूनां वनेचराणामप्रयोगापत्तेश्च गवयत्वप्रवृत्तिनिमित्तकत्वस्य निश्चयादिति। सामान्यव्याप्तिमाह **असतीति**। अत्रायं क्रमः—गवयपदेऽव्युत्पन्नं नागरिकं प्रति आरण्यकेन गोसदृशोगवय इति प्रयुक्ते वनं गतस्य गवयपिण्डं प्रत्यक्षयतो नागरिकस्याऽतिदेशवाक्यं स्मरतोऽनुमानं भवतीति।

गवयपदं गवयत्वप्रवृत्तिनिमित्तकं गवयत्वेतराऽप्रवृत्तिनिमित्तकत्वे सतिसप्रवृत्तिनिमत्तकत्वादित्यनुमानेन गवयत्वप्रवृत्तिनिमित्तकत्वं साधनीयम्, तत्रेतराऽप्रवृत्तिनिमित्तकत्वे वादिनामविवाद एव। गोत्वादेर्गवयाऽवृत्तित्वात्, द्रव्यत्वादेरतिप्रसक्तत्वात्, सादृश्यस्य गुरुत्वाच्चेति मन्तव्यम्। तत्र विशेष्यासिद्धिनिरासायाऽऽह। **यद्वेति**। **सप्रवृत्तिनिमित्तकमिति**। किंचिद्धर्मावच्छिन्ने शक्तमित्यर्थः। **साधुपदत्वादिति**। साधुत्वं च शक्तिभ्रमानधीनशाब्दबोधजनकत्वम्। व्याकरणनिष्पादित्वमित्यपि केचित्। **पक्षधर्मताबलादिति**। इतरबाधनिश्चयसहकृतादित्यादिः।

न च गवयपदे गवयत्वावच्छिन्नशक्तत्वानुमितावपि गवयेगवयपदवाच्यत्वाऽसिद्धेः, तदर्थमुपमानस्य पृथक् प्रामाण्यं स्वीकार्यमिति वाच्यम्। गवयप्रत्यक्षानन्तरं गवयो गवयपदवाच्यः गवयपदनिरूपितलक्ष्यत्वाभाववत्त्वे सति तत्पदनिरूपितशक्तिज्ञानजन्योपस्थितिविशेष्यत्वात्। योर्थः यत्पदनिरूपितलक्ष्यत्वाभाववत्त्वे सति यत्पदनिरूपितशक्तिज्ञानजन्योपस्थितिविशेष्यतावान् सोर्थः तत्पदवाच्योभवति-यथा गौरित्यनुमानात् गवयेगवयपदवाच्यत्वानुमितेः संभवात्। एवं गवयो गवयपदवाच्यः असति वृत्यन्तरे गवयशब्दप्रयोगविषयत्वादित्यनुमानादपीति ॥१४०॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अनुमानगतार्थत्वादितिवैशेषिकं मतम् ।
तन्न सम्यग्विना व्याप्तिबोधं शाब्दादिबोधतः ॥१४१॥

तन्मतंदूषयति—तन्नसम्यगिति । व्याप्तिज्ञानं विनापि शाब्दबोधस्यानुभवसिद्धत्वात् । नहिसर्वत्रशब्दश्रवणानन्तरं व्याप्तिज्ञाने प्रमाणमस्तीति ।

नैयायिक लोग वैशेषिकमत का खण्डन करते हैं—'तन्न सम्यक्' व्याप्तिज्ञान के बिना भी शाब्दबोध अनुभवसिद्ध है । क्योंकि सर्वत्र शब्द को सुनने के बाद ही व्याप्ति ज्ञान होता है

मूले—अनुमानगतार्थत्वादिति । अनुमानेऽन्तर्भावादित्यर्थः । अत्र प्रत्यक्षानुमानान्यतरत्वं प्रमाणत्वव्यापकं न वा । प्रत्यक्षानुमित्यन्यतरत्वं प्रमात्वव्यापकं नवेति विप्रतिपत्तिर्बोध्या ।

तन्मतमिति । वैशेषिकमतमित्यर्थः । दूषयतीति । पदार्थपञ्चकानुमानं दूषयतीत्यर्थः । व्याप्तिबोधं विनापीति । आकांक्षादिमत्पदस्मारितत्वं परस्परसंसर्गव्याप्यमिति व्याप्तिज्ञानविरहकालेऽपीत्यर्थः । इदमुपलक्षणम् । पदस्मारितत्वाभाववती गौरिति पक्षधर्मत्वाभावनिश्चयदशायामित्यपि बोध्यम् । तथा च तदानीं परामर्शानुत्पादेन तदानीमुत्पन्नस्याऽन्वयबोधस्यानुमितित्वं दुर्घटमिति भावः । शाब्दबोधस्यानुभवसिद्धत्वादिति । पदस्मारितत्वाभावग्रहकालेपि घटमानयेति वाक्यात् घटकर्मकऽऽनयनानुकूलकृतिमानिति शाब्दबोधस्यानुभवसिद्धत्वात् उक्तपरामर्शासंभवेन कुतोऽनुमानेऽन्तर्भाव इति भावः । ननु शाब्दबोधे पदजन्यपदार्थोपस्थितिज्ञानमेव हेतुरिति पदजन्यस्मृतिविषयत्वरूपस्य पदस्मारितत्वस्याऽज्ञानदशायां शाब्दबोध एव न जायते इति चेन्न । पदजन्यपदार्थोपस्थितिः स्वरूपसती एव कारणम्, न तु ज्ञाता, प्रमाणाभावात्, अनुमितौ तु व्याप्यवत्तानिश्चयस्यैव कारणत्वात् । पदैरस्मारितस्यापि पदजन्यपदार्थस्मृतत्वग्रहात्शाब्दबोधप्रसंगाच्च तथा च व्यतिरेकव्यभिचारादन्वयव्यभिचाराच्च व्याप्तिज्ञानं न शाब्दबोधहेतुरिति तत्वम् । अत्रेदमवधातव्यम् । एते पदार्थाः संसर्गवन्तः आकांक्षायोग्यतादिमत्पदस्मादितत्वादित्यत्र संसर्गवत्वं साध्यम्, तच्च नियमतः संसर्गवत्वम्, संसर्गस्वरूपयोग्यत्वं वा । आद्ये पयसा सिञ्चतीत्यादौ अनैकान्तः, पयस्त्वावच्छिन्ने सेचनकरणत्वस्याऽनियतत्वात् । सर्वासु पयोव्यक्तिषु सेचनकरणत्वाभावात् । तथा च येनैव पयसा न सेकः तत्रैव व्यभिचार इति भावः । द्वितीये न संसर्गनिश्चयः, संसर्गनिश्चयाभावे च प्रवृत्त्यनुपपत्तिः, तद्विषयकप्रवृत्तिं प्रति तन्निश्चयस्य हेतुत्वात् । अथ च योग्यता अन्वयप्रयोजकवत्वरूपा "अन्वयः संसर्गः तत्प्रयोजकं पयस्त्वादिकं तद्वत्वम्" । तस्याः हेतुविशेषणत्वे सिद्धसाधनात् । हेतुतावच्छेदकरूपेण हेतुनिश्चयस्य पूर्वमपेक्षितत्वात् हेतुतावच्छेदककोटिप्रविष्टयोग्यताघटकतयैव अन्वयरूप

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संसर्गसिद्धेः। बाधविरहरूपयोग्यताया निवेशे न सिद्धसाधनमिति तु न युक्तम्। परैस्तदनंगीकारात्। तादृशयोग्यतायाः पदार्थनिष्ठत्वेन पदधर्मत्वाभावेन तन्निवेशस्य कर्तुमशक्यत्वाच्च। अन्वयप्रयोजकरूपवत्वस्य तु पयस्त्वादेः पदवाच्यतया पदधर्मत्वात्। किं च बाधनिश्चयाभावेनान्यथासिद्धस्यबाधविरहरूपयोग्यतानिश्चयस्यानावश्यकत्वात्। तादृशयोग्यताया हेतुविशेषणत्वासंभवात्। एवमाकांक्षायाः स्वरूपसत्त्या एव हेतुताया तस्याः हेतुविशेषणत्वानुपपत्तिः, अनुमितौहेतुविशेषणनिश्चयस्यावश्यकत्वात्। एवं व्यापकतावच्छेदकरूपेणैवानुमितेर्व्यापकविषयत्वात्। विशेषसंसर्गासिद्धिः। तदभावे च प्रवृत्त्यनुपपत्तिः, विशेषरूपेण निश्चयस्यैव प्रवृत्तिहेतुत्वात्। तथा च शाब्दबोधानन्तरं प्रवृत्तेरानुभविकतया तदुपपत्तये विशेषसंसर्गबोधकः शब्दः प्रमाणान्तरम्। एवं घटादन्य इत्यादौ भेदो घटप्रतियोगिताकः इति रीत्या पक्षविषयाऽन्यत्वस्य भावेपि अन्यत्वेनाऽन्यस्यानुमितौ भानाऽसंभवात्तदुपपत्त्यर्थं शब्दस्य प्रमाणान्तरत्वमित्यपि बोध्यम्।

एतानि पदानि तात्पर्यविषयस्मारितपदार्थसंसर्गप्रमापूर्वकाणि आकांक्षायोग्यताऽऽसत्तिमत्पदकदंबत्वात् घटमानयेति पदकदंबवत् इति पदपक्षकानुमानं परमवशिष्यते। तत्र नाऽऽकांक्षाया हेतुत्वसंभवः, आकांक्षा हि स्वरूपसती कारणम्, अनुमितौ च हेतुनिश्चयस्याऽऽवश्यकत्वात्। समभिव्याहृतपदस्मारितपदार्थजिज्ञासाया एवाऽऽकांक्षात्वात्। तथाचैतादृशाऽऽकांक्षासत्वे तद्ज्ञानाभावेपि शाब्दबुद्धेरानुभविकतया तदुपपत्तये शब्दस्य प्रमाणान्तरत्वमावश्यकम्। यदि तु अजिज्ञासोरपि अन्वयबोधोभवतीत्युच्यते तदा जिज्ञासायोग्यत्वं विवक्षणीयमिति शब्दमणौ व्यक्तम्, इयंचाऽऽकांक्षा प्राचामनुमता नवीनमते तु समभिव्याहार एवाऽऽकांक्षा, सा च ज्ञातैवोपयुज्यते इति नोक्तदोषावकाशसंभवः। परन्तु परानुमतामेवाऽऽकांक्षामनुसृत्येदं दूषणम्। अथाऽऽकांक्षा यदि स्वरूपसती हेतुः तदा योग्यताऽऽसत्तिमत्पदकदंबत्वमेव हेतुरस्तु तयोर्द्वयोरपि निश्चितयोरेव शाब्दबोध हेतुत्वात्। न च योग्यतासंशयादपि शाब्दबोधस्यानुभविकतया तन्निश्चयोपि नावश्यक इति वाच्यम्। यतोबाधविरहस्य योग्यतात्वे एव तथा, बाधसंशयस्याऽप्रतिबन्धकतया बाधाभावसंशयेपि शाब्दबोधोत्पत्तेः। अन्वयप्रयोजकरूपवत्वस्य योग्यतात्वे तु न तथा, अन्वयप्रयोजकरूपसंशये शाब्दबोधानुत्पत्तेरिति चेन्न। अयमेति पुत्रोराज्ञः पुरुषोपसार्यतामित्यत्र "राज्ञः पुत्रेण सहान्वये" निराकांक्षयोः राजपुरुषपदयोर्व्यभिचारात्। एतेन हेतौ आकांक्षानिवेशप्रयोजनमपि सूचितम्। एवं वन्हिनासिञ्चतीत्यादौ संसर्गबोधापत्तिः, योग्यताभ्रमे तु भवत्येव बोधः। आसत्त्यनिवेशे गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यादौ अन्वयबोधापत्ति र्बोध्या।

इदमुपलक्षणम् अर्थज्ञानमेव प्रवर्तकं, न तु तद्विषयकज्ञानज्ञानम्, गौरवात्, इदं रजतमित्यादिज्ञानात्प्रवृत्तिदर्शनेन व्यभिचाराच्च। यद्यपि रजतविषयकज्ञानज्ञानमपि रजतविषयकं तथापि तस्य रजतत्वप्रकारताकत्वं नास्ति। प्रवर्तकज्ञानं तु तथाविधमेव। अन्यथा भ्रान्तस्येव भ्रान्तिज्ञस्यापि प्रवृत्त्यापत्तेः। एवं अनुमिते-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

किंच सर्वत्रशाब्दस्थले यदि व्याप्तिज्ञानं कल्प्यते तदा सर्वत्रानुमितिस्थले पदज्ञानं कल्पयित्वा शाब्दबोधएव किं न स्वीक्रियतामिति ध्येयम् ॥१४१॥

इसमें कोई प्रमाण नहीं है। दूसरी बात यह है कि सर्वत्र शाब्दबोधस्थल में (वैशेषिकलोग) यदि व्याप्तिज्ञान की कल्पना करके ही शाब्दबोध का अनुमिति में अन्तर्भाव करते हैं तब सर्वत्र अनुमितिस्थल में पदज्ञान की कल्पना करके अनुमिति का ही शाब्दबोध में अन्तर्भाव करके अनुमितिस्थल में शाब्दबोध ही क्यों न मान लिया जाय ॥१४१॥

व्यापकतावच्छेदकप्रकारकत्वनियमात् स्मारितपदार्थसंसर्गपूर्वकत्वसिद्धावपि रजतप्रमापूर्वकत्वमसिद्धमेव। न च तन्मात्रात् रजतार्थिनः प्रवृत्तिः। अतः प्रवृत्त्युपयोगिज्ञाननिर्वाहार्थं शब्दस्य प्रमाणान्तरत्वं स्वीकार्यम्।

वस्तुतो वाक्यार्थबोधस्याऽनुमितित्वे सत्येव आकांक्षादिमत्पदसमूहत्वलिंगकत्वं कल्प्यम्, परन्तु अनुमितित्वमेवा सिद्धम्, प्रमाणाभावात् शाब्दबोधोऽनुमितिः लिंगजत्वादित्यनुमानं तु स्वरूपासिद्धम्। न चाऽस्तित्वेन गामनुमिनोमीत्यनुव्यवसाय एव तत्र मानमिति वाच्यम्। अस्तित्वेन गामनुमिनोमीत्यनुव्यवसायाभावात्। प्रत्युताऽस्तित्वेन गौश्रुतोनत्वनुमित इत्येवानुभवात्। तादृशानुव्यवसायानंगीकारे वन्ह्याद्यनुमितिः वन्ह्यादिपदज्ञानजन्या अनुमितित्वादित्यनुमानेन पदजन्यत्वं प्रसाध्य अनुमितिः शाब्दबोधः पदजन्यत्वादित्यनुमानेन शाब्दत्वसिद्धौ अनुमानस्यैव प्रमाणान्तरत्वं भज्येते त्याशयवानाह। **नहीति** शब्दश्रवणानन्तरं सर्वत्रेति योजना। **व्याप्तिज्ञाने प्रमाणमिति**। व्याप्तिज्ञानकल्पकप्रमाणमित्यर्थः। ननु अनुमितिरूपकार्यान्यथानुपपत्तिरेव मानमिति चेत्तदाह। **किंचेति**। **कल्प्यते इति**। अनुमित्यात्मककार्यान्यथानुपपत्त्या इत्यादिः। **स्वीक्रियता मिति**। तस्मादेकेनाऽपरस्यापलापाऽसंभवात् शब्दस्यापि पृथक् प्रामाण्यमावश्यकमिति भावः।

न चाऽनुमितिः न शाब्दबोधः समानविषयकप्रत्यक्षसामग्र्यभावजन्यत्वादित्यनुमानेनानुमितौ शाब्दान्यत्वं साधनीयमिति वाच्यम्। शाब्दबोधोनानुमितिः समानविषयकप्रत्यक्षसामग्र्यभावजन्यत्वादित्यनुमानेनानुमित्यन्यत्वसाधने बाधकाभावात्। न च तथापि अनुमितेः पदजन्यत्वं प्रसाध्यान्वयबोधत्वस्वीकारो न युज्यते, शाब्दबोधे आकांक्षाद्यवगमस्य हेतुत्वात्, वन्ह्याद्यनुमितौ तु पूर्वमाकांक्षाज्ञानाऽसंभवात्कथमन्वयबोधत्वमिति वाच्यम्। घटादिपदैरर्थस्य घटादेः स्मरणे सति तदीयव्याप्तेरिव वन्ह्याद्यर्थैः वन्ह्यादिपदस्य स्मरणोत्तरं तत्राऽऽकांक्षावगमस्य सुवचत्वादित्यास्तां विस्तरः।

एवं गवयपदं गवयत्वप्रवृत्तिनिमित्तकमित्यनुमितावपि साध्याप्रसिद्धिः, पूर्वं गवयत्वस्यानुपस्थितत्वात्। व्याप्त्यप्रतिसन्धानेपि गवयत्वाश्रयो गवयपदवाच्य इति बुद्धेरनुभवसिद्धत्वाच्च।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्रैविध्यमनुमानस्य केवलान्वयिभेदतः।
द्वैविध्यं तु भवेद् व्याप्तेरन्वयव्यतिरेकतः ॥१४२॥

त्रैविध्यमिति। अनुमानं हि त्रिविधं-केवलान्वयि-केवलव्यतिरेकि-

अनुमान तीन प्रकार का है। केवलान्वयी-केवलव्यतिरेकी-अन्वय-व्यतिरेकिभेद से।

गवयपदं सप्रवृत्तिनिमित्तकं साधुपदत्वादित्यनुमानेनापि "गोत्वादिकं च तन्नत्रप्रवृत्तिनिमित्तमितिज्ञानकालेपि" गवयत्वप्रवृत्तिनिमित्तकत्वं न सिद्ध्यति। व्यापकतावच्छेदकरूपेणैवानुमितेर्व्यापकविषयत्वात्। तथा च गवयत्वप्रवृत्तिनिमित्तकत्वसाधनार्थं मानान्तरमावश्यकम्। एवं च विशिष्य गवयत्वप्रवृत्तिनिमित्तकत्वमुपमान फलम्।

ननु गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्यादेव शक्तिधीरस्तु गवयत्वविशिष्टोधर्मी गवयपदवाच्यो गोसदृशत्वादित्यनुमानाद्वा अस्तु इति चेत् अतिदेशवाक्यात् गोसदृशत्वं गवयपदशक्यतावच्छेदकं स्यात्, तच्चायुक्तम्, संभवति लघौ धर्मे गुरुधर्मस्यावच्छेदकत्वानभ्युपगमात्। अनुमानेन तु गवयत्वविशिष्टो-गोसदृश इति पक्षधर्मताबलाद् गवयत्वस्य शक्यतावच्छेदकत्व लाभः। व्यतिरेकेण गवादिर्दृष्टान्तः। तथा च गवये गवयपदस्य शक्तिग्रहः शब्दादनुमानाद्वा न भवितुमर्हति। गवयत्वस्य तेन पुंसाऽगृहीतत्वात्, न हि अगृहीतधर्मस्यावच्छेदकतया भानं संभवति विशेषणज्ञानस्य विशिष्टबुद्धौ हेतुत्वात्। तथा च नातिदेशवाक्याच्छक्तिग्रहसंभवः। यदा च गवयत्वं प्रत्यक्षं तदापि नातिदेशवाक्यात् गवयत्वविशिष्टे शक्तिग्रहसंभवः। अतिदेशवाक्यतोगवयत्वविशिष्टे गवयपदवाच्यत्वाप्रतीतेः। नाप्यनुमानात्, पक्षतावच्छेदकीभूतगवयत्वस्य पूर्वमगृहीततया पक्षतावच्छेदकावच्छेदेन परामर्शाऽसंभवात्। प्रत्यक्षस्य शक्तिग्रहेऽसामर्थ्यादित्यपि बोध्यम्। अतः प्रमाणान्तरमेवोपमानम्। न च सादृश्यमेव प्रवृत्तिनिमित्तमस्तु तस्य च पूर्वमुपस्थितत्वादिति वाच्यम्। तस्य गवयपदप्रवृत्तिनिमित्तत्वाभावात। तदुक्तमाचार्यैः—

सादृश्यस्याऽनिमित्तत्वात् निमित्तस्याऽप्रतीतितः।
समयोदुर्ग्रहः पूर्वं शब्देनानुमयापि वा इति।

समयः शक्तिरूपसंबन्धः। न च तथापि उपमानस्य कथं शक्तिग्राहकत्वम्, व्यवहारादपि शक्तिग्रहेण व्यभिचारादिति वाच्यम्। कार्यतावच्छेदककोटौ अव्यवहितोत्तरत्वनिवेशेन व्यभिचारविरहात।

संबन्धस्य परिच्छेदः संज्ञायाः संज्ञिना सह।
प्रत्यक्षादेरसाध्यत्वादुपमानफलं विदुरित्याचार्याः।

एवमुपमिनोमि इत्यनुव्यवसायसिद्धोपमितित्वजातिमत्वं लक्षणं बोध्यम्। १४१

इति शब्दोपमानयोः पृथक् प्रामाण्यनिरूपणम्।

त्रैविध्यमिति अत्र त्रिविधत्वं साध्यम्, तच्च केवलान्वयित्वकेवलव्यतिरेकित्व अन्वयव्यतिरेकित्वगतं त्रित्वम्, तस्य साध्यता च स्वाश्रयाश्रयत्व सं०। उद्देश्यता-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अन्वयव्यतिरेकिभेदात्। तत्रासद्विपक्षः केवलान्वयी, यथा घटोऽभिधेयः प्रमेयत्वादित्यादौ, तत्र हि सर्वस्यैवाभिधेयत्वाद्विपक्षासत्त्वम्।

जिस साध्य का विपक्ष अप्रसिद्ध हो तादृशसाध्यक जो अनुमिति, उस अनुमिति का कारण जो अनुमान उसे केवलान्वयी अनुमान कहते हैं। जैसे—"घटोऽभिधेयः प्रमेयत्वात्" यहाँ पर अभिधेयत्वरूपसाध्य के अभाववाला कोई भी नहीं है जिसे कि विपक्ष कहा जाय, अतः यहाँ विपक्ष

वच्छेदकसमनियतसंख्यावत्वं विधप्रत्ययार्थः। समनियतत्वं च व्याप्यत्वे सति व्यापकत्वम्। तथा चोद्देश्यतावच्छेदकीभूताऽनुमानत्वस्य व्याप्यत्वं व्यापकत्वं च तादृशसंबन्धेन त्रित्वे स्तीति। अत्र संख्यायामुद्देश्यतावच्छेदकसामानाधिकरण्य-मात्रोक्तौ केवलान्वयित्वगतैकत्वमादाय "अनुमानस्यैकविधत्वप्रसंगः, व्याप्यत्व-मात्रोक्तौ स एव दोषः, अतोव्यापकत्वोपादानम्। व्याप्यत्वोपादानं तु केवलान्वयित्व-केवलव्यतिरेकित्व-अन्वयव्यतिरेकित्वघटत्वगतचतुष्टुसंख्यामादाय अनुमानस्य चतु-र्विधत्ववारणाय। न चैवपि अनुमानत्व केवलान्वयित्व-केवलव्यतिरेकित्व-अन्वय-व्यतिरेकित्व-गतचतुष्टमादाय अनुमानस्य चतुर्विधत्वापत्तिरिति वाच्यम्। संख्यायां वस्तुमदन्यत्वस्यापि विशेषणीयत्वात्। वस्तुमत्ता च स्ववृत्तित्व-स्वसमानाधिकरण-स्वेतरवृत्तित्वोभवसंबन्धेन। तथा च अनुमानं अनुमानत्वसमनियततादृशत्रित्वसंख्या-वत्-केवलान्वयि-केवलव्यतिरेकि-अनुन्वयव्यतिरेकिभेदादिति हेतुः—तदर्थश्च केवलान्व-यिभेद-केवलव्यतिरेकिभेद-पन्वयव्यतिरेकिभेद-एतदन्यतमस्मादिति। हेतुतावच्छेदक-संबन्धश्च स्वनिरूपितप्रतियोगितावत्वमिति।

तत्र। तेषुमध्ये। असद्विपक्ष इति। असन् विपक्षोयस्येति व्युत्पत्तिः। न च सिद्ध्यसिद्धिभ्यां व्याघातः। अत्यन्ताभावाऽप्रतियोगिसाध्यकत्वंकेवलान्वयित्व-मितिविवक्षणात्। विपक्षाऽसत्त्वमिति। विपक्षविरहइत्यर्थः। न वाच्यत्वाभावाधि-करणमिति यावत्; अभिधानेऽनभिधाने वा विपक्षत्वव्याघादितिभावः। अयं भावः— अभिधेयत्वं यदधिकरणनिष्ठात्यन्ताभावप्रतियोगितया अभिमतं तदधिकरणमेवविपक्षः स्यात्, तदधिकरणस्य शब्दवाच्यत्वे विपक्षत्वस्य—"अभिधेयत्वाभाववत्वस्या-प्रसिद्धिः, प्रतियोग्यभावयोरेकत्राऽसत्वात्। विपक्षस्याऽनभिधाने "शब्दा-ऽवाच्यत्वे—" विपक्षत्व व्याघातादिति-अभिधेयत्वाभावाधिकरणत्वाऽ प्रसिद्धेः—शब्द-जन्यज्ञानाऽविषयत्वेनालीकत्वादिति ध्येयम्।

न चाऽत्यन्ताभावाऽप्रतियोगित्वस्य केवलान्वयित्वे गगनाभावस्य कपि-संयोगाभावस्य च केवलान्वयित्वानुपपत्तिः, तयोः स्वाभावप्रतियोगित्वादिति वाच्यम्। प्रथमानुपपत्तिवारणाय वृत्तिमत्वमभावे विशेषणीयम्। द्वितीयानुपपत्ति-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

असत्सपक्षः केवलव्यतिरेकी, यथा पृथिवीइतरेभ्योभिद्यते गन्धवत्त्वादित्यादौ, तत्र हि जलादित्रयोदशभेदस्य पूर्वमनिश्चितया निश्चितसाध्यवतः सपक्षस्याभाव इति।

अप्रसिद्ध है क्योंकि सभी अभिधेय हैं। जिस साध्य का सपक्ष अप्रसिद्ध हो तादृशसाध्यकानुमितिकरण जो अनुमान उसे केवलव्यतिरेकी अनुमान कहते हैं। जैसे–'पृथिवी इतरेभ्योभिद्यते गन्धवत्वात्'' यहाँ पर जलादि जो त्रयोदश (जल है आदि में जिन्हों के ऐसे जो जलादित्रयोदश अर्थात् जल के सहित १४ चतुर्दश—''१-जल, २-तेज, ३-वायु, ४-आकाश, ५-काल, ६-दिक्, ७-आत्मा, ८-मन। एवं—१-गुण, २-कर्म, ३-सामान्य, ४-विशेष, ५-समवाय, ६-अभाव।'' उनका भेद रूप जो साध्य उस साध्य का पूर्व में कहीं निश्चय (प्रसिद्धि) न होने के नाते 'निश्चित साध्यवात्' सपक्ष अप्रसिद्ध है। (अर्थात् जलादि रूप जो इतर १४ चतुर्दश उनका भेदात्मक जो साध्य है वह पृथिवी में तो प्रसिद्ध हो नहीं सकता कारण कि पृथिवी तो पक्ष है और पक्ष में हमेशा साध्य का सन्देह ही रहा करता है। और जलादि में जलादि का भेद इस लिये नहीं रह सकता है कि स्व में स्व का भेद सर्वथा बाधित है—अथ च सपक्ष वह कहलाता है जिस में साध्य का निश्चय हो, क्योंकि "निश्चित साध्यवान् सपक्षः" अतः यहाँ पर सपक्ष के सर्वथा अप्रसिद्ध होने के नाते "पृथिवी इतरेभ्योभिद्यते" इत्यादि अनुमान केवल व्यतिरेकी अनुमान कहलाता है)। और जिस अनुमान में सपक्ष तथा विपक्ष दोनों विद्यमान हों वह अनुमान अन्वयव्यतिरेकि कहलाता है। जैसे "पर्वतो वन्हिमान् धूमात्" यहाँ पर सपक्ष महानस है क्योंकि महानस में साध्य (वन्हि) प्रसिद्ध (निश्चित) है। और विपक्ष जलहृद प्रसिद्ध है क्योंकि जलहृद में साध्याभाव (वन्ह्यभाव) का निश्चय है (निश्चितसाध्याभाववान् विपक्षः)।

वारणाय प्रतियोगिवैयधिकरण्यमभावे विशेषणीयम्। तथा च स्वावच्छेदकसंबन्धेन स्वाश्रयानधिकरणवृत्त्यभावीयतत्संबन्धावच्छिन्न प्रतियोगित्वाभाववत्वमेव तत्संबन्धेन केवलान्वयित्वम्। प्रतियोगिता विशिष्टप्रतियोगित्वाभाववत्वं केवलान्वयित्वमित्यनुगमः। वै० स्वतादात्म्य-स्वविशिष्टाधिकरणवृत्त्यभावीयत्व-स्वावच्छेदकसंबन्धावच्छिन्नत्वएतत्त्रितयसंबन्धेन। अधिकरणे स्ववै० स्वाश्रयाधिकरणत्वसंबन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्वसंबन्धेनेति। एवं च प्रतियोगिव्यधिकरण-वृत्तिमदभावाप्रतियोगिसाध्यकानुमितिकरणत्वं केवलान्वयित्वमिति-समुदितार्थः।

असत्सपक्ष इति। अत्रापि असन् सपक्षो "निश्चितसाध्यवान्" यस्येति यथाश्रुतार्थे पूर्ववद्व्याघातोबोध्यः। प्रकृतहेतुधर्मिकसाध्यसहचारग्रहाऽजन्या या प्रकृतहेतुका अथ च अवच्छिन्नवृत्तिकान्यविरहप्रतियोगिसाध्यकाऽनुमितिस्तत्करणत्वं केवलव्यतिरेकित्वम्। अन्वयव्यतिरेकिणि अतिव्याप्तिवारणायाऽजन्यान्तम्। तन्मानोक्तौ च अन्वयसहचाराऽग्रहदशायां "इदंवाच्यंज्ञेयत्वादित्यत्र" केवलान्वयिनि-अतिव्याप्तिः, अन्वयसहचाराऽग्रहदशायामपि ज्ञेयत्वहेतोः अत्यन्ताभावाप्रतियोगिसाध्यकत्वरूपकेवलान्वयित्वात्, व्यतिरेकाऽप्रतियोगित्वाच्च। अभावेऽवच्छिन्न-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अन्वयव्याप्तिरुक्तैव व्यतिरेकादिहोच्यते ।
साध्याभावव्यापकत्वं हेत्वभावस्य यद्‍ भवेत् ॥१४३॥

वृत्तिकान्यत्वविशेषणाच्च "अन्वयसहचाराऽग्रहदशायां "संयोगाभाववान् वाच्यत्वा दित्यत्र" केवलान्वयिनि नातिव्याप्तिः, संयोगाभावाभावस्याऽवच्छिन्नवृत्तिकान्यत्व-विरहात् । उदाहरणमाह । **यथेति** । **इतरेभ्यो भिद्यते इति** । पृथिवीतरभेदव-तीत्यर्थः । अत्र "योगन्धवान् स पृथिवीतरभिन्नः" इत्यन्वयदृष्टान्तोनास्ति पृथिवी-मात्रस्य पक्षत्वात्, तदेवाह । **जलादित्रयोदशभेदस्येति** । त्रयोदशसु भेद इति त्रयोदशभेदः । जलादीनां त्रयोदशभेद इति जलादित्रयोदशभेदस्तस्येति विग्रहः । जलादित्रयोदशसु जलादिचतुर्दशप्रतियोगिकभेदा इत्यर्थः । जलादिप्रतियोगिकचतुर्दश भेदानां मध्ये एकैकभेदस्य स्वप्रतियोगिभिन्नत्रयोदशसु प्रसिद्धस्येति यावत् । तादृशैकै-कभेदघटितभेदचतुर्दशत्वावच्छिन्नस्येति भावः । **पूर्वमिति** । अनुमितिपूर्वमित्यर्थः । **अप्रसिद्धतयेति** । तादृशभेदचतुर्दशस्य क्वाप्यप्रसिद्धतयेत्यर्थः । तादृशभेदचतुर्दश-त्वावच्छिन्नाधिकरणतायाः पृथिवीभिन्ने कुत्राप्यवर्तमानत्वात्, पृथिव्यां तादृशा-धिकरणतासत्वेपि अनुमितेः पूर्वं तत्राऽनिश्चितत्वादिति भावः ।

अन्वयव्यतिरेकिणं लक्षयति । **सत्सपक्षविपक्ष इति** । प्रकृतहेतुधर्मिकसाध्य-सहचारग्रहजन्यव्याप्तिज्ञानजन्यप्रकृतहेतुकव्यतिरेकिसाध्यकानुमितिकरणत्वमित्यर्थः । उदाहरणमाह । **यथेति** । **सपक्षस्य**—निश्चितसाध्यवतः । **विपक्षस्य**—निश्चित-साध्याभाववतः ।

व्याप्तिं विभजते । **मूले-द्वैविध्यंतु इति** । एवकारार्थकस्तुशब्दः । द्वैविध्य-मेवेत्यर्थः । **अन्वयव्यतिरेकतः इति** । अभेदे पंचमी—अन्वयाभिन्ना व्याप्तिः, व्यति-रेकाऽभिन्ना व्याप्तिश्चेत्यर्थः । १४२ ।

इत्यनुमानत्रैविध्यनिरूपणम्

व्यतिरेकादिति । व्यतिरेकव्याप्तिरित्यर्थः । **तत्र** । लिंगत्रयमध्ये । हि-हेतौ । साध्यतावच्छेदकरूपेणसाध्यनिश्चयाभावादिति यावत् । **व्यतिरेकिणि इति** । व्यतिरेकि साध्यकानुमितौइत्यर्थः । **व्यतिरेकव्याप्तिज्ञानमिति** । व्यतिरेकव्याप्तिज्ञानमेवेत्यर्थः । **तदर्थं** । व्यतिरेकव्याप्तिज्ञानार्थं । **मूले-साध्याभावव्यापकत्वमिति** । अथ साध्या-भावव्यापकत्वस्य व्याप्तित्वे तस्य स्वरूपसंबन्धेन हेत्वभावनिष्ठत्वेपि हेतुनिष्ठत्वाभावाद् हेतौ व्याप्यत्वव्यवहारोनुपपन्न इति चेन्न । स्वाश्रयीभूताभावप्रतियोगित्वसंबन्धेन तस्य हेतुनिष्ठत्वान्नानुपपत्तिरित्याह । **साध्याभावव्यापकीभूताभावेति** । अत्र साध्याभावसमानाधिकरणेत्युक्तौ धूमाभावाधिकरणह्रदवृत्त्यभावप्रतियोगित्वस्य वन्हौ सत्वाद् धूमवान् वन्हेरित्यादावतिव्याप्तिवारणाय व्यापकेति । हेत्वभावे साध्या-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सत्सपक्षविपक्षोऽन्वयव्यतिरेकी, यथा वन्हिमान् धूमादित्यादौ तत्र सपक्षस्य महानसादे विपक्षस्य जलहृदादेश्च सत्त्वमिति ॥

तत्र व्यतिरेकिणि व्यतिरेकव्याप्तिज्ञानं कारणं तदर्थं व्यतिरेकव्याप्तिं निर्वक्ति साध्यभावेति । साध्याभावव्यापकीभूताभावप्रतियोगित्वमित्यर्थः । अत्रेदं बोध्यम्—यत्सम्बन्धेन यदवच्छिन्नं प्रति येन सम्बन्धेन येन रूपेण व्यापकता गृह्यते तत्सम्बन्धावच्छिन्नप्रतियोगिताकतद्धर्मावच्छिन्नाभाववत्ता-ज्ञानात्तत्सम्बन्धावच्छिन्नप्रतियोगिताकतद्धर्मावच्छिन्नाभावस्य सिद्धिरिति । इत्थं च यत्र विशेषणतादिसम्बन्धेनेतरत्वव्यापकत्वं गन्धात्यन्ताभावे गृह्यते तत्र गन्धाभावाभावेनेतरत्वात्यन्ताभावः सिद्ध्यति ।

व्यतिरेकी अनुमान में व्यतिरेक व्याप्तिज्ञान कारण होता है—इसलिये व्यतिरेक व्याप्ति का निर्वचन करते हैं—साध्याभावेति । साध्याभाव का व्यापकीभूत जो अभाव तादृशाभावप्रतियोगित्व ही व्यतिरेकव्याप्ति है । यहाँ पर यह जानना चाहिये कि—जिस सम्बन्ध से 'यदवच्छिन्न' यद्धर्मावच्छिन्न के प्रति (जिसको) जिस सम्बन्ध से तथा जिस रूप से व्यापकता गृहीत हो उस सम्बन्ध से अवच्छिन्न (युक्त) है प्रतियोगिता जिसकी ऐसा जो तद्धर्मा वच्छिन्न प्रतियोगिता कतद्धर्मावच्छिन्नाभाव की सिद्धि (अनुमिति) होती है । (जैसे—वन्हिमान् धूमात् यहाँ पर—यत् संबन्धेन (संयोगसम्बन्धेन) यदवच्छिन्नं प्रति (धूमत्वावच्छिन्नं प्रतियेन सम्बन्धेन (संयोगसम्बन्धेन) येन रूपेण (वन्हित्वेन रूपेण) वन्हि में व्यापकता ग्रह होने से तत्सम्बन्धा-वच्छिन्न (संयोग सम्बन्धावच्छिन्न) प्रतियोगिताक तद्धर्मावच्छिन्न (वन्हित्वाववच्छिन्न) के अभाववत्ता (अभाव प्रकारक) ज्ञान से तत्सम्बन्धावच्छिन्न (संयोगसम्बन्धावच्छिन्न) प्रतियोगिताक तद्धर्मावच्छिन्न (धूमत्वावच्छिन्न) के अभाव की सिद्धि (अनुमिति) जलहृद में हो जाती है 'हृदो धूमाभाववान् वन्ह्यभावात्' इत्यादि रूप से) इत्थं चेति—इस प्रकार "पृथिवी इतरभिन्ना गन्धात्" यहाँ पर यदि विशेषणता (स्वरूप) सम्बन्ध से इतरत्व की व्यापकता का गन्धात्यन्ताभाव में ग्रहण (निश्चय) होता है तो वहाँ व्यापक जो गन्धाभाव उसके अभाव अर्थात् गन्धाभावाभाव (गन्ध) से व्याप्य (इतरत्व) का अत्यन्ताभाव (इतरत्वा-त्यन्ताभाव) सिद्ध होता है । (पृथिवी इतरत्वात्यन्ताभाववती गन्धात् यह अनुमिति होती

भावव्यापकत्वं च साध्याभावाधिकरणवृत्त्यत्यन्ताभावाप्रतियोगित्वम्, साध्या-भावाधिकरणवृत्तिभेदप्रतियोगितानवच्छेदकत्वं वा । अत्र साध्याभावे हेत्वभावे च प्रतियोगिवैयधिकरण्यं निवेशनीयम्, तेन कपिसंयोगी एतद्वृक्षत्वात्, एतद्वृक्षत्ववान् कपिसंयोगादित्यादौ नाव्याप्त्यतिव्याप्ती । अथ वा साध्यमभावोयस्येतिव्युत्पत्त्या-साध्यवद्भेदः एवं हेत्वभावस्येत्यत्रापि बहुव्रीह्याश्रयणेन हेतुमद्भेदोलभ्यते तथा च साध्यवद्भेदव्यापकीभूतभेदप्रतियोगितावच्छेदकत्वमित्यर्थलाभान्नोपादेयमेव प्रति-योगिवैयधिकरण्यद्वयम् । यथा अन्वयिनि व्याप्यतावच्छेदकसंबन्धेन व्याप्यवत्ता-ज्ञानात् व्यापकतावच्छेदकसंबन्धेन व्यापकःसिद्ध्यति । तेन न धूमावयवे संयोगेन

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यत्र तु तादात्म्यसंबन्धेनेतरव्यापकत्वं गन्धाभावे गृह्यते तत्र तादात्म्यसम्बन्धेनेतराभावः सिद्धयति। स एव चान्योन्याभावः। एवं यत्र संयोगेन धूमं प्रति संयोगसंबन्धेनवन्हेर्व्यापकतागृह्यते तत्र संयोगसंबन्धावच्छिन्नप्रतियोगिताकवन्ह्यभावेन ह्रदे संयोगसंबन्धावच्छिन्नप्रतियोगिताकधूमाभावः सिद्धयति।

अत्र च व्यतिरेक व्याप्तिग्रहे व्यतिरेकसहचारग्रहः कारणम्।

है) और जब कि तादात्म्यसम्बन्ध से इतरत्व व्यापकता गन्धाभाव में गृहीत होती है तब तादात्म्यसम्बन्ध से ही इतर का अभाव सिद्ध होता है यही तादात्म्य सम्बन्ध से सिद्ध होने वाला अभाव अन्योन्याभाव (इतर भेद) कहलाता है।

इसी प्रकार जहाँ सयोगसम्बन्ध से धूम के प्रति संयोगसम्बन्ध से वन्हि में व्यापकता गृहीत होती है वहाँ संयोग सम्बन्धावच्छिन्न प्रतियोगिताकवन्ह्यभाव (हेतु) से जलह्रद में संयोग सम्बन्धावच्छिन्न प्रतियोगिताक धूमाभाव सिद्ध हो जाता है। (अर्थात् ह्रदो धूमाभाववान् वन्ह्य भावात्) और यहाँ केवलव्यतिरेकि हेतुकस्थल में व्यतिरेक व्याप्ति ज्ञान के प्रति व्यतिरेक सहचार ज्ञान अर्थात् यत्र साध्याभावस्तत्र हेत्वभावः कारण है।

वन्हिधीः, न वा संयोगेन धूमाधिकरणे पर्वते समवायेन वन्हिधीः। तथा व्यतिरेकिणि व्यापकतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकव्यापकाभावेन व्याप्यतावच्छेकसंबन्धावच्छिन्नप्रतियोगिताकव्याप्याभावः सिद्धयति इत्याह। अत्रेदं बोध्यमिति। यत्संबन्धावच्छिन्नेति। व्यापकतावच्छेदकसंबन्धावच्छिन्नेत्यर्थः। तद्धर्मावच्छिन्नाभाववत्ताज्ञानादिति। व्यापकतावच्छेदकधर्मावच्छिन्नाभाववत्ताज्ञानादित्यर्थः। तत्संबन्धावच्छिन्नेति। व्याप्यतावच्छेदकसंबन्धावच्छिन्नेत्यर्थः। तद्धर्मावच्छिन्नाभावस्य सिद्धिरिति। व्याप्यतावच्छेदकावच्छिन्नप्रतियोगिताकव्याप्याभावस्यसिद्धिरित्यर्थः। तेन न समवायेन वन्हिविरहिणि महानसे संयोगसंबन्धावच्चिन्नप्रतियोगिताकधूमाभावसिद्धिः, न वा संयोगेन वन्हिविरहिणि धूमावयवे समवायसंबन्धावच्छिन्नप्रतियोगिताकधूमाभावसिद्धिः। इत्थं चेति। व्यापकाभावेन व्याप्याभावानुमितिस्वीकारे चेत्यर्थः। यत्र। जलंगन्धाभाववत् पृथिवीतरत्वादित्यत्र। तत्र। तादृशस्थले। तथा च पृथिवी पृथिवीतरत्वाभाववती गन्धादित्यनुमानेन पृथिवीतरत्वात्यन्ताभावः सिद्धयतीति भावः।

यत्र तु इति। जलं गन्धाभाववत् जलादित्यत्रेत्यर्थः। तत्र। तादृशस्थले। सिद्धयतीति। पृथिवी इतरभेदवती गन्धादित्यनुमानेनेतरभेदसिद्धिरिति भावः। स एवेति। तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकाभाव एवेत्यर्थः। अत्र

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

केचित्तु व्यतिरेकसहचारग्रहेणाऽन्वयव्याप्तिरेव गृह्यते नतुव्यतिरेकव्याप्तिरपि कारणम् । यत्रव्यतिरेकसहचाराद् व्याप्तिग्रहः तद्व्यतिरेकीत्युच्यते,

कुछ आचार्य लोगों का कहना यह है कि (अनुमितिमात्र के प्रति अन्वयव्याप्तिज्ञान ही कारण है न कि व्यतिरेकव्याप्तिज्ञान) व्यतिरेकसहचार से भी अन्वय व्याप्ति का ही निश्चय होता है। अतः व्यतिरेकव्याप्तिज्ञान कारण ही नहीं है। (जिससे कि व्यतिरेक व्याप्ति का निश्चय व्यतिरेक सहचार से किया जाय)।

प्रश्न—जब कि सर्वत्र अन्वय व्याप्ति ज्ञान से ही अनुमिति होती है तब तो सभी हेतु अन्वयी ही कहलायेंगे—व्यतिरेकी हेतु ही अप्रसिद्ध हो जायगा।

उत्तर—जहाँ व्यतिरेकसहचार से व्याप्तिग्रह हुवा तत्स्थलीय हेतु ही व्यतिरेकी हेतु कहलाता है।

चेति। केवलव्यतिरेकिण्यपीत्यर्थः। **व्यतिरेकव्याप्तिग्रहे** इति। हेतौ साध्याभावव्यापकीभूताभावप्रतियोगित्वग्रहे इत्यर्थः। **व्यतिरेकसहचारग्रह** इति। साध्याभावोहेत्वभावसमानाधिकरण इत्यर्थः। तथा च व्यतिरेकसहचारेणैव व्यतिरेकव्याप्तिग्रहान्नान्वयसहचारग्रहापेक्षेति भावः। इदं चोपाध्यायमतम्, तन्मते व्यतिरेकव्याप्तिज्ञानमपि अनुमिति हेतुः, न तु व्यतिरेकसहचारेणा ऽन्वयव्याप्तिरेव गृह्यते इति। तथा च प्रकृतहेतुकप्रकृतसाध्यकानुमित्यौपयिकव्याप्तित्वव्यापकव्यतिरेकव्याप्तित्वकत्वं केवलव्यतिरेकिणोलक्षणम्।

आचार्यास्तु अनुमितिसामान्येऽन्वयव्याप्तिरेव कारणम्, न तु साध्याभावव्यापकीभूताभावप्रतियोगित्वज्ञानम् तथा, गौरवात्, केवलान्वयिनि "केवलान्वयित्वग्रहकालीनानुमितौ च" अभावात्। अथ साध्याभावव्यापकीभूताभावप्रतियोगित्वेन साध्यव्याप्यत्वमनुमेयम्, एवं च व्यतिरेकव्याप्त्याऽन्वयव्याप्तिमनुमाय यत्रानुमितिः स एव व्यतिरेकीत्युच्यते। तन्न। अन्वयव्याप्त्यनुकूलतया च तदुपन्यासे अन्वयव्याप्तिमनुपन्यस्य तदुपन्यासस्याऽप्राप्तकालत्वम्। न चैवं पृथिवीतरेभ्योभिद्यते गन्धवत्वादित्यादौ अनुमित्यनुपपत्तिः, तत्राऽन्वयसहचारग्रहाभावेनाऽ न्वयव्याप्तिग्रहाऽसंभवादितिवाच्यम्। तत्र व्यतिरेकसहचारेणैवाऽन्वयव्याप्तिज्ञानसंभवात्। अन्वयसहचारस्येव क्वचिद्व्यतिरेकसहचारस्य हेतुत्वस्वीकारात्। अत एवोक्तं "निरुपधिव्यतिरेकसहचारेणाऽन्वयव्याप्तिरेवगृह्यते" इति। एवं च साध्यभावधर्मिकस्वाभावसहचारग्रहाऽजन्यप्रकृतसाध्यव्याप्तिग्रहविशेष्यत्वं केवलान्वयित्वम्। "हेतुः साध्यसमानाधिकरण इति" अन्वयसहचारग्रहाजन्यव्यतिरेकसहचारग्रहजन्याऽन्वयव्याप्तिग्रहविशेष्यत्वं केवलव्यतिरेकित्वम्। उभयसहचारगृहीतान्वयव्याप्तिग्रहविशेष्यत्वमन्वव्यतिरेकित्वं निर्वाच्यमिति वदन्ति। तन्मतमुपन्यस्यति। **केचित्तु** इति। **व्यतिरेकसहचारेण**। व्यतिरेकसहचारज्ञानेन। **व्यतिरेकव्याप्तिरपिकारणमिति**। अनुमितावित्यादिः। **यत्र**।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

साध्यप्रसिद्धिस्तु घटादावेवजायते, पश्चात् पृथिवीत्वावच्छेदेन साध्यते इति वदन्ति ॥१४३॥

प्रश्न—इतरभेदात्मक साध्य सर्वथा अप्रसिद्ध है, क्योंकि इतर (जलादि) में तो इतर (जलादि) का भेद रहेगा नहीं स्व में स्व का भेद रह नहीं सकता है, पृथिवी (पक्ष) में अभी सिद्ध ही कर रहे हैं। अतः इतरभेदात्मकसाध्य के अप्रसिद्ध होने के नाते "पृथिवी इतरभिन्ना" यहाँ पर साध्याप्रसिद्धि ही क्यों न कह दी जावे।

उत्तर—पृथिवीत्व सामानाधिकरण्येन अर्थात् यत्किंचित् घटादिरूप पृथिवी में इतरभेद (साध्य) को प्रसिद्ध करके फिर पृथिवीत्वावच्छेदेन अर्थात् पृथिवीमात्र में इतरभेद सिद्ध कर देने से साध्याप्रसिद्धि दोष नहीं है ॥ १४३ ॥

विशेष्यकत्वं सप्तम्यर्थः। तस्य व्याप्तिग्रहेऽन्वयः। **व्यतिरेकसहचारादिति**। प्रयोज्यत्वं पंचम्यर्थः। **व्याप्तिग्रहः**। अन्वयव्याप्तिग्रहः। **तद्व्यतिरेकीत्युच्यते** इति। तल्लिङ्गं व्यतिरेकिशब्देन व्यवह्रियते इत्यर्थः। ननु कुत्रापि साध्यसहचारग्रहाऽसंभवात्कथमन्वयव्याप्तिग्रह इत्यत आह। **साध्यप्रसिद्धिस्तु** इति। साध्यनिश्चयश्चेत्यर्थः। **घटादावेव**। पक्षैकदेशघटादावेव। ननु सिद्धेः प्रतिबन्धकत्वात्कथमनुमितिरित्यत आह। **पश्चादिति**। साध्यनिश्चयोत्तरमित्यर्थः। **पृथिवीत्वावच्छेदेनेति**। तथा चावच्छेदावच्छेदेनानुमितौ सामानाधिकरण्येन सिद्धेरप्रतिबन्धकत्वादिति भावः। वदन्तीत्यत्वरसः, तद्बीजं तु तर्हि पृथिवी इतरभिन्ना गन्धवत्वाद् घटवदित्यन्वय्यनुमानस्यैव इतरभेदसाधकत्वे व्यतिरेकव्याप्त्युपन्यासोऽव्यर्थ एव स्यात्। यथा अयं घटः पूर्वानुभूतघटाऽभिन्नः तद्घटवृत्तिविलक्षणसंस्थानवत्वादित्यादिस्थैर्यसाधकाऽभेदानुमानवत्, घटसाधारणपक्षत्वेपि पक्षस्य दृष्टान्तत्वेऽविरोधात्। पक्षान्यत्वं हि न दृष्टान्तत्वे प्रयोजकम्, अपि तु साध्यवत्तया निश्चितत्वं प्रयोजकमिति।

इदमप्यातत्वः—यथाऽन्वयव्याप्तिज्ञानस्य व्यतिरेकव्याप्तिज्ञानविरहकालेऽनुमितिजनकत्वमनुभवसिद्धं तथाऽन्वयव्याप्तिज्ञानविरहस्थले व्यतिरेकव्याप्तिज्ञानस्य कारणतापि अनुभवसिद्धा। अन्वयव्याप्त्यनुपन्यासदशायां व्यतिरेकव्याप्त्युपन्यासस्याऽपर्यनुयोज्यत्वात्। तदुक्तम्—"**आस्तांतावदयंसुहृदुपदेशःकेवलव्यतिरेकिलक्षणंतावन्निर्व्यूढम्**" अस्यार्थः—अन्वयिनैवतावदितरभेदसिद्धौ किं व्यतिरेकोपन्यासेनेति सुहृदुपदेश इत्यर्थः। **केवलव्यतिरेकिलक्षणमिति**। केवलव्यतिरेकिस्वरूपमित्यर्थः। **निर्व्यूढमिति** अन्वयव्याप्त्यनुपन्यासदशायामपिव्यतिरेकव्याप्तिज्ञानादनुमितेरनुभवसिद्धत्वेन तस्यापि हेतुत्वादिति भावः।

अत्रेदंबोध्यम्। जलादीनां चतुर्दशान्योन्याभावाःत्रयोदशसु प्रसिद्धाः पृथिव्यां साध्यन्ते चतुर्दशत्वरूपेण। न च चतुर्दशान्योन्याभावानां प्रातिस्विकरूपेण त्रयोदशसु प्रसिद्धत्वेपि साध्यतावच्छेदकीभूतचतुर्दशत्वप्रकारेण सिद्ध्यभावात्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कथमनुमितिरिति वाच्यम् भिन्नाभिन्नाधिकरणस्थानामपि अभावानां चतुर्दशत्वादिना ज्ञानसंभवात्, भिन्नाधिकरणस्थितयोर्घटयोर्द्वौ घटौ इत्यादिप्रतीतिवत्। जलादिमिलितप्रतियोगिकाऽन्योन्याभावस्तु न साध्यः, तथासति "गगनमितरभिन्नमिति आकाशेतरत्वावच्छिन्नप्रतियोगिताकान्योन्याभावावगाहिन्या अनुमितेरनुपपत्तिः स्यात्, आकाशस्यैकव्यक्तित्वेन तत्रैकदेशेपि साध्यप्रसिद्ध्यसंभवात्। अतश्चतुर्दशान्योन्याभावा एव साध्याः। तथा चोक्तगन्धवत्त्वहेतोर्नान्वयित्वम्, न वाऽ साधारण्यम् एतेन

साध्याऽप्रसिद्धिर्वैधर्म्यं व्यर्थतोपनयस्य च।
अन्वयेनैवसिद्धिश्च व्यतिरेकिणि दूषणम्॥

इत्यपि प्रत्याख्यातम्। अस्यार्थस्तु पृथिवी इतरभेदवती इतरभेदात्मकसाध्यनिश्चये सति तादृशे साध्यनिश्चयधर्मिणि हेतोरभावे तु सपक्षविपक्षव्यावृत्ततयाऽसाधारण्यम्। हेतोः सत्वे तु अन्वयित्वम्। यत्र कुत्रचिद्धर्मिणिसाध्यप्रकारकनिश्चयविरहे तु संशयरूपपक्षताया अनुपपत्तिः, संशयकारणस्य साध्यप्रकारकनिश्चयाधीनस्य साध्यतदभावसहचरितधर्मवद्धर्मिज्ञानस्य विरहात्। सिषाधयिषाकारणस्य सिद्धिधर्मिकेष्टसाधनताज्ञानस्य चाऽभावात्, तस्य साध्यप्रकारकनिश्चयाधीनत्वात्। न च सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्य पक्षतात्वे नानुपपत्तिरिति वाच्यम्। तथापि तादृशानुमितेरनुपपत्तिः, विशिष्टवैशिष्ट्यावगाहिबुद्धौ विशेषणतावच्छेदकप्रकारकनिश्चयस्य कारणत्वात्।

किं च साध्याभावहेत्वभावयोरन्वयव्याप्तिः, व्याप्यस्य "साध्याभावस्य" न पक्षधर्मत्वम्, प्रकृतहेतोर्नव्याप्तत्वमिति वैषम्यम्। व्याप्तिपक्षधर्मताविशिष्टहेतुप्रतिपादनेनोपनयसार्थक्यं भवति। अत्र तु तदसंभवादुपनयवैयर्थ्यं च, अगृहीतव्याप्तिकस्य वस्तुनः उपनयेनाऽप्रतिपादनादिति पद्यतात्पर्यम्।

तत्रेदं बोध्यम्। इतरेषां जलादीनांभेदस्य घटे एव प्रसिद्धेः। वाय्वादेरतीन्द्रियस्यापि भेदस्य घटादौप्रत्यक्षतएव सिद्धत्वात्। अन्योन्याभावप्रत्यक्षे अधिकरणयोग्यतायास्तन्त्रत्वात्। नचैवं तर्हि घट एव दृष्टान्तोस्तु किं व्यतिरेकिणा।

ऋजुमार्गेणसिद्ध्यन्तं को हि वक्रेणसाधयेदिति" वाच्यम्। व्यतिरेकिलिंगं चेद्दोषरहितं तदाऽयमपि मार्गः ऋजुरेव। तथा च बोधयितुरन्वयव्यतिरेकसहचारग्रहे बुभुत्सोर्व्यतिरेकसहचारमात्रग्रहे बोधयितुरन्वयव्यतिरेकी—बुभुत्सोश्च केवलव्यतिरेकी अयं हेतुर्भवतीति न व्यतिरेकित्वहानिरित्याशयः। साध्याप्रसिद्धेर्निरासे तन्मूलकदोषाणां निरासः। ग्रहादिति। तथा च व्यतिरेकसहचारगृहीतव्याप्तिकव्यतिरेकिसाध्यकहेतुरेव केवलव्यतिरेकीत्युच्यते इति भावः। ननु व्यतिरेकव्याप्तिनिरपेक्षात् व्यतिरेकसहचारग्रहाच्चेदन्वयव्याप्तिज्ञानं व्यर्थमेव तर्हि व्यतिरेकव्याप्तिग्राहकोदाहरणमुपनयश्चेति चेत्—सत्यम्—धूमो वन्हिव्याप्यः वन्ह्यभावव्यापकीभूताभावप्रतियोगित्वादित्यनुमितिहेतुभूतव्यतिरेकव्याप्तिज्ञानजनकत्वेन व्यतिरेकसहचारस्यानुमित्यौपयिकान्वयव्याप्तिग्रहप्रयोजकत्वमस्तीति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तादृशहेतोरपि न व्यतिरेकित्वहानिरिति भावः। नापि वैयर्थ्यम्, साध्यान्वयव्याप्यस्य-हेतोः पक्षधर्मत्वात्। नाप्युपनयवैयर्थ्यम्। व्यतिरेकव्याप्तिप्रतिपादनद्वारा अन्वयव्याप्तिज्ञापनम्, तथाविधव्याप्यहेतोः पक्षधर्मत्वप्रतिपादनस्योपनयार्थत्वात्। नाप्यपसिद्धान्तः, तदुक्तम्—

नियम्यत्वनियन्तृत्वे भावयोर्यादृशीमते।
त एव विपरीते तु विज्ञेये तदभावयोरिति॥

हेत्वभावे साध्याभावव्यापकत्वं हेतौ साध्यव्याप्तिरेव, साध्याभावव्यापकीभूताभावप्रतियोगित्वस्य साध्यान्वयव्याप्तिनियतसत्ताकत्वात्, तत्साध्यकतद्धेतुकानुमितिप्रयोजकत्वाच्च। अथ च व्यतिरेकिणि साध्याप्रसिद्धिर्न दूषणम्, अपि तु भूषणम्। साध्याप्रसिद्धिश्च साध्यज्ञानाभावः। अत एव साध्यविशेष्यकानुमितिरुपपद्यते, साध्यविशेष्यकानुमितौ तु साध्यज्ञानाभाव एव पक्षतेति संक्षेपः॥१४३॥

इति व्यतिरेकव्याप्तिनिरूपणम्

मीमांसकमते वेदान्तिमते च व्यतिरेक्यनुमानं न प्रमाणम्। अर्थापत्तिप्रमाणेनैव गतार्थत्वात्। तथा हि इतरभेदं विना गन्धवत्त्वमनुपपन्नमतोगन्धवत्त्वेन इतरभेदकल्पना अर्थापत्तिरेव। अथ वा गन्धेन इतरभेदं पृथिव्यामनुमिनोमीत्यनुव्यवसायवत् गन्धानुपपत्त्या इतरभेदं कल्पयामीत्यनुव्यवसायेनार्थापत्तिरपि सिद्धैव, एकेना परस्य निषेधासंभवात, अनुव्यवसायस्योभयत्र तुल्यत्वात्। अर्थापत्तित्वं च आपादयामीत्यनुभवसिद्धोजातिविशेषः। न च व्यतिरेकव्याप्तिज्ञानजन्यानुमितित्वमेव तादृशानुभवविषयः इति वाच्यम्। अननुगतत्वात्, तदुपस्थितिं विनापि तादृशबुद्धेर्जायमानत्वात्।

अथाऽस्तु अर्थापत्तित्वं जातिविशेषः, स चानुमितित्वव्याप्य एव। न च तस्य तद्व्याप्यत्वे मानाभावः। व्यतिरेकव्याप्तिज्ञानजन्यज्ञाने ऽनुमिनोमीत्यनुव्यवसायस्याऽनुमितिसामग्रीजन्यत्वस्य च मानत्वात् इति चेन्न तत्र तादृशानुव्यवसायस्यैवाऽसिद्धेः। प्रत्युत न साक्षात्कृतं, न वा ऽनुमितं, परंतु अर्थापत्त्याऽवगतमित्येवानुभवात्।

अत्र विप्रतिपत्तिश्च व्यतिरेकव्याप्तिज्ञानं व्यतिरेकव्याप्यविषयकानुमितिभिन्नप्रमितिकरणं न वेत्याकारिका प्रमाणत्वं प्रत्यक्षादिचतुष्टयप्रमाणान्यतमत्वव्याप्यं न वा, प्रमात्वं प्रत्यक्षादिचतुष्टयप्रमित्यन्यतमत्वव्याप्यं न वेत्याकारिका बोध्या।

अर्थस्याऽऽपत्तिर्यस्मादिति बहुव्रीह्याश्रयणेन प्रमाणे अर्थापत्तिशब्दप्रयोगः। अर्थस्याऽऽपत्तिरिति षष्ठीतत्पुरुषाश्रयणेन प्रमायां तत्प्रयोगः।

उपपाद्यज्ञानेनोपपादककल्पनम्, अर्थापत्तिप्रमा।

येन विना यदनुपपन्नं तदुपपाद्यम्। यथा शतवर्षजीविनो गृहासत्वम्, तच्च वहिःसत्वं विना अनुपपन्नम्। व्याप्यस्यैवोपपाद्यत्वात्। उपपाद्यज्ञानमेवाऽर्थापत्तिप्रमाणम्। तथाचोपपादकाभावव्यापकीभूताभावप्रतियोगित्वमुपपाद्यत्वमिति फलितम्। येन विना अनुपपत्तिः, तदुपपादकम्, यथा प्रकृते वहिः सत्वम्,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अर्थापत्तेस्तु नैवेह प्रमाणान्तरतेष्यते।
व्यतिरेकव्याप्तिबुद्ध्याचरितार्था हि सा यतः ॥१४४॥

अर्थापत्तिरिति। अर्थापत्तिं प्रमाणान्तरं के च न मन्यन्ते। तथा

अर्थापत्ति प्रमाणान्तर है ऐसा मीमांसक वगैरह मानते हैं। तथाहि किसी व्यक्ति ने देवदत्त सौ वर्ष जीवेगा यह ज्योतिःशास्त्र से अच्छी प्रकार निश्चय कर लिया। इसके बाद देवदत्त जीवी (जिन्दा) है तथा घर में नहीं है ऐसा प्रत्यक्ष से उसे ज्ञान हुवा। तब ऐसी परिस्थिति

तद्ज्ञानमर्थापत्तिप्रमा। व्यापकस्यैवोपपादकत्वात्, अन्यथा किं कस्योपपादकमिति नियामकाभावेन जीविनोगृहासत्वं घटं विना ऽनुपपन्नमित्यपि किं न स्यात्। अथ एतावतासिद्धं उपपादकज्ञानकारणं यदुपपाद्यज्ञानं तदर्थापत्तिः प्रमाणम्, व्यापकज्ञानकारणं व्याप्यज्ञानमिति यावत्। तच्चानुमानमेव, अनुमानप्रमाणभेदस्याऽऽप्रतीयमानत्वादिति चेन्न पूर्वोक्तानुव्यवसाययोरेव परस्परवैलक्षण्येन तद्भेदात्।

इदमत्रावधेयम्। अर्थापत्तेर्नान्वयव्याप्तिज्ञाने ऽन्तर्भावः, जीवित्ववहिः सत्वयोः सहचारदर्शनाभावात् जीवित्वस्यस्वव्यापकसाध्यसमानाधिकरण्यरूपाऽन्वयव्याप्तिग्रहाभावात्। प्रत्युत जीवित्वं सत्तामात्रव्याप्यमिति व्याप्तिग्रहस्यैव संभवात्, जीवित्वमात्रेण सत्तामात्रमनुमेयं ननु वहिःसत्वमिति। न च जीवित्व। ज्ञानात् सत्वं, गृहासत्वज्ञानाच्च वहिःसत्वमनुमेयम् इति वाच्यम्। गृहासत्वस्य वहिःसत्वव्याप्यत्वाभावेन गृहासत्वानुमित्यनुपपत्तेः। ननु मा भूदर्थापत्तेरन्वय्यनुमानेऽन्तर्भावः, व्यतिरेक्यनुमाने एवान्तर्भावोस्तु तथा हि दिवाभोजनाभाववतो रात्रिभोजनाभावे पीनत्वाभावः स्यादिति साध्यव्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्तिबलेन पीनत्वज्ञानात्तस्य रात्रिभोजनानुमितिः सुघटा इति चेद् व्यतिरेकव्याप्तेरेवानुपगमात्। ननु जीविनोगृहासत्वं वहिःसत्वव्याप्यमतोजीवन् देवदत्तोवहिरस्ति गृहाऽसत्वात् गृहाऽस्थितस्वशरीरवदित्यनुमानत्वं घटते अर्थापत्तेः; न प्रमाणान्तरत्वमिति नाशंकनीयम्। अनुव्यवसायवैलक्षण्यादर्थापत्तेर्नानुमानत्वम्, अपि तु प्रमाणान्तरत्वमेवेति उक्तप्रायम्। साचाऽर्थापत्तिर्द्विविधा दृष्टार्थापत्तिः, श्रुतार्थापत्तिश्च। यत्रदृष्टेन उपपाद्येन उपपादककल्पनमाद्या, यथा पीनोयं दिवा न भुङ्क्ते इत्यादि। श्रुतेन उपपाद्येनोपपादककल्पनं द्वितीया यथाजीवन्देवदत्तोगृहेनास्तीति। श्रुतार्थापत्तिश्च द्विविधा अभिधानानुपपत्ति अभिहितानुपपत्ति भेदात्। अभिधानस्य तात्पर्यस्य अनुपपत्तिराद्या यथा द्वारमित्यत्र पिधेहीति पदाध्याहारः। पदाध्याहारं विना तात्पर्यस्याऽनुपपन्नत्वात्। अत्र तात्पर्यमुपपाद्यम्, पदाध्याहारश्चोपपादकः। अभिहितस्य अर्थस्यानुपपत्तिर्द्वितीया। यथा स्वर्गकामोयजेतेत्यादि, श्रुतस्य वाक्यार्थस्य स्वर्गसाधनत्वरूपस्य अपूर्वं विना नुपपत्तिरिति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हि यत्र देवदत्तस्य शतवर्षजीवित्वं ज्योतिःशास्त्रादवगतं जीविनोगृहासत्त्वं च प्रत्यक्षादवगतं तत्र शतवर्षजीविनो गृहासत्त्वं बहिः सत्त्वं विनाऽनुपपन्नमिति बहिः सत्त्वं कल्प्यत इति ।

में सौ वर्ष जीनेवाले उस देवदत्त का गृहासत्त्व (घर में न रहना) बहिःसत्त्व (बाहर रहने) के बिना अनुपपन्न (नहीं बनता) है, इस वास्ते देवदत्त के बहिःसत्त्व की कल्पना की जाती है कि देवदत्त बाहर है, इसी का नाम अर्थापत्ति है—अर्थात् बहिःसत्त्वरूप अर्थ की जो आपत्ति (कल्पना) ।

मीमांसकमतं दर्शयति । केचनेति । मीमांसका इत्यर्थः । तदुदाहरणं तावद्दर्शयति। तथाहीति । जीविदेवदत्तोगेहेनास्ति इति ज्ञानानन्तरंबहिरस्तीतिधीरुदाहरणम्। यत्र । यस्य । ज्योतिःशास्त्रादवगतमिति । जीवीगृहेएवेति नियमश्च प्रत्यक्षादवगतः, तत इति शेषः । प्रत्यक्षादवगतमिति । ततो जीवति न वेति संशयः ततः संशयनिरासार्थं वहिःसत्वं कल्प्यते इत्यन्वयः । तत्र । तस्य । शतवर्षजीवित्वान्यथानुपपत्त्येति । तादृशान्यथानुपपत्तिज्ञानरूपप्रमाणेनेत्यर्थः । कल्प्यते इति । गृहेऽवर्तमानः शतवर्षजीवी वहिःसत्ववानित्यर्थापत्तिप्रमा जन्यते इत्यर्थः । नचेदमनुमानम् । लिङ्गविशेषणस्य जीवित्वस्य तदानीं संशयेन तन्निश्चयाऽसंभवात् । किं च जीविदेवदत्तस्याभावो गृहे विद्यमानः न देवदत्तस्य वहिःसत्वं साधयितुमर्हति, तस्य देवदत्ताऽवृत्तित्वात्, वहिःसत्व-गृहनिष्ठाभावयोर्व्यधिकरणत्वेन नियतसामानाधिकरण्यरूपव्याप्त्यभावात् । किं च देवदत्तस्य तदानीमप्रत्यक्षत्वेन तद्विशेष्यकपरामर्शाऽसंभवादपि नानुमानम् । तदपीति । अर्थापत्तेः प्रमाणान्तरत्वमपीत्यर्थः । नेष्यते इति । नाङ्गीक्रियते इत्यर्थः । तत्र हेतुमाह । अनुमानेन गतार्थत्वादिति। अर्थापत्तिज्ञानस्याऽनुमितिरूपत्वे व्याप्तिं प्रदर्शयति । तथाहीत्यादिना । यत्र । देवदत्ते । गृहीतमिति । देवदत्तोगृहसत्व-वहिःसत्वान्यतरव्याप्यजीवित्ववानिति परामर्शो गृहीतः इत्यर्थः । तत्र । जीवित्ववति । अन्यतरसिद्धौ जायमानायामिति। देवदत्तोगृहसत्व-वहिसत्वान्यतरवान् जीवित्वादित्यनुमानेना न्यतरसिद्धौ जायमानायामित्यर्थः । वहिःसत्वमेवानुमितौ विषयीक्रियते इत्यन्वयः । तत्र हेतुमाह। गृहसत्वबाधादिति । इतरबाधसहकारादित्यर्थः । वहिःसत्वस्यविधेयता तु तादृशान्यतरत्वेन वहिःसत्वत्वेन वा इत्यन्यदेतत् ।

अथ हेतुभूतस्य हेतुघटकस्य वा जीवित्वस्य संशयात्कथमनुमानम् इतिचेत् यतोदेवदत्तोजीवनमरणान्यतरप्रतियोगी प्राणित्वात् मद्वत् इति सामान्य-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तोदृष्टमनुमानं लाघवतर्कसहकारेण जीवनप्रतियोगित्वं विषयीकरोति। तथा सति जीवित्वस्य निश्चयादनुमानादेव तत्सिद्धिः। न च वहिःसत्वकल्पनया "जीवी गृहे एव" इति नियमग्राहकप्रमाणवाधकल्पनवत्, मरणं कल्पयित्वा जीवनग्राहक-प्रमाणवाधकल्पनापिसंभवतीति वाच्यम्। मरणस्थले देवदत्तःशतवर्षंजीवी, जीवी गृहे एव, इति नियमद्वयस्यैव वाधा स्यात्, जीवनवाधे तन्नियमवाधस्यावश्यकत्वात्। किं च शतवर्षजीविनोऽद्य जीवति, श्वोऽजीविष्यति, इत्यादि वहुतरलवक्षणमुहूर्तादि-समयोपाधिनियतं जीवनमिति तद्वाधे वहुतरव्याप्तिवाधः स्यात्, जीवीगृहे एव इत्यस्य वाधे तु देवदत्ततदवयवगृहसत्वव्याप्तिरल्पैव वाधिता भवति। किं च मरणा-पेक्षया जीवनं लघु इति ज्ञानात्तदेव कल्पयितुमुचितम्।

अपि च नियमद्वयविषयकसंशयानन्तरं अनयोरकतरं अप्रमाणं विरुद्धार्थ-कत्वादिति सामान्यतोदृष्टमनुमानं "ज्योतिःशास्त्राद् यथार्थजीवनग्राहकं" लाघव-तर्कसहकारेण जीवनविषयकं गृहसत्वनियमग्राहकस्यैवा प्रामाण्यं पर्यवसाययतीति-जीवित्वनिश्चयः। न हि जीवननियमग्राहकयोः प्रमाणयोस्तुल्यवलत्वे वहिःसत्व-कल्पना संभवति, विशेषदर्शनाभावात। तस्माद् यत्र शतवर्षजीवित्वं दृढतरप्रामाणा-वधृतं गृहाभावश्च निश्चितः तत्र वहिः सत्वकल्पनम्, न तु जीवनसंशये, इति क जीवित्वस्य संशयः।

न च गृहनिष्ठाभाव-देवदत्तनिष्ठवहिःसत्वयोर्व्यधिकरणत्वादनुमानाऽसंभवा-दनुपपत्तिज्ञानं करणमिति वाच्यम्। उपरि सविता भूमेरालोकवत्त्वादित्यनुमान-वदत्रापि गृहनिष्ठाभावप्रतियोगित्वेनाऽनुमानसंभवात्। उक्तानुमाने हि भूमिः पक्षः सवितृसंयुक्तोपरिदेशकत्वं साध्यम्। उपर्यवच्छेदेना लोकसंयोगो हेतुः। एतेन भूमिनिष्ठाऽऽलोकसंयोगस्य कथमुपरिदेशे संयोगसंबन्धेन सवित्रनुमापकत्वम्, पक्षाऽवृत्तित्वादव्याप्यत्वाच्चेति निरस्तम्। न च गृहनिष्ठाभावप्रतियोगित्वस्य देवदत्तधर्मतया तस्य चाऽसन्निकृष्टतया प्रत्यक्षेण ज्ञातुमशक्यत्वात् देवदत्तविशेष्यक-तृतीयलिंगपरामर्शाऽसंभवाच्च नानुमानम्, अतो व्यतिरेकव्याप्तिमुपजीव्य जीवि-नोदेवदत्तस्य गृहाभावोवहिःसत्वं कल्पयतीति वाच्यम्। देवदत्तस्याऽसन्निकृष्टत्वेपि गृहनिष्ठाभावप्रतियोगित्वस्य (तन्निष्ठस्य) प्रत्यक्षेणैव गृहीतुं शक्यत्वात्।

तथा हि गृहे देवदत्तस्याऽभाव इति प्रत्यक्षं तावत् देवदत्तं षष्ठ्यर्थं च "प्रतियोगित्वलक्षणमभावसंबन्धं" विषयीकरोति। प्रतियोगिना सममभावस्य संबन्धान्तराभावात्। संबन्धज्ञानस्य संबन्धिद्वयविषयकत्वात्, अभावप्रत्ययस्य विशिष्टवैशिष्ट्यावगाहित्वनियमाच्च देवदत्तप्रतियोगिकाभावस्य गृहवृत्तित्वम्, तद्गत तुल्यवित्तिवेद्यतया देवदत्तस्य गृहवृत्त्यभावप्रतियोगित्वमपि प्रत्यक्षेणैव शक्यं गृहीतुम्। प्रत्यक्षोपस्थिते च देवदत्तस्य गृहनिष्ठाभावप्रतियोगित्वे स्मृतव्याप्ति-वैशिष्ट्यमपि सुग्रहमेव। न चैवमपि देवदत्तविशेष्यकतृतीयलिंगपरामर्शाऽसंभ-वात्कथमनुमितिरिति वाच्यम्। पक्षवृत्तिलिंगपरामर्शस्य लाघवादनुमितिहेतुत्वो-पगमात्। सहकारिवशान्मनसैव स्मृतदेवदत्तविशेष्यकतृतीयलिंगपरामर्शसंभवाच्च।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तदप्यनुमानेन गतार्थत्वान्नेष्यते। तथा हि यत्र जीवित्वस्य बहिः सत्त्वगृहसत्त्वान्यतरव्याप्यत्वं गृहीतं तत्रान्यतरसिद्धौ जायमानायां गृहसत्त्वबाधाद्बहिः सत्त्वमनुमितौ भासते। एवं पीनोदेवदत्तोदिवा न भुङ्क्ते, इत्यादौ पीनत्वस्य भोजनव्याप्यत्वावगमाद् भोजनसिद्धौ दिवाभोजनबाधे रात्रिभोजनं सिद्ध्यतीति।

नैयायिक कहता है कि—"तदनुमानेन गतार्थत्वात् नेष्यते" अर्थात् शतवर्षजीवी देवदत्त के वहिःसत्त्व का ज्ञान अनुमान प्रमाण से ही जब कि सम्भव है तो इसके लिये स्वतन्त्र एक अर्थापत्ति प्रमाण इष्ट नहीं है; तथाहि—जब कि देवदत्त में रहने वाले जीवित्व में वहिःसत्त्व एवं गृहसत्त्व अन्यतर (दोनों में से एक) की व्याप्यता का निश्चय हो चुका तब उस जीवी देवदत्त में गृहसत्त्व-वहिःसत्त्व अन्यतर की सिद्धि (निश्चय) हो जाने पर प्रत्यक्षतः गृहसत्त्व का बाध हो जाने से वहिःसत्त्व हो अनुमिति में भासता है कि —"देवदत्तो वहिरस्ति जीवित्वेसति गृहेऽसत्त्वात्"।

इसी प्रकार "देवदत्त पीन (मोटा-ताजा) है-तथा दिन में नहीं खाता है" इत्यादि स्थल में जब कि दिवा भोजन का बाध है तब रात्रि भोजन अर्थतः सिद्ध हो रहा है (कि देवदत्त जब दिन में नहीं खाता है तो रात्रि को अवश्य ही खाता है) क्योंकि पीनत्व भोजन का व्याप्य है (व्याप्ति यह है कि-"यत्र=पीनत्वं तत्र=भोजनम्") इससे भोजन सिद्ध है। [अतः यहाँ पीन देवदत्त में दिवाभोजन का बाध देखकर रात्रिभोजन रूप अर्थ की आपत्ति (कल्पना) रूप अर्थापत्ति प्रमाण भी निरस्त हो गया, कारण कि देवदत्त में रात्रिभोजित्व का ज्ञान तो अनुमान से ही हो जायगा कि "देवदत्तः रात्रिभोजी दिवाऽभुञ्जानत्वे सति पीनत्वात्"]

न च व्यतिरेकयोर्व्याप्तिः, अन्वयस्य पक्षधर्मतेति व्याप्तिधीजन्यमपि वहिः सत्वज्ञानं नानुमितिः, तस्याः व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यत्वनियमादिति वाच्यम्। अन्वयिन्येव व्याप्तिविशिष्टपक्षधर्मताज्ञानस्य हेतुत्वम्, व्यतिरेकिणि तु साध्याभावव्यापकीभूताभावप्रतियोगित्वेन पक्षधर्मस्य ज्ञानमनुमितिप्रयोजकमित्यभ्युपगमात्। यद्वा व्यतिरेकव्याप्तेरेवाऽऽन्वयेन गम्यगमकभावः, तथा हि साध्याभावव्यापकीभूतसाधनाभावस्याभावेन "साधनेन" साध्याभावाभावस्य "साध्यस्य" अवगतिः। व्यापकाभावेन व्याप्याभावस्यावश्यकत्वादिति संक्षेपः।

श्रुतार्थापत्तेः प्रमाणान्तरत्वं निरस्य दृष्टार्थापत्तेः प्रमाणत्वं निरसितुं तामुदाहरति। एवंमिति। यादृशदेवदत्ते पीनत्वं दिवाऽभुञ्जानत्वमपि दृष्टम्, दिवाऽभुञ्जानस्य तस्य पीनत्वान्यथानुपपत्तिप्रमाणेन तादृशपुरुषविशेष्यकरात्रिभोजनप्रकारकाऽर्थापत्तिप्रमा जन्यते इति। भोजनव्याप्यत्वावगमादिति। भोजनव्याप्यपीनत्ववानयमितिपरामर्शादित्यर्थः। तादृशपरामर्शे दिवाभोजनरात्रिभोजनान्यतराभाव-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अभावप्रत्यक्षस्यानुभविकत्वादनुपलम्भोपि न प्रमाणान्तरम्। किं चानुपलम्भस्याज्ञातस्य हेतुत्वे ज्ञानाऽकरणकत्वात्प्रत्यक्षत्वम्। ज्ञातस्य हेतुत्वे तु तत्राप्यनुपलम्भान्तरापेक्षेत्यनवस्था।

अनुपलंभ (अनुपलब्धि) भी कोई अभाव का ग्राहक अतिरिक्त प्रमाण नहीं है कारण कि "घटाभाववद्भूतलम्" यहाँ पर विशेषणतासन्निकर्ष से अभाव का प्रत्यक्ष अनुभव सिद्ध है (अतः प्रत्यक्षप्रमाण ही जब कि अभाव ग्राहक हो रहा है तो अनुपलब्धि को भी फिर एक अतिरिक्त प्रमाण मानने की क्या आवश्यकता है इस वास्ते अनुपब्धि का प्रत्यक्षप्रमाण में ही अन्तर्भाव है)

व्यापकीभूताभावप्रतियोगित्वरूपव्याप्तिप्रकारकनिश्चयः कारणम्। भोजनसिद्धाविति। दिवाभोजनरात्रिभोजनान्यतरवान् इत्यनुमितौ इत्यर्थः। दिवाभोजनबाधेसतीति। दिवाभोजित्वाभावनिश्चये सतीत्यर्थः। इतरबाधनिश्चयसहकृतात्तादृशपरामर्शादिति यावत्। रात्रिभोजनमिति। रात्रिभोजनमात्रमित्यर्थः। सिद्ध्यतीति। अयं रात्रिभोजी दिवाऽभुञ्जानत्वे सति पीनत्वादित्यनुमानेन रात्रिभोजनं सिद्ध्यतीत्यर्थः।

मीमांसकानां अर्थापत्तिसामग्रीकाले नैयायिकाभिमतानुमितिसामग्र्याः नियमतः सत्वे विवाद एव, तथा हि मीमांसकैरर्थापत्तिरापत्तिरूपैव प्रमाणान्तरतया स्वीक्रियते। आपत्तिं प्रति आपाद्यव्याप्याऽऽपादकवत्तानिश्चयः कारणम्। तथा च चैत्रो यदि गृहसत्वबहिःसत्वान्यतराभावान् तदाजीवित्वाभाववान् स्यादित्याकारिकाया आपत्तेः गृहसत्वबाधसहकृताया बहिःसत्वकल्पकत्वं तदैव स्यात् यदि तादृशापत्तेः पूर्वं आपाद्यापादकयोर्व्याप्तिनिश्चयः स्यात्, तादृशव्याप्तिनिश्चयस्य च जीवित्वे गृहसत्वबहिःसत्वयो र्व्यतिरेकनिश्चयरूपताया आवश्यकत्वमिति अनुमानेनैव चारितार्थ्यं संभवदुक्तिकमेवेति।

इत्यर्थापत्तेः प्रमाणान्तरत्वनिरासः।

अभावप्रत्यक्षस्यानुभविकत्वादिति। घटाभावप्रत्यक्षस्याऽनुभवसिद्धत्वादित्यर्थः। तथा च घटाभावं साक्षात्करोमीत्यनुभवात् अनुपलब्धिजन्याऽभावप्रतीतेः प्रत्यक्षत्वं, न तु तद्विजातीयप्रमात्वं यत्रानुपलब्धिः प्रमाणान्तरं स्यात् इति भावः। विमतमनुपलब्धिजन्यमभावज्ञानमिन्द्रियकरणकं प्रत्यक्षज्ञानत्वात् घटादिप्रत्यक्षवदित्यनुमानेनाऽभावज्ञानस्येन्द्रियकरणकत्वसिद्धिः। नैयायिकमते अभावप्रत्यक्षे इन्द्रियमेव करणम्, अनुपलब्धिः सहकारिणी न तु करणम्, व्यापारवत्वाभावात्, व्यापारवदसाधारणकारणस्यैव करणत्वात्। एवमिन्द्रियाणि अभावविषयकप्रत्यक्षस्वरूपयोग्यानि तत्प्रतियोगिविषयकप्रत्यक्षस्वरूपयोग्यत्वात्। योयत्प्रतियोगिग्राहकः स

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवं चेष्टापि न प्रमाणान्तरं तस्याः संकेतग्राहकशब्दस्मारकत्वेन लिप्यादिसमशीलत्वाच्छब्द एवान्तर्भावत्। यत्र च व्याप्त्यादिग्रहस्तत्रानुमितिरेवेति ॥१४४॥

एवं चेष्टा भी अतिरिक्त प्रमाण नहीं है क्योंकि चेष्टा भी नेत्र आदि के निमेषण द्वारा आह्वानरूप जो संकेतितअर्थ तादृशअर्थज्ञान का कारण जो शब्द उस शब्द का स्मारक होने के नाते लिपि आदि के समान है, अर्थात् लिपि आदि से होनेवाला बोध जैसे शाब्दबोधरूप है अतः लिपि जैसे प्रमाणान्तर नहीं है, वैसे ही चेष्टा भी प्रमाणान्तर नहीं है किन्तु शब्द में ही अन्तर्भाव है। और जिस स्थल में चेष्टा के द्वारा व्याप्तिज्ञान होकर ही बोध होता है उस स्थल में वह बोध अनुमितिरूप है इस नाते चेष्टा का अनुमान में ही अन्तर्भाव है।

तदभावग्राहक इति सामान्यतोव्याप्त्या चेन्द्रियाणामभावग्राहकत्वम्। यथाऽनुमानं घटस्येव घटाभावस्यापि ग्राहकमिति दृष्टान्तोबोध्यः।

न च अनन्यथासिद्धत्वमुपाधिः। तस्य साध्यव्यापकता अनुपलब्धौ, इन्द्रिये च साधनाऽव्यापकता, प्रतियोगिग्राहकत्वसत्वेपि अनन्यथासिद्धत्वाभावात्, अधिकरणप्रत्यक्षेण इन्द्रियस्याऽन्यथासिद्धत्वात्। एवं च प्रतियोगिग्राहकत्वं अभावग्राहकत्वव्यभिचारि अन्यथासिद्धत्वव्यभिचारित्वादित्यनुमानेन साध्यव्यभिचारोऽनुमेय इति वाच्यम्। व्यापारेण व्यापारिणोऽन्यथासिद्ध्यभावात्, अन्यथा भ्रम्यादिना दण्डादेरपि अन्यथासिद्धत्वापत्तेः। एवमिन्द्रियमभावप्रमाकरणं तद्भ्रमकरणत्वात् रूपप्रमाकरणचक्षुर्वदित्यनुमानेनेन्द्रियाणां करणत्वसिद्धिः। अयं भावः दोषोऽप्रमायाजनकः, दोषश्च इन्द्रियनिष्ठ एव, अनुपलब्धेर्दोषवत्वाभावात्, पित्तादिना इन्द्रियस्यैव दुष्टत्वादिति। एवं घटाभाववद्भूतलमिति विशिष्टधीर्नेन्द्रियजन्या अभावधीत्वात्। तन्मतेऽभावधिय इन्द्रियाजन्यत्वादितिभावः। नानुपलब्धिकारणजा भावधीत्वात्। अधिकरणादिभावपदार्थज्ञानस्याऽनुपलब्धिकरणकत्वस्यत्वयाप्यनभ्युपगमादिति ध्येयम्। अत इन्द्रियंविशिष्टग्राहि इति अवश्यं स्वीकार्यम्। तदेतत्सर्वमभिप्रेत्याह। अनुपलम्भोपीति। योग्यानुपलब्धिरपीत्यर्थः। न प्रमाणान्तरमिति। न विजातीयप्रमाजनकमित्यर्थः। विप्रतिपत्तिस्तु अनुपलब्धिरभावग्राहिका नवेत्याकारिका बोध्या। दोषान्तरमाह। किंचेति। अनुपलब्धिः स्वरूपसती कारणम्, ज्ञाता वा, आद्ये अज्ञातानुपलब्धिजन्याऽभावज्ञानस्य प्रत्यक्षत्वं न विरुद्धम्, ज्ञानाऽकरणकज्ञानत्वादित्याह। यत्रेति। अनुपलंभस्येति। अनुपलब्धेः। अज्ञातस्य। स्वरूपसतः। ज्ञानाकरणकत्वादिति। अभावज्ञानस्येत्यादिः। द्वितीयेत्वाह। ज्ञातस्येति। तत्रापि। अनुपलब्धावपि। अनवस्थेति।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सुखं तु जगतामेव काम्यं धर्मेण जायते।
अधर्मजन्यं दुःखं स्यात्प्रतिकूलं सचेतसाम्। १४५

सुखं निरूपयति। सुखं तु जगतामेवेति। काम्यमभिलाषविषयः। धर्मेणेति। धर्मत्वेन सुखत्वेन कार्यकारणभाव इत्यर्थः।

इति सुखनिरूपणम्।

दुःखं निरूपयति। अधर्मेति। अधर्मत्वेन दुःखत्वेन कार्यकारणभाव इत्यर्थः। प्रतिकूलमिति। दुःखत्वज्ञानादेव सर्वेषां स्वाभाविकद्वेषविषय इत्यर्थः। १४५

इति दुःखनिरूपणम्।

सुख का निरूपण करते हैं—सुखन्त्विति। सब स्पष्ट ही है ॥१४५॥
दुःख का निरूपण करते हैं—अधर्मेति। यह सब भी स्पष्ट ही है।

न हि अनुपलब्धिः ज्ञाता सती करणम्, तथात्वे अनुपलब्धेरपि उपलब्ध्यभावरूपतयातद्ज्ञाने तदनुपलब्धिज्ञानमपेक्षणीयम, एवं तत्र तत्रापीत्यनवस्था स्यादिति भावः। न चाऽभावग्रहे चक्षुरादेरन्वयव्यतिरेकोऽसिद्धः। निमीलितलोचनस्याऽन्धस्य च घटाभावप्रत्यक्षापत्तेः। न च भवत्येव तस्यापि स्पार्शनमिति वाच्यम्। तत्रापि त्वगिन्द्रियान्वयव्यतिरेकानुविधायित्वात्। अन्यथोपहतत्वगिन्द्रियस्यापि घटाभावप्रत्यक्षापत्तेः।

नापि अधिकरणप्रत्यक्षेणाऽन्यथासिद्धिः, अधिकरणप्रत्यक्षाभावेपि आकाशे शब्दध्वंसस्य वायौ रूपाभावस्य च ग्रहात्। चेष्टापीति। अपिना अर्थापत्तिपरिग्रहः। न प्रमाणान्तरमिति। न विजातीयप्रमाजनकमित्यर्थः। मानाभावादिति हेतुः पूरणीयः। तस्याः। संकेतग्राहकशब्दस्मारकत्वेनेति। अभिमतार्थकशब्दस्मारकत्वेनेत्यर्थः। लिप्यादिसमशीलत्वादिति। लिप्यादितुल्यत्वादित्यर्थः। शब्दे एवान्तर्भवतीति। शब्दप्रमाणमुत्पाद्य विश्राम्यतीत्यर्थः। तथा च यथा लिपिदर्शनस्य शब्दस्मृतिद्वाराशाब्दबोधप्रयोजकत्वम् तथा चेष्टाविशेषदर्शनस्यापि शब्दविशेषस्मृतिद्वारा शाब्दबोधप्रयोजकत्वम्, न तु प्रमाणान्तरत्वमिति भावः। यत्र च व्याप्तिग्रह इति। यत्राऽऽह्वानानुकूलचेष्टा तत्राऽऽह्वानकर्तृत्वमितिव्याप्तिग्रहः। तत्रानुमितिरेवेति। अयं मामाह्वयति विलक्षणचेष्टावत्वादित्यनुमितिरेवेत्यर्थः। एवकारेण प्रमान्तरत्वव्यवच्छेदः। १४४

अनुपलब्धि चेष्टयोः प्रमाणान्तरत्वनिरूपणम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जगतामेवेति । प्राणिनामेवेत्यर्थः । **अभिलाषविषय इति** । इच्छाविषय इत्यर्थः । इच्छाविषये भोजनादावतिव्याप्तिवारणाय अन्येच्छानधीनत्वमिच्छायां विशेषणीयम् ।

फलं द्विविधम् । गौणमुख्यभेदात् । मुख्यं फलं सुखं दुःखाभावश्च । गौणफलं तु सुखसाधनं दुःखाभावसाधनं च । तत्वं च इच्छाविषयत्वम् । तथा चेतरेच्छानधीनेच्छाविषयत्वं सुखस्य लक्षणम् । दुःखाभावस्यापि तादृशत्वाचत्रातिव्याप्तिवारणाय द्वेषानधीनत्वमपि इच्छायां विशेषणीयम् । एवं सुखत्वजातिमत्वमपि तल्लक्षणं बोध्यम् । स्वाश्रयसमानाधिकरणसमानकालीनसाक्षात्कारविषयताव्याप्यदुःखत्वेतरजातिमत्सुखम् । इदं च चतुर्विधम् । किंचिदाध्यासिकं यथा मृगयादिषु । किंचिदाभिमानिकं यथा चुम्बनादिषु । किंचिद्वैषयिकं यथासुरभि मधुर गान्धारादिसन्निकर्षाज्जायते । तत्र सन्निकर्षो न सुखहेतुः सत्यपि तस्मिन् विषयाऽज्ञाने सुखानुत्पत्तेः, किन्तु विषयज्ञानवत्येव सुखोत्पत्तेः, तद्ज्ञानमेव तथा । नन्वेवं योगिनामसत्यपि स्रक्चन्दनादिसंयोगे तदापत्तिः । न चेष्टापत्तिः । कायव्यूहेन्द्रियार्थनिर्माणवैयर्थ्यात्, इष्टानिष्टसाक्षात्कारस्यैकस्मिन्नेव शरीरे मनसैव सिद्धत्वादितिचेन्न । कायव्यूहं विना यौगपद्यानुपपत्तेः । किंचिन्मानोरथिकं यथा भाविपुत्रजन्मादिनोत्सवचिन्तनादिषु उत्पद्यमानम् ।

ननु स्वप्नान्तिकं सुखं पञ्चमं स्यात्, अस्ति च तत् । स्वप्नसुखप्रतीतेर्बाधकं विना प्रमात्वात् । चन्दनादिसन्निकर्षस्तु सुखविशेषे एव हेतुः, अतो न कारणबाधोपि, कारणं तत्र स्वप्ने विषयसाक्षात्कार एवेति चेन्न । चन्दनादिजन्यसुखजातीयत्वस्यैव तत्रानुभवेनेतरकारणकत्वाकल्पने कारणबाधात्कार्यस्याऽसत्वात्प्रतीतेर्भ्रमत्वात् । तत्र स्वप्नेन सुखं न वा दुःखं यदि च तदुभयान्यतरसाधनमपि न स्याद् धर्माधर्मकार्यो न स्यात्, स्वीकृतं च तथात्वम्, अन्यथा स्वप्नवैचित्र्यानुपपत्तेरिति वाच्यम् । स्वप्नस्य सुखदुःखसाक्षात्कारत्वेनाऽदृष्टफलकत्वात् । सुखमेव धर्ममात्रजन्यशरीरोपभोग्यं स्वर्गं इत्युच्यते । सुखं ज्ञानविशेष इति बाह्याः । **सुखत्वेनेति** । इदं च प्राचीनमतम् । जन्यसुखत्वेनेति नव्याः । तैर्नित्यसुखाङ्गीकारात् ।

इति सुखनिरूपणम् ।

अहं दुखीति प्रतीतिसाक्षिकोगुणविशेषोदुःखम् । दुःखत्वजातिमत्वं वा दुःखस्य लक्षणम् । तच्च द्विविधं ऐहिकं आमुष्मिकं च । आद्यं च दुरीश्वरोपसर्पणादिप्रभवम् । अन्त्यं च अधर्ममात्रजन्यशरीरोपभोग्यं यन्नरक इत्याख्यायते । **सर्वेषां** । प्राणिनां । **स्वाभाविकेति** । अन्यविषयकद्वेषानधीनेत्यर्थः । तथा चाऽन्यविषयकद्वेषानधीनद्वेषविषयो दुःखमिति भावः । तेन दुःखोपाये सर्पादौ नातिव्याप्तिः । १४५

इति दुःखनिरूपणम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

निर्दुःखत्वे सुखे चेच्छा तद्ज्ञानादेव जायते ।
इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्यदि । १४६

इच्छांनिरूपयति । निर्दुःखत्वे इति । इच्छा द्विविधा । फलविषयिणी उपायविषयिणी च । फलं तु सुखं दुःखाभावश्च । तत्र फलेच्छां प्रति फलज्ञानं कारणम् । अत एव पुरुषार्थः संभवति । यद् ज्ञातं सत् स्ववृत्तितयेष्यते स पुरुषार्थ इति तल्लक्षणात् । इतिरेच्छानधीनेच्छाविषयत्वं फलितोर्थः । उपायेच्छां प्रति इष्टसाधनताज्ञानं कारणम् । १४६

इच्छा का निरूपण करते हैं—निर्दुःखत्व इति ।

निर्दुःखत्व (दुःखाभाव) में तथा सुख में इच्छा होती है । और वह इच्छा दुःखाभाव—सुख दोनों के ज्ञान से होती है । और सुख-दुःखाभाव के उपाय (साधन) में यदि इष्टोपायत्व प्रकारक ज्ञान "इदं मदिष्टसाधनम्" हो तब इच्छा होती है ।

इच्छा दो प्रकार की है फलेच्छा तथा उपायेच्छा । फल सुख और दुःखाभाव को कहते हैं । फलेच्छा के प्रति फलज्ञान कारण है । इसीलिये सुख-दुःखाभाव दोनों पुरुषार्थ हो सकते हैं । कारण कि जो ज्ञात होकर आत्मवृत्तितया इच्छा का विषय हो वही पुरुषार्थ कहलाता है, अर्थात् दूसरे की इच्छा के अनधीन इच्छा (अपनी इच्छा) का विषय जो हो वही पुरुषार्थ वस्तु है । उपायेच्छा के प्रति इष्टसाधनताज्ञान कारण होता है ॥१४६॥

इच्छांनिरूपयतीति । क्रमप्राप्तामित्यादिः । इच्छामीतिप्रतीतिसिद्धेच्छात्वजातिमत्त्वमिच्छालक्षणम् । कामो भिलाषो रागः संकल्पः कारुण्यं वैराग्यं माया भावः इत्यादयइच्छाभेदाः । तत्र मैथुनेच्छा कामः । भोजनादीच्छा अभिलाषः । उत्कटफलेच्छा रागः । अनागतफलेच्छा संकल्पः । निरुपधिपरदुःखप्रहाणेच्छा कारुण्यम् । दोषदर्शनाद्विषयपरित्यागेच्छा वैराग्यम् । परवञ्चनेच्छा माया । अन्तर्निगूढेच्छा भावः । परेष्टनिवारणेच्छा मात्सर्यम् । अप्राप्ते प्राप्तीच्छा स्पृहा । इदं मा क्षीयतामितीच्छा तृष्णा । उचितव्ययहेतूपस्थितौधनरक्षणेच्छाकार्पण्यम् । कपटेन धार्मिकत्वादिना स्वोत्कर्षप्रतिपादनेच्छा दंभः । एवमन्येपि ।

भगवदिच्छायामपि सा जातिरस्त्येव न तत्राव्याप्तिः । इच्छायाद्वैविध्यमनुपदमेव वक्ष्यति । तत्र फलेच्छास्वरूपं तत्कारणं चादावाह । मूले—निर्दुःखत्वे इति । तथा च दुःखाभावविषयिणीसुखविषयिणी च या इच्छा सैव फलेच्छा । सा च दुःखाभावोजायतामित्याकारिका सुखं जायतामित्याकारिका च बोध्या । तथा च फलविशेष्यकेच्छात्वं फलेच्छालक्षणम् । फलेच्छाकारणमाह । तद्ज्ञानादेवेति । सुख-दुःखाभावज्ञानादेवेत्यर्थः । तथा च फलेच्छांप्रति फलज्ञानं कारणमितिभावः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चिकीर्षा कृतिसाध्यत्वप्रकारेच्छा च या भवेत्।
तद्धेतुः कृतिसाध्येष्टसाधनत्वमतिर्भवेत् ॥१४७॥

उपायेच्छास्वरूपं तत्कारणं चाह। **इच्छा तु तदुपाये** इति। फलोपाये इत्यर्थः। तथा चोपायविशेष्यकेच्छात्वमुपायेच्छालक्षणम्। उपायेच्छाकारणमाह। **इष्टोपायत्वधीर्यदीति**। तथाचोपायेच्छां प्रति इष्टसाधनताज्ञानं कारणमित्यर्थः। तत्र इच्छयोर्मध्ये। **अतएव**। फलज्ञानस्य फलेच्छां प्रति हेतुत्वादेव। **पुरुषार्थः संभवतीति**। सुखं दुखाभावश्च पुरुषार्थो भवतीत्यर्थः। पुरुषार्थस्वरूपमाह। **यद्ज्ञातं संदिति**। यद्ज्ञातंसदेवेत्यर्थः। स्ववृत्तितयेति। **इष्यते** इति। इच्छाविषयोभवतीत्यर्थः। तथा च स्वज्ञानमात्राधीनेच्छाविषयत्वं पुरुषार्थत्वमिति भावः। अथैवमुपायेऽतिव्याप्तिः, तस्यापि स्वविषयकेष्टसाधनताज्ञानजन्येच्छाविषयत्वादत आह। **इतरेच्छेति**। **फलितोर्थ** तादृशेच्छाविषयत्वं पुरुषार्थत्वमिति फलितार्थः। "**इच्छा तु तदुपायेस्यादिष्टोपायत्वधीर्यदीति** मूलस्य प्रतीकमधृत्वाऽर्थमाह। **उपायेच्छांप्रतीति**। सुखत्वप्रकारत्वानिरूपितोद्देश्यतासंबन्धेनेच्छां प्रतीत्यर्थः। तेन सुखत्वेन पाकाद्यवगाहि "सुखमित्याकारक" भ्रमोत्तरं पाकविषयकेच्छोत्पादेन तत्र चेष्टसाधनज्ञानविरहेपि न व्यभिचारः। अथैतादृशकार्यकारणभावे किं प्रमाणमितिचेन्न। निष्फले चैत्यवन्दनादौ प्रवृत्त्यभावस्यैव प्रमाणत्वात्। अथैवमपि फलेच्छाविरहे फलसाधनताज्ञानसत्वे फलोपायेच्छोत्पादापत्तिः। न च स्वरूपसदिच्छाविषयसाधनताज्ञानस्य कारणत्वोक्तौ न दोषः। अत एवोपायेच्छां प्रति फलेच्छाकारणमितिमूलसंगतिरिति वाच्यम्। यत्रौदनस्यौदनत्वेन "ओदनोभवतु इति" इच्छाविषयता, द्रव्यत्वेनौदनसाधनता च पाके गृहीता, तत्र पाकेच्छोत्पादापत्तेः, एवं उक्तस्थले ओदनादिविषयकेच्छाविरहकालेपि कालान्तरीणतद्विषयतामादायेदानीं तनतत्साधनताज्ञानसत्वेपि पाकादाविच्छोत्पादापत्तेश्चेति चेन्न। स्वरूपसदिच्छाविषयतावच्छेदकावच्छिन्नसाधनताज्ञानस्यैव उपायेच्छां प्रति कारणत्वादिति संक्षेपः। १४६

चिकीर्षां निरूपयति। **चिकीर्षेति**। **कृतिसाध्यत्वप्रकारा** इति। कृतिसाध्यत्वं प्रकारोयत्रेति बहुव्रीहिविग्रहप्रतिपाद्यार्थमाह। **कृतिसाध्यत्वप्रकारिकेति**। **कृतिसाध्यविषयिणीति** स्पष्टार्थम्। तथा च कृतिसाध्यत्वप्रकारकेच्छात्वं चिकीर्षालक्षणम्। वस्तुतः कर्तुमिच्छा चिकीर्षा। अत्र प्रयोज्यत्वं तुमुन्प्रत्ययार्थः। तथा च व्युत्पत्तिबलादेवकृतिसाध्यत्वप्रकारिका इच्छेति अर्थोलब्ध एव। इच्छायाः कृतिसाध्यत्वप्रकारकत्वे अनुभवमप्याह। **पाकंकृत्यसाधयामीति**। अत्र पाकमिति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चिकीर्षेति । कृतिसाध्यत्वप्रकारिका कृति साध्यविषयिणीच्छा चिकीर्षा। पाकं कृत्यासाधयामीति तदनुभवात्। चिकीर्षां प्रति कृतिसाध्यताज्ञानमिष्टसाधनताज्ञानं च कारणम्। तद्धेतुरिति। अतएव वृष्ट्यादौ कृतिसाध्यताज्ञानाभावान्न चिकीर्षा ॥१४७॥

कृतिसाध्यत्वप्रकारिका अर्थात् कृतिसाध्यविषयिणी जो इच्छा उसे चिकीर्षा कहते हैं "पाकं कृत्या साधयामि" यह अनुभव होता है। चिकीर्षा के प्रति कृतिसाध्यताज्ञान अर्थात् "इदं मत्कृतिसाध्यम्" तथा इष्टसाधनताज्ञान अर्थात् "इदं मदिष्टसाधनम्" यह ज्ञान कारण होता है। इसीलिये कृतिसाध्यताज्ञानरूप कारण के न रहने प्रयुक्त ही वृष्टि में चिकीर्षा नहीं होती है ॥१४७॥

द्वितीयार्थोविषयकत्वं "विशेष्यकत्वं" धात्वर्थेच्छायां तस्याऽन्वयः। कृत्या। साध्यतासंबन्धेन कृतिप्रकारेण कृतिसाध्यत्वप्रकारेणेति यावत्। साधयामीति। इच्छामीत्यर्थः। तथा च पाकविशेष्यककृतिसाध्यत्वप्रकारकेच्छावानहमितिबोधात्तादृशार्थे प्रमाणत्वमनुभवस्येति भावः। मूले तद्धेतुरिति। चिकीर्षाहेतुरित्यर्थः। कृतिसाध्येष्टसाधनयोर्द्वन्द्वः। तयोर्भावस्तत्त्वम्। तस्य मतिरित्यर्थः। फलितार्थमाह। चिकीर्षां प्रतीति। तथा च केवलेष्टसाधनताज्ञानादुपायेच्छा भवति कृतिसाध्यताज्ञानसमानकालीनेष्टसाधनताज्ञानाच्चिकीर्षाभवतीति विवेकः।

अथ कृत्यसाध्यत्वप्रकारकनिश्चयस्य चिकीर्षां प्रति प्रतिबन्धकत्वमस्तु-एवं च तादृशनिश्चयाभावस्य प्रतिबन्धकाभावविधया कारणत्वेन निर्वाहे अलं कृति साध्यताज्ञानस्य कारणत्वेनेत्यत आह। अत एवेति। कृतिसाध्यत्वप्रकारकज्ञानस्य हेतुत्वादेवेत्यर्थः। न चिकीर्षेति। अन्यथा कृत्यसाध्यताज्ञानाभावरूपकारणात्तत्र चिकीर्षापत्तेः, कृतिसाध्यताज्ञानस्य हेतुत्वमावश्यकमिति भावः ॥१४७॥

ननु एतावता उपायेच्छां प्रति इष्टसाधनताज्ञानं कारणम्, चिकीर्षां प्रति कृतिसाध्यताज्ञानं इष्टसाधनताज्ञानं च कारणमिति सिद्धम्, एवं च मधुविषसंयुक्तान्नभक्षणादौ चिकीर्षापत्तिः, तादृशभक्षणादौ तृप्तिरूपेष्टसाधनत्व कृतिसाध्यत्वज्ञानसत्वात्, ततश्च प्रवृत्त्यापत्तिः, न चेष्टापत्तिः संभवतीत्यत आह। मूले-बलवद्द्विष्टेति। द्विष्टत्वं द्वेषविषयत्वम्, तच्च दुःखे, एवं च द्वेषविषयीभूत दुःखसाधनताज्ञानं चिकीर्षाप्रतिबन्धकमित्यर्थः। तदेवाह। बलवदिति। बलवत्वं द्वेषनिष्ठोजातिविशेषः। तेन "कष्टं कर्म" इति न्यायेनयागस्यापि नान्तरीयकदुःखजनकततया द्वेषविषयीभूतदुःखसाधनताधीसत्वेपि न चिकीर्षानुपपत्तिः। तत्र। चिकीर्षायाम्। प्रतिबन्धकमिति। तथा च चिकीर्षां प्रति बलवद्द्वेषविषयतावच्छेदकीभूतधर्मावच्छिन्ननिरूपितसाधनताज्ञानं प्रतिबन्धकमित्यर्थः। एवं च मधुविषसंयुक्तान्नभक्षणादौ निरुक्तकारणसत्वेपि प्रतिबन्धकसत्वान्न चिकीर्षापत्तिरिति भावः। अतः। प्रतिबन्धक-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

बलवद्द्विष्टहेतुत्वमतिः स्यात् प्रतिबन्धिका ।

बलवदिति । बलवद्द्विष्टसाधनताज्ञानं प्रतिबन्धकम्, अतो मधुविष-संपृक्तान्नभोजने न चिकीर्षा । बलवद्द्वेषः प्रतिबन्धक इत्यन्ये ॥

बलवद्द्विष्टसाधनताज्ञान को चिकीर्षा के प्रति प्रतिबन्धक माना गया है इसी वास्ते मधु-विष सम्पृक्त अन्नभोजन में चिकीर्षा नहीं होती है। अन्य कोई लोग कहते हैं कि मधुविष सम्पृक्त अन्नभोजन में न होनेवाली चिकीर्षा के प्रति बलवद्द्वेष ही प्रतिबन्धक है ॥१४८॥

सत्वात्। **बलवद्द्वेष** इति। बलवद्द्विष्टसाधनताज्ञानाधीनद्वेष इत्यर्थः। फले द्वेषात्त-दुपायेपि द्वेष इति भावः। तथा च पाकादिगोचरेच्छायां "बलवद्द्वेषविषयीभूतदुःख साधनताज्ञानजन्यः" पाकविषयकद्वेषः प्रतिबन्धक इतिध्येयम्।

यत्र यदा इष्टसाधनताज्ञानं द्विष्टसाधनताज्ञानजनकसामग्रीसमवधानं च तदुत्तरक्षणे द्विष्टसाधनताज्ञानस्यैव इच्छाया उत्पत्तिप्रसंगः, प्रतिबन्धकाभावविधया द्वेषाभावरूप सत्वादित्यस्वरसोऽन्ये इत्यनेनसूचितः। **मूले-तदिति** । बलवद्द्विष्टेत्यर्थः तदेवाह। **बलवदनिष्टेति** । यदा बलवदनिष्टानुबन्धित्वनिश्चयः बलवदनिष्टानु-बन्धित्वज्ञानं च नास्ति तदा इच्छानुत्पत्तिप्रसंगः, इत्यस्वरसः कस्यचिन्मते इत्यनेन दर्शितः।

अथ बलवदनिष्टाननुबन्धित्वज्ञानस्याहेतुत्वे तस्य विध्यर्थत्वानुपपत्तिः, प्रवृत्तिजनकेच्छाजनकज्ञानविषयस्यैव विध्यर्थत्वात्। प्रवर्तकचिकीर्षाया हेतुधी-विषयोविधिरित्याचार्योक्तेः। न चेष्टापत्तिः। न कलञ्जंभक्षयेदित्यादिवाक्यानाम-प्रामाण्यप्रसंगात्। कलञ्जभक्षणे कृतिसाध्यत्वस्य इष्टसाधनत्वस्य च सत्वेनाऽगत्या बलवदनिष्टाननुबन्धित्वस्य विध्यर्थत्वावश्यकत्वादिति चेन्न। तद्ज्ञानस्य प्रवृत्त्यजन-कत्वेपि प्रवृत्तिजनकेच्छाप्रतिबन्धकज्ञानविघटकत्वेन प्रवृत्तिप्रयोजकतया तद्विषयस्य विध्यर्थत्वोपपत्तेः ॥१४८॥

इति इच्छानिरूपणम्

द्वेषं निरूपयति। **द्विष्टेति** । दुःखोपायविषयकद्वेषं प्रति बलवद्द्विष्टसाधनता-ज्ञानं कारणमित्यर्थः। बलवदिष्टसाधनताज्ञानं प्रतिबन्धकम्, तेन नान्तरीयकदुःख-जनके पाठकादौ न द्वेषः।

निवृत्तेः साक्षादनुकूलत्वं द्वेषलक्षणम्। ज्ञानवारणाय साक्षादिति। **दुःखोपाय-विषयकमिति** । दुखोपायभूता ये सर्पादयः तद्विषयकमित्यर्थः एवं च द्विष्टसाधनता-ज्ञानजन्यतावच्छेदकद्वेषत्वजातिमत्वं द्वेषस्य लक्षणम्। तस्य तु द्रोहः क्रोधो मन्यु-रक्षमा-अमर्ष इति भेदाः। अलक्षितविकारश्चिरानुपद्यापकारावसानोद्रोहः। शरीरादि-विकारहेतुः क्षणविनाशी द्वेषः क्रोधः। अपकाराऽसमर्थस्याऽन्तर्निगूढो द्वेषो मन्युः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तदहेतुत्वबुद्धेस्तु हेतुत्वं कस्यचिन्मते ॥१४८॥

तदहेतुत्वेति। बलवदनिष्टाजनकत्वज्ञानं कारणमित्यर्थः ॥१४८॥

इति इच्छानिरूपणम्

द्विष्टसाधनताबुद्धिर्भवेद् द्वेषस्य कारणम्।
प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम् ॥१४९॥
एवं प्रयत्नत्रैविध्यं तान्त्रिकैः परिकीर्त्तितम् ॥

प्रयत्नं निरूपयति प्रवृत्तिश्चेति। प्रवृत्ति-निवृत्ति-जीवनयोनियत्नभेदात् प्रयत्नस्त्रिविधइत्यर्थः ॥

द्वेष का निरूपण करते हैं—द्विष्टसाधनतेति।

द्वेष दो प्रकार का है (१) दुःखविषयक, अर्थात् दुःख के प्रति जो द्वेष वह हुवा दुःखविषयक द्वेष। दूसरा दुःखोपायविषयक, अर्थात् दुःख के उपाय (कारण) जिस कारण से दुःख होता है वह दुःखोपायविषयक द्वेष कहलाता है, सो दुःखोपायविषयक द्वेष के प्रति बलवद्द्विष्टसाधनताज्ञान कारण है। और उस द्वेष के प्रति बलवदिष्टसाधनताज्ञान प्रतिबन्धक है। इसलिये नान्तरीयक अर्थात् जिस दुःख के बिना पाक नहीं हो सकता है, जैसे पाकनिर्माणकाल में हाथ वगैरह का जल जाना, तथा आँख में धुआँ लगना इत्यादि। उस दुःख के जनक पाक में द्विष्टसाधनताज्ञानरूप द्वेष का कारण रहते हुवे भी द्वेष इसलिये नहीं होता है कि उस द्वेष का प्रतिबन्धक बलवदिष्टसाधनताज्ञान बैठा हुवा है क्योंकि पाक बलवान् इष्ट जो तृप्ति उसका साधन है ॥१४९॥

प्रयत्न का निरूपण करते हैं—प्रवृत्तिश्चेति ॥१५०॥

प्रवृत्ति में कौन-कौन कारण हैं—चिकीर्षेति। १—चिकीर्षा। २—कृतिसाध्यताज्ञान। ३—इष्टसाधनताज्ञान। ४—समवायिकारण का प्रत्यक्ष ये चार प्रवृत्ति में कारण होते हैं।

परगुणद्वेषोऽक्षमास्वगुणपरिभवाऽक्षमोद्वेषोऽमर्षः। तेन। द्वेषे बलवत्वविशेषणेन। दुःखे नान्तरीयकत्वं च प्रकृत कार्यनियतपूर्ववर्तित्वे सति प्रकृतकार्याऽजनकत्वम्।

इति द्वेषनिरूपणम्

मूले-जीवनकारणमिति। जीवनयोनिरित्यर्थः। तथा च प्रयत्नपदशक्यतावच्छेदकतया सिद्धोजातिविशेषः प्रयत्नत्वं प्रयत्नसामान्यलक्षणम्। प्रयत्न एव कृतिः भावना इति चोच्यते भाव्यते फलमनया इति व्युत्पत्तेः। तस्य भेदानाह। प्रवृत्तीत्यादि।

"प्रवृत्तोस्मीति प्रतीतिसिद्ध" प्रवृत्तित्वजातिमत्वं प्रवृत्तेर्लक्षणम्। तस्याः कारणान्याह। मूले—चिकीर्षेति। कृतिसाध्यत्वप्रकारिका इच्छेत्यर्थः। सा च

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चिकीर्षा कृतिसाध्येष्टसाधनत्वमतिस्तथा ॥१५०॥
उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत् ।

चिकीर्षेत्यादि । मधुविषसंपृक्तान्नभोजनादौ बलवदनिष्टानुबन्धित्वेन चिकीर्षाभावान्न प्रवृत्तिरिति भावः । कृतिसाध्यताज्ञानादिवद्बलवदनिष्टाननुबन्धित्वज्ञानमपि स्वतन्त्रान्वयव्यतिरेकाभ्यां प्रवृत्तौ कारणमित्यपि वदन्ति।

चन्द्रमण्डलानयन में कृतिसाध्यताज्ञान न होने से, अग्नि प्रवेश में इष्टसाधनताज्ञान न होने से, तथा द्व्यणुक को पैदा करने में परमाणु (द्व्यणुक के कारण) का प्रत्यक्ष न होने से, मनुष्यमात्र की प्रवृत्ति नहीं होती है। और घट के निर्माण में प्रवृत्ति कुलाल की इस कारण से होती है कि वहाँ कारणचतुष्टय मौजूद है। यह कारिकार्थ हुवा।

मधु और विष से संपृक्त (मिला हुवा) अन्नस्वरूप भोजन बलवान् अनिष्ट (मरण) का अनुबन्धी (कारण) है इसलिये उसको करने की इच्छा न होने से प्रवृत्ति नहींहोती है। किसी का सिद्धान्त है कि कृतिसाध्यता-इष्टसाधनताज्ञान आदि की

प्रवृत्तौकारणम्, तदसत्वे इतरकारणकलापसत्वे प्रवृत्त्यनुपपत्तेः । तथा च समवायेन प्रवृत्तिं प्रति समवायेन चिकीर्षा कारणम् । जन्यतावच्छेदकतावच्छेदकसंबन्धश्च समवायकालिकैतदुभयम् । तेन प्रवृत्तित्वस्येश्वरप्रवृत्तिवृत्तित्वेपि न क्षतिः । एवं प्रवृत्तौ कृतिसाध्यताज्ञानं कारणम् । अतश्चन्द्रमण्डलाऽऽनयने इष्टसाधनताज्ञानसत्वेपि कृतिसाध्यताज्ञानाभावान्न प्रवृत्तिः । एवं तत्र इष्टसाधनताज्ञानमपि कारणम्, अतो मधुविषसंपृक्तान्नभक्षणादौ कृतिसाध्यताज्ञानसत्वेपि न प्रवृत्तिः ।

अथ मधुविषसंपृक्तान्नभक्षणे कथं न प्रवृत्तिः, तृप्तिरूपेष्टसाधनताज्ञानसत्वादत आह । **मधुविषसंपृक्तान्नभोजनादाविति** । **बलवदनिष्टानुबन्धित्वेनेति** । बलवदनिष्टजनकतासत्वेनेत्यर्थः । तादृशभोजनं बलवदनिष्टानुबन्धीति ज्ञानसत्वेनेति यावत् । **चिकीर्षाभावादिति** । तथा च चिकीर्षां प्रति बलदनिष्टानुबन्धित्वज्ञानस्य प्रतिबन्धकतायाः पूर्वं **बलवद्द्विष्टहेतुत्वमतिः स्यात्प्रतिबन्धिके''** त्यनेनोक्ततया मधुविषसंपृक्तान्नभक्षणादौ प्रतिबन्धकाभावरूपकारणाभावात् चिकीर्षानुत्पत्त्या न प्रवृत्तिरिति भावः ।

कस्य चिन्मतमाह । **कृतिसाध्यताज्ञानादिवदिति** । आदिना चिकीर्षेष्टसाधनत्वज्ञानयोः परिग्रहः । **बलवदनिष्टाननुबन्धित्वज्ञानमपीति** । बलवदनिष्टाजनकत्वज्ञानमपीत्यर्थः । **स्वतन्त्रेति** । चिकीर्षाऽद्वारकेत्यर्थः । अन्यथा कृतिसाध्यताज्ञानादेरपि चिकीर्षायामेव हेतुत्वं स्यान्नतु प्रवृत्तौ, व्यापारेण व्यापारिणोनाऽन्यथासिद्धत्वमिति तु प्रकृतेऽपि समानमिति भावः । चिकीर्षां प्रति बलवदनिष्टानुबन्धित्वज्ञानाभावस्य हेतुत्वस्वीकारेणैव सामंजस्ये बलवदनिष्टाननुबन्धित्वज्ञानस्यहेतुत्वाकल्पनाद्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कार्यताज्ञानं प्रवर्त्तकमिति गुरवः । तथाहि-ज्ञानस्यप्रवृत्तौ जननीयायां चिकीर्षातिरिक्तं नापेक्षितमस्ति । साच कृतिसाध्यताज्ञानसाध्या, इच्छायाः स्वप्रकारप्रकारकधीसाध्यत्वनियमात् । चिकीर्षा हि कृतिसाध्यत्वप्रकारिकेच्छा ।

तरह बलवदनिष्ट का अननुबन्धित्व (अकारणत्व) ज्ञान भी प्रतिबन्धकाभावविषया स्वतंत्र अन्वय-व्यतिरेक के द्वारा प्रवृत्ति में कारण है। और गुरु प्रभाकर का सिद्धान्त है कि कार्यताज्ञान (कृतिसाध्यताज्ञान) प्रवृत्ति में कारण है। तथाहि ज्ञान (कृतिसाध्यता ज्ञान) प्रवृत्ति को उत्पन्न करने में चिकीर्षा के अतिरिक्त (इष्टसाधनताज्ञान आदि की) अपेक्षा नहीं रखता है। और वह चिकीर्षा कृतिसाध्यता ज्ञान से साध्य (प्रयोज्य) है, कारण कि इच्छा अपने समानप्रकारक ज्ञान से उत्पन्न होती है। (अभिप्राय यह है कि 'कर्त्तुम् इच्छा चिकीर्षा' इस व्युत्पत्ति में 'तुमुन्' प्रत्ययान्त 'कृ' धातुका अर्थ है 'कृतिसाध्य', इच्छा का 'इच्छा' ही अर्थ है अब समुदित का अर्थ हुवा "कृतिसाध्यत्वप्रकारिका इच्छा"। और यह नियम है कि इच्छा अपने समानप्रकारक ज्ञान से साध्य (जन्य) होती है। अर्थात् स्व (चिकीर्षा) में जो प्रकार (कृतिसाध्यत्व) तत्प्रकारक (कृतिसाध्यत्वप्रकारक) जो धी "घटो मत्कृतिसाध्यः", ऐसा कृतिसाध्यत्वप्रकारकज्ञान होने पर ही घट की इच्छा होती है) वही मूल में कहा है कि "इच्छायाः स्वप्रकार प्रकारक धी साध्यत्व नियमात्" अर्थात् इच्छा (चिकीर्षा) स्व (चिकीर्षा) में जो प्रकार (कृतिसाध्यत्व) तत्प्रकारक धी से नियम से साध्य है। चिकीर्षा नाम है कृतिसाध्यत्वप्रकारिका इच्छा का, चिकीर्षा

अन्यथा यदा बलवदनिष्टाननुबन्धित्वज्ञानं च नास्ति तदा सर्वानुभवसिद्धचिकीर्षापलापप्रसंग इत्यस्वरसोवदन्तीत्यनेन सूचितः।

अत्रेदं बोध्यम् प्रवृत्तौ चिकीर्षायाः साक्षात्कारणत्वम्, कृतिसाध्यत्वेष्टसाधनताज्ञानयोश्चिकीर्षाद्वारा हेतुत्वमिति।

प्रवृत्तिं प्रति कृतिसाध्यताज्ञानमात्रं कारणम्, अतः कृतिसाध्यत्वमेव विध्यर्थः इति प्राभाकरमतं निरसितुमादौ तन्मतमुपन्यस्यति। **कार्यताज्ञानमिति**। कृतिसाध्यताज्ञानमित्यर्थः। **प्रवर्तकमिति**। चिकीर्षाद्वारा प्रवृत्तिकारणमित्यर्थः। **गुरव इति**। वदन्तीति शेषः। **ज्ञानस्य**। कृतिसाध्यताज्ञानस्य। **चिकीर्षातिरिक्तं**। चिकीर्षारूपव्यापारभिन्नं। **नापेक्षितमस्तीति**। सहकारिकारणं किमपिनास्तीत्यर्थः। तथा च कार्यताज्ञानं इष्टसाधानताज्ञानाऽसहकृतं सत् चिकार्षाद्वारा प्रवृत्तिं जनयतीति भावः। यथा श्रुते आत्ममनःसंयोगादेरपि कारणत्वादसंगत्यापत्तेः। चिकीर्षाया व्यापारत्वमुपपादयति। **साचेति**। चिकीर्षाचेत्यर्थः। चकारः एवकारार्थकः, साध्येत्युत्तरं योजनीयः। तत्र हेतुमाह। **इच्छाया इति**। चिकीर्षाया इत्यर्थः। **स्वप्रकारप्रकारकधीसाध्यत्वनियमादिति**। स्वं चिकीर्षा तस्यां प्रकार एव प्रकारोयस्यां सा स्वप्रकारप्रकारकधीः तत्साध्यत्वनियमादिति। कृतिसाध्यताज्ञानसत्वे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तत्र कृतिसाध्यत्वं प्रकारस्तत्प्रकारकज्ञानं चिकीर्षायां तद्द्वारा च प्रवृत्तौ कारणं नत्विष्टसाधनताज्ञानं तत्र हेतुः। कृत्यसाध्येऽपि चन्द्रमण्डलानयनादौ प्रवृत्त्यापत्तेः।

नन्वकृत्यसाध्यताज्ञानं प्रतिबन्धकमिति चेन्न। तदभावापेक्षया कृतिसाध्यताज्ञानस्य लघुत्वात्। न च द्वयोरेव हेतुत्वं, गौरवात्। ननु

में 'कृतिसाध्यत्व' प्रकार है, इसीलिये कृतिसाध्यत्व प्रकारक ज्ञान चिकीर्षा में और चिकीर्षा द्वारा प्रवृत्ति में कारण है। किन्तु इष्टसाधनता ज्ञान प्रवृत्ति में कारण नहीं है। क्योंकि इष्टसाधनता ज्ञान को कारण मानने पर चन्द्रमण्डल के आनयन में प्रवृत्ति की आपत्ति लग जायगी। (और कृतिसाध्यताज्ञान को प्रवृत्ति में कारण मानने पर वह आपत्ति इसलिये वारित हो जाती है कि वह चन्द्रमण्डलानयन कृति से सर्वथा असाध्य हैं अतः कृतिसाध्यताज्ञान के अभाव होने से प्रवृत्ति नहीं होती है)।

प्रश्न—नैयायिक कहता है कि वहाँ पर अर्थात् चन्द्रमण्डलानयनस्थल में कृतिसाध्यताज्ञानाभाव को प्रतिबन्धक मान लिया जायगा, सो वहाँ पर कृतिसाध्यताज्ञानाभावरूप प्रतिबन्धक के मौजूद होने से प्रवृत्ति नहीं होती है।

उत्तर—प्रभाकर कहता है कि तदभाव (कृतिसाध्यताज्ञानाभाव) को प्रतिबन्धक मानने की अपेक्षया कृतिसाध्यताज्ञान को कारण मानने में लाघव है। नैया० दोनों (इष्टसाधनता-

---

चिकीर्षासत्त्वं तदभावे तदभाव इत्यन्वयव्यतिरेकाभ्यां कृतिसाध्यताज्ञानजन्यत्वावश्यकत्वादित्यर्थः। कृत्यसाध्यताज्ञाने सति चिकीर्षानुदयादिति भावः। उक्तार्थमेवस्मारयति। चिकीर्षाहीति। हि यतः। तथा च यतश्चिकीर्षाकृतिसाध्यत्वप्रकारकेच्छारूपाइत्यर्थः। तत्रेति। अत इत्यादिः। चिकीर्षायामित्यर्थः। तत्प्रकारकं ज्ञानमिति। कृतिसाध्यत्वप्रकारकं ज्ञानमित्यर्थः। अत्रेदंतत्त्वम्। लाघवात् साध्यतासंबन्धेन कृतिप्रकारिका पाकोमत्कृतिमान् भवतु इत्याकारिकेच्छैव द्वारं, न तु कृतिसाध्यत्वप्रकारिका गौरवात्। अत एव ज्ञानमपि साध्यतासंबन्धेन कृतिप्रकारकमेव हेतुरिति। चिकीर्षायामिति। अस्य हेतुरित्यनेनान्वयः। तद्द्वारा। चिकीर्षाद्वारा। प्रवृत्ताविति। प्रवृत्तावपीत्यर्थः। नत्विष्टसाधनताज्ञानमिति। इष्टसाधनत्वादिज्ञानमित्यर्थः। आदिना बलवदनिष्टाननुबन्धित्वपरिग्रहः। तत्रेति। नित्ये इति। तदभावादिति। इष्टसाधनत्वाभावादित्यर्थः। अन्यथासिद्धत्वादित्यपि बोध्यम्। केचित्तु तत्रेति। चिकीर्षासामान्येइत्यर्थः। तेन विशेषतोहेतुत्वेपि न क्षति रित्याहुः। तच्चिन्त्यम्।

शंकते। नन्विति। कृत्यसाध्यताज्ञानं प्रतिबन्धकम्, "अन्यथा" कृत्यसाध्येपि प्रवृत्त्यापत्तेरिति योजना। तदभावापेक्षयेति। कृत्यसाध्यतानिश्चयाभावाऽपेक्षयेत्यर्थः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्वन्मतेऽपि मधुविषसंपृक्तान्नभोजने चैत्यवन्दने च प्रवृत्त्यापत्तिः, कार्यता ज्ञानस्य सत्त्वादिति चेन्न ।

ज्ञान-कृतिसाध्यताज्ञान) को ही कारण मान लिया जावे । प्रभा० गौरव है । नैया० तुम्हारे प्रभाकर के मत में मधु और विष से मिले हुवे भोजन में तथा चैत्य (बौद्ध देवता) के वन्दन में प्रवृत्ति होनी चाहिये । क्योंकि कार्यता (कृतिसाध्यता) ज्ञान उभयत्र मधुविषसम्पृक्तान्नभोजन तथा चैतवन्दन में) वर्त्तमान है । प्रभाकर—यह कथन ठीक नहीं क्योंकि स्वविशेषणवत्ता-

---

अत्रेदं बोध्यम् । स्वकृतिसाध्यत्वप्रकारकेच्छैव प्रवृत्तौ हेतुः, स्वकृत्यसाध्यतया ज्ञाते पुरुषान्तरीयकृतिसाध्यताज्ञानवतस्तत्प्रकारकेच्छा संभवेप्य प्रवृत्तेः । साध्यत्वमपि फलोपधानात्मकसाधनताघटित मेव ग्राह्यम् , तेनाऽस्मदादि कृतेः कृतित्वेन मेरुलङ्घनादावपि स्वरूपयोग्यतया तत्साध्यताज्ञानान्नमेरुलङ्घनादौ प्रवृत्त्यापत्तिः । ईदृशसाध्यत्वस्य फलोत्पत्तेः पूर्वं सर्वत्र निश्चयाऽसंभवेन संशयनिश्चयसाधारणज्ञानत्वेन रूपेणैव कृतिसाध्यताज्ञानस्य प्रवृत्तिकारणचिकीर्षाहेतुत्वं वक्तव्यम् । तथा च कृत्यसाध्यतानिश्चयस्य प्रतिबन्धकत्वे निश्चयत्वप्रवेशेवगौरवमपीति ।

ननु कृत्यसाध्यतानिश्चयाऽभावः सर्वत्र चिकीर्षोत्पत्तिपूर्वं उभयमतसिद्धः, कृतिसाध्यताज्ञानं तु न तथा, तथा च कृतिसाध्यताज्ञानत्वस्य कारणतावच्छेदकत्वे लाघवं "सदपि" न विनिगमकम्, तत्र नियतपूर्ववर्त्तितावच्छेदकत्वकल्पनगौरवस्य दुर्वारत्वात्, कृत्यसाध्यतानिश्चयाभावत्वे चाऽन्यथासिद्धिनिरूपकतानवच्छेदकत्वस्यैव कल्प्यतया तत्रापि लाघवगौरयोस्तौल्यात्, तथा च कारणतावच्छेदकगौरवमचित्करमेवेति विनिगमनाविरहादुभयोरेव हेतुत्वमावश्यकमित्याशंकते । **नचेति ।** नहीत्यर्थः । अस्य हेतुत्वमित्यनेनाऽन्वयः । **द्वयोरेवेति ।** कृत्यसाध्यतानिश्चयाभावत्व कृतिसाध्यताज्ञानत्वाभ्यामित्यादिः । तादृशाभाव तादृशज्ञानयोरपीत्यर्थः । हेतुत्वाभावे हेतुमाह । **गौरवादिति ।** कृत्यसाध्यतानिश्चयाभावत्वस्य गुरुरूपत्वादित्यर्थः । तथा च द्वयोर्लघुधर्मरूपत्वे विनिगमनाविरहेण कृतिसाध्यताज्ञानत्वेनेव तादृशनिश्चयाभावत्वेन हेतुत्वमापद्येत, न चैवम्, तादृशनिश्चयाभावत्वस्य गुरुरूपत्वादिति भावः । वस्तुतस्तु इच्छायाः स्वप्रकारप्रकारकधीसाध्यत्वनियमस्याऽनुपदमेवोपदर्शिततया स्वयं नियतपूर्ववर्त्तित्वस्य कृतिसाध्यताज्ञाने ऽकल्पनीयतया तादृशकल्पनागौरवमपि नास्तीति ध्येयम् ।

न चैवं सति कृत्यसाध्यता ज्ञानं कृतिसाध्यताज्ञानं च यदा नास्ति तदा चिकीर्षाप्रवृत्त्योरनुत्पत्तिप्रसंगइतिवाच्यम् । इष्टापत्तेः । अज्ञातार्थविषयकचिकीर्षापत्तिवारणाय तत्प्रकारकचिकीर्षां प्रति तत्प्रकारकज्ञानस्य हेतुताया आवश्यकत्वात् ।

नैयायिकः शंकते । **नन्विति । स्वन्मतेपीति ।** अपिशब्दः प्रवृत्यापत्तिरित्युत्तरं योजनीयः । प्राभाकरमतेपीत्यर्थः । **प्रवृत्त्यापत्तिरिति** बलवदनिष्टानुबन्धित्वादिरूप

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्वविशेषणवत्ताप्रतिसंधानजन्यकार्यता ज्ञानस्य प्रवर्त्तकत्वात् । काम्ये हि पाकयागादौ कामनास्वविशेषणम् । ततश्च बलवदनिष्टाननुबन्धि-काम्यसाधनताज्ञानेन कार्यताज्ञानं, ततः प्रवृत्तिः । तृप्तस्य भोजने न प्रवर्त्तते तदानीं कामनायाः पुरुषविशेषणत्वाभावात् । नित्ये च शौचादिकं पुरुषविशेषणम् । तेन शौचादिज्ञानाधीनकृतिसाध्यताज्ञानात् तत्र प्रवृत्तिः ।

प्रतिसन्धानजन्य कार्यताज्ञान ही प्रवृत्तक है । (स्वपद से प्रवर्त्तमान पुरुष को लेना चाहिये) काम्यप्रयोग याग एवं पाक आदि में कामना स्व (पुरुष) का विशेषण है । इसके बाद बलवान् अनिष्ट के अननुबन्धी काम्यसाधनताज्ञान से कार्यताज्ञान होता है तब प्रवृत्ति होती है । तृप्त व्यक्ति की भोजन में प्रवृत्ति इसलिये नहीं होती है कि उस समय कामना (इच्छा) पुरुष का विशेषण नहीं है । (अर्थात् उस (तृप्ति) काल कामनावान् (इच्छावान्) यदि पुरुष होता तो कामना पुरुष का विशेषण होती, परन्तु तृप्तिकाल में पुरुष को भोजन की इच्छा ही नहीं है, अतः वहाँ पुनः भोजन में प्रवृत्ति नहीं होती है । इसी प्रकार मधु-विष से संयुक्त अन्न भोजन में भी अगाड़ी (खाने के बाद) होनेवाले मरणरूप अनिष्ट को देखकर कामना (इच्छा) नहीं होती है अतः वहाँ भी स्वविशेषणवत्ता (प्रवर्त्तमान पुरुष कामनावत्ता) प्रति-सन्धानजन्य (ज्ञानजन्य) कार्यताज्ञान के न होने से प्रवृत्ति नहीं होती है) । नित्यप्रयोग (सन्ध्या-वन्दन आदि) स्थल में शौच (पवित्रता) आदि पुरुष के विशेषण हैं, इसलिये वहां शौच आदि के ज्ञानाधीन कृतिसाध्यताज्ञान से प्रवृत्ति होतीं है । (और पूर्वोक्त चैत्यवन्दन में केवल कृतिसाध्यताज्ञान होते हुवे भी शौचादिरूपकामनाज्ञाधीनकृतिसाध्यताज्ञान नहीं है अतः आस्तिक की प्रवृत्ति नही होती है) ।

बाधनिश्चयदशायामित्यादिः । तेन नेष्टापत्तिसंभवः । हृद्‌मुपलक्षणम् । पाकादावपि बाधनिश्चयदशायां तथा प्रसंगोबोध्यः । चिकीर्षापत्तिः—तद्वारा प्रवृत्त्यापत्तिश्चेत्यर्थः । कार्यताज्ञानस्य सत्वादिति । कृतिसाध्यताज्ञानस्य सत्वादित्यर्थः । बलवदनिष्टा-ननुबन्धित्वेष्टसाधनत्वभ्रमोत्तरं तादृशस्थले प्रवृत्तेरानुभवविकत्वेन कृतिसाध्यताया विषभक्षणादौ सत्वेन तद्‌ज्ञानस्य स्मृत्यात्मकस्य उक्तबाधनिश्चयदशायामपि सत्वादिति भावः । इदमत्रावधेयम् । बलवदनिष्टाननुबन्धित्वभ्रमाधीन कृतिसाध्यत्व-संपादनाय मूले मधुविषसंपृक्तान्नभोजन-चैत्यवन्दनरूपोदाहरणद्वयोपन्यासः । इष्ट-साधनताज्ञानसंपादनायैव चाद्योदाहरणे मधुपदोपादानम् । यद्यपि चैत्यवन्दनस्य निष्फलत्वेन न कुर्यान्निष्फलं कर्मेत्यनेन निषिद्धतया तत्रापि बलवदनिष्टानु-बन्धित्वबुद्धिभ्रमरूपा संभवत्येव, तथापि चैत्यवन्दने तदनुबन्धित्वज्ञानस्य नास्तिकाविसाधारण्याभावेनाद्योदाहरणोपन्यासः । प्रभाकरःसमाधत्ते । स्वविशेषणवत्ते-त्यादि । स्वं-प्रवृत्याश्रयः पुरुषः—तत्र विशेषणं काम्ये "स्वर्गादि" कामना—नित्ये शौचादि—तद्वत्ता—तद्विषयसाधनता-इष्टसाधनतेतियावत् तत्प्रतिसन्धानं—तन्निश्चयः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जन्यत्वम्-अव्यवहितोत्तरत्वम्।[1] **कार्यताज्ञानस्येति**। कृतिसाध्यताज्ञानस्येत्यर्थः। **प्रवर्तकत्वादिति** चिकीर्षा द्वारा प्रवृत्तिहेतुत्वस्वीकारादित्यर्थः। तथा च काम्यगोचर प्रवृत्तौ इष्टसाधनताज्ञानाव्यवहितोत्तरकृतिसाध्यताज्ञानं कारणम्। एवं नित्यविषयक-प्रवृत्तौशुचितत्कालजीवित्वज्ञानाव्यवहितोत्तरकृतिसाध्यताज्ञानं कारणम्।

जन्यत्वस्य यथाश्रुतार्थकत्वे तु इष्टसाधनताज्ञानस्य लिङ्गज्ञानविधया कृति-विधया कृतिसाध्यताज्ञानहेतुत्वं बोध्यम्-तथा हि-पाकोमत्कृतिसाध्यः—मत्कृतिं विना-ऽसत्वे सति मदिष्टसाधनत्वादित्यनुमानं बोध्यम्।

ननु यागादिः स्वेच्छाधीनमत्कृतिसाध्यः स्वेच्छाधीनमत्कृतिव्यतिरेकप्रयुक्ता-भावप्रतियोगित्वात्, स्वेच्छाधीनमत्कृतिं विना असत्वे सति सत्वाद्वा इत्यनुमाना-ज्जायमानस्वेच्छाधीनकृतिसाध्यत्वप्रकारकानुमित्यात्मकज्ञानादपि प्रवृत्त्यापत्तिः, तादृशानुमितेरपि कृतिरूपस्वविशेषणघटितहेतुप्रतिसन्धानजन्यत्वात्। न चेष्टापत्तिः। इष्टसाधनताज्ञानशून्यकालीनतादृशकार्यताज्ञानस्य प्रवृत्तिहेतुतायाः सर्वमतविरुद्धत्वादत आह। **काम्ये हीति**। हि-यतः। **कामना**—कामनैव। **स्वविशेषणमिति**। स्वविशेषणशब्देन विवक्षितमित्यर्थः। एवं विशेषणशब्दोत्तरमतुप्प्रत्ययेन स्वविषय-साधनतैव विवक्षितेत्यर्थः। अतोनोक्तदोष इति शेषः। तथा च स्वविशेषणवत्ताप्रति-सन्धानशब्देन कामनाविषयसाधनताज्ञानस्यैव विवक्षितत्वात्, निरुक्तहेतुककार्यत्वानु-मितेः कामनाविषयसाधनताज्ञानाऽजन्यत्वेन इष्टसाधनताज्ञानशून्यकालीननिरुक्त-लिङ्गककृतिसाध्यताज्ञानान्न प्रवृत्त्यापत्तिरिति भावः।

नन्वेवमपि मधुविषसंपृक्तान्नभक्षणादौ प्रवृत्त्यापत्तिः, तत्रापि स्वेच्छाधीन-मत्कृतिं विनाऽसत्वविशिष्टमदिष्टसाधनताज्ञानजन्यस्वेच्छाधीनमत्कृतिसाध्यताज्ञान-सत्वादत आह। **ततश्चेति**। तत एवेत्यर्थः। निरुक्तहेतौ बलवदनिष्टाननुबन्धित्व-विशेषणादेवेतिभावः। हेतौ बलवदनिष्टाननुबन्धित्वविशेषणदानेन फलितार्थमाह। **बलवदिति**। तृतीयार्थोऽव्यवहितोत्तरत्वम्, जन्यत्वं वा। तथा च बलवदनिष्टाननु-बन्धिकाम्यसाधनताज्ञानाव्यवहितोत्तरं, तादृशज्ञानजन्यं वेत्यर्थः। **कार्यताज्ञानं**। कृतिसाध्यताज्ञानं। **तत इति**। कृतिसाध्यताज्ञानादित्यर्थः। **प्रवृत्तिरिति**। वाच्येति शेषः। तथा च मधुविषसंपृक्तान्नभक्षणादौ बलवदनिष्टानुबन्धित्वाभावेन तद्घटित-लिङ्गज्ञानाधीनकार्यताज्ञानस्य सुतरामभावेन न प्रवृत्त्यापत्तिरिति भावः।

ननु तृप्तस्यापि भोजने प्रवृत्त्यापत्तिः, तत्रापि तदीयपूर्वकालीनकामनाविषय-साधनत्वघटितलिङ्गज्ञानाधीनकार्यताज्ञानसत्वादत आह। **तृप्तश्चेति**। एवकारार्थ-कश्चशब्दोनेत्युत्तरं योजनीयः। **न प्रवर्तते** इति। नैव प्रवर्तते इत्यर्थः। **तदानीं**।

१—नियतोत्तरवर्त्तित्वरूपस्य जन्यत्वस्य प्रवेशे गौरवं बोध्यम्। अव्यवहितो-त्तरत्वनिवेशेनक्वचिदिष्टसाधनतास्मरणानन्तरंकृतिसाध्यत्वस्य हेत्वन्तराधीनज्ञान-विषयत्वेपि न प्रवृत्त्यनुपपत्तिः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ननु तदपेक्षया लाघवेनबलवनिष्टाननुबन्धीष्टसाधनताविषयककार्यताज्ञानत्वेन हेतुत्वमस्तु, बलवनिष्टाननुबन्धित्वञ्च इष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखाजनकत्वं बलवद्द्वेषविषयदुःखाजनकत्वं वेति चेन्न। इष्टसाधनत्वकृति-

प्रश्न—नैया० स्वविशेषणवत्ताप्रतिसन्धानजन्यकार्यताज्ञान से लब्ध बलवदनिष्टाननुबन्धित्वविशिष्टइष्टसाधनताज्ञानजन्यकार्यताज्ञान को कारण मानने की अपेक्षया बलवदनिष्टाननुबन्धित्वविशिष्ट इष्टसाधनताविषयककार्यताज्ञान को ही लाघवात् कारण मान लिया जाय। (इसमें लाघव यह है कि जन्यत्व का निवेश नहीं है)। बलवदनिष्टाननुबन्धित्व यह वस्तु है कि अपने इष्ट की उत्पत्ति में नान्तरीयक (आवश्यक) दुःख से अधिक दुःख का जनक न होना, अथवा बलवद्द्वेष के विषय दुःख का जनक न होना। समाधान—मीमांसक यह नैयायिक का कथन ठीक नहीं है—क्योंकि इष्टसाधनत्व—कृतिसाध्यत्व ये दोनों युगपत् (एककाल) में ज्ञातुम् अशक्य हैं, कारण कि साध्यत्व और साधनत्व दोनों का विरोध है,

---

तृप्तिकाले। **पुरुषविशेषणत्वाभावादिति**। पुरुषवृत्तित्वाभावादित्यर्थः। तथा च स्वविशेषणीभूतकामनायां तत्कालीनत्वं विशेषणीयम्। तत्कालीनकामनाविषयसाधनत्वघटितलिङ्गज्ञानजन्यकार्यताज्ञानं तत्कालीनप्रवृत्तिकारणम्। तृप्तिकालीनपुरुषे तादृशकार्यताज्ञानरूपकारणाभावात्तृप्तिकाले न तस्य प्रवृत्तिरिति भावः। ननु काम्ये कर्मणि इष्टसाधनताज्ञानशून्यकाले प्रवृत्त्यनुदयेन तदनुरोधेन इष्टसाधनत्वघटितलिङ्गज्ञानाधीनकार्यताज्ञानस्य प्रवर्तकत्वस्वीकारे नित्ये कर्मणि इष्टाभावेन इष्टसाधनताज्ञानं विनापि प्रवृत्तेः सर्वानुभवसिद्धतया स्वेच्छाधीनमत्कृतिव्यतिरेकप्रयुक्ताभावप्रतियोगित्वादिलिङ्गज्ञानजन्यकार्यताज्ञानात्सन्ध्यावन्दने प्रवृत्त्यापत्तिः, कृतेरपि स्वविशेषणत्वादत आह। **नित्ये इति**। सन्ध्यावन्दनादावित्यर्थः। **शौचादिकमिति**। आदिना विहितकालजीवित्वादेः परिग्रहः। **पुरुषविशेषणमिति**। स्वविशेषणशब्देन विवक्षितमित्यर्थः। तथा च प्रकृते शुचित्व—विहितकालजीवित्वादेरेव स्वविशेषणशब्देन बोध्यतया स्वरूपसंबन्धस्यैव मतुबर्थतया शुचित्वाद्याश्रयस्वरूपलिङ्गज्ञानाधीनकार्यताज्ञानस्यैव प्रवर्तकत्वलाभान्न लिङ्गान्तरजन्यकार्यताज्ञानात्प्रवृत्त्यापत्तिरिति भावः। तदेवाह। **तेनेति**। स्वविशेषणशब्देन शुचित्वादेर्विवक्षितत्वेनेत्यर्थः। **शौचज्ञानाधीनकृतिसाध्यताज्ञानादिति**। तादृशज्ञानादेवेत्यर्थः। **तत्र**। सन्ध्यावन्दनादिकर्मणि। **प्रवृत्तिरिति**। संभवतीति शेषः।

विशिष्टस्य कृतिसाध्यत्वस्य प्रवर्तकत्वं, विध्यर्थत्वं चेति वादिनां मतमुपन्यस्य दूषयति। **नन्विति**। **तदपेक्षयेति**। बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनताज्ञानजन्यकार्यताज्ञानत्वेन हेतुत्वापेक्षया इत्यर्थः। **लाघवेनेति**। जन्यत्वस्य ज्ञानत्वस्याऽनिवेशप्रयुक्तलाघवेनेत्यर्थः। **बलवदनिष्टाननुबन्धीष्टसाधनताविषयककार्यता-**

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

साध्यत्वयोर्युगपज्ज्ञातुमशक्यत्वात् साध्यत्वसाधनत्वयोर्विरोधित्वात्। असि-

क्योंकि असिद्ध को अर्थात् जबतक कार्य की सिद्धि (उत्पत्ति) नहीं होती है तबतक वह कार्य कृतिसाध्य होता है, और सिद्ध अर्थात् उत्पन्न हो जाने पर वह किसी इष्ट का साधन माना

ज्ञानमेवेति। बलवदनिष्टाननुबन्धित्वे-ष्टसाधनत्व-कृतिसाध्यताविषयकज्ञानमेवेत्यर्थः। हेतुरस्त्विति। निरुक्तत्रितयविषयकज्ञानत्वेन कारणमस्तु इत्यर्थः। बलवदनिष्टाऽजनकत्वं निर्वक्ति। बलवदनिष्टाननुबन्धित्वं चेति। अवधारणार्थकचशब्दो-दुःखाजनकत्वमित्युत्तरं योजनीयः। इष्टोत्पत्तिनान्तरीयकेति। इष्टोत्पत्ति साधनीभूतकर्मजन्येत्यर्थः। तथा च इष्टोत्पत्तिसाधनीभूतकर्मजन्यदुःखातिरिक्त-दुःखाजनकत्वं समुदितार्थः। तेन मधुविषसंपृक्तान्नभोजने न प्रवृत्त्यापत्तिः, तेन इष्टोत्पत्तिनान्तरीयकदुःखातिरिक्त "मरणरूप" दुःखजननात्। नन्वेवमपि रागान्धस्याऽगम्य। गमनादौ प्रवृत्तिर्न स्यात्, तादृशगमनस्य नरकसाधनत्वादित्यस्वरसा-दाह। बलवद्द्वेषविषयेति। विजातीयद्वेषविषयेत्यर्थः। बलवद्द्वेषविषयतावच्छेदकी-भूत "दुःखत्व" धर्मावच्छिन्ननिरूपितसाधनताज्ञानस्येच्छां प्रति प्रतिबन्धकतया तादृशप्रतिबन्धकतावच्छेदकघटकतया द्वेषे वैजात्यसिद्धिर्बोध्या। इत्थं च रागान्ध-विषयकनरकविषयकद्वेषे तादृशवैजात्याभावान्नोक्तप्रवृत्त्यनुपपत्तिरिति।

वस्तुतस्तु नरकाऽजनकत्वं—पापाजनकत्वं वा बलवदनिष्टाननुबन्धित्वम्। तेन दुःखमात्रस्य विरक्तानां बलवद्द्वेषविषयत्वेन तादृशवैजात्यस्याऽव्यावर्त्तकत्वेपि न क्षतिः। इष्टसाधनत्वकृतिसाध्यत्वयोरिति। इष्टोत्पत्त्यव्यवहितपूर्वक्षणावच्छेदे-नेष्टव्यापकत्वरूपस्येष्टसाधनत्वस्य इष्टोत्पत्त्यव्यवहितपूर्वक्षणवृत्तित्वघटितस्य—कृत्यव्यवहितोत्तरक्षणवृत्तित्वे सति कृतिव्याप्यत्वरूपस्य कृतिसाध्यत्वस्य कृत्यव्यव-हितोत्तरसंबन्धघटितस्य चेत्यर्थः। युगपद्ज्ञातुमशक्यत्वादिति। एककालावच्छे-दैकविशेष्यकज्ञानीयप्रकारताशून्यत्वादित्यर्थः। तत्र हेतुमाह। साध्यत्वसाधनत्वयो-रिति। क्षणविशेषघटितयोस्तयोरित्यर्थः। विरोधादिति। एकक्षणावच्छेदेनैकत्रा-ऽवर्तमानत्वादित्यर्थः विरोधमुपपादयति। असिद्धस्य हीति। असिद्धस्यैवेत्यर्थः। आद्यक्षणवृत्तित्वविशिष्टस्ययागपाकादेरिति यावत्। सिद्धस्य चेति। आद्यक्षणा-न्यक्षणवृत्तित्वविशिष्टस्यैवेत्यर्थः। कृत्यव्यवहितोत्तरसंबन्धघटितकृतिसाध्यत्वस्य यागपाकाद्युत्पत्तिक्षणे एव यागपाकादिवृत्तित्वात्, स्वर्गौदनाद्यव्यवहितपूर्वक्षणवृत्ति-त्वघटितस्य कालान्तरभाविस्वर्गौदनादीष्टसाधनत्वस्य चोत्पत्तिक्षणावच्छेदेन याग-पाकाद्यवृत्तित्वाच्च तयोरेकक्षणावच्छेदेनैकत्राऽवर्तमानत्वरूपविरोधोदुर्वार इति भावः। तयोर्विरोधमुपपाद्य इदानीमेकज्ञानाऽविषयत्वमुपपादयति। न चैकमेकेनैकदेति। एकेन एकदा इदं सिद्धं, तदसिद्धमिति ज्ञायते इत्येकमुक्तम्। एकं एकेन सिद्धं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

द्धस्य हि साध्यत्वं सिद्धस्य च साधनत्वम्। न चैकमेकेनैकदा सिद्धमसिद्धं चेति ज्ञायते तस्मात् कालभेदादुभयं ज्ञायते इति।

मैवम्। लाघवेन बलवदनिष्टाननुबन्धीष्टसाधनत्वेसति कृतिसाध्यताज्ञा-

गया है। और एक मनुष्य एक वस्तु को एककाल में सिद्ध और असिद्ध इस उभयरूप से कैसे जान सकता है, अतः कालभेद से ही उभय (दोनों वस्तु) जानी जा सकती हैं। खण्डन-नैयायिक कहता है कि पूर्वोक्त कथन प्रभाकर का ठीक नहीं है—क्योंकि लाघव होने के नाते बलवदनिष्टाननुबन्धी इष्टसाधनताविषयककृतिसाध्यताज्ञान ही प्रवृत्ति में कारण है।

अपरेणाऽसिद्धमिति ज्ञायते इति एकेनेत्युक्तम्। एकेन एकं विभिन्नकालावच्छेदेन ज्ञायते इति एकदेत्युक्तम्। प्राभाकरमतमुपसंहरति। तस्मादिति। उक्तरीत्या निरुक्तसाधनत्व-साध्यत्वविषयकसमूहालंवनाऽसंभवादित्यर्थः। न चेदानीमसिद्धः पाकः कृतिसाध्यः, कालान्तरे सिद्धः पाकः इष्टसाधनमिति संमूहालंवनज्ञानादेवप्रवृत्तिसंभव इति वाच्यम्। इदीनीन्तनकालकालान्तरयोरननुगमात्। कालभेदादुभयंज्ञायते इति। भिन्नक्षणावच्छेदेन एकैकज्ञाननिरूपितविषयतावदेव निरुक्तसाध्यत्वसाधनत्वोभयमित्यर्थः। तथा चेष्टसाधनत्वकृतिसाध्यत्वोभयविषयकज्ञानस्याप्रामाणिकतया नैयायिकैस्ताद्दशोभयविषयकज्ञानत्वेन प्रवृत्तिहेतुताया वक्तुमशक्यत्वादनायत्या सर्वैरपि तादृशकार्यताज्ञानत्वेनैव हेतुत्वं स्वीकार्यमिति प्राभाकराभिप्रायः। कृतिसाध्यत्वादेर्विशेषणविशेष्यभावव्यत्यासेन गुरुतरशक्तिषट्कापत्तेश्चेति ध्येयम्।

प्रभाकरमते योग्यताज्ञानं शाब्दबुद्धौ कारणम्। योग्यत्वं चाऽन्वयप्रयोजकरूपवत्वम्, तत्वं च तदभावप्रयोजकीभूताभावप्रतियोगित्वम्। यथा कृतिसाध्यत्वाभावप्रयोजको य इष्टसाधनत्वाभावस्तत्प्रतियोगीष्टसाधनत्वं यागे कृतिसाध्यत्वान्वययोग्यता। ईदृशयोग्यताज्ञानस्याऽहेतुत्वे स्वर्गकामः पचेत इत्यादेरपि प्रामाण्यापत्तिः, स्वर्गकामकृतिसाध्यत्वस्य पाकादौ सत्वात्। इदानीं तु स्वर्गसाधनत्वस्य तत्राऽसत्वान्न प्रामाण्यापत्तिः। एवं च "स्वर्गकामोयजेत" इत्यादौ यागः स्वर्गकामकृतिसाध्यतावानित्याकारकः प्रथमं न बोधः। स्वर्गकामकृतिसाध्यत्वान्वये प्रयोजकस्य स्वर्गसाधनत्वस्य पूर्वं यागे ऽगृहीतत्वात्, साक्षात्स्वर्गसाधनत्वस्य तत्राऽसत्वात्, स्वर्गपर्यन्तस्थायिस्वव्यापारवत्वस्य व्यापारानुपस्थितत्या ग्रहाऽसंभवात्। न च स्वर्गकामनियोज्यताकः "नियोज्यतासंवन्धेनस्वर्गकामीयोवा" यागः कृतिसाध्यतावानित्येवबोधोऽस्तु इति वाच्यम्। स्वर्गकामनियोज्यत्वं हि यदि तत्कृतिसाध्यत्वम्, तदास्वर्गकामकृतिसाध्यताविशिष्टे यागे लिङर्थकृतिसाध्यत्वस्याऽन्वये निराकांक्षत्वापत्तेः, उद्देश्यतावच्छेदकविधेययोरैक्यात्। यदि च स्वर्गकामीयकृतिसाध्यत्वधीविशेष्यत्वम्, तदा "स्वर्गकामः पचेत" इत्यादेरपि प्रामाण्यापत्तेः। किन्तु स्वर्गकामनिष्ठा या स्वर्गसाधनताधीः तज्जन्यकृतिसाध्यताज्ञानविशेष्यत्वंवत्, तदन्वयप्रयोजकं च स्वर्गसाधनत्वं साक्षादसाधनस्य यागादेः स्वर्गपर्यन्तस्थायिव्यापारानुपस्थित्या प्रथमं दुर्ग्रहम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नस्य तत्र हेतुत्वात्। न च साध्यत्वसाधनत्वयोर्विरोधः, यदाकदाचित् साध्यत्वसाधनत्वयोरविरोधात् एकदा साध्यत्वसाधनत्वयोश्चज्ञानात्।

प्रश्न—प्रभाकर कहता है कि कृतिसाध्यत्व-इष्टसाधनत्व—इन दोनों का एककाल में एक वस्तु में न रहने प्रयुक्त विरोध हो जायगा।

उत्तर—साध्यत्व (कृतिसाध्यत्व) साधनत्व (इष्टसाधनत्व) का विरोध नहीं है, क्योंकि कालभेद से (यदाकदाचित्) एक वस्तु में साध्यत्व-साधनत्व के रहने में कोई भी विरोध नहीं है अतः एक वस्तु में साध्यत्व तथा साधनत्व का ज्ञान हो जायेगा। प्रभाकर

अतः कार्ये "अपूर्वे" एव लिङः शक्तिः, तत्रैव धात्वर्थयागस्यस्वर्गकाम-नियोज्यताकत्वस्य च युगपदन्वया। इत्थं च "स्वर्गकामोयजेत" इति विधिवाक्यात् स्वर्गकामनियोज्यताकं यागविषयकं कार्यमित्याकारक एव प्रथमं बोधः। ततश्च यागकार्यस्य स्वर्गकामकृतिसाध्यत्वं स्वर्गकामनियोज्यताकत्वं वा यागस्य स्वर्ग-साधनत्वं विनाऽनुपपन्नमित्यनुपपत्तिधीसहकृतेन तेनैवशब्देनाऽर्थापत्तिरूपपञ्चम-प्रमाणतामापन्नेन यागः स्वर्गकामस्य कृतिसाध्यइत्याकारकः स्वर्गकाम-नियोज्यताको यागः कृतिसाध्य इत्याकारको वा प्रवृत्यौ ययिकोबोध उपगम्यते। प्रभाकर सिद्धान्तः।

प्राभाकरमतं दूषयति। मैवमिति। लाघवेनेति। कारणतावच्छेदककोटौ-जन्यत्व-ज्ञानत्वाऽनिवेशप्रयुक्तलाघवेनेत्यर्थः। बलवदनिष्टाननुबन्धीत्यादि। बलवद-निष्टाननुबन्धित्वेष्टसाधनत्वकृतिसाध्यत्वविषयकनिश्चयस्येत्यर्थः। तत्र। प्रवृत्तौ। हेतुत्वादिति। तादृशत्रितयविषयकनिश्चयत्वेनैव हेतुत्वादित्यर्थः। प्राभाकरोक्त-साध्यत्वसाधनत्वयोर्विरोधं परिहरति। नचेति। नहीत्यर्थः। अविरोधमुपपादयति। यदा कदाचिदिति। यत्किंचित्कालीनसाध्यत्वस्य यत्किंचित्कालीनेनसाधनत्वेन सह विरोधाभावादित्यर्थः। कालविशेषा घटितयोः साध्यत्वसाधनत्वयोरेकत्र वृत्तौ बाधका-भावादित्यर्थः। तथाच एककालावच्छेदेन साध्यत्वसाधनत्वयोरेकत्रावृत्तित्वेपि न क्षतिः। तद्ज्ञानस्य प्रवर्तकत्वानभ्युपगमात्, किन्तु साध्यत्वसाधनत्वयोरनवच्छिन्नयो-रविरुद्धयोर्ज्ञानमेव प्रवर्त्तकं, अव्याप्यवृत्तिज्ञानस्यावच्छेदकावगाहित्वनियमे माना-भावात्, वृक्षः कपिसंयोगीत्यपि प्रतीतेः सर्वानुभवसिद्धत्वादिति भावः। तथा च निर्विशेषितयोः सामान्यतः कृतिसाध्यत्वेष्टसाधनत्वयोर्ज्ञानस्यैव हेतुत्वाङ्गीकार इति फलितम्। एकदेति। इदं च ज्ञाने साध्यत्वं साधनत्वयोश्चाऽन्वेति, साध्यत्व साध-नत्वयोरिति। निर्विशेषितयोरित्यादिः। ज्ञानादिति। ज्ञानसंभवादित्यर्थः। तथा च एकदा तादृशज्ञानसंभवान्न प्रवृत्त्यनुपपत्तिरिति भावः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नव्यास्तुममेदं कृतिसाध्यमितिज्ञानं न प्रवर्त्तकमनागते तस्य ज्ञातुमशक्यत्वात्। किन्तुयादृशस्यपुंसःकृतिसाध्यं यद्दृष्टं तादृशत्वं स्वस्य प्रतिसंधाय तत्र प्रवर्त्तते। तेनौदनकामस्य तत्साधनताज्ञानवतस्तदुपकरणवतः पाकः कृतिसाध्यः तादृशश्चाहमिति प्रतिसंधायपाकेप्रवर्त्ततइत्याहुः।

मतावलम्बी नवीनों का कथन है कि-"ममेदं कृतिसाध्यम्" यह ज्ञान प्रवर्त्तक नहीं है, कारण कि अनागतकाल में होनेवाले पाक आदि में "ममेदं कृतिसाध्यम्" यह ज्ञान सर्वथा अशक्य है (क्योंकि-इदंपदार्थ की प्रत्यक्षविषयीभूतपदार्थ में शक्ति है) किन्तु जिस किसी पुरुष की कृति से साध्य जो कार्य देखा गया है अन्य पुरुष उस कार्य को यदि अपनी कृति से साध्य समझेगा तो उस कार्य में प्रवृत्त होगा—अन्यथा नहीं होगा। इसीलिये ओदन पाक की कामनावाले तथा ओदन विषयक कृतिसाध्यताज्ञानवाले एवं ओदन सम्बन्धी उपकरण (सामग्री) वाले व्यक्ति की पाक में तभी प्रवृत्ति होती है जब कि वह व्यक्ति पाक को अपनी कृति से साध्य, (अर्थात् मैं भी ओदन सम्बन्धी पाक का निर्माण कर सकता हूँ) तथा ओदन पाक की उपकरण सामग्री भी मेरे पास में है ऐसा प्रतिसन्धान (ज्ञान) कर पाता है।

प्राभाकरमतानुयायिनवीनमतमाह। नव्यास्त्विति। ममेदं कृतिसाध्यमितिज्ञानमिति। इदं मत्समवेतकृतिसाध्यमिति ज्ञानमित्यर्थः। न प्रवर्तकमिति। चिकीर्षाद्वारा न प्रवृत्तिजनकमित्यर्थः। प्रवृत्तिजनकत्वाभावे हेतुमाह। अनागते इति। भविष्यत्पाके इत्यर्थः। तस्य। मत्समवेतकृतिसाध्यत्वस्य। ज्ञातुमशक्यत्वादिति। भविष्यत्पाकस्य ज्ञानाऽसंभवेन तद्विशेष्यकमत्समवेतकृतिसाध्यत्वप्रकारकज्ञानाऽसंभवादित्यर्थः। न च पाकोत्पत्त्यनन्तरं लौकिकसन्निकर्षबलात्तादृशपाके कृतिसाध्यत्वज्ञानसंभवेन ततश्च सामान्यलक्षणया भविष्यत्पाकविशेष्यकतादृशकृतिसाध्यत्वप्रकारकज्ञानसंभव इति वाच्यम्। सामान्यलक्षणायाः प्रत्यासत्तित्वानङ्गीकर्तृमते तादृशज्ञानासंभवात्। लौकिसन्निकर्षाधीनप्रत्यक्षस्य च प्रवृत्त्युत्तरकालीनतया प्रवृत्तिहेतुत्वाऽसंभवात्। भविष्यत्पाकरूपपक्षज्ञानाऽसंभवेन भविष्यत्पाकविशेष्यकतादृशकृतिसाध्यत्वप्रकारकानुमितेरप्यसंभवाच्चेति भावः। यादृशस्येति। कृत्युत्पादकसामग्रीविशिष्टस्येत्यर्थः। यद्दृष्टमिति। पाकोदृष्ट इत्यर्थः। तादृशत्वं। तादृशसामग्रीविशिष्टत्वं। स्वस्यप्रतिसन्धायेति। तादृशसामग्रीमानहमिति निश्चित्येत्यर्थः। तत्र। पाके। तेन। ईदृशज्ञानस्य प्रवर्तकत्वस्वीकारेण। ओदनकामस्य। चैत्रादेः। तत्साध्यताज्ञानवतः। अन्यदीयपाकधर्मिकअन्यदीयकृतिसाध्यताप्रकारकप्रत्यक्षप्रमावतः। तदुपकरणवतः। तत्सामग्रीमतः। पाकः कृतिसाध्य इति प्रमित इति शेषः। तादृशश्चाहमितिप्रतिसन्धायेति। तादृशसामग्रीमानहमिति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तन्न । स्वकल्पितलिप्यादिप्रवृत्तौ यौवने कामोद्भेदादिना संभोगादौ च तदभावात् । इदन्तु बोध्यम्—इदानींतनेष्टसाधनत्वादिज्ञानं प्रवर्त्तकम् । तेन भावियौवराज्ये बालस्य न प्रवृत्तिः तदानीं कृतिसाध्यत्वाज्ञानात् । एवं तृप्तश्च भोजने न प्रवर्त्तते तदानीमिष्टसाधनत्वाज्ञानात् । प्रवर्त्तते च दोषदूषितचित्तो विषादिभक्षणे, तदानीं बलवदनिष्टाननुबन्धित्वज्ञानात् । न चास्तिक-

खण्डन—यह मीमांसक का कथन ठीक है क्योंकि स्वयं अपने कल्पित लिपी आदि में तथा यौवन में कामोद्भेदन (कामातुरता) से होने वाले संभोग आदि में मनुष्यों की प्रवृत्ति नहीं हो सकेगी (क्योंकि न उसने उस लिपी को बनाते हुवे किसी को देखा, और न संभोग करते हुवे किसी को देखा जिससे कि वह व्यक्ति "तादृशश्चाहम्" ऐसा निश्चय कर सके)।

नैयायिक कहता है कि यह और जानना चाहिये कि इदानींतनइष्टसाधनताज्ञान-इदानींतनकृतिसाध्यताज्ञान-एवं इदानींतनबलवदानिष्टाननुबन्धित्वज्ञान ही प्रवृत्ति में कारण हैं, न कि केवल इष्टसाधनता ज्ञानादि । तीनों इदानींतननिवेशका फल क्रम से बतलाते हैं कि "तेन भावियौवरा इति । अर्थात् कृतिसाध्यताज्ञान घटक कृति में यदि इदानींतन का निवेश करने से बालक की भावियौवराज्य में प्रवृत्ति नहीं होती है, क्योंकि "तदानीं" बाल्यावस्था में भावियौवराज्यसम्बन्धी कृतिसाध्यताज्ञान नहीं है । इष्टसाधनताज्ञान में इदानींतननिवेश का फल बतलाते हैं कि—"एवं तृप्तश्च" इति । अर्थात् तृप्त व्यक्ति की भोजन में प्रवृत्ति नहीं होती है क्योंकि तृप्तिकाल में उस मनुष्य को भोजन में इष्टसाधनताज्ञान नहीं है । बलवदनिष्टाननुबन्धित्वज्ञान से इदानींतन के निवेश का फल बतलाते कि "प्रवर्त्ततेच रोषदूषितचित्तः" इति । अर्थात् रोष से दूषितचित्त वाले व्यक्ति की विष आदि के भक्षण में प्रवृत्ति इसलिये हो जाती है कि उस काल में उसे बलवान् अनिष्ट के अनुबन्धित्व का ज्ञान नहीं है ।

निश्चियेत्यर्थः । स्वकल्पितलिप्यादिप्रवृत्ताविति । स्व"पुरुषविशेष" कल्पितविजातीयलिपिविजातीयभाषाविषयकप्रवृत्तावित्यर्थः । इदं च तदभावादित्यनेनान्वेति । तदभावादित्यस्य च यादृशस्य पुंसः कृतिसाध्यं यद्दृष्टं तादृशत्वज्ञानाभावादित्यर्थः । तथा च व्यभिचार इति भावः । कामोद्भेदादिनेति । कामातिशयेनेत्यर्थः । आदिना बाल्येऽविवेकेनेत्यादेः परिग्रहः । तदभावादिति । तथा च पुरुषान्तरकर्तृकैतादृशविजातीयसंभोगादेरप्रसिद्ध्या प्रवृत्तिपूर्वं विजातीयसंभोगादिदर्शनासंभवेन तादृशश्चाहमिति प्रवर्तकज्ञानस्य सुतरामसंभवेन व्यभिचारान्नतादृशनिश्चयस्य प्रवर्तकत्वमिति भावः ।

ननु सिद्धान्ते केवलेष्टसाधनत्वादित्रितयविषयकज्ञानस्य प्रवर्तकत्वे भावियौवराज्ये प्रवृत्त्यापत्तिरत आह । इदन्तु बोध्यमिति । अनुपदं वक्ष्यमाणमेव प्रवर्तकमिति बोध्यमित्यर्थः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्यागम्यागमनशत्रुवधादिप्रवृत्तौ कथं बलवदनिष्टाननुबन्धित्वबुद्धिर्नरकसाधनत्वज्ञानादिति वाच्यम्। उत्कटरागादिना नरकसाधनताधीतिरोधानात्। वृष्ट्यादौ तु कृतिसाध्यताज्ञानाभावान्न चिकीर्षाप्रवृत्ती किन्त्विष्टसाधनताज्ञानादिच्छामात्रम्। कृतिश्च प्रवृत्तिरूपा बोध्या। तेनजीवनयोनिसाध्ये प्राणपञ्चकसञ्चारे न प्रवृत्तिः।

प्रश्न—आस्तिक मनुष्य की अगम्या (पर स्त्री) के साथ गमन (संभोग) में, तथा शत्रुवध आदि में होनेवाली प्रवृत्ति में बलवदनिष्टाननुबन्धित्वज्ञान कैसे हुवा जब कि (अगम्यागमन में तथा शत्रुवधादि में) नरक साधनत्वज्ञान उसे हो रहा है।

उत्तर—उत्कटराग-एवं उत्कट द्वेष होने के कारण नरकसाधनताज्ञान तिरोहित हो रहा है। वृष्टि आदि में कृतिसाध्यताज्ञान न होने के कारण चिकीर्षा-प्रवृत्ति नहीं होती हैं, किन्तु इष्टसाधनताज्ञान से इच्छामात्र ही होती है। और कृतिसाध्यताज्ञान घटक कृति का प्रवृत्तिरूप अर्थ समझना चाहिये, इसीलिये जीवनयोनियत्न से साध्य प्राण आदि पाँचवायुवों के संचार में प्रवृत्ति नहीं होती है।

इदानीन्तनेष्टसाधनत्वादिज्ञानमिति। आदिपदात् इदानीन्तनबलवदनिष्टाननुबन्धित्व-इदानीन्तमकृतिसाध्यत्वयोः परिग्रहः। इष्टसाधनत्वं च इच्छाविषयोयस्तत्साधनत्वमित्यर्थः। तत्रेच्छायां इदानीन्तनत्वविशेषणम्। बलवदनिष्टाननुबन्धित्वं च बलवद्द्वेषविषयदुःखाजनकत्वम्, तत्र द्वेषे इदानीन्तनत्वं विशेषणीयम्। एवं कृतौ इदानीन्तनत्वं विशेषणं बोध्यम्।

वस्तुतस्तु विशिष्टस्य कारणत्वे विशेष्यविशेषणभावे विनिगमनाविरहेण कार्यकारणभावषट्कापत्त्या तद्विषयकेच्छा तत्साधनताज्ञान तद्विषयकबलवद्द्वेष तदननुबन्धित्वज्ञान तत्कालीनकृतिसाध्यताज्ञानानां पञ्चविधाः पृथगेव कार्यकारणभावा वाच्याः। एवं तत्कालीनकृतिसाध्यताज्ञानेत्यत्रापितत्तत्कालकृतिसाध्यताज्ञानयोरेव कारणत्वं स्वीक्रियते।

स्थलत्रयेइदानीन्तनत्वविशेषणस्यक्रमेणप्रयोजनमाह। तेनेति। कृतिसाध्यत्वघटककृतौ इदानीन्तनत्वविशेषणेनेत्यर्थः। यौवराज्येइति। सिंहासनारोहणविशेषेइत्यर्थः तदानीं। बाल्यावस्थायां। बालस्येतिशेषः। इष्टसाधनत्वघटकेच्छायामिदानीन्तनत्वविशेषणस्य प्रयोजनमाह। एवमिति। तादृशेच्छायामिदानीन्तनत्वविशेषणेनेत्यर्थः। तदानीं। तृप्तिसमये। तृप्तस्येति शेषः इष्टसाधनत्वाज्ञानादिति। तदानीमिष्टत्वस्य "इच्छाविषयत्वस्य" तृप्तावभावेन विशिष्टतृप्तिसाधनत्वज्ञानाऽसंभवादित्यर्थः। एकक्षणावच्छिन्नैकात्मवृत्तित्वसंबन्धेन तद्विषयकेच्छाविशिष्टं तत्साधनताज्ञानं फलितम्। वै० एकक्षणावच्छिन्नैकालवृत्तित्वसंबन्धेन। तथा चेच्छास्वरूपसती

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इत्थञ्च प्रवर्त्तकत्वानुरोधाद्विधेरपीष्टसाधनत्वादिकमेवार्थः ।

इसलिये प्रवर्त्तकत्व के अनुरोध से "गच्छेत्" "पठेत्" इत्यादि विधिस्थलों में विधि का भी इष्टसाधनत्व-आदिपद ग्राह्य बलवदनिष्टाननुबन्धित्व-कृतिसाध्यत्व-अर्थ है। (अर्थात् बलवद-निष्टाननुबन्धीष्ट-साधनत्वविशिष्टकृतिसाध्यत्व अर्थ है)।

एवविशेषणम् । तेनेच्छाया ज्ञातानुपयोगित्वेपि न क्षतिः । बलवद्द्वेषे तद्विशेषण-प्रयोजनमाह । **प्रवर्तते चेति** । प्रवर्तते एवेत्यर्थः। **दोषदूषितचित्त इति**। दोषैः-रागद्वेषमोहैर्दूषितं चित्तं यस्य स तथा । **विषादिभक्षणे इति** । आदिना मरणसाधनान्तराणां परिग्रहः । **तदानीं** । विषादिभक्षणप्रवृत्त्यव्यहितपूर्वकाले । दोषदूषित-चित्तस्येतिशेषः । **बलवदनिष्टाननुबन्धित्वज्ञानादिति** । बलवद्द्वेषविषयदुःखाजनकत्वज्ञानस्यापिसंभवादित्यर्थः । तथा च विषादिभक्षणे तज्जन्यमरणे तदानीं द्वेषाभावेन तत्कालीनबलवद्द्वेषविषयपदार्थान्तराननुबन्धित्वस्य तादृशप्रवृत्तौ सत्वेन तदानीं तादृशज्ञानसंभवादिति भावः । **आस्तिकस्येति** । अस्ति परलोक इति ज्ञानवत इत्यर्थः । **अगम्याऽगमनशत्रुवधादिप्रवृत्ताविति** । गन्तुं संबद्धुमयोग्या अगम्या-तस्याः-गमने-संभोगे-विषयकत्वं सप्तम्यर्थः-तथा चाऽगम्यागमनविषयक-प्रवृत्तौ शत्रुवधादिविषयकप्रवृत्तावित्यर्थः । आदिपदात्सुरापानादिपरिग्रहः । **प्रवृत्तौ** प्रवृत्त्यव्यवहितपूर्वमिति यावत् । **कथं बलवदनिष्टाननुबन्धित्वबुद्धिरिति** । कथं बलवद्द्वेषविषयदुःखाजनकत्वबुद्धिरित्यर्थः । तत्रहेतुमाह । **नरकसाधनत्वज्ञानादिति** अगम्यागमनादिविशेष्यक बलवद्द्वेषविषयदुःखजनकत्वनिश्चयरूपप्रतिबन्धकसत्वादित्यर्थः । तथा च व्यतिरेकव्यभिचारान्न प्रवृत्तिसामान्ये तादृशबुद्धेर्हेतुत्वमिति भावः । **उत्कटरागादिनेति** । अगम्यागमनादिजन्यसुखविषयकोत्कटेच्छयेत्यर्थः । **नरकसाधनताधीतिरोधानादिति** । बलवद्द्वेषविषयदुःखजनकत्वनिश्चयानुत्पादादित्यर्थः । अगम्यागमने तज्जन्ये सुखे नरके वा बलवद्द्वेषाभावादिति भावः । ननु इष्टसाधनताज्ञानं चिकीर्षाद्वारा प्रवृत्तिहेतुरस्तु किमुपायेच्छां प्रति इष्टसाधनता ज्ञानस्य हेतुताकल्पनेनेत्यत आह । **वृष्ट्यादौत्विति** । आदिना नन्दनवनसञ्चार-परिग्रहः । **कृतिसाध्यताज्ञानाभावादिति** । वृष्टिर्मत्कृतिसाध्येतिज्ञानाभावादित्यर्थः । **नचिकीर्षा** । नवृष्टिविशेष्यककृतिसाध्यत्वप्रकारकेच्छा । चिकीर्षाऽभावात्तत्प्रवृत्तिरपि-नेति भावः । **किन्त्विति** । **इष्टसाधनताज्ञानादिति** । वृष्टिर्भवत्विष्टसाधनमिति ज्ञानादित्यर्थः । **इच्छामात्रमिति** । वृष्टिर्भवतु इति उपायेच्छामात्रमित्यर्थः । उपायेच्छोत्पत्त्यनुरोधात्तत्रेष्टसाधनताज्ञानं स्वातन्त्र्येण हेतुर्वाच्य इति भावः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ननु कृतिसाध्यताज्ञानस्य प्रवृत्तिकारणत्वेऽन्वयव्यभिचारः, जीवनयोनियत्नसाध्ये प्राणपञ्चकसंचारे प्रवृत्त्यभावदर्शनादत आह । कृतिश्चेति । कृतिसाध्यताज्ञानमित्यत्र कृतिसाध्यत्वप्रकारकेच्छारूपचिकीर्षेत्यत्र च कृतिश्चेत्यर्थः प्रवृत्तिरूपेति। तथा चोभयत्र कृतिशब्दस्य प्रवृत्तित्वाच्छिन्नेलक्षणेति भावः । एवं च प्रवृत्तित्वाच्छिन्नेलक्षणेति भावः । एवं च प्रवृत्तिसाध्यताज्ञानं प्रवृत्तिसाध्यत्वप्रकारकेच्छारूपचिकीर्षां प्रति तद्द्वारा च प्रवृत्तौ कारणं बोध्यम्। तेन । प्रवृत्तित्वेन प्रवेशेन । यत्नत्वावच्छिन्नसाध्यताज्ञानस्य प्रवर्तकत्वास्वीकारेणेति यावत्। जीवनयोनिसाध्ये इति । जीवनयोनियत्नमात्रसाध्ये इत्यर्थः। प्रवृत्त्यसाध्ये इति । यावत्। न प्रवृत्तिरिति। प्रवृत्तिं प्रति कृत्यसाध्यताज्ञानस्य प्रतिबन्धकत्वादिति भावः ।

इत्थंचेति । प्रवृत्तिं प्रतीष्टसाधनत्वादिज्ञानस्य हेतुत्वे चेत्यर्थः । प्रवर्तकत्वानुरोधादिति । प्रवर्तकत्वादित्यर्थः। लिङ्श्रवणेऽयं मां प्रवर्तयतीतिनियमतोबोधादिति भावः। विधेरपीति । लिङ्लोट्तव्यत्प्रत्ययानामित्यर्थः। इष्टसाधनत्वादिकमेवेति । आदिना बलवदनिष्टाननुबन्धित्व कृतिसाध्यत्वयोः परिग्रहः । अर्थ इति। वाच्य इति शेषः तथा च विधेराख्यातत्वेन कृतौ शक्तिः, विधित्वेनेष्टसाधनत्वादौ इति फलितम् ।

अत्र भट्टपादाः—प्रवृत्तिस्तावद् द्विविधा—स्वाधीना-पराधीना च । तत्राऽऽद्यायामिष्टसाधनताज्ञानं कारणम्। द्वितीयायां तु आज्ञादिज्ञानं कारणम्। अनिच्छन्तमपि मां राजा प्रेरयतीत्यनुभवात् । तत्राऽऽज्ञादेः प्रत्येकं ज्ञानं न प्रवृत्तिहेतुः, गौरवात् किन्तु आज्ञादिसर्वानुगतं प्रवर्तनात्वप्रकारकज्ञानं तथा लाघवात्। प्रवर्तना च प्रवर्तयितुः परप्रवृत्त्यनुकूलः स्वनिष्ठोव्यापारविशेषः । स च चेतनस्य राजादेराज्ञादिः, अचेतनस्य तु वेदस्य अभिधानामकः स्वसमवेतः स्वजन्यः कश्चिदलौकिकोव्यापारोलिङादिबोध्यः । शब्दाश्रितत्वात् शाब्दीभावना इत्युच्यते, भावनाशब्दस्य व्यापारवाचित्वात, भाव्यतेऽनया इति व्युत्पत्तेः । अत एवाऽऽख्यातार्थभावनापि व्यापाररूपैव। विधेः प्रवर्तकत्वं तु विधिर्मांप्रवर्तयतीत्यनुभवसिद्धम्। तथा च तदुपपत्त्यर्थं लिङादेः स्वनिष्ठाव्यापारविशेषोऽवश्यमभ्युपेयः ।

स्वनिष्ठव्यापारद्वारैव परनिष्ठव्यापारजनकत्वनियमात्। दण्डस्य स्वनिष्ठस्पन्दद्वारा चक्रनिष्ठस्पन्दजनकत्वदर्शनात् । व्यापारिणः स्वनिष्ठव्यापारजननेपि व्यापारापेक्षामनवस्थापत्तिरित्यतः परनिष्ठेति । ज्ञानद्वारा लिङादेः प्रवृत्तिजनकत्वोपगमे शब्दाश्रयोऽभिधानामकोव्यापारोन सिद्ध्यतीत्यतः स्वनिष्ठेति । तथा च परप्रवृत्तिजनकेन लिङादिपदेनापि स्वनिष्ठव्यापारोऽभिधानामकोऽवश्यं जननीयः।

एवं विधिः प्रवृत्तिजनकधर्मसमवायिकारणं तज्जनकद्रव्यत्वादात्मवदित्यनुमानमपि लिङादिसमवेताऽभिधानामकव्यापारेमानम् । परमतेशब्दस्य द्रव्यत्वाभावान्नासिद्धिः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इत्थञ्च विश्वजिता यजेतेत्यादौ यत्र फलं न श्रूयते तत्रापि स्वर्गः फलं

इसीलिये तीन को विधि का अर्थ मानने से "विश्वजिता यजेत" इत्यादिस्थलों में जहाँ पर फल श्रवण नहीं होता है वहाँ भी स्वर्गात्मक इष्टफल की कल्पना कर ली जाती है और उसी स्वर्गरूप इष्टसाधनताज्ञान से याग में फिर प्रवृत्ति होती है ।

सेयमभिधा लिङादिपदमात्रशक्या । तथा हि—यजेतेत्यादौ लिङोंऽशद्वयमस्ति, लिङ्त्वं आख्यातत्वं च । तत्र लिङ्त्वेनाऽभिधायां शक्तिः, सैव शाब्दीभावना । आख्यातत्वेनोत्पादनायां शक्तिः, सैवचार्थीभावना इत्युच्यते ।

द्विविधापि भावना साध्य-साधने-तिकर्तव्यतारूपांऽशत्रयसाकांक्षा । एतत्त्रितयसाकांक्षत्वमेव भावनात्वम् । तत्र तावदार्थीभावनाया अंशत्रयमुच्यते । किं भावयेत् केन भावयेत् कथं भावयेदिति । किमित्याकांक्षायां "कामश्रुतिसमर्पितं" स्वर्गादिफलं भाव्यतयाऽन्वेति । केनेत्याकांक्षायां प्रकृत्यर्थोयागः करणतयाऽन्वेति । यद्यपि कृतिरूपाया आर्थीभावनाया न यागजन्यत्वं प्रत्युतयागजनिकैव सेति तत्र करणतया यागान्वयोन संभवति तथापि भाव्ये स्वर्गादौ यागस्य करणत्वात् तद्विशिष्टभावनायामपि तस्य तथात्वोपचारात्तत्र तस्य करणत्वेनाऽन्वय इत्यदोषः । कथमित्याकांक्षायां प्रयाजाद्यङ्गजातमितिकर्तव्यतात्वेनाऽन्वेति । तथा च स्वर्गकामनिष्ठा यागकरणिका प्रयाजादीतिकर्तव्यताका स्वर्गफलिका भावना इत्यार्थीभावनाबोधः ।

इयमेवार्थीभावना प्रवृत्तिरूपा शाब्दीभावनायां भाव्यतयाऽन्वेति । केनेत्यपेक्षायां अभिधायां लिङः शक्तिग्रहः करणतयाऽन्वेति । कथमित्याकांक्षायामर्थवादोपस्थितं स्तुत्यादिकमितिकर्तव्यकतात्वेनाऽन्वेति । यदाहुः—

लिङोऽभिधा सैव च शब्दभावना भाव्या च तस्यां पुरुषप्रवृत्तिः।
संबन्धबोधः करणं तदीयं प्ररोचनोचाङ्ग तयोपयुज्यते इति ।

तथा च विधिनिष्ठा शक्तिग्रहकरणिका स्तुत्यर्थवादोपकृता यागप्रवृत्तिजनिका भावना इति शाब्दीभावनाबोधः । अत्र च प्रवर्तनात्वेन शाब्दीभावनायां लिङादेः शक्तिः, एकपदोपात्तत्वप्रत्यासत्त्या च भावनयोः परस्परमन्वयबोधः प्रथमतोजायते । स च प्रवर्तनाविषयः कृतिरित्याकारकः । विषयत्वंजन्यत्वम् । तदुक्तम् ।

विधिभावनयोः श्रुत्या सङ्गतिः पूर्वमिष्यते इति ।

विधिः शाब्दीभावना । भावना आर्थीभावना । अत एव विध्युपरक्ताभावनालिङर्थ इति भट्टसिद्धान्तः । विधिः प्रवर्तना, तदुपरक्ता तद्विशिष्टा आर्थीभावना लिङर्थ इत्यर्थः । यागविषयकभावनाजन्यव्यापारवान्पुरुष इत्यन्वयबोध इत्यन्ये । तत्र यागविषयत्वं भावनाजन्यत्वं च व्यापारविशेषणम् । भावना शाब्दीभावना । व्यापारः प्रवृत्तिः ।

न चैवमपि प्रवृत्तिहेतोरिष्टसाधनताज्ञानस्याऽलाभात्कथं प्रवृत्तिरिति वाच्यम् । आर्थीभावनायां शाब्दीभावनाजन्यत्वस्यान्वये तस्या इष्टसाधनत्वं योग्यतेति तत्र

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कल्प्यते। नन्वहरहः संध्यामुपासीतेत्यादाविष्टानुत्पत्तेः प्रवृत्तिः कथम्। न चार्थवादादिकं ब्रह्मलोकादि प्रत्यवायाभावो वा फलमिति वाच्यम्। तथा सति काम्यत्वेनित्यत्वहान्यापत्तेः, कामनाभावे चाकरणापत्तेः, इत्थञ्च यत्र फलश्रुतिस्तत्रार्थवादमात्रमितिचेन्न।

प्रश्न—मीमांसक नैयायिक से कहता है कि यदि इष्टसाधनत्व ही विध्यर्थ है तब "अहरहः सन्ध्यामुपासीत" यहाँ विधिवाक्य से बोधित संध्योपासनरूप नित्यकर्म में इष्ट (फलविशेष) की अनुत्पत्ति होने से संध्योपासन में प्रवृत्ति कैसे होगी।

उत्तर—वहाँ पर भी "संध्यामुपासते ये तु सततंसंशितव्रताः। विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम्" इस अर्थवाद से सिद्ध ब्रह्मलोकादि अथवा प्रत्यवायाभाव फल है, और उस ब्रह्मलोक अथवा प्रत्यवायाभावरूप फल की साधनता का ज्ञान संन्ध्योपासन में होने से प्रवृत्ति बन जायगी।

प्रश्न—मीमांसक कहता है यह कथन ठीक नहीं है क्योंकि तब तो सन्ध्योपासन कर्म के काम्य हो जाने से नित्यत्व की हानि हो जावेगी। और काम्य न मानने से अकरणापत्ति लग जावेगी, इस प्रकार "संन्ध्यामुपासते" इत्यादिस्थलों में जहाँ नित्य कर्मों की फलश्रुति देखने में आती है वहाँ अर्थवादमात्र फल मानना उचित है।

तल्लाभात्। अस्तु वा तदपि विध्यर्थः, तच्च स्वपदोपात्तायामार्थीभावनायामन्वेति। न चेष्टसाधनत्वस्य विध्यर्थत्वे न्यायमताऽविशेष इति वाच्यम्। न्यायमते यागादिगतमिष्टसाधनत्वं विध्यर्थः। भट्टमते तु प्रवृत्तिगतं तत्तथेति विशेषात्। आर्थीभावनाया इष्टसाधनत्वं क्रियागतेष्टसाधनत्वं विनानेति क्रियागतेष्टसाधनत्वधीरपीति प्रवृत्तिर्नानुपपन्नेति प्राहुः।

अथ विधिवाक्यादिष्टसाधनत्वघटकस्य इष्टस्य यदि इष्टत्वेनोपस्थितिस्तदा स्वर्गकामः पचेते त्यादेरपि प्रामाण्यापत्तिः, स्वर्गकामकृतिसाध्यस्य पाकादेरोदनादिरूपेष्टसाधनत्वादिति चेद् स्वर्गकामादिसमभिव्याहृतविधिवाक्यस्य स्वर्गत्वादि रूपणैव बोधे साकांक्षत्वात्, इष्टान्तरसाधनत्वे शक्तिमत्त्वेऽपि निराकांक्षतया उक्तविधेस्तद्बोधकत्वाऽसंभवात्। परन्तु यत्र इष्टस्य स्वर्गत्वाद्यवान्तररूपेणविधिवाक्याद्बोधः, तत्र तादृशावान्तररूपेणैवेष्टं विधेः शक्यतावच्छेदकम्, यदि इष्टत्वेनैव विधिवाक्याद्बोधस्तदा इष्टत्वेनैव। अत एव "विश्वजितायजेते"त्यादौ इष्टसामान्यसाधनत्वस्यैव विधिना बोधनात् तस्य चाऽप्रवर्तकतया प्रवर्तकस्य इष्टविशेषसाधनत्वावगाहिज्ञानस्यसंपत्तये स्वर्गः फलं कल्प्यते इत्याह। इत्थं चेति। इष्टसाधनत्वादेर्विध्यर्थत्वे चेत्यर्थः। स्वर्गःफलमिति। तथा च स्वर्गकामपदमध्याहर्तव्यमिति भावः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ग्रहणश्राद्धादौ नित्यत्वनैमित्तिकत्वयोरिव भरणीश्राद्धे काम्यत्वनैमित्तिकत्वयोरिव नित्यत्वकाम्यत्वयोरपि अविरोधात्।

उत्तर—नैयायिक कहता है परन्तु यह भी ठीक नहीं है कारण कि ग्रहणनिमित्तक श्राद्ध तथा स्नान आदि में नित्यत्व का प्रतिपादन किया है तो ग्रहण श्राद्ध में जैसे कि नित्यत्व-नैमित्तिकत्व अविरुद्ध हैं उसी प्रकार नित्यत्व-काम्यत्व का भी अविरोध है। और यह जो पहिले प्रभाकरानुयायी ने कहा था कि सन्ध्या-वन्दन आदि कर्मों को यदि काम्य नहीं मानेंगे तो अकरणापत्ति लग जायेगी—अर्थात् उन कर्मों में कामना का अभाव हो जाने पर करना ही

ननु इष्टसाधनत्वस्य विध्यर्थत्वे "प्रत्यहं सन्ध्यामुपासीते" त्यादिविधेरप्रामाण्यापत्तिः, नित्यकर्मणः फलाभावादितिप्राभाकरः शंकते। **नन्विति। इत्यादाविति।** इत्यादिविधिवाक्यप्रतिपाद्यसन्ध्योपासनादिकर्मणीत्यर्थः। **अस्य कथं प्रवृत्तिरित्य**नेनाऽन्वयः। तत्र हेतुमाह। **इष्टानुत्पत्तेरिति।** तादृशकर्मणा फलानुत्पत्तेरित्यर्थः। रात्रिसत्रन्यायेन सन्ध्योपासनादेरपि आर्थवादिकफलसंबन्धः स्वीकार्यं इति शंकते। **नचेति। आर्थवादिकमिति।**

"सन्ध्यामुपासते ये तु सततं संशितव्रताः।

विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनमित्यर्थवादोक्तमित्यर्थः। **ब्रह्मलोकादीति।** ब्रह्मलोकादिप्राप्तिरित्यर्थः। **प्रत्यवायाभावोवेति।** वाकारश्चार्थे। प्रत्यवायानुत्पत्तिरित्यर्थः। **फलमिति।** तथाच प्रवृत्तिर्नानुपपन्नेति भावः। **तथासति।** नित्यस्यापि फलसाधनत्वे। **काम्यत्वे इति।** काम्यत्वं च सफलत्वे सति विधिप्रतिपाद्यत्वम्। एवं नित्यत्वं निष्फलत्वे सति विधिप्रतिपाद्यत्वम्। **नित्यत्वहान्यापत्तेरिति।** नित्यत्वाभावप्रसङ्गादित्यर्थः। नित्यत्वकाम्यत्वयोर्विरोधादिति भावः। अविरोधे त्वाह। **कामनाऽभावे इति।** फलेच्छाविरहे सतीत्यर्थः। **अकरणतापत्तेरिति।** अकरणे प्रत्यवायानुत्पत्तेः पुत्रेष्ट्यादिवदित्यर्थः। नित्यस्थलीयफलश्रुतेर्वैयर्थ्यंनाशंकनीयम्, तस्या अर्थवादतया प्राशस्त्यमात्रबोधे तात्पर्यादित्याह। **इयंचेति।** अकरणतापत्तिभियानिष्फलत्वसिद्धौ चेत्यर्थः। **फलश्रुतिरिति।** फलप्रतिपादकसन्ध्यामुपासते इत्यर्थवादः इत्यर्थः। **तत्र।** सन्ध्योपासनकर्तरि। **अर्थवादमात्रमिति।** प्राशस्त्यबोधतात्पर्यका, न तु फलत्वबोधतात्पर्यका इत्यर्थः।

नैयायिकः समाधत्ते। **ग्रहणश्राद्धादाविति।** नित्यत्वनैमित्तिकत्वयोरिवेति। उपरागेश्राद्धंकुर्वीत, उपरागेस्नायादिति विधिवाक्येन श्राद्धस्नानयोर्नित्यत्वप्रतिपादनात्, ग्रहणनिमित्तकत्वप्रतिपादनाच्च तयोर्नित्यत्वनैमित्तिवदित्यर्थः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न च कामनाऽभावेऽकरणतापत्तिः। त्रिकालस्तवपाठादाविव कामनासद्भावस्यैव कल्पनात्। न तु वेदबोधितकार्यताज्ञानात् प्रवृत्तिरिति संभवति स्वेष्टसाधनत्वमविज्ञाय तादृशकार्यताज्ञानसहस्रेणापि प्रवृत्तेरसंभवात्। यदपि

व्यर्थ हो जायगा। नैयायिक—यह भी प्रभाकरानुयायी का कथन ठीक नहीं है, क्योंकि त्रिकालस्तवपाठ विष्णुसहस्रनाम आदि जैसे विधि प्राप्त होने से यद्यपि काम्य नहीं है, परन्तु फिर भी "त्रिसन्ध्यं कीर्त्तयेद्यस्तु सर्वान् कामानवाप्नुयात्" इस फलकामना के सद्भाव से लोग उसमें प्रवृत्त होते हैं और उन्हें वैसा ही फल भी होता है। उसी प्रकार संध्या-उपासनादि स्थल में भी "अकुर्वन् विहितं कर्म नरो भवति किल्बिषी" इस वचन के अनुसार प्रत्यवायाभावरूप फल की कामना अवश्य कर लेनी चाहिये, यही "त्रिकालस्तव पाठादाविव" इत्यादि पंक्ति का अर्थ है। और मीमांसक जो कहता है कि वेदबोधितकार्यताज्ञान से प्रवृत्ति होती है वह तो संभव ही नहीं है क्योंकि अपने इष्टसाधनता का ज्ञान जिसे नहीं है उसकी हजार कार्यताज्ञानों से भी प्रवृत्ति संभव नहीं है।

भरणीश्राद्धे इति। भरणीनक्षत्रनिमित्तकश्राद्धे इत्यर्थः। काम्यत्वनैमित्तिकत्वयोरिवेति। सप्तविंशतिनक्षत्राणां मध्ये एकैकनक्षत्रनिमित्तकं श्राद्धमुक्तम्, पशुपुत्रादिरूपैकैकफलाभ्युदयंचोक्तम्। ततश्चभरणीश्राद्धकर्तुः तावत्फलवत्वस्य हरिवंशादौ प्रतिपादितत्वान्नक्षत्रनिमित्तकत्वाच्च भरणीश्राद्धस्य काम्यत्वनैमित्तिकत्ववदित्यर्थः। नित्यत्वकाम्यत्वयोरपीति। सन्ध्योपासनादेरित्यादिः। अविरोधादिति। अविरोधस्वीकारादित्यर्थः। वस्तुतो नहि निष्फलत्वे सति वेदबोधितत्वं नित्यत्वम्, असिद्धेः। प्रवृत्तिसामान्यं प्रत्येव काम्यसाधनताधियो हेतुत्वात्। यदकरणात्प्रत्यवायस्तत्वम्, तच्च काम्यत्वेपि अविरुद्धमितिध्येयम्। कामनाऽभावे इति। कामनाविरहिण इत्यर्थः। अकरणतापत्तिरिति। अकरणे प्रत्यवायो न स्यात्पुत्रेष्ट्यादिवदित्यर्थः। कल्पनादिति। तथा च सन्ध्योपासनादावपि कामनासत्वमावश्यकमिति भावः। ननु सन्ध्योपासनं अफलमपि करणीयम् वेदबोधितत्वादिति गुरुमतमाक्षिपति। नत्विति। अस्य संभवतीत्यनेनाऽन्वयः वेदबोधितकार्यताज्ञानादिति। वेदबोधितकृतिसाध्यताज्ञानादेवेत्यर्थः। तेनेष्टसाधनताज्ञानव्यवच्छेदः। स्वेष्टसधनत्वमविज्ञायेति। स्वेष्टसाधनत्वज्ञानविरहे इति यावत्।

प्रवृत्तेरसंभवादिति। प्रवृत्त्यभावादित्यर्थः। अनेन इष्टसाधनताज्ञानाभावे प्रवृत्त्यभाव इति व्यतिरेकसहचारोदर्शितः। इदमुपलक्षणम्। इष्टसाधनताज्ञानसत्वे प्रवृत्तिसत्वमित्यन्वयसहचारोपि बोध्यः। तादृशकार्यताज्ञानसहस्रेणापीति। वेदबोधितकृतिसाध्यताज्ञानसत्वेपीत्यर्थः। अनेन तादृशकार्यताज्ञानसत्वे प्रवृत्त्यभाव

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पण्डापूर्वं फलमिति तदपि न, कामनाभावेऽकरणापत्तेस्तौल्यात् । कामनाकल्पने तु अर्थवादादिकं फलमेव रात्रिसत्रन्यायात् कल्प्यताम् । अन्यथा प्रवृत्त्यनुपपत्तेः । तेनानुत्पत्तिं प्रत्यवायस्यान्ये मन्यंते ।

प्रश्न—प्रभाकर कहता है कि—पण्डात्मक अपूर्व ही सन्ध्योपासन का फल मान लेना चाहिये । (जिस अपूर्व से कोई फल न हो उसे "पण्डा" कहते हैं)

उत्तर—यह भी ठीक नहीं है—क्योंकि जिसे पण्डापूर्वरूप फल की इच्छा नहीं है उस उस पुरुष को सन्ध्यावन्दन कर्म के अकरण की आपत्ति लग जावेगी, अर्थात् उसे सन्ध्यावन्दन नहीं करना चाहिये—यह दोष प्रभाकर के मत में भी तुल्य ही है । यदि पण्डापूर्वरूपफल की कामना की कल्पना करते हो तो रात्रिसत्रन्याय से अर्थवाद वाक्य से बोधित जो फल उसकी कल्पना ही श्रेयस्कर है ।

इत्यन्वयव्यभिचारोदर्शितः । एवं तादृशकार्यताज्ञानाभावेप्रवृत्तिसत्वमितिव्यतिरेकव्यभिचारोपि वोध्यः । तथा च निष्फलेप्रवृत्त्यभावेनाऽन्वयव्यतिरेकाभ्यां प्रवृत्तित्वेन इष्टसाधनताज्ञानत्वे न कार्यकारणभावस्य निर्धारितत्वादिति भावः । अत एव कुसुमाञ्जलौ "सन्ध्योपासनमफलमपि क्रियते वेदवोधितत्वादिति गुरुमतमाशंक्य सन्ध्योपासनं सफलं शिष्टैरनुष्ठीयमानत्वादित्यनुमानेन तस्यसफलत्वं प्रसाध्य निष्फलत्वसाधकहेतोः ज्योतिष्टोमादौ व्यभिचारदर्शनेन तन्मतंनिरस्य "गुरुमतमेतन्नगुरोर्मतमि" त्यभिधावैवोपेक्षितमाचार्यैः । यच्च सुखदुःखाभावयोरिव पण्डापूर्वं स्वतःप्रयोजनं नित्यस्य कर्मण इति प्राभाकरमतं, तदपि दूषयति । यदपीति । पण्डापूर्वमिति । सदसद्विवेचिनी बुद्धिः–पण्डा । पण्डापूर्वमिति । तादृशबुद्ध्यपूर्वमित्यर्थः । कामनाविरहतत्सत्वाभ्यां विकल्प्य दूषयति । कामनाभावे इति । पण्डापूर्वात्मकफलकामनाविरहे इत्यर्थः । अकरणतापत्तेरिति । अकरणेप्रत्यवायो न स्यादित्यर्थः । तौल्यादिति । तुल्यत्वादित्यर्थः । पुत्रेष्ट्यादितुल्यत्वादिति भावः । कामनाकल्पने तु इति । कामनास्वीकारे तु इत्यर्थः । आर्थवादिकं फलमेवेति । अर्थवादोक्तं प्रत्यवायानुत्पत्तिरूपफलमेवेत्यर्थः । एवकारेण पण्डापूर्वव्यवच्छेदः । रात्रिसत्रन्यायादिति । रात्रिसत्रेण यजेतेति विधिवाक्ये फलाऽश्रवणेन फल जिज्ञासायां "प्रतितिष्ठन्ति कृत्वा य एतारात्रीरुपयन्ति" इत्यर्थवादबोधितप्रतिष्ठारूपफलं यथा सिद्धान्तितंतथाऽत्रापि लाघवात् "सन्ध्यामुपासते ये तु" इत्यादि अर्थवादोक्तब्रह्मलोकावाप्तिरूपफलमवश्यं स्वीकार्यमित्यर्थः । अन्यथा तस्य निष्फलत्वे । प्रवृत्त्यनुपपत्तेरिति । प्रवृत्तिं प्रति इष्टसाधनताज्ञानस्य कारणत्वादिति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवं "सन्ध्यामुपासते ये तु सततं शंसितव्रताः ॥
विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम् ।"
एवं "दद्यादहरहः श्राद्धं पितृभ्यः प्रीतिमावहन् ॥"

इति प्रीत्यात्मकमेव फलमस्तु ।

न च पितृप्रीतिः कथं फलं व्यधिकरणत्वात् इति वाच्यम् । अतएवोक्तं "शास्त्रदर्शितं फलमनुष्ठानकर्त्तरीत्युत्सर्गः" इति । पितॄणां मुक्तत्वे तु

[अभिप्राय यह है कि—जैसे रात्रिसत्र (रात में किये हुवे यज्ञ) का कोई फल श्रुत नहीं है किन्तु रात्रिसत्र का "प्रतितिष्ठन्ति ह वाये" इत्यादि अर्थवाद वाक्य द्वारा प्रतिष्ठारूप फल मीमांसकों ने माना है । इसी प्रकार सन्ध्यावन्दन आदि नित्य कर्मों का भी 'सन्ध्यामुपासते ये तु सततं शंसितव्रता' इस अर्थवाद वाक्य से प्रतिपादित ब्रह्मलोक प्राप्ति आदि ही फल मानना चाहिये] अन्यथा (नित्य कर्मों का यदि कुछ भी फल न माना जागगा तो) नित्य कर्मों में प्रवृत्ति ही नहीं होगी । इसीलिये कुछ अन्य नवीन लोग प्रत्यवाय की अनुत्पत्ति ही सन्ध्यावन्दन आदि नित्यकर्मों का फल मानते हैं । इसी दृष्टि से प्राचीन लोग सन्ध्यावन्दन आदि नित्य कर्मों का "सन्ध्यामुपासते ये तु सततं ये तु शंसितव्रता:—विधूतपापास्तेयान्ति ब्रह्मलोक-मनामयम्" इस अर्थवाद सम्बन्धित वाक्यों के आधार पर ब्रह्मलोकप्राप्ति ही फल मानते हैं । एवं "दद्यादहरहः श्राद्धं पितृभ्यः प्रीतिमावहन्" इस अर्थवादबोधक वाक्य के आधार पर नित्यकर्मात्मक पितृश्राद्ध का पितृप्रीति ही फल है ।

प्रश्न—पितृश्राद्ध का फल पितृ लोगों की प्रसन्नता कैसे हो सकती है, व्यधिकरण (विभिन्न अधिकरण में वृत्ति) होने से । [क्योंकि पुत्र जब पिता का श्राद्ध करता है तब पितृगण पुत्र पर प्रसन्न होते हैं—यहाँ पर श्राद्धक्रियाकर्तृत्व पुत्र में है और प्रसन्नता पितृयों में है—दोनों का विभिन्न अधिकरण होने के नाते वैयधिकरण्य है, अतः इन दोनों का कार्यकारण भाव सर्वथा अनुपपन्न है—क्योंकि 'ययोः सामानाधिकरण्यं तयोरेव कार्यकारणभावः]

भावः । तेन । आर्थवादिकफलकल्पनेन । अनुत्पत्तिं प्रत्यवायस्येति । प्रत्यवाय-स्यानुत्पत्तिमिति योजना । अनुत्पत्तिः प्रागभावः । अनामयमिति । मनुते इति शेषः । प्रीतिमावहन्निति । इत्यर्थवादोपस्थितेरयर्थः । फलमस्त्विति । फलमङ्गी-कर्तव्यमित्यर्थः । व्यधिकरणत्वादिति । यः कर्ता स एव भोक्ता इति न्यायेन पितृप्रीतेः कर्तृनिष्ठत्वाभावेन तस्याः श्राद्धफलत्वं न संभवतीत्याशयः । गयाश्राद्धा-दाविवेति । आदिना ब्रह्मकपालश्राद्धादेः परिग्रहः । "गयायां पिण्डदानं च पितृप्रीतिकरं भवेदि" तिवचनेन गयाश्राद्धस्य पितृतृप्तिहेतुत्वप्रतिपादनात्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्वस्य स्वर्गादि एव फलम् । यावन्नित्यनैमित्तिकानुष्ठानस्य सामान्यतः स्वर्गजनकत्वात् ।

पण्डाऽपूर्वार्थं प्रवृत्तिश्च न संभवति । न तत्सुखदुःखाभाववत्स्वतः

उत्तर—गया श्राद्ध की तरह उद्देश्यतासम्बन्ध से स्वर्गात्मक फलजनकत्व की कल्पना कर लेनी चाहिये । [अर्थात् जिसके उद्देश्य से गयाश्राद्ध किया जायगा उस गयाश्राद्ध का फल (स्वर्ग) उसी उद्दिष्ट व्यक्ति को होता है, इसी प्रकार अहरहः (प्रतिदिन) श्राद्धस्थल में भी पुत्र जब कि पितृ लोगों की प्रसन्नता के ही उद्देश्य से श्राद्ध करता है तो श्राद्ध क्रिया भी उद्देश्यता सम्बन्ध से पितृ लोगों में है और प्रसन्नता (प्रीति) भी सुखस्वरूप होने के नाते समवायसम्बन्ध से पितृओं में है अतः सामानाधिकरण्यप्रयुक्त श्राद्ध क्रियात्मक कारण का तथा स्वर्ग एवं प्रीत्यात्मक फल का कार्यकारणभाव बन जाता है] इसीलिये शास्त्र प्रतिपादित क्रिया का फल अनुष्ठान कर्त्ता को होता है इसे उत्सर्गवाद बतलाया है । (अर्थात् प्रायः अनुष्ठानकर्त्ता को तो होता ही है परन्तु जिसको उद्देश्य किया जावे उसे भी फल होता है । उत्सर्ग नाम प्रायः का है ।)

प्रश्न—गया श्राद्ध का फल जब कि आपने पितृमुक्ति अथवा पितृ लोगों को स्वर्गप्राप्ति बतलाया है तब गयाश्राद्ध से पहिले ही यदि पितृ लोग मुक्त हो गये, या इन्हें स्वर्ग प्राप्ति हो गयी तो पुत्र द्वारा किये हुवे गयाश्राद्ध का क्या फल होगा ?

उत्तर—पितृओं के मुक्त हो जाने पर श्राद्ध करने वाले पुत्र को स्वर्गफल होगा । क्योंकि यावत् (समस्त) नित्य-नैमित्तिक कर्मानुष्ठान को सामान्यरूप से स्वर्ग जनकत्व माना गया है ।

प्रश्न—पण्डा पूर्व फल क्यों नहीं है ।

प्रश्न—हमारे यहाँ सुख-दुःखाभाव-तथा इनके साधनभूत उपाय-इन तीन को ही स्वयं पुरुषार्थ माना है, वह पण्डापूर्व सुख-दुःखाभाव तथा उनके साधन की तरह स्वतः पुरुषार्थ नहीं है । [अतः पण्डापूर्व सन्ध्यावन्दन आदि नित्य कर्मों का फल नहीं हो सकता है]

तदनुरोधेन पितृनिष्ठतृप्तिं प्रति उद्देश्यतासंबन्धेन गयाश्राद्धस्य हेतुत्वस्वीकारवदित्यर्थः । अतएव । पितृप्रीतेः श्राद्धफलत्वादेव । उक्तमिति । भट्टैरित्यादिः । उत्सर्ग इतीति । श्राद्धादिफलस्य कर्तृमात्रगतत्वे तु व्यभिचाराभावान्नियम एव स्यादिति भावः । मुक्तत्वे तु इति । अवधारणार्थकस्तुशब्दः स्वर्ग इत्युत्तरं योजनीयः स्वस्य । श्राद्धकर्त्तुः । यावदिति । सर्वस्येत्यर्थः । सामान्यतः । विहितकर्मत्वेन । स्वर्गफलकत्वादिति । स्वर्गफलकत्वस्वीकारादित्यर्थः । स स्वर्गः सर्वान्प्रत्यविशिष्टत्वादिति न्यायादिति भावः । पण्डापूर्वस्य फलत्वमेव न संभवतीत्याह । पण्डापूर्वार्थमिति । पण्डापूर्वमुद्दिश्येत्यर्थः । प्रवृत्तिश्चेति । सन्ध्योपासनादिविधेयकप्रवृत्तिश्चेत्यर्थः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पुरुषार्थौ, न वा तत्साधनम्। प्रत्यवायानुत्पत्तौ कथं प्रवृत्तिरिति चेद्— इत्थम्। यथा हि—नित्ये कृते प्रत्यवायाभावस्तिष्ठति तदभावे तदभावः। एवं प्रत्यवायाभावस्य सत्वे दुःखप्रागभावसत्वं, तदभावे तदभाव इति योगक्षेम-साधारणकारणतया दुःखप्रागभावं प्रत्यपि सुवचत्वात्। एवमेव प्रायश्चित्त-स्यापि दुःखप्रागभावहेतुत्वमिति।

प्रश्न—प्रत्यवाय की अनुत्पत्ति अर्थात् प्रत्यवाय के अभाव में कैसे प्रवृत्ति होती है। [क्योंकि प्रत्यवायाभाव भी पण्डापूर्व के समान सुख-दुःखाभाव एवं तत्साधनरूप न होने के नाते स्वतः पुरुषार्थ नहीं है अतः प्रत्यवाय (पाप) की अनुत्पत्ति के लिये जो विद्वान् लोगों की सन्ध्यावन्दन आदि नित्य कर्मों में प्रवृत्ति होती है वह कैसे होगी]

उत्तर—जैसे नित्य कर्म करने पर प्रत्यवायाभाव रहता है, और न करने पर तदभाव अर्थात् प्रत्यवायाभाव का अभाव (पाप) रहता है। ऐसे ही प्रत्यावायाभाव रहने पर दुःख प्रागभाव रहता है, और प्रत्यावायाभाव के अभाव रहने पर दुःखप्रागभाव का अभाव (दुःख) रहता है इस प्रकार योगक्षेम साधारण प्रवृत्ति कारणता दुःखप्रागभाव के प्रति भी सुवच है [इस दृष्टि से प्रत्यवायाभाव में अर्थात् प्रत्यवाय की अनुत्पत्ति में प्रवृत्ति होती है कि जिससे दुःखप्रागाभाव बना रहे] इसी प्रकार प्रायश्चित्त को भी दुःखप्रागभाव का हेतु जानकर प्रायश्चित के करने में विद्वान् लोग प्रवृत्त होते हैं।

प्रवृत्त्यसंभवमेवोपपादयति। नहीति। तत्। पण्डापूर्वं। स्वतः पुरुषार्थ इति। इतरेच्छानधीनेच्छाविषय इत्यर्थः। तथा चेच्छाविषयत्वाभावान्न तस्य फलत्वमिति भावः। ननु मास्तु उद्देश्यतया प्रवृत्तिः विधेयतयैव प्रवृत्तिरास्तामित्यत आह। नवेति। तत्साधनमिति। फलसाधनमित्यर्थः। फलसाधनत्वपण्डत्वयोर्विरुद्धत्वा-दिति भावः। ननु नैयायिकमते प्रत्यवायानुत्पत्तिः कथं फलम्, तस्याः स्वतः पुरुषार्थत्वाभावात्, तस्या पुरुषार्थसाधनत्वाभावाच्चेत्याशंकते। प्रत्यवायानुत्पत्ता-विति। प्रत्यवायप्रागभावे इत्यर्थः। कथं प्रवृत्तिरिति। उद्देश्यताविधेयताऽन्यतरा-भावादित्यर्थः। इत्थमिति। वाच्यमाणप्रकारेणेत्यर्थः। तादृशप्रकारमेवाह। यथा हीति। नित्येकृते। सन्ध्योपासनादिकरणे सति। प्रत्ययाभावस्तिष्ठति। प्रत्यवाय-प्रागभावस्तिष्ठति तदभावे। सन्ध्योपासनाद्यकरणे। तदभावः। प्रत्यवायप्रागभावा-भावः। दुःखप्रागभावध्वंस इति यावत्। प्रत्यवायानुत्पत्तेः दुःखानुत्पत्तिहेतुत्व-मुपपादयति। एवमिति। तदभावे। प्रत्यवायप्रागभावाभावे। तदभावः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ननु न कलञ्जं भक्षयेदित्यत्र विध्यर्थे कथं नञर्थाऽन्वयः। इष्टसाधनत्वाभावस्य कृतिसाध्यत्वाभावस्य च बोधयितुमशक्यत्वादिति चेन्न।

प्रश्न—तटस्थ पूछ रहा है कि—इष्टसाधनत्व तथा कृतिसाध्यत्व ही यदि विध्यर्थ है तो "न कलञ्ज भक्षयेत्" यहाँ पर विध्यर्थ के साथ नञर्थ अभाव का यदि अन्वय करेंगे तो यह बोध होगा कि कलञ्जभक्षण न तो मेरे इष्ट का साधन है और न कृतिसाध्य ही है। (अर्थात् कलञ्जभक्षणं इष्टसाधनत्वाभाववत्—कृतिसाध्यत्वाभाववच्च) परन्तु यह बोध सर्वथा अशक्य (बाधित) है। (क्योंकि शुष्कमांसस्वरूप कलञ्जभक्षण में तृप्तिरूप इष्टसाधनत्व भी है और कृतिसाध्यत्व तो है ही है)

दुःखप्रागभावाभावः। **योगक्षेमसाधारणेति**। जन्याऽजन्यनिरूपितेत्यर्थः। अन्वयव्यतिरेकसिद्धेति यावत्। **एवमेव**। योगक्षेमसाधारणमेव। **प्रायश्चित्तस्यापीति**। अपिना प्रत्यवायानुत्पत्तिसमुच्चयः। दुःखप्रागभावहेतुत्वमिति। इष्टमिति शेषः। नव्यास्तु सन्ध्योपासनादेः प्रत्यवायप्रागभावः, प्रत्यवायप्रागभावस्य च दुःखप्रागभावो वा न फलम्, प्रागभावे एव मानाभावात्, किन्तु प्रत्यवायात्यन्ताभावः, तस्य च दुःखात्यन्ताभावः फलम्, तयोरपि योगक्षेमसाधारणकारणत्वसंभवादित्याहुः।

शंकते। **नन्विति। कलञ्जमिति**। विषाक्तवाणहतमृगपक्षिमांसं शुष्कमांसं वा कलञ्जम्—दुक्तम्—

विषाक्तेनैववाणेनहतौयौमृगपक्षिणौ।
तयोर्मांसंकलञ्जंस्यात्शुष्कमांसमथापिवा इति॥

विध्यर्थे कथं नञर्थान्वय इति। विध्यर्थनञर्थयोः कथमन्वयः विध्यर्थेष्टसाधनत्वकृतिसाध्यत्वाभ्यामन्वितस्य नञर्थाभावस्य कलञ्जभक्षणे कथमन्वय इत्यर्थः। **अशक्यत्वादिति**। कलञ्जभक्षणे इष्टसाधनत्वाभावस्य कृतिसाध्यत्वाभावस्य च बाधादिति भावः। तथा च कलञ्जभक्षणमिष्टसाधनत्वाभाववदिति बोधोबाधित एवेति शंकितुराशयः। न च कलञ्जभक्षणाभावइष्टसाधनमित्येव बोध इति वाच्यम्। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिभङ्गप्रसंगात्। तावतापि कलञ्जभक्षस्या॥निष्टहेतुत्वानवगमेन ततोनिवृत्त्यनुपपत्तेश्च। न चेष्टसाधनत्वैकदेशेइष्टांशे नञोऽन्वयाभ्युपगमेन कलञ्जभक्षणमनिष्टसाधनमित्यन्वयबोधात्ततोनिवृत्त्युपपत्तिरिति वाच्यम्। पदार्थैकदेशेपदार्थान्तरान्वयाव्युत्पत्तेः। समाधत्ते। **तत्रेति**। कलञ्जभक्षणे इत्यर्थः। **बाधादिति**। इष्टसाधनत्वकृतिसाध्यत्वाभावयोरित्यादिः। तस्य साक्षादेवतृप्तिरूपेष्टसाधनत्वादिति भावः। **न विध्यर्थ** इति। न प्रकृतविधितात्पर्य-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तत्र बाधादिष्टसाधनत्वं कृतिसाध्यत्वं च न विध्यर्थः, किन्तु बलवदनिष्टाननुबन्धित्वमात्रम्, तदभावश्च नञा बोध्यते। अथवा बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वे सति कृतिसाध्यत्वं विध्यर्थः। तदभावश्च नञा बोध्यमानो विशिष्टाभावो विशेष्यवति विशेषणाभावे विश्राम्यति।

ननु श्येनेनाभिचरन् यजेत इत्यादौ कथं बलवदनिष्टाननुबन्धित्वं विध्यर्थः। श्येनस्य मरणानुकूलव्यापारस्य हिंसात्वेन नरकसाधनत्वात्। न

उत्तर—कलञ्जभक्षण में इष्टसाधनत्व–कृतिसाध्यत्व का बाध होने से वह विध्यर्थ नहीं माना जा सकता है, किन्तु बलवदनिष्टाननुबन्धित्वमात्र विध्यर्थ है और उसका अभाव अर्थात् बलवदनिष्ट का अनुबन्धित्व (जनकत्व) नञ् से बोध्य है। (अर्थात् कलञ्जभक्षणं बलवदनिष्टाननुबन्धित्वाभाववत्] अथवा बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वे सति कृतिसाध्यत्व विध्यर्थ मान लिया जाव। नञ् से बोध्यमान जो विशिष्टाभाव (बलवदनिष्टाननुबन्धीष्टसाधनत्वविशिष्टकृतिसाध्यत्वाभाव) उसका कृतिसाध्यत्वरूपविशेष्य वाले कलञ्जभक्षण में रहने वाले बलवदनिष्टाननुबन्धित्वाभाव अर्थात् बलवान् अनिष्ट के अनुबन्धित्वरूप विध्यर्थाभावरूपविशेषणाभाव में पर्यवसान हो जाता है।

प्रश्न—'श्येनेनाभिचरन् यजेत' (शत्रुवध की कामना करने वाला पुरुष श्येनयाग करे) यहाँ पर बलवदनिष्टाननुबन्धित्व विधि का अर्थ कैसे हो सकता है। क्योंकि शत्रु को मारणरूप जो अभिचार कर्म है वह हिंसारूप होने के नाते नरकरूप जो बलवान् अनिष्ट उसका

विषय इत्यर्थः। **बलवदनिष्टाननुबन्धित्वमात्रमिति**। विधेःकृतिसाध्यत्वादिषु शक्तिस्वीकारेण कचित् कस्यचित् क्वचित् कस्य चिद्विध्यर्थस्य बोधस्वीकारादिति भावः। **तदभावश्च**। बलवदनिष्टाननुबन्धित्वाभावश्च। **नञा बोध्यते** इति। तादृशाभावस्यकलञ्जभक्षणान्वययोग्यत्वादितिभावः। तथा च कलञ्जभक्षणं बलवदनिष्टाननुबन्धित्वाभाववदिति बोध इति भावः। इदमुपलक्षणम्। श्येनेनाभिचरन्यजेतेत्यत्र कृतिसाध्यत्वेसतीष्टसाधनत्वमात्रमेव विधिवाक्यजन्यशाब्दबोधे भासते, न तु बलवदनिष्टाननुबन्धित्वमपि तत्र तस्य बाधादिति। प्रवृत्तिं प्रति कृतिसाध्यत्वविशिष्टबलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वज्ञानत्वेनैकस्यैव हेतुत्वं, लाघवात्, न तु कृतिसाध्यत्वादिप्रत्येकविषयकज्ञानत्वेन गौरवादतोविधेरपि विशिष्टे एव शक्तिर्वाच्या, एवं च निषेधस्थले विशिष्टाभावो विधिसमभिव्याहृतनञा बोध्यते इत्यभिप्रायवानाह। **अथवेति**। **तदभावश्च**। विशिष्टाभावश्च। अवधारणार्थकश्चशब्दः विशेषणाभावे इत्युत्तरं योजनीयः। **विशेष्यवति**। इष्टसाधनत्ववति कलंजभक्षणादौ। **विशेषणाभावे**। बलवदनिष्टाननुबन्धित्वाभावे एव। **विश्राम्यतीति**। पर्यवस्यतीत्यर्थः। अतिरिक्ताभावकल्पने गौरवादिति भावः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

च वैधत्वान्न निषेध इति वाच्यम् । अभिचारे प्रायश्चित्तोपदेशात् । न च मरणानुकूलव्यापारमात्रं यदि हिंसा, तदाखड्गकारस्य कूपकर्त्तुश्च हिंसकत्वापत्तिः, गललग्नान्नभक्षणजन्यमरणे स्वात्मवधत्वापत्तिश्चेति वाच्यम् ।

साधन (अनुबन्धी ही है । यदि यह कहा जाय कि वह वैधहिंसा है अतः उसका निषेध उचित नहीं है अर्थात् वह हिंसा हिंसा ही नहीं है । तब फिर अभिचार कर्म में प्रायश्चित्त का जो उपदेश किया है वह क्यों किया है कि—"अभिचारमहीनञ्चत्रिभिःकृच्छ्रैर्व्यपोहति" इत्यादि । यदि यह कहा जाय कि मरण का कारणीभूतव्यापारमात्र ही हिंसा है, तब फिर तलवार बनाने वाले को तथा कुवा खुदवाने वाले को भी हिंसा लगनी चाहिये । [क्योंकि तलवार से भी

विशिष्टस्य विध्यर्थत्वे श्येनयागे वलवदनिष्टाननुबन्धित्वरूपविशेषणवाधात् कथं विशिष्टस्य विध्यर्थस्य बोध इत्याशंकते । नन्विति । श्येनेनाभिचरन् यजेतेत्यादाविति । वैरिमरणं कामयन् श्येननामकं यागं कुर्यादित्यर्थकविधिवाक्ये इत्यर्थः । अर्थ इति । विध्यर्थइत्यर्थः । श्येनयागे वलवदनिष्टाननुवन्धित्वस्य वाधादिति भावः । वाधमुपपादयति । श्येनस्य । श्येनयागस्य । मरणानुकूलव्यापारस्य । शत्रुमरणानुकूलव्यापारस्य । नरकसाधनत्वादिति । शत्रुवधद्वारा तस्य नरकोत्पादकत्वात्, नरकस्य च वलवदनिष्टत्वादिति भावः ।

ननु वलवदनिष्टाननुवन्धित्वं न वलवद्दुःखाजनत्वं, येन श्येनयागस्य नरकोत्पादकत्वेन वलवद्दुःखजनकत्वाद् वाधः स्यात् । किं तु वलवद्द्वेषविषयदुःखाजनकत्वं तत्, तथा च शत्रुवधे उत्कटरागवशात श्येने प्रवृत्तस्य तन्निष्पाद्यनरके वलवद्द्वेषाभावाद् वलवदनिष्टाननुवन्धित्वस्य तत्र न वाध इति चेन्न । वलवदनिष्टाननुवन्धित्वं हि न वलवद्द्वेषविषययत्किंचिद्दुःखजनकत्वाभावः, वलवदनिष्टानुवन्धिन्यपि तत्सत्वात्, किन्तु वलवद्द्वेषविषयदुःखजनकत्वसामान्याभावस्तथा । तथा च श्येनस्य शत्रुवधरूपेष्टसाधनत्वे सत्यपि तन्निष्पाद्यनरके वलवद्द्वेषवतां शिष्टानां तत्राऽप्रवृत्तिदर्शनात् वलवद्द्वेषविषयदुःखजनकत्वसामान्याभावस्तत्र वाधित एवेति न वलवदनिष्टाननुवन्धित्वस्य विधिप्रत्ययार्थत्वसंभव इति ध्येयम् ।

वैधत्वान्न निषेध इति । मा हिंस्यात्सर्वाभूतानीति सामान्यशास्त्रस्य वैधहिंसेतरहिंसाया एव निषिद्धत्वपरतया श्येनयागस्यापि नरकसाधनत्वाभावादिति भावः । अभिचारे इति । अभिचारकर्मणि कृते सतीत्यर्थः । प्रायश्चित्तोपदेशादिति । कर्तुः प्रायश्चित्तोपदेशादित्यर्थः । अभिचारमहीनं च त्रिभिः कृच्छ्रैर्व्यपोहतीत्यनेन कृच्छ्रत्रयरूपप्रायश्चित्तविधानात्, उक्तप्रायश्चित्तवैयर्थ्यापत्त्या अनुपदिष्टप्रायश्चित्तहिंसेतरहिंसापरत्वात् माहिंस्यादिति निषेधविधेरिति । प्रकृते श्येननामकाभिचारकर्मणः उपदिष्टप्रायश्चित्तहिंसारूपतया सामान्यशास्त्रप्रवृत्तेरिति भावः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मरणोद्देश्यकत्वस्यापि विशेषणत्वात् । अन्योद्देश्यकक्षिप्तनाराचहतब्राह्मणस्य तु वाचनिकं प्रायश्चित्तमिति चेन्न ।

तत्र बलवदनिष्टाननुबन्धित्वस्य विध्यर्थत्वाभावात् । वस्तुतः श्येनवारणायाऽदृष्टाऽद्वारकत्वेन विशेषणीयम् । अत एव काशीमरणार्थं कृतशिव-

कोई मरता ही है, एवं कुवे में गिरकर भी कोई मरता ही है अतः मरणानुकूलव्यापाररूपहिंसा वाला खड्गकर्त्ता तथा कूपकर्त्ता भी हो गया इसलिये वह भी हिंसक कहा जाना चाहिये] एवं जिस पुरुष को भोजन करते समय गले में अन्न रुक जाने से मृत्यु हो गयी उसे भी आत्म हत्या का पाप लगना चाहिये, अतः इन सब दोषों के वारणार्थ मरणानुकूलव्यापार में मरणोद्देश्यकत्व भी विशेषण दे देना, अर्थात् मरणोद्देश्यक जो मरणानुकूल व्यापार वही हिंसा वस्तु है। कूप-खड्ग आदि का निर्माणात्मक व्यापार मरण के उद्देश्य से नहीं हुवा है । इसीलिये अन्य उद्देश्य से फेंके हुवे वाण (नाराच) से अकस्मात् ब्राह्मण की हत्या हो गयी वहाँ वाण फेंकने वाले को वाचनिक प्रायश्चित्तमात्र का विधान हैं ।

उत्तर—श्येनयागस्थल के लिये मरणानुकूलव्यापार में अदृष्टाद्वारकत्व विशेषण और दे देना चाहिये, (अर्थात् अदृष्टाद्वारकत्वेसति मरणोद्देश्यकत्वेसति मरणानुकूलव्यापारो हिंसा) सो श्येनयाग अदृष्ट द्वारा ही शत्रुनाशक है । इसीलिये जिस पुरुष ने काशी मरण के उद्देश्य से भगवान् शिव की पूजा वगैरह की है उसे भी हिंसा नहीं होती है क्योंकि वह भी भगवान् शंकर की पूजा अदृष्टद्वारक ही है ।

प्रश्न—साक्षात् मरण के जनक व्यापार को ही हिंसा कह दिया जाय (अदृष्टद्वारकत्व विशेषण देना गौरवग्रस्त है) श्येनयाग साक्षात् शत्रुमरण का जनक नहीं है । अपितु अदृष्ट द्वारा ।

मरणानुकूलव्यापारमात्रमिति । साक्षात्परंपरयेत्यादिः । **यदि हिंसेति** । माहिंस्यादितिश्रुतिघटकहिंसापदार्थोयदीत्यर्थः । **विशेषणत्वादिति** । तथा च मरणोद्देश्यकत्वे सति मरणानुकूलव्यापारस्य हिंसापदार्थत्वेन खड्गकरणादेः मरणानुकूलत्वेपि मरणोद्देश्यकत्वाभावात्तत्कर्तुर्न हिंसकत्वापत्तिः । श्येनयागस्य तु मरणोद्देश्यकत्वात् हिंसात्वसंभव इति भावः । अथ मरणोद्देश्यकत्वनिवेशेऽन्योद्देशेन प्रक्षिप्तनाराचेन यत्र ब्राह्मणमृतिस्तत्र प्रायश्चित्तं न स्यात् , ब्राह्मणमरणस्य हिंसात्वाभावेन मा हिंस्यादिति निषेधाविषयत्वादत आह । **अन्योद्देश्यकेति** । **वाचनिकम्**—सेतौ च स्नानमात्रेण ब्रह्महत्यां व्यपोहति इति वचनेन ब्राह्मणवधस्य सेतुस्नानादिरूपप्रायश्चित्तविधानात्, सामान्यतो ब्राह्मणवधस्यापि उद्दिष्टप्रायश्चितत्वेन हिंसात्वाऽनपायात् । अन्योद्देश्यकनाराचप्रक्षेपस्य मरणोद्देश्यकत्वाऽभावेन मा हिंस्यादिति निषेधशास्त्राविषयत्वेपि ब्राह्मणं न हन्याल्लोहितं कुर्यादिति विशेषनिषेधविधिना ब्राह्मणहननमात्रस्य निषेधप्रतिपादनात् तस्य हिंसात्वं, तत्कर्तुः प्रायश्चित्तविधानं चोपपन्नमिति भावः । अभिचारकर्मणि बलवदनिष्टाननुबन्धित्वं नविध्यर्थः किन्तु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पूजादेरपि न हिंसात्वम्, श्येनस्तु न तथा, किन्तु तज्जन्यापूर्वमिति वाच्यम्। खड्गाघातेन ब्राह्मणे व्रणपाकपरंपरया मृते हिंसात्वानापत्तेः।

केचित्तु श्येनस्य हिंसाफलम्, न तु मरणम्, तेन श्येनजन्यखड्गाघातादिरूपा हिंसाऽभिचारपदार्थः, तस्य च पापजनकत्वम्, अतः श्येनस्य वैधत्वात्पापाऽजनकत्वेपि अग्रिमपापं प्रतिसन्धाय सन्तो न प्रवर्तन्ते इत्याहुः।

उत्तर—यह भी ठीक नहीं है क्योंकि खड्ग के आघात से व्रण एवं आघात आदि परम्परा से जहाँ ब्राह्मण मरा वहाँ खड्गाघातजन्य हिंसा को हिंसा ही नहीं मानना चाहिये, क्योंकि खड्ग से हुवा आघात साक्षात् मरण का जनक नहीं है।

कुछ विद्वानों का ऐसा मत है कि—श्येनयाग का फल सिर्फ 'हिंसा' ही है—न कि मरण। अतः श्येनयाग से होने वाले जो शत्रु के ऊपर खड्गाघात आदि हैं वे ही साक्षात मरण के जनक होने के नाते हिंसारूप हैं और वही हिंसा अभिचार पद का अर्थ है। और उसी खड्गाघातादिरूप अभिचार पदार्थ को पापजनकत्व है [श्येनयाग को नहीं—क्योंकि वह साक्षात् मरण का जनक नहीं। और इस मत में भी साक्षात् मरण के जनक को ही हिंसा माना है—अथ च हिंसा ही पाप का जनक होती है] अतः श्येनवैध होने के नाते पाप का अजनक होने पर भी इसी परम्परा के आधार पर अगाड़ी यह शत्रुमरणजन्यपाप न हो ऐसा प्रतिसन्धान करके सन्त लोग इसमें प्रवृत्त नहीं होते हैं।

कृतिसाध्येष्टसाधनत्वमात्रं तथा च विध्यर्थस्य बोधो नानुपपन्न इत्याशयेन समाधत्ते। तत्र। श्येनेनाभिचरन् यजेतेत्यत्र। विध्यर्थत्वाभावादिति। तथा च तत्र लक्षणया कृतिसाध्यत्वविशिष्टेष्टसाधनत्वबोध इत्यर्थः। न विधौ परः शब्दार्थ इति नियमस्य च विधिप्रत्ययातिरिक्त शब्दपरत्वादिति भावः। अत एवाऽस्वरसादाह। वस्तुत इति। श्येनवारणायेति। श्येनस्य बलवदनिष्टानुबन्धित्ववारणायेत्यर्थः। विशेषणीयमिति। "बलवदनिष्टानुबन्धित्वरूपं" बलवद्द्वेषविषयदुःखजनकत्वमिति शेषः। एवं मरणोद्देश्यकत्वे सति अदृष्टाद्वारकत्वे सति मरणानुकूलव्यापारस्यैव मा हिंस्यादित्यत्र हिंसापदार्थतया श्येनस्याऽदृष्टद्वारैव वैरिमरणसाधनतया न हिंसात्वमिति भावः। अतएवेति। अदृष्टाद्वारकत्वविशेषणादेवेत्यर्थः। कृतशिवपूजनादेरपीति। अपिना श्येनपरिग्रहः। न हिंसात्वमिति। नाऽदृष्टाद्वारकमरणानुकूलव्यापारत्वमित्यर्थः। न बलवदनिष्टानुबन्धित्वमिति यावत्। ननु साक्षान्मरणजनकत्वविशेषणादेव तादृशशिवपूजनश्येनादेर्वारणे किमदृष्टाद्वारकत्वविशेषणेनेति शंकते। नचेति। साक्षान्मरणजनकस्यैवेति। एवकारेण परंपरयेत्यस्य व्यावृत्तिः। तज्जन्याहिंसात्वमिति। अस्तु इति शेषः। न तथा। न साक्षान्मरणजनकः। तज्जन्या-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आचार्यास्तु आप्ताभिप्रायोविध्यर्थः। पाकं कुर्याः इत्यादौ आज्ञादिरूपेच्छावाचित्वल्लिङ्मात्रस्येच्छावाचित्वं लाघवात्। एवं च स्वर्गकामोयजेत

और उदयनाचार्य आप्तपुरुष की इच्छा (अभिप्राय) ही को विध्यर्थ मानते हैं। 'पाकंकुर्याः' यहाँ पर जैसे लिङ् को आज्ञारूप इच्छावाचित्व है वैसे ही सर्वत्र लिङ् मात्र को इच्छावाचकत्व है लाघव होने से। इसी प्रकार 'स्वर्गकामोयजेत' यहाँ पर भी याग स्वर्ग की इच्छा वाले पुरुष की कृति से साध्य होने के नाते आप्त पुरुष को इष्ट है। इसके बाद याग के

पूर्वमिति। साक्षान्मरणजनकमित्यनुसंज्ञनीयम्। तथा च साक्षान्मरणानुकूलव्यापारस्य हिंसात्वस्वीकारेणैवोपपत्तौ अदृष्टाद्वारकत्वविशेषणमनर्थकमिति भावः। हिंसात्वानापत्तेरिति। तादृशखड्गाघातस्य हिंसात्वानुपपत्तेरित्यर्थः। तथा च साक्षान्मरणजनकव्यापारस्य हिंसात्वं न संभवतीति भावः। अदृष्टाद्वारकत्वविशेषणं विनैव श्येने बलवदनिष्टाननुबन्धित्वमुपपादयतां मतमाह। केचित्त्विति। हिंसा। साक्षान्मरणानुकूलव्यापारः। तेन। साक्षान्मरणानुकूलव्यापारस्यैव हिंसात्वस्वीकारेण। खड्गाघातादिरूपाहिंसेति सावधारणम्। तस्य चेति। खड्गाघातादेरित्यर्थः। पापजनकत्वमिति। स्वीक्रियते इति शेषः। कुतस्तर्हिआस्तिकानांश्येने न प्रवृत्तिरत आह। अग्रिमपापं प्रतिसन्धायेति। खड्गाभिघातजन्यं पापं ज्ञात्वेत्यर्थः। न प्रवर्तन्ते इति। तथा च श्येनस्य मरणजनकत्वाभावेपि मरणप्रयोजकत्वात्सतां प्रवृत्त्यभाव इति भावः।

आचार्यास्त्विति। विध्यर्थ इति। लिङर्थ इत्यर्थः। तथा च प्रवृत्तिनिवृत्तिविषये आप्ताभिप्रायो लिङ्प्रत्ययार्थ इति भावः। पाकं कुर्याइत्यादाविति। अदिना पाकं कुर्याम्, पाकं कुर्यादित्यनयोः परिग्रहः। आज्ञादिरूपेच्छावाचित्ववदिति। आदिना संकल्पपरिग्रहः। कुर्याः इत्यत्र आज्ञा, कुर्यामित्यत्र संकल्पः इति भेदः। यां वक्तुरिच्छामननुविधानस्तत्संक्षोभाद्बिभेति सा आज्ञा। या तु स्वकर्तव्यत्वेनेच्छा सा संकल्पः। एवं मध्यमोत्तमपुरुषयोरिच्छावाचित्ववत्प्रथमपुरुषस्यापि इच्छावाचित्वं लाघवात्। तदेवाह लिङ्मात्रस्येति। आज्ञादीत्यादिपदादध्येषणा अनुज्ञा संप्रश्न प्रार्थना आशीः परिग्रहः। या वक्तुरिच्छा श्रोतुः पूजासम्मानव्यंजिका इच्छा सा अध्येषणा। वारणाभावव्यंजिकेच्छा अनुज्ञा। अभिधानप्रयोजनेच्छा संप्रश्नः। लाभेच्छाप्रार्थना। शुभाशंसनं आशीः। लाघवादिति। कृतिसाध्यत्वादित्रितयापेक्षया इच्छात्वेन शक्तौलाघवादित्यर्थः। अभिप्रायश्चेच्छा। एवंचेति। इच्छामात्रस्य विध्यर्थत्वे चेत्यर्थः। आप्तेष्ट इति। आप्तेच्छाविषय इत्यर्थः। आप्तेच्छा च यागः स्वर्गकामस्य कृतिसाध्योभवतु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इत्यादौ यागः स्वर्गकामकृतिसाध्यतया आप्तेष्ट इत्यर्थः । ततश्चाऽऽप्तेष्टत्वेनेष्ट-साधनत्वादिकमनुमाय प्रवर्तते, कलञ्जभक्षणे तदभावान्न प्रवर्तते ।

यस्तु वेदे पौरुषेयत्वं नाभ्युपैति तं प्रति विधिरेव, तावद् गर्भं इव श्रुतिकुमार्याः पुंयोगे मानम् । न च कर्त्रस्मरणं बाधकम् । कपिलकणादा-

आप्तेष्टत्व का निश्चय कर इष्टसाधनत्व का अनुमान करते हैं तब लोग इसमें प्रवृत्त होते हैं । और कलञ्जभक्षण में आप्तेष्टत्व नहीं है इसलिये प्रवृत्ति नहीं होती है ।

प्रश्न—'पाकं कुर्याः' 'त्वं गच्छ' इत्यादि लोकस्थल में लिङ् को वक्ता की इच्छा का वाचक मान कर विध्यर्थत्व का निर्वाह कर सकते हैं—परन्तु वेदस्थल में तो कोई वक्ता पुरुष ही नहीं है अतः वहाँ किसकी इच्छा का वाचक लिङ् को मानकर विध्यर्थत्व उपपन्न किया जाय ।

उत्तर—जैसे कुमारी के साथ पुरुष के संयोग में गर्भ ही प्रमाण होता है वैसे ही वेद में जो मीमांसक पौरुषेयत्व नहीं स्वीकार करते हैं उनके प्रति वेदस्थ विधिप्रत्यय ही वेद के साथ पुरुष का योग होने में अर्थात् वेद के पौरुषेयत्व में प्रमाण है, अन्यथा वेद में किसकी इच्छा को विध्यर्थ कहा जायगा ।

इत्याकारिका बोध्या । एवं न कलंजंभक्षयेदित्यस्य कलंजभक्षणं कृतिसाध्यतया नाप्तेच्छाविषय इत्यर्थो बोध्यः । ननु तावतापि प्रवृत्तिहेतोरिष्टसाधनताज्ञानस्य निवृत्तिहेतोरनिष्टसाधनताज्ञानस्य चालाभात् कथं प्रवृत्तिनिवृत्ती इत्यत आह । ततश्चेति । शाब्दबोधात्मक "कृतिसाध्यत्वप्रकारकाऽऽप्तसमवेतेच्छाविशेष्यत्वात्मक" लिङ्गज्ञानानन्तरमित्यर्थः । एवं शाब्दबोधात्मक "कृतिसाध्यत्वप्रकारकाऽऽप्तसमवेतेच्छा-विशेष्यत्वाभावात्मकऽऽलिङ्गज्ञानानन्तरमित्यपिबोध्यम् । इष्टसाधनत्वादिकमिति । आदिनाबलवदनिष्टाननुबन्धित्वपरिग्रहः । इदमुपलक्षणम् । अनिष्टसाधनत्वमपि बोध्यम् । अनुमायेति । अनुमितिविषयीकृत्येत्यर्थः । तथा च यागो "बलवद-निष्टाननुबन्धि" मदिष्टसाधनं मत्कृतिसाध्यत्वप्रकारकाऽऽप्तसमवेतेच्छाविशेष्यत्वात् मत्पित्रामत्कृतिसाध्यत्वप्रकारकमत्पितृसमवेतेच्छाविशेष्यमत्कर्तृकभोजनवदित्यनुमि-तिर्जायते इति भावः । सामान्यव्याप्तिश्च योयस्य कृतिसाध्यतया आप्तेनेष्यते स तस्य बलवदनिष्टाननुबन्धीष्टसाधनमित्याकारिका बोध्या ।

एवं कलंजभक्षणं मम बलवदनिष्टसाधनं मत्कृतिसाध्यतया आप्तेनाऽनिष्य-माणत्वात् मत्पित्रा मत्कृतिसाध्यतयाऽनिष्यमाणमधुविषसंपृक्ताऽन्नभोजनवत् । यो यस्य कृतिसाध्यतया आप्तेन नेष्यते स तस्य बलवदनिष्टसाधनमिति सामान्य-व्याप्त्या अनिष्टसाधनत्वसिद्धिः । तदेवाह । कलंजभक्षणे इति । तदभावात् । इष्टसाधनत्वज्ञानाभावात्, प्रत्युततद्विरोधि अनिष्टसाधनत्वज्ञानादिति यावत न प्रवर्तते । निवर्तते इति यावत् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दिकमारभ्याद्यपर्यन्तं कर्तृस्मरणस्यैव प्रतीयमानत्वात् । अन्यथा स्मृतीनाम-प्यकर्तृकत्वापत्तेः, तत्रैव कर्तृस्मरणमप्यस्तीति चेत्—वेदेपि "छन्दांसि जज्ञिरे तस्मात्" इत्यादि कर्तृस्मरणमस्त्येव । एवं—

प्रतिमन्वन्तरं चैषाश्रुतिरन्या विधीयते । इत्यपि द्रष्टव्यम् ।

स्वयंभूरेष भगवान् वेदोगीतस्त्वया पुरा ।

शिवादिऋषिपर्यन्ताः स्मर्तारोनास्य कारकाः इति तु वेदस्य स्तुतिमात्रम् ।

प्रश्न—वेद के किसी भी कर्त्ता का स्मरण न होना ही वेद के पौरुषेयत्व का बाधक मान लिया जाय ।

उत्तर—यह ठीक नहीं – क्योंकि कपिल-कणाद आदि ऋषियों द्वारा आज तक वेद में कर्त्ता का स्मरण बना हुआ है । (अतः वेद को सकर्तृक अवश्य ही मानना होगा) अन्यथा स्मृति वगैरह को भी अकर्तृकत्व की आपत्ति लग जावेगी ।

प्रश्न—मन्वादि स्मृति में तो उन-उन स्मृति कर्ताओं के नामों का उल्लेख होने के नाते कर्तृस्मरण बना हुआ है । (परन्तु वेद में नामोल्लेख न होने के नाते कैसे कर्तृस्मरण स्वीकार किया जावे) ।

उत्तर—यदि ऐसा है तब तो वेद में भी "छंदांसि जज्ञिरे तस्मात्" इत्यादि मन्त्रों के द्वारा कर्तृस्मरण होता ही है अतः वेद को पौरुषेयत्व स्पष्ट ही है । एवं "प्रतिमन्वन्तरं चैषा

न च वेदेषु पुरुषस्य निरासान्न तत्राऽऽप्ताभिप्रायस्य विध्यर्थत्वसंभव इति । वाच्यम् । निरासहेतोरभावात् । न च तदस्तित्वेपि प्रमाणं नास्तीति वाच्यम् । तस्य दर्शितत्वात् । न च वक्तृणामध्यापकानामेवाभिप्रायस्य विध्यर्थत्वमस्तु कृतं स्वतन्त्रेण वक्त्रा परमेश्वरेणेति वाच्यम् । अध्यापकानामनुवक्तृतयाऽभ्यासमात्राभिप्रायेण प्रवृत्तेः शुकादिवत्तथाविधाभिप्रायाभावात् । भावे वा न राजशासनानुवादिनोऽभिप्राय आज्ञा, किन्तु राज्ञ एवेति लोके दर्शनात्, इहापि स्वतन्त्रस्य वक्तुः पुरुषधौरेयस्याभिप्रायो विध्यर्थोः नानुवक्तृणाम् । माभूत्प्रमाणान्तरं तथाप्याह । यस्त्विति । पौरुषयत्वमिति । पुरुषप्रणीतत्वमित्यर्थः । विधिरेवेति । मानमित्युत्तरेण संबन्धः । कुमार्या गर्भ इवेति । कुमार्या गर्भ इत्यादिः । तथा च पुरुषसंबन्ध

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न च पौरुषेयत्वे भ्रमादिसंभवादप्रामाण्यं स्यादिति वाच्यम्। नित्यसर्वज्ञत्वेन निर्दोषत्वात्। अत एव पुरुषान्तरस्य भ्रमादिसंभवान्न कपिलादेरपि कर्तृत्वं वेदस्य, किं च वर्णानामनित्यत्वस्य वक्ष्यमाणत्वात्सुतरां तत्सन्दर्भस्य वेदस्याऽनित्यत्वमिति संक्षेपः ॥१५०॥

श्रुतिरन्या विधीयते" इत्यादि स्मृति भी प्रति मन्वन्तर में विभिन्न श्रुतियों के निर्माण में हेतु है, इससे भी श्रुति को अर्थात् वेद को पौरुषेयत्व स्पष्ट है। और "स्वयंभूरेष भगवान्" इत्यादि वचन तो वेद की स्तुतिमात्र है, न कि इसके आधार पर वेद को अपौरुषेय कहा जा सकता है।

प्रश्न—वेद को पौरुषेय मानने पर पुरुष में भ्रम आदि के संभावित होने के नाते वेद में अप्रामाण्य आ जायगा अर्थात् वेद अप्रमाण हो जावेगा।

उत्तर—नहीं, क्योंकि ईश्वर नित्य तथा सर्वज्ञ होने के नाते सर्वथा निर्दोष है। (अतः भ्रमादि की संभावना भी ईश्वर में नहीं है, जिससे कि वेद में अप्रामाण्य की शंका की जावे) हाँ कपिल आदि पुरुषान्तरों में भ्रमादि की संभावना अवश्य हो सकती है इसीलिये कपिलादि भी वेद के कर्त्ता नहीं हैं। और दूसरी बात यह है कि वर्णों को अनित्य जब की अगाड़ी हमें कहना ही है तो सुतरां उस वर्ण समुदायभूत वेद को नित्य (अपौरुषेय) नहीं माना जा सकता है। उपादान अर्थात् समवायिकारण का अध्यक्ष यानी प्रत्यक्ष भी प्रवृत्ति में कारण होता है ॥ १५०॥

विना गर्भाऽसंभवात् कुमार्यागर्भः पुंयोगे मानं तथा श्रुतिकुमारी मध्यस्थविधिरेव श्रुतेः पौरुषेयत्वे मानमिति समुदितार्थः। न च कर्त्रस्मरणमिति। कर्तुः वेदकर्तुः। अस्मरणं स्मृतिभिरनवबोधनम्। बाधकमिति। तथा च वेदो न पौरुषेयः अस्मर्यमाणकर्तृकत्वात् आकाशादिवदित्यनुमानमीश्वरसिद्धौ बाधकमिति भावः। प्रतीयमानत्वादिति। कपिलकणादगौतमैस्तच्छिष्यैश्चाऽद्यपर्यन्तं वेदस्य सकर्तृकत्वस्मरणादित्यर्थः। चिरातीतत्वेन कर्त्रस्मरणोपपत्तेश्च हिमालयखानित-कूपादिवत्। न च मूलभूताऽनुभवाभावात् स्मरणानुपपत्तिः। स्मरणस्यापलपितु-मशक्यत्वात्, पौरुषेयत्वानुमानेनैव अनुभवाच्च, अनुमितिस्तु वेदः पौरुषेयः वाक्यसमूहत्वादित्याकारिका। तथाचोक्तानुमितिमूलकस्मरणस्मृतिप्रणयनयोः संभवादिति भावः। अन्यथा। उक्तानुमानस्याऽप्रयोजकत्वमङ्गीकृत्य वेदस्य सकर्तृकत्वानङ्गीकारे। शंकते। तत्रैवेति। स्मृतिष्वेवेत्यर्थः। अस्तीति चेदिति। अस्तीतियदुच्यते इत्यर्थः। स्वयम्भूरिति। नित्य इत्यर्थः। एषभगवानिति। एतद्द्वयमपिवेदविशेषणम्। तथाचैतादृशवचनेन वेदस्य नित्यत्वलाभान्नपौरुषेयत्व-मिति भावः। शंकां परिहरति। वेदस्यस्तुतिमात्रमिति। तथा च पूर्वोक्तश्रुति-स्मृत्योर्विरोधेनाऽस्य भारतस्य न स्वार्थे तात्पर्यमपि तु स्तुतिपरत्वमिति भावः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उपादानस्य चाऽध्यक्षं प्रवृत्तौ जनकं भवेत् ।
निवृत्तिस्तु भवेद् द्वेषाद् द्विष्टसाधनताधियः ॥१५१॥
यत्नो जीवनयोनितु सर्वदाऽतीन्द्रियो भवेत् ।
शरीरे प्राणसंचारे कारणं स प्रकीर्तितः ॥१५२॥

उपादानस्येति । उपादानस्य समवायिकारणस्याऽध्यक्षं च प्रवृत्तौ कारणमिति । निवृत्तिरिति । द्विष्टसाधनताज्ञानस्य निवृत्तिं प्रति जनकत्वमन्वयव्यतिरेकाभ्यामवधारितमिति भावः । १५१ । यत्न इति । जीवनयोनियत्नो यावज्जीवनमनुवर्तते । स चाऽतीन्द्रियः । तत्र प्रमाणमाह । शरीरे इति । प्राणसञ्चारो हि अधिकश्वासादिः यत्नसाध्यः । इत्थं च प्राणसंचारस्य

निवृत्तिरिति । द्विष्ट साधनताज्ञान निवृत्ति में कारण है यह अन्वय-व्यतिरेक से निश्चित है ॥१५१॥

जीवनपर्यन्त रहने वाला यत्न जीवनयोनियत्न कहलाता है और वह अतीन्द्रिय है । व्यायाम कालीन अधिक श्वास-प्रश्वास स्वरूप प्राणसंचार यत्न साध्य है । (सो जिस यत्न से साध्य है वही यत्न जीवनयोनियत्न है) इस प्रकार समस्त प्राणसंचार में प्रयत्न साध्यत्व का अनुमान

निर्दोषत्वादिति । भ्रमादिदोषवत्वाऽसंभवादिति भावः । अतएव । नित्य सर्वज्ञत्वाभादेव ।

ननु स एवायं गकार इत्यादि प्रत्यभिज्ञानाद् वर्णानां नित्यतया सुतरां वेदस्य नित्यत्वमितिनिर्दोषतया तत्प्रामाण्यमप्रत्यूहम्, तथाच सकर्तृकत्वानुमाने बाध इत्यतो वेदस्य नित्यत्वे बाधकमाह । किंचेति । तत्सन्दर्भस्य । वर्णघटितानुपूर्वीविशेषावच्छिन्नवाक्यरूपस्य । १५०

प्रवृत्तौकारणमिति । तथा च तद्विधेयकप्रवृत्तिं प्रति तदुपादाननिष्ठलौकिकविषयताशालिप्रत्यक्षं कारणमिति भावः । ननु शब्दोद्देशेन मृदङ्गादौ प्रवृत्तिर्न स्यात्, तदुपादानस्य गगनस्य लौकिकविषयताशून्यत्वात्, एवं ध्वंसविधेयक प्रवृत्तिरपि न स्यात् ध्वंसोपादानाऽप्रसिद्धेरिति चेत् इष्टापत्तेः । शब्दादिप्रत्यक्षमुद्दिश्यैव मृदङ्गादौ प्रवृत्तिस्वीकारात् । वस्तुतो द्रव्यविधेयकप्रवृत्तिं प्रत्येव तदुपादानप्रत्यक्षस्य हेतुत्वमावश्यकम्, कपालादिप्रत्यक्षं विना तद्विषयकेच्छानुत्पादात् कपालादौ प्रवृत्त्यनुपपत्तेः, एवं च शब्दादिविषयकप्रवृत्तेः कार्यतावच्छेदकानाक्रान्ततया गगनादेरतीन्द्रियत्वेपि ध्वंसोपादानस्याऽप्रसिद्धत्वेपि नानुपपत्तिरिति ध्येयम् । मूले— निवृत्तिस्तु इति । उपाये निवृत्तिस्तु इत्यर्थः । द्वेषात्—उपाये द्वेषात् । फले द्वेषाच्च । निवृत्तिं प्रति फलगतोद्वेषः कारणम् । उपायेच्छां प्रति फलेच्छाया इव उपायद्वेषं प्रति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अतीन्द्रियं गुरुत्वं स्यात् पृथिव्यादिद्वये तु तत्।
अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् ॥१५३॥
तदेवाऽसमवायि स्यात्पतनाख्ये तु कर्मणि।

सर्वस्य यत्नसाध्यत्वानुमानात्प्रत्यक्षयत्नबाधाच्चातीन्द्रिययत्नसिद्धिः। स एव जीवनयोनिर्यत्नः। १५२।

गुरुत्वं निरूपयति – अतीन्द्रियमिति। अनित्ये इति। अनित्ये द्यणुकादौ। गुरुत्वं, तद् अनित्यम्। नित्ये–परमाणौ। नित्यम् गुरुत्वमित्यनुवर्तते। तद्–गुरुत्वम्। असमवायि–असमवायिकारणम् पतनाख्ये इति। आद्यपतने इत्यर्थः।

इति गुरुत्वनिरूपणम्।

होता है कि—'प्राणसंचारो यत्नसाध्यः' इत्यादि। इस प्रकार उस यत्न का प्रत्यक्ष न होने के नाते वह अतीन्द्रिय सिद्ध हो रहा है। और वही जीवनयोनियत्न है ॥१५२॥

गुरुत्व का निरूपण करते हैं—स्पष्ट अर्थ है ॥१५३॥

फलद्वेषस्य हेतुत्वावश्यकत्वादिति भावः। द्विष्टसाधनताज्ञानस्येति। द्वेषविषयीभूतदुःखसाधनताज्ञानस्येत्यर्थः। निवृत्तिंप्रति। उपायविषयकनिवृत्तिं प्रति। उपायविषयकद्वेषं प्रतीत्यपि बोध्यम्। अन्वयव्यतिरेकाभ्यामिति। द्विष्टसाधनताज्ञानसत्वे-निवृत्तिसत्त्वं, तदभावे तदभाव इति निश्चयाभ्यामित्यर्थः ॥१५१॥

जीवनं–जीवनाऽदृष्टं, योनिः–कारणमस्येति जीवनयोनिशब्दो यत्ने योगरूढः। सर्वदा इत्यस्य विवरणं यावज्जीवमिति। प्राणसञ्चारोहीति। एवकारार्थकोहिशब्द अधिकश्वासादिरित्युत्तरं योजनीयः। अधिकश्वासादिरूपएवेत्यर्थः। प्रयत्नसाध्य इति। गुरुभारोत्तोलने धावनादौ च प्रयत्नविशेषात् श्वासक्रियाविशेषदर्शनात्प्रयत्नसाध्य इत्यर्थः। इत्थंचेति। एतादृशप्राणसंचारस्य यत्नसाध्यत्वे चेत्यर्थः। प्राणसञ्चारस्य सर्वस्येति। सर्वस्येति। प्राणसञ्चारत्वावच्छेदेनेत्यर्थः। सुषुप्तिकालीनश्वासात्मकप्राणसंचारस्येति यावत्। यत्नसाध्यत्वानुमानादिति। यद्विशेषयोः कार्यकारणभावोबाधकं विना तत्सामान्ययोरपीति न्यायेन प्राणक्रियासामान्ये यत्नसामान्यजन्यत्वानुमानादित्यर्थः। तथाच सुषुप्तिकालीनश्वासः भोक्तृप्रयत्नसाध्यः श्वासत्वात् धावतः श्वासवदित्यनुमानं बोध्यम्। नव्यास्तु सुषुप्तिकालीनप्राणसंचाररूपश्वासं प्रति जीवनाऽदृष्टस्य हेतुत्वस्वीकारेणैवोपपत्तेः, उक्तानुमानस्याऽप्रयोजकत्वाच्च जीवनयोनियत्ने मानाभावः, अन्यथा बाह्यपदार्थप्रयत्ने ज्ञानजन्यत्वस्य सिद्धेत्वात्तद्दृष्टान्तेन प्रयत्नत्वलिङ्गेन जीवनयोनियत्नेपि ज्ञानजन्यत्वसिद्ध्यापत्त्या सुषुप्तिकाले आत्मनि अतीन्द्रियज्ञानस्यापि स्वीकारापत्तेरिति प्राहुः ॥१५२॥

इति यत्ननिरूपणम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सांसिद्धिकं द्रवत्वं स्यान्नैमित्तिकमथापरम् ॥१५४॥
सांसिद्धिकं तु सलिले द्वितीयं क्षितितेजसोः ।
परमाणौ जले नित्यमन्यत्राऽनित्यमिष्यते ॥१५५॥
नैमित्तिकं वन्हियोगात्तपनीयघृतादिषु ।
द्रवत्वं स्यन्दने हेतुर्निमित्तं संग्रहे तु तत् ॥१५६॥

द्रवत्वं निरूपयति । सांसिद्धिकमिति ! द्रवत्वं द्विविधम् सांसिद्धिकं नैमित्तिकं चेति । द्वितीयं–नैमित्तिकम् । परमाणाविति । जलपरमाणौ द्रवत्वं नित्यमित्यर्थः । अन्यत्र–पृथिवीतेजःपरमाण्वादौ जलद्यणुकादौ च द्रवत्वमनित्यम् । १५४–१५५ । कुत्रचित्तेजसि कुत्रचित्पृथिव्यां च नैमित्तिकं द्रवत्वम् । तच्च सुवर्णात्मकतेजसि घृतजतुप्रभृतिपृथिव्यां च वर्तते इत्यर्थः । द्रवत्वं स्यन्दने हेतुरिति । असमवायिकारणमित्यर्थः । संग्रहे–सक्तुकादिसंयोगविशेषे । तत्–द्रवत्वं, स्नेहसहितमिति बोद्धव्यम् । तेन द्रुतसुवर्णस्य न संग्रहः । १५६ ।

द्रवत्व का निरूपण करते हैं—द्रवत्व दो प्रकार का है—सांसिद्धिक, (स्वाभाविक) नैमित्तिक । (निमित्त से होने वाला) जल के परमाणु में द्रवत्व नित्य है, और अन्यत्र पृथिवी परमाणु में तथा जलादि के द्व्यणुक आदि में अनित्य है । और तेज (सुवर्ण) में तथा पृथिवी (घृत) में नैमित्तिक द्रवत्व है ॥१५४॥

अग्नि संयोग से जायमान द्रवत्व नैमित्तिक है । और वह सुवर्ण रूप तेज में तथा घृत-जतु (लाक्षा) आदि पृथिवी में रहता है ॥१५५॥१५६॥

मूलस्याऽसमवायिशब्दस्य समवायिभिन्नपरत्वे रूपादावतिव्याप्तिरत आह । असमवायिकारणमिति । आद्यपतने इत्यर्थ इति । पतनं नाम वृक्षविभागजनकव्यापारमारभ्य भूमिसंयोगजनकव्यापारपर्यन्तं सर्वाः क्रियाः । तत्र प्राथमिकव्यापारे गुरुत्वमसमवायिकारणम्, द्वितीयादिपतने वेगोऽसमवायिकारणम्, तथा च द्वितीयपतनाऽसमवायिकारणत्वाद् वेगेऽतिव्याप्तिवारणाया ऽऽद्येति विशेषणमिति भावः । आद्यत्वं च स्वसमानाधिकरणपतनप्रतियोगिकध्वंसाऽसमानकालीनत्वम् । गुरुत्वमतीन्द्रियं इन्द्रियजन्यलौकिकप्रत्यक्षायोग्यत्वात् अदृष्टवदिति । किन्तु पतनकार्यानुमेयम् । अनुमितिस्तु आद्यपतनं साऽसमवायिकारणं क्रियात्वात् संयोगासमवायिकारणक्रियावत् इत्याकारिका । न्यायलीलावतीकृतस्तु अदृष्टसापेक्षेण त्वगिन्द्रियेण पृष्ठाद्यारोपितपदार्थस्य गुरुत्वमुपलभ्यते एव । न च तत्रापि तदुपलब्धिरानुमानिकी भवतीति वक्तुं शक्यम् । तदनुमापकपतनाऽयोगात् । अत एव तेषां ग्रन्थः—"अतो-योगीन्द्रियवत् इन्द्रियमदृष्टसहायमतीन्द्रियेपि प्रवर्तते इति ।" गुरुत्वस्य आश्रयः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्नेहो जले स नित्योऽणावनित्येऽवयविन्यसौ।
तैलान्तरे तत्प्रकर्षाद्दहनस्याऽनुकूलता ॥१५७॥
संस्कारभेदो वेगोऽथ स्थितिस्थापकभावने।

स्नेहं निरूपयति। जले इति। जले एवेत्यर्थः। असौ—स्नेहः। ननु पृथिव्यामपि तैले स्नेह उपलभ्यते। न चासौ जलीयः। तथा सति दहनप्रातिकूल्यप्रसंगादत आह। तैलान्तरे इति। तत्प्रकर्षात्—स्नेहप्रकर्षात्। तैले उपलभ्यमानः स्नेहोपि जलीय एव तस्य प्रकृष्टत्वादग्नेरानुकूल्यम्। अपकृष्टस्नेहं हि जलं वन्हिं नाशयतीति भावः। १५७। संस्कारं निरूपयति। संस्कारेति। वेगस्थितिस्थापकभावनाभेदात्संस्कारस्त्रिविध इत्यर्थः। मूर्तमात्रे

स्नेह का निरूपण भी स्पष्ट ही है ॥१५७॥

संस्कार का निरूपण करते हैं—संस्कारेति। संस्कार तीन प्रकार का है—वेग--स्थितिस्थापक-भावना। वेग नामक संस्कार कहीं कर्म से होता है, और कहीं वेग से। शरीर आदि में नोद-

---

"फलादिः" समवायिकारणम्। अवयविसमवेतगुरुत्वस्य अवयवसमवेतगुरुत्वमसमवायिकारणम्। आश्रयनाशान्नाशः। लक्षणं तु आद्यपतनाऽसमवायिकारणत्वम्।

इति गुरुत्वनिरूपणम्।

आद्यस्यन्दनाऽसमवायिकारणं द्रवत्वम्। स्यन्दनं—प्रस्रवणम्, तच्च सन्निकृष्टे द्रव्यसंयोगानुकूलोव्यापारः। सांसिद्धिकं—अग्न्यादिसंयोगाजन्यम्। अग्न्यादिसंयोगोनिमित्तं, तज्जन्यं नैमित्तिकम्। सर्वं नैमित्तिकद्रवत्वमनित्यम्। तेजःसंयोगोऽसमवायिकारणम्। तेजःसंयोगनाशाच्च नश्यतीति ॥१५६॥

इति द्रवत्वनिरूपणम्।

स्नेहत्वं जातिविशेषः प्रत्यक्षसिद्धः तदेव स्नेहस्य लक्षणम्। जले एवेत्यर्थ इति। जलभिन्ने स्नेहव्यवस्थापकप्रमाणाभावादिति भावः। अथ घृततैलादावपि स्नेहाङ्गीकार आवश्यकः, अन्यथा तैलसंयुक्तचूर्णादौ अवयवानां विलक्षणदृढसंयोगानुपपत्तेः तथा च कथं स्नेहस्य जलमात्रवृत्तित्वमित्याशंकते। नन्विति। असौ—तैले प्रतीयमानस्नेहः। जलीयः—तैलान्तर्गतजलनिष्ठः तथासति। तैलादौ जलसत्वे। दहनप्रातिकूल्यप्रसंगादिति। तथाच ततोदहनानुपपत्तिः, जलस्य दहनप्रतिकूलत्वादिति भावः। जलीय एवेति। कालिन्दीजले श्यामादिवत् तैले औपाधिकस्नेहप्रत्ययोपपत्तिरिति भावः। अपकृष्टस्नेहं हीति। अप्रकृष्टस्नेहवज्जलं हीत्यर्थः। तैलान्तर्वर्तिजलं हि वन्हिं नाशयतीति वा बोध्यम्। अत्रेदं बोध्यम्। द्रुतजलसंयोगस्य सांसिद्धिकद्रवत्वस्य स्नेहस्य वा कारणत्वमित्यत्र विनिगमनाविरहात् अतिरिक्त-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मूर्तमात्रे तु वेगः स्यात्कर्मजो वेगजः क्वचित् ॥१५८॥
स्थितिस्थापकसंस्कारः क्षितौ केचिच्चतुर्ष्वपि ।
अतीन्द्रियोऽसौ विज्ञेयः क्वचित्स्पन्देऽपि कारणम् ॥१५९॥

इति । कर्मजवेगजभेदाद् वेगो द्विविध इत्यर्थः । शरीरादौ हि नोदनजनितेन कर्मणा वेगोजन्यते, तेन च पूर्वकर्मनाशः तत उत्तरं कर्म । एवमग्रेपि । विना च वेगं कर्मणः कर्मप्रतिबन्धकत्वात् पूर्वकर्मनाशः उत्तरकर्मोत्पत्तिश्च न स्यात् । यत्र वेगवता कपालेन जनिते घटे वेगो जन्यते स वेगजो वेगः ॥१५८॥

नाख्य संयोग से जनित कर्म से वेग उत्पन्न होता है। और उस वेग से पूर्व कर्म का नाश तथा उसके बाद कर्मान्तरोत्पत्ति होती है। ऐसे ही फिर अगाड़ी भी (अर्थात् उत्पन्न हुवे उस कर्मान्तर से पूर्व वेग का नाश तथा वेगान्तर (दूसरे वेग) की उत्पत्ति) होती है। विना वेग के अर्थात् वेग को यदि नहीं माना जायगा तो पूर्व कर्म ही स्थायी हो जायगा और वह कर्मान्तर की उत्पत्ति में प्रतिबन्धक हो जायेगा—इससे पूर्व कर्म नाश-तथा कर्मान्तरोत्पत्ति (उत्तर कर्म की उत्पत्ति) न हो सकेगी। (क्योंकि वही वेग पूर्व कर्म के नाश तथा कर्मान्तर की उत्पत्ति में कारण है) जहाँ वेग वाले कपाल से जनित घट में वेग उत्पन्न हुआ वह वेगज वेग कहलाता है ॥१५८॥

स्नेहसिद्धिः । स्नेहोनित्यवृत्तिर्नित्यः । अनित्यवृत्तिरनित्यः । अनित्यः कारणपूर्वकः, आश्रयनाशनाश्यश्चेति ॥१५७॥

इति स्नेहनिरूपणम् ।

मूले—संस्कारभेद इति । भिद्यते अनेनेति भेदः असाधारणोधर्म इत्यर्थः । वेगादिशब्दोभावप्रधाननिर्देशपरः । तथा च वेगत्वादि त्रयं संस्कारधर्म इति फलितम् । संस्कारत्वजातिमत्त्वं संस्कारस्यलक्षणम् । संस्कारत्वजातिस्तु संस्कारप्रदशकयतावच्छेकतया सिद्धा । मूर्तमात्रे तु वेगः स्यादिति मूलम्—संख्यादावतिव्याप्तिवारणाय मात्रपदम् । अमूर्ताऽवृत्तित्वे सति मूर्तवृत्तित्वं तदर्थः । अमूर्तसमवेतावृत्ति मत्तः समवेतवृत्तिजातिमत्त्वं प्रत्यक्षसिद्धवेगत्वजातिमत्त्वं वा वेगस्य लक्षणम् । तेन रूपादौ नातिव्याप्ति तादवस्थ्यम् । कर्मजवेगं तावदुदाहरति । शरीरादाविति । वेगशून्ये शरीरादावित्यर्थः । कर्मणेति । प्रयत्नवदात्मसंयोगजन्यकर्मणैवेत्यर्थः वेगोजन्यते इति । पूर्वं तदधिकरणे वेगाभावेन तादृशवेगस्य वेगजन्यत्वाऽसंभवादिति भावः ।

वेगादेव पूर्वकमणोनाशः, उत्तरकर्मणश्चोत्पत्तिर्जायते इत्याह । तेनचेति । तादृशवेगेनैवेत्यर्थः । पूर्वकर्मनाशः । स्वजनककर्मनाशः । ततः—तादृशनाशानन्तरं ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्थितिस्थापकेति। अतीन्द्रिय इति। आकृष्टशाखादीनां परित्यागे पुनर्गमनस्य स्थितिस्थापकसाध्यत्वात्। केचिदिति। चतुर्ष्विति क्षित्यादिषु स्थितिस्थापकं केचिन्मन्यन्ते तदप्रमाणमिति भावः। असौ स्थितिस्थापकः। क्वचित् आकृष्टशाखादौ ॥१५६॥ भावनाख्य इति। तस्य संस्कारस्य।

आकृष्ट शाखा आदि को छोड़ देने के पश्चात् उन शाखाओं का जो फिर से स्वस्थान पर चला जाना—वह स्थितिस्थापकसंस्कार साध्य है अर्थात् उस पुनर्गमन का कारण स्थिति-स्थापक संस्कार है। कोई लोग कहते हैं कि स्थिति स्थापक संस्कार पृथिवी-जल-तेज-वायु—इन चारों में रहता है, परन्तु वह मत सर्वथा अप्रमाण है ॥१५६॥

का अर्थ—भावना नामक संस्कार जीवात्मा में रहने वाला तथा अतीन्द्रिय है। और उपेक्षानात्मक अर्थात् अपेक्षात्मक निश्चय उस संस्कार का कारण होता है।

उत्तरकर्मचेति। उभयत्र जन्यते इत्यनुषरंजनीयम्। एवमग्रेवीति। द्वितीयादिकर्मणा पूर्ववेगनाशस्ततोवेगान्तरोत्पत्तिश्च तुल्यन्यायेन स्वीकार्येति भावः। ननु वेगस्य कर्मनाशकत्वे सानाभाव इत्यत आह। विना च वेगमिति। अस्य कर्मनाशोन स्यादित्युत्तरेणान्वयः। उत्तरसंयोगस्य आश्रयनाशस्य वा नाशकतया तयोरभावा दित्याशयः। ननु कर्मणो नाशाभावे का क्षतिरित्यत आह। कर्मोत्पत्तिश्च न स्यादिति। अत्र हेतुः कर्मणः कर्मप्रतिबन्धकत्वादिति। द्वितीयं वेगजवेगमुदा-हरति। यत्रेति। अस्यवेगोजन्यते इत्यत्र वेगेऽन्वयः। १५८ स्थिति स्थापकत्वं च पूर्वदेशसंयोगजनकक्रियाजनकतावच्छेदकतया सिद्धोजातिविशेषः, तद्वत्वं—वेग-भावनान्यसंस्कारत्वं वा स्थिति स्थापकलक्षणम् पुनर्गमनस्येति। पुनः पूर्वदेशसंयोग-जनकक्रियाया इत्यर्थः स्थितिस्थापकसाध्यत्वादिति। वेगस्य तूत्तरदेशसंयोग-जनकक्रियाजनकत्वम्, न तु यथापूर्वसंयोगजनकक्रियाजनकत्वमिति न वेगेन स्थिति स्थापकस्यान्यथासिद्धत्वमिति भावः। मूले—अतीन्द्रिय इति। क्रियाविशेषजनकः—स्वजन्यक्रियानाश्य इत्यपि बोध्यम्। १५९। अनुभवनन्यत्वे सति स्मृतिहेतुत्वं भावना-त्वम्। आत्मनि अति व्याप्तिवारणाय सत्यन्तम्। अनुभवध्वंसेऽतिव्याप्तिवारणाय विशेष्यदलम्। न च दण्डीपुरुष इति विशिष्ट प्रत्यक्षेऽतिव्याप्तिः, तस्यापिस्वाव्यव-हितपूर्वक्षणोत्पन्नोयोदण्डज्ञानात्मकोऽनुभवः "विशेषणज्ञानविधया" तज्जन्यत्वात् जनिष्यमाणे दण्डीपुरुष इत्याकारकस्मरणे हेतुत्वाच्चेति वाच्यम् अनुभवत्वावच्छिन्न-कारणतानिरूपितकार्यताश्रयत्वस्य सत्यन्तार्थत्वात्। एवं सति स्मृतावतिव्याप्ति-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भावनाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रियः ।
उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत् ॥१६०॥
स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते ।

उपेक्षात्मकज्ञानात् संस्कारानुत्पत्तेः उपेक्षानात्मक इत्युक्तम् । तत्संशयात्तस्यानुत्पत्तेर्निश्चय इत्युक्तम् । तेनोपेक्षान्यनिश्चयत्वेन संस्कारं प्रति हेतुतेति भावः ॥१६०॥

ननु स्मरणं प्रति उपेक्षान्यनिश्चयत्वेन हेतुत्वं, तेनोपेक्षादिस्थले न स्मरणम् । इत्थं च संस्कारं प्रति ज्ञानत्वेनैव हेतुताऽस्तु इति चेन्न । विनिगमनाविरहेणापि संस्कारं प्रति उपेक्षान्यनिश्चयत्वेन हेतुतायाः सिद्धत्वात्, किं चोपेक्षास्थले संस्कारकल्पनायाः गुरुत्वात् संस्कारं प्रति उपेक्षान्यनिश्चयत्वेन हेतुतायाः सिद्धत्वात् । असौ-संस्कारः । तत्र प्रमाणं दर्शयति । स्मरणे इति । यतः स्मरणं प्रत्यभिज्ञानं च जनयति अतः संस्कारः कल्प्यते ।

उपेक्षात्मक ज्ञान से भावना संस्कार की उत्पत्ति नहीं होती अतः उपेक्षानात्मक कहा। उपेक्षानात्मकसंशय से भी संस्कार की उत्पत्ति नहीं होती है अतः निश्चय पद दिया। इससे सिद्ध है कि भावनासंस्कार के प्रति उपेक्षान्यनिश्चय कारण है ॥१६०॥

प्रश्न—स्मरण के प्रति उपेक्षान्य निश्चय कारण है इसी से उपेक्षास्थल में स्मरण नहीं होता है। परन्तु इसी प्रकार संस्कार के प्रति उपेक्षान्यज्ञान ही को कारण क्यों न मान लिया जाय ?

उत्तर—उपेक्षान्यनिश्चय को संस्कार के प्रति उपेक्षान्यज्ञानत्वेनरूपेण ही कारण मानें और उपेक्षान्यनिश्चयत्वेनरूपेण न मानें इसमें आपके यहाँ कोई विनिगमना (युक्ति) न होने के नाते संस्कार के प्रति भी उपेक्षान्यनिश्चयत्वरूप से कारणता माननी उचित है। दूसरी बात यह है कि—संस्कार के प्रति उपेक्षान्यनिश्चय को तादृशनिश्चयत्वेनरूपेण कारण न मानकर यदि उपेक्षान्यज्ञानत्वरूप से कारण मानते हैं तो तादृशज्ञानत्व संशयादिसाधारण अपेक्षाज्ञान में भी है अतः संशयादिसाधारण अपेक्षाज्ञान से भी संस्कार होना चाहिये—इस वास्ते संस्कार कल्पनाप्रयुक्त गुरुत्व (गौरव) होने के नाते उपेक्षान्यनिश्चयत्वरूप से ही संस्कार के प्रति कारणता उचित है।

वारणाय विशेष्यदलसार्थक्यात् । तत्संशयादिति । उपेक्षानात्मकसंशयादित्यर्थः । तस्य—संस्कारस्य । तेन—तादृशज्ञानात्—तत्संशयाच्च संस्कारानुत्पत्त्या ॥१६०॥

तेन उपेक्षान्यनिश्चयत्वेन हेतुत्वेन । इत्थंचेति । स्मरणं प्रति उपेक्षान्यनिश्चयत्वेन हेतुत्वं स्वीकृत्योपेक्षात्मकज्ञानात्स्मृतिवारणे चेत्यर्थः । ज्ञानत्वेनैवेति । एवकारेण उपेक्षान्यत्वस्य निश्चयत्वस्य च व्यावृत्तिः । हेतुताऽस्तु इति ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विना व्यापारं पूर्वानुभवस्य स्मरणादिजननाऽसामर्थ्यात्, स्वस्वव्यापारान्यतराभावे कारणत्वाऽसंभवात्। न च प्रत्यभिज्ञां प्रति तत्तत्संस्कारस्य हेतुत्वे प्रत्यभिज्ञायाः संस्कारजन्यत्वेन स्मृतित्वापत्तिरिति वाच्यम्। अप्रयोजकत्वात्। परे तु अनुद्बुद्धसंस्कारात्प्रत्यभिज्ञानुदयात् उद्बुद्धसंस्कारस्य हेतुत्वापेक्षया तत्तत्स्मरणस्यैव प्रत्यभिज्ञां प्रति हेतुत्वं कल्प्यते इत्याहुः।

भावनानामक संस्कार—असौ संस्कार—भावनानामक संस्कार में प्रमाण देते हैं कि—स्मरण तथा प्रत्याभिज्ञाज्ञान का यह भावनासंस्कार उत्पादन करता है अतः इसका स्वीकार आवश्यक है। क्योंकि बिना व्यापार के पूर्वानुभव-स्मरण आदि ज्ञानों के जनन में असमर्थ होने के नाते कार्योत्पत्ति के पूर्व में कारण अथवा कारणव्यापार इस अन्यतर के अभाव होने पर कारण नहीं हो सकता है।

प्रश्न—प्रत्यभिज्ञा के प्रति उन-उन संस्कारों को कारण मानने पर प्रत्यभिज्ञा को भी संस्कारजन्य होने के कारण स्मृतिरूप ही मान लिया जाय?

उत्तर—यह ठीक नहीं–कारण कि संस्कारजन्यत्व स्मृतित्व का प्रयोजक नहीं है। गंगेशोपाध्याय का मत है कि अनुद्बुद्धसंस्कार से प्रत्यभिज्ञा नहीं होती है, और उद्बुद्धसंस्कार को कारण मानने की अपेक्षया तो तत्तत्स्मरण को ही प्रत्यभिज्ञा के प्रति कारण मानना उचित है। इसलिये प्रत्यभिज्ञा को संस्कारजन्य न होने के नाते स्मृतिरूप नहीं माना जा सकता है।

लाघवादिति शेषः। वस्तुतः संस्कारं प्रति उपेक्षान्यनिश्चयत्वेन हेतुत्वे एव विनिगमकमस्तीत्याह। **किंचेति**। स्मृतिं प्रत्येवोपेक्षान्यनिश्चयत्वेन हेतुत्वे इत्यादिः। संस्कारं प्रति केवल ज्ञानत्वेन हेतुत्वे इति यावत्। **उपेक्षास्थले**। उपेक्षाविशिष्टात्मनि। **संस्कारकल्पनाया गुरुत्वादिति**। संस्कारकल्पनाप्रयुक्तगौरवादित्यर्थः। **सिद्धत्वादिति**। आवश्यकत्वादित्यर्थः। भावनायां प्रमाणं दर्शयति। **मूले स्मरणे इत्यादि**। उद्देश्यवाचकपदस्य प्रागपेक्षितत्वात्पश्चान्निर्दिष्टस्यापि तस्य प्रथमं अनुसन्धानं करोति। **असौ संस्कार इति**। तत्र-संस्कारे। **यत इति**। **अनुभवः इत्यादिः**। यादृशव्यापारसहकारादेवेत्यर्थः। **अतः**। तादृशव्यापारसम्पत्यर्थम्। **संस्कारः** भावनाख्यसंस्कारः। **कल्प्यते**। इति। अनुमीयते इत्यर्थः। अनुमितिश्च अनुभवः फलकालपर्यन्तस्थायिस्वजन्यफलानुकूलव्यापारवान् तावत्कालमस्थायित्वे सति जनकत्वाद् यागवदित्याकारिका। ननु अनुभवो यथा स्वध्वंसजनने व्यापारं नाऽपेक्षते तथा स्वजन्यस्मृतावपि साक्षाद्धेतुरस्तु किं संस्कारकल्पनेनेत्यत आह। **विना व्यापारमिति**। **पूर्वानुभवस्येति**। अत्रानुभवसामान्यस्येत्येव सम्यक् शेषभागस्यवैयर्थ्यात्। **स्मरणादीति**। आदिना प्रत्यभिज्ञासंग्रहः। तथा च संस्काररूपव्यापारानङ्गीकारे कालान्तरभाविस्मृत्यव्यवहितपूर्ववर्त्तित्वाभावेना अनु-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

धर्माऽधर्मावदृष्टं स्याद् धर्मः स्वर्गादिसाधनम् ॥१६१॥
गंगास्नानादियागादिव्यापारः स तु कीर्तितः ।

अदृष्टं निरूपयति । धर्मेति । स्वर्गादीति । स्वर्गादिसकलसुखानां स्वर्गसाधनीभूतशरीरादीनां च साधनं धर्म इत्यर्थः । तत्र प्रमाणं दर्शयितु माह । यागादीति । यागादिव्यापारतया धर्मः कल्प्यते । अन्यथा यागादीनां चिरविनष्टतया निर्व्यापारतया च कालान्तरभाविस्वर्गजनकत्वं न स्यात् । तदुक्तमाचार्यैः "चिरध्वस्तं फलायालं न कर्मातिशयं विनेति ॥१६१॥

अदृष्टनिरूपण—धर्माधर्माविति । स्वर्गादि समस्तसुखों का स्वर्गसाधनीभूत शरीर आदि का साधन धर्म ही है । उस धर्म में प्रमाण बतलाते हैं कि—यागादि के व्यापाररूप से धर्म की कल्पना की जाती है । अन्यथा अर्थात् मध्य में यागादि का व्यापार यदि धर्म नहीं माना जायगा तो–चिरकाल से विनष्ट हुवे यागादि निर्व्यापार होने के नाते कालान्तर में होनेवाले स्वर्ग के जनक न हो सकेंगे । यही आचार्यचरण ने भी कहा है कि—चिरकाल से ध्वस्त यागादि कर्म अतिशय (व्यापार) के बिना फल के जनन में समर्थ नहीं हो सकता है ।

भवस्य स्मृतिहेतुत्वानुपपत्तिः । न चेष्टापत्तिः । अननुभूतस्यापि स्मरणापत्तेः । ननु तथापि अनुभवस्य स्मृत्यव्यवहितपूर्ववर्तित्वाभावात्तद्दोषतादवस्थ्यमित्यत आह । स्वस्वव्यापारान्यतराभावे इति । कारणत्वाऽसंभवादिति । कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्याधिकरणवृत्त्यत्यन्ताभावा प्रतियोगि स्वस्वव्यापारान्यतरकत्वस्यैव कारणतापदार्थत्वात्, तस्य चाऽनुभवे अक्षतत्वादिति भावः । न चाऽनुभवध्वंस एव व्यापारोऽस्तु किं संस्कारकल्पनेनेति वाच्यम् । प्रतियोगिध्वंसयोरेकत्राऽजनकत्वात् । अनुभवस्य स्मृतिं प्रति प्रतिबन्धकत्वापत्तेश्च कारणीभूताभावप्रतियोगित्वस्यैव प्रतिबन्धकतापदार्थत्वात् । वस्तुतो वक्ष्यमाणाऽपूर्वसाधकयुक्त्या संस्कारसिद्धिनिराबाधैवेति ध्येयम् ।

अप्रयोजकत्वादिति । संस्कारजन्यत्वस्य स्मृतित्वाप्रयोजकत्वादित्यर्थः । तथा च संस्कारजन्यत्वं न स्मृतित्वप्रयोजकं तद्ध्वंसस्यापि स्मृतित्वापत्तेः । किन्तु वहिरिन्द्रियाजन्यत्वे सति संस्कारजन्यत्वविशिष्टज्ञानत्वम्, तस्य च प्रत्यभिज्ञायामसत्वान्नोक्तापत्तिरित्याशय । मणिकृन्मतं दर्शयति । परेतु इति । तत्तत्स्मरणस्यैवेति । एवकारेणोद्बुद्धसंस्कारस्य व्यावृत्तिः । कल्प्यते । इति । उद्बुद्धसंस्कारत्वेन हेतुत्वापेक्षया स्मृतित्वेन हेतुत्वे लाघवादित्याशयः । अत्र प्रत्यभिज्ञापूर्वं स्मरणं न संभवति प्रतिबन्धकीभूतलौकिकप्रत्यक्षसामग्र्याःसत्वात्, स्मृत्युत्तरकालीनलौकिकप्रत्यक्षसामग्रीजनितप्रत्यभिज्ञायां स्मरणस्य हेतुत्वं न संभवति प्रत्यभिज्ञाकाले स्मरणस्य नाशादित्यस्वरस आहुरित्यनेन सूचितः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ननु यागध्वंस एव व्यापारः स्यात्। न च प्रतियोगितद्ध्वंसयोरेकत्राऽजनकत्वम्। सर्वत्र तथात्वे मानाभावात्। न च त्वन्मते फलानन्त्यम्, मन्मते चरमफलस्याऽपूर्वनाशकत्वान्न तथात्वमिति वाच्यम्। कालविशेषस्य

प्रश्न—धर्म को मध्यवर्ती व्यापार मानने की अपेक्षया यागध्वंस को ही याग का व्यापार मान लिया जाय। यदि यह कहा जाय कि प्रतियोगी (याग) और तद्ध्वंस को एकत्र (स्वर्ग के प्रति) जनकत्व ही अनुपपन्न है—तो यह कथन भी ठीक नहीं है क्योंकि सर्वत्र तथात्व में अर्थात् प्रतियोगी तथा तद्ध्वंस को एकत्राजनकत्व में कोई प्रमाण नहीं है। [अर्थात् प्रतियोगी और प्रतियोगी का ध्वंस ये दोनों एकत्रकारण नहीं हो सकते हैं—इसमें कोई प्रमाण नहीं है] यदि यह कहें कि—यागध्वंस को व्यापार माननेवाले तुम्हारे मत में स्वर्गात्मकफल का आनन्त्य दोष है। (क्योंकि यागध्वंसात्मकव्यापार सर्वदा स्थायी रहेगा—उसका तो फिर ध्वंस होना नहीं

धर्मत्वजातिमत्त्वं धर्मस्य लक्षणम्। धर्मत्वं च विहितकर्ममात्रवृत्ति व्यापारानवच्छिन्नकारणतानिरूपितकार्यतावच्छेदकतया सुखत्वावच्छिन्नकार्यतानिरूपित व्यापारानवच्छिन्नकारणतावच्छेदकतया वा सिद्धोजातिविशेषः। **यागादिव्यापारतेति**। यागादीत्यादिना होमादेः परिग्रहः। अत्र कात्यायनसूत्रम्। **यजति जुहोतिनां कोविशेषः।** अस्यार्थः—यजतीनां—यागानां जुहोतीनां—होमानां कोविशेष इति-प्रश्ने **तिष्ठद्धोमाः वषट्कारप्रदानाः याज्यापुरोनुवाक्यावन्तोयजतयः** इति सूत्रम्। तिष्ठता होमो येषांते तिष्ठद्धोमाः—वषट्कारेण प्रदानं येषु ते वषट्कार-प्रदानाः—तथा याज्यावन्तः पुरोनुवाक्यावन्तश्च ये ते यजतयः यागनामधेया उच्यन्ते इति तदर्थः। **उपविष्टहोमाः स्वाहाकारप्रदाना जुहोतयः** इति सूत्रम्। उपविष्टेन कर्त्रा होमोयेषु ते उपविष्टहोमाः, स्वाहाकारेण प्रदानं येषु ते स्वाहाकार प्रदानाः, ते जुहोतयः होमपदवाच्या इति तदर्थः। तेषां व्यापारतयेत्यर्थः **धर्मः कल्प्यते** इति। धर्मः अवश्यं स्वीकार्य इत्यर्थः। ननु यागादिरेव स्वर्गादि हेतुस्तु कृतं तज्जन्यादृष्टेनेत्यत आह। **अन्यथेति**। धर्मानंगीकारे इत्यर्थः। **चिरविनष्टतया**। चिरध्वस्ततया। चिरविनष्टस्याप्यनुभवस्य स्मृतिजनकत्वादाह। **निर्व्यारतयेति**। अनुभवस्य संस्काररूपव्यापारवत्वादित्याशयः। तथा च यागादिकं फलकालपर्यन्तस्थायिस्वजन्यफलानुकूलव्यापारवत् तावत्कालमस्थायित्वे सति जनकत्वादनुभववत् इति प्रयोगः। न चाऽप्रयोजनकत्वम्। यागोयदि चिरध्वस्तत्वे सति सव्यापारो न स्यात्तदा स्वर्गकारणं न स्याद् घटवदित्यनुकूलत्तर्कसत्वात्। **चिरध्वस्तमिति**। चिरपदं वर्तमाने क्रमनिरासार्थम्। **चिरध्वस्तं**—यागादिकर्म—**कर्मातिशयं विना**—कर्मजन्यातिशयं "अदृष्टं" विना—**फलाय** स्वर्गादिजननाय—**नालं**—न समर्थमित्यर्थः। चिरध्वस्तकारणस्य व्यापारद्वारैव हेतुत्वम्, यथाऽनुभवस्य संस्कार द्वारा स्मृतौ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सहकारित्वादित्यत आह। गंगास्नानादीति। गंगास्नानस्य हि स्वर्गजनकत्वेऽनन्तानां जलसंयोगध्वंसानां व्यापारत्वमपेक्ष्यैकमपूर्वमेव कल्प्यते लाघवादिति भावः।

है कारण कि ध्वंस का ध्वंस अप्रसिद्धवस्तु हैं—अतः उस यागध्वंसात्मकव्यापार से हमेशा एक के बाद दूसरा, दूसरे के बाद तीसरा इत्यादि रूप से नये-नये स्वर्ग पैदा होते रहा करेंगे, इस प्रकार फलानन्त्यदोष हो जायेगा) और मेरे मत में अर्थात् धर्माधर्मात्मक अपूर्ववादी के मत में चरमफल (स्वर्ग) से धर्मात्मक अपूर्व का नाश हो जाने के नाते एक फल के बाद दूसरा-दूसरे के बाद तीसरा-यह परम्परा नहीं रह जाती है, क्योंकि उसका कारण अपूर्वात्मक व्यापार ही नहीं है—परन्तु यह कहना भी युक्तियुक्त नहीं है—क्योंकि यागध्वंस को व्यापारपक्ष में फलानन्त्यदोष कालविशेष को यागध्वंस का सहकारी कारण मानकर वारित हो सकता है।

उत्तर—ध्वंस व्यापारपक्ष में स्वर्ग कारणीभूत जो अनन्तजलसंयोगस्वरूप गंगास्नान-उसके अनन्त ध्वंसों को व्यापार मानने की अपेक्षया एक धर्मस्वरूप अपूर्व को ही व्यापारत्व कल्पना करने में लाघव है।

अयं भावः—यागादौ प्रवृत्ति र्न निष्फला प्रेक्षावत्प्रवृत्तित्वात्। एवं यागादौ प्रवृत्तिः न दुःखमात्रफलिका इष्टसाधनताज्ञानजन्यत्वात्। तथा हि—इष्टसाधनताज्ञानं प्रवृत्तौ हेतुः, इष्टं च सुखं-दुःखाभावश्च, न तु दुःखम्। एवं च सुखसाधनताज्ञानादेव प्रवृत्तिर्वाच्या, तथा च न तस्याः दुःखमात्रफलकत्वम्। दुःखमात्रसाधनत्वे प्रवृत्तिरेव न स्यादिति भावः। एवं यागादिः न सम्मान-ख्याति-धनलाभफलकः तन्निरपेक्षैरपि विविक्ते गिरिगुहाऽरण्यादौ तदाचरणात्। किं चाऽदृष्टाऽस्वीकारे तपस्विनां दृष्टधनादिलाभोपि न संभवति, अदृष्टार्थमेव तपस्विभ्योऽन्यैर्धनादिदानात्। अन्यथा प्राणेभ्योपि प्रियस्य धनस्य दानानुपपत्तेः। न च केनचित्प्रतारकेण स्वर्गादिफलजनकतया यागादिकं प्रकल्प्य स्वयमनुष्ठाय प्रतारितोलोकः प्रवर्तते इति वाच्यम्। क एवं बुद्धिमान् यः परप्रतारणार्थं नानाविधक्लेशैरात्मानमवसादयेत्। तथा च यागादिः स्वर्गजनकः तत्फलोद्देशेन प्रेक्षावत्प्रवृत्तिविषयत्वात् तृप्त्युद्देशेन प्रेक्षावत्प्रवृत्तिविषयभोजनवत्। अथ वा यागादिः फलजनकः प्रेक्षावत्प्रवृत्तिविषयत्वाद् भोजनवदित्यादिप्रयोगाः बोध्याः तदुक्तम्।

विफला विश्ववृत्तिर्नो न दुःखैक फलापि वा।
दृष्टलाभफलावापि विप्रलंभोपि[1] नेदृश इति ॥१६१॥

यागध्वंस एवेति। एवकारेणाऽदृष्टस्य व्यवच्छेदः। व्यापारः स्यादिति। तथा च क्लृप्तेनैव निर्वाहे किमदृष्टेनेति भावः। प्रतियोगितद्ध्वंसयोरिति। प्रतियोगितदभावयोरित्यर्थः। एकत्राऽजनकत्वमिति। तथा च स्वर्गो न यागध्वंस-

1 विप्रलंभः प्रतारणा।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कर्मनाशाजलस्पर्शादिना नाश्यस्त्वसौ मतः ॥१६२॥

ननु ध्वंसोपि न व्यापारोऽस्तु । न च निर्व्यापारस्य चिरध्वस्तस्य कथं कारणत्वमिति वाच्यम् । अनन्यथासिद्धनियतपूर्ववर्त्तित्वस्य तत्रापि सत्वात् । अव्यवहितपूर्ववर्त्तित्वं हि चक्षुःसंयोगादेः कारणत्वे दृष्टं न तु सर्वत्र कार्यकालवृत्तित्वमिव समवायिकारणस्य कारणत्वे इत्यत आह । कर्मनाशेति । यदि हि अपूर्वं न स्यात् तदा कर्मनाशाजलस्पर्शादिना

प्रश्न—ध्वंस व्यापार न हो परन्तु निर्व्यापार एवं चिरध्वस्त याग स्वर्ग का कारण कैसे हो सकता है ?

उत्तर—अनन्यथासिद्धनियत पूर्ववर्त्तित्वरूपकारणत्व याग तथा गंगास्नान आदि में भी है, अतः उनमें स्वर्गकारणत्व की अनुपपत्ति नहीं हुवी । [यदि अव्यवहितपूर्ववर्तित्वरूपकारणत्व होता तो अनुपपत्ति होती, क्योंकि यागादि स्वर्ग के अव्यवहितपूर्ववर्त्ती नहीं हैं] अव्यवहित-पूर्ववर्त्तित्वरूपकारणत्व चक्षुःसंयोग आदि को कारण मानने पर ही उत्पन्न हो सकता है न कि सर्वत्र । जैसे समवायिकारण की कारणता में कार्यकालवृत्तित्व माना जाता है, ऐसे ही चक्षुः-संयोग आदि की कारणता में अव्यवहितपूर्ववर्त्तित्व का नियम मान्य है । इससे निर्व्यापार याग

जन्यः यागजन्यत्वात् घटजन्यं जलाहरणं न घटध्वंसजन्यमिति दृष्टं, तथा चाऽयमिति । **तथात्वे** । ध्वंसप्रतियोगिनोरेकत्रजनकत्वाभावे । **मानाभावादिति** । प्राचामते दुरितस्यैव दुरितध्वंस-तत्प्रागभावयोरपि दुरितात्यन्ताभावप्रतियोगितया दुरित-संसर्गाभावत्वेन त्रयाणामपि समाप्तिहेतुत्वात्तादृशनियमे मानाभावादिति भावः । वस्तुतो ध्वंसस्य कारणत्वे यागस्य प्रतिबन्धकत्वापत्तिः, कारणीभूताभावप्रतियोगिन एव तत्वात् । अत एव "**ध्वंसत्वेनापि हेतुत्वे प्रतियोगी न कारणमिति** व्याप्तिरेव व्यभिचाराभावात्" इति शब्दमणिटिप्पण्यां रुचिदत्तेनोक्तमिति विभावनीयम् । ध्वंसस्याविनाशित्वात्स्वर्गधारापत्तिः स्वर्गोत्पादानन्तरमपि ध्वंसरूपव्यापारस्य सत्वादित्याशंकते । **नचेति** । **न तथात्वम्**—न फलानन्त्यम् । ध्वंसस्याविनाशित्वेपि कालादिरूपसहकारिकारणाभावादेव फलानन्त्यप्रसंगाभावादित्याशयेन समाधत्ते । **कालविशेषस्येति** । गंगास्नानस्य स्वर्गजनकत्वे स्नानध्वंसस्य व्यापारत्वं वाच्यं, स्नानं च सर्वाङ्गीणजलसंयोगः, तेषां चानन्त्यादनन्तध्वंसानां हेतुत्वकल्पने गौरव-मित्याह । **स्वर्गजनकत्वे इति** । एवं प्रतिज्ञासंकल्पमारभ्य कर्मापवर्गसमिदाधान-पर्यन्तस्य कर्मकलापात्मकस्य यागस्य ध्वंसानामानन्त्यादित्यपि बोध्यम् । न चात्र क्रियाणां युगपद्विनाशः, येनैकोध्वंसः स्यात् । न च चरमक्रियाध्वंसस्तथा, पूर्वक्रियाणा-मनर्थकत्वापत्तेः । तन्मात्रानुष्ठानेपि फलापत्तेश्च ।

ध्वंसोपि न व्यापारोस्त्विति । यागादेरित्यादिः । निरुक्तगौरवादितिभावः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नाश्यत्वं धर्मस्य न स्यात् । न हि तेन यागादेर्नाशः प्रतिबन्धो वा कर्तुं शक्यते, तस्य पूर्वमेव वृत्तत्वादिति भावः ।

एतेन देवताप्रीतेरेव फलत्वमित्यपास्तम् । गंगास्नानादौ सर्वत्र देवताप्रीतेरसंभवाच्च देवतायाश्चेतनत्वेपि तत्प्रीतेरनुद्देश्यत्वात् । प्रीतेः सुख-

को ही स्वर्ग का कारण मानना चाहिये यह सिद्ध हुवा, इसका उत्तर "विश्वनाथपञ्चानन" ने "कर्मनाशाजलस्पर्शादिना" इत्यादि ग्रन्थ से दिया ।

यदि अपूर्व न हो तो कर्मनाशा नदी के जल के स्पर्श से धर्म का नाश नहीं होना चाहिये । कर्मनाशा जलस्पर्श से याग का नाश अथवा प्रतिबन्ध (याग की अनुत्पत्ति) नहीं हो सकती है, क्योंकि याग पहिले ही उत्पन्न होकर नष्ट भी हो चुका है । इससे किसी मीमांसक का जो यह मत था कि याग अथवा गंगास्नान से देवता लोग प्रसन्न होते हैं अतः देवताप्रीति ही यागादि का फल है, धर्म का स्वीकार व्यर्थ है वह भी मत अपास्त (खण्डित) हो गया।

चिरध्वस्तस्येति । यागादेरितिशेषः । कथं कारणत्वमिति कार्याव्यवहितपूर्ववर्तित्वाभावादिति भावः । नियतपूर्ववर्त्तित्वस्येति । नियतपूर्ववर्त्तित्वमात्रस्येत्यर्थः। तत्रापि । निर्व्यापारयागादावपि । अव्यवहितपूर्वत्वघटितकारणत्वस्यात्राभावेपि न क्षतिरित्याह । अव्यवहितपूर्वत्वंहीति । चक्षुःसंयोगादेरिति । आदिना त्वक्संयोगादेः परिग्रहः । कारणत्वे इति । घटकत्व सप्तम्यर्थः । कारणत्वघटकमित्यर्थः । तथा चाऽव्यवहितपूर्वत्वं चक्षुःसंयोगादिरूपव्यापारनिष्ठकारणत्वघटकमेवेति संमुदितार्थः । एवकारव्यवच्छेद्यंस्पष्टयति । न तु सर्वत्रेति । निर्व्यापारकारणनिष्ठकारणत्वघटकं नेत्यर्थः । कार्यकालवृत्तित्वमिवेति । कारणत्वे इति। सप्तम्यर्थोघटकत्वम् । तथा च कार्यकालवृत्तित्वं यथा नियमेन समवायिकारणत्वघटकं न तु कारणत्वमात्रघटकं प्रागभावादौ तदभावात् तथा प्रकृतेपीति भावः। कार्यकालवृत्तित्वघटककारणत्वं च कार्याधिकरणे कार्याव्यवहितकाल-कार्यकालान्यतरावच्छिन्नवृत्तिकाऽत्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्वं बोध्यम् । अपूर्वं न स्यादिति । धर्मो न स्यादित्यर्थः । तेन नैयायिकैः पराभिमताऽपूर्वानङ्गीकारेपि न क्षतिः । कर्मनाशाजलस्पर्शादिनेति । कर्मनाशानामकनदीजलस्पर्शादिनेत्यर्थः। आदिना—

कर्मनाशाजलस्पर्शात् करतोयातिलंघनात् ।
गण्डकीबाहुतरणात् धर्मः क्षरति कीर्तनात् ॥

इति वचनसिद्धकरतोयाविलंघनादेः परिग्रहः । धर्मस्य न स्यादिति । तदनङ्गीकारादिति भावः । यागादिध्वंसस्य चाऽविनाशित्वात् । तेन । कर्मनाशा-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अधर्मो नरकादीनां हेतुर्निन्दितकर्मजः।
प्रायश्चित्तादिनाश्योऽसौ जीववृत्ती त्विमौ गुणौ ॥१६३॥
इमौ तु वासनाजन्यौ ज्ञानादपि विनश्यतः।

रूपत्वेन विष्णुप्रीत्यादौ तदसंभवात् जन्यसुखस्य तत्राभावात्, तेन विष्णुप्रीति जन्यत्वेन पराभिमत स्वर्गादिरेव विष्णुप्रीतिशब्देन लभ्यते ॥१६२॥

अधर्मेति। नरकादिसकलदुःखानां नारकीयशरीरादीनां च साधन मधर्म इत्यर्थः। तत्र प्रमाणमाह। प्रायश्चितेति। यदिह्यधर्मो न स्यात्तदा प्रायश्चित्तादिना नाश्यत्वं न स्यात्, न हि तेन ब्रह्महननादीनां नाशः

क्योंकि धर्म को यदि नहीं माना जायगा तो कर्मनाशा के जल से नाश किसका होगा। दूसरी बात यह है कि गंगास्नान एवं याग आदि का फल देवताप्रीति होना सर्वत्र संभव नहीं है। क्योंकि देवता के चेतनत्वपक्ष में भी देवताप्रीति, याग अथवा गंगास्नानादि का उद्देश्य ही नहीं नहीं है। कारण कि प्रीति सुखस्वरूप होने के नाते विष्णु की प्रीति में उद्देश्यता ही नहीं है– क्योंकि विष्णु में जन्यसुखादि का अभाव है। अतः विष्णुप्रीति से जन्य जो पराभिमत (मीमांसकाभिमत) स्वर्गादि हैं उनका ही लक्षणया विष्णुप्रीति शब्द से बोध होता है ॥१६२॥

जलस्पर्शादिना। तस्य। यागादेः। पूर्वमेव। कर्मनाशाजलस्पर्शादिपूर्वमेव। वृत्तत्वादिति। उत्पन्नत्वाद्विनष्टत्वाच्चेत्यर्थः। एतेन। कर्मनाशाजलस्पर्शादिनाऽनाश्यत्वेन। अपास्तमिति। विष्णुप्रीतेरविनाशादिति भावः। दोषान्तरमाह। गङ्गास्नानादाविति। १६२ अधर्मेति। अधर्मत्वजातिमत्वमधर्मस्य लक्षणम्। अधर्मत्वं तु निषिद्धकर्ममात्रवृत्तिव्यापारानवच्छिन्नकारणतानिरूपितकार्यतावच्छेदकतया दुःखत्वावच्छिन्नकार्यतानिरूपितव्यापारानवच्छिन्नकारणतावच्छेदकतया वा सिद्धो जातिविशेषः। निषिद्धत्वं चाऽकर्तव्यतया श्रुतिविहितत्वम्। अधर्मो न स्यादिति। अधर्मो "निषिद्धकर्मातिरिक्त" एव न स्यादित्यर्थः। प्रायश्चित्तादिनेति। आदिना भोग तत्वज्ञानयोः परिग्रहः। तेन। प्रायश्चित्तेन। तस्य। ब्रह्महननादेः। पूर्वमेव। प्रायश्चित्तात्पूर्वमेव। प्रायश्चितं च पापक्षयमात्रसाधनम्। तत्वं च पापक्षयेतराऽसाधनत्वे सति पापक्षयसाधनत्वम्। पापक्षयस्वर्गोभयसाधनीभूत गङ्गास्नानाऽश्वमेधादावतिव्याप्तिवारणाय सत्यन्तम्। परिमाण्डल्यवारणाय विशेष्यदलम्। अधिकं वेदान्तसारे गङ्गायां द्रष्टव्यम्। धर्माऽधर्माऽभावादिति। ईश्वरे धर्माऽधर्मोत्पत्त्यभावादित्यर्थः। समवायेन विहितनिषिद्धक्रियां प्रति अवच्छेदकतासम्बन्धेन शरीरस्य हेतुतया ईश्वरेशरीराभावात्, तत्समवेतक्रियाया अभावाच्च न धर्माधर्मोत्पत्तिसंभव इति भावः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रतिबन्धो वा कर्तुं शक्यते, तस्य पूर्वमेव विनष्टत्वादिति भावः। जीवेति। ईश्वरस्य धर्माधर्माभावादिति भावः ॥१६३॥

इमौ धर्माधर्मौ। वासनेति। अतो ज्ञानिना कृते अपि सुकृतदुष्कृत-कर्मणी न फलायाऽलमिति भावः। ज्ञानादपीति। अपिना भोगपरिग्रहः। ननु तत्त्वज्ञानस्य कथं धर्माधर्मनाशकत्वम्।

नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपीति वचनविरोधात्। इत्थं च तत्त्व-ज्ञानिनां झटिति कायव्यूहेन सकलकर्मणां भोगेन क्षय इति चेन्न। तत्र

अधर्म इति। नरकादि सकलदुःखों का तथा नारकीय शरीरादि का साधन अधर्म होता है। अधर्म में प्रमाण कहते हैं कि–प्रायश्चित्त इति। यदि अधर्म न हो तो प्रायश्चित्त से नाश कौन होगा। ब्रह्महननादि का नाश अथवा प्रतिबन्ध प्रायश्चित्त से नहीं हो सकता है, क्योंकि वह पहिले ही विनष्ट हो चुका है। धर्माधर्म ईश्वर में नहीं है।

धर्माधर्म मिथ्याज्ञानजन्य वासना से पैदा होनेवाले हैं, और तत्त्वज्ञान से इनका नाश हो जाता है। इसलिये ज्ञानी पुरुष के द्वारा किये हुवे जो अच्छे-बुरे कर्म हैं उनसे धर्माधर्म फल उत्पन्न नहीं होते हैं।

प्रश्न—तत्त्वज्ञान धर्माधर्म का नाशक कैसे हो सकता है, क्योंकि "नाभुक्तम्" इत्यादि वचन से जब कि यह सिद्ध है कि–धर्माधर्म का बिना भोग के क्षय नहीं है–अतः इस वचन से विरोध हो जाता है। इस प्रकार तत्त्वज्ञानी लोगों को भी झटिति कायव्यूह के द्वारा ही अर्थात् एक शरीर के अनेक शरीर बनाकर ही अपने समस्त कर्मों का क्षय करना होता है।

सांख्यास्तु अन्तःकरणस्य बुद्धेर्वृत्तिविशेषं धर्ममाहुः। वृद्धमीमांसका यागादिकर्मनिर्वर्त्यमपूर्वं नाम धर्मं वदन्ति। भट्टपादास्तु—

श्रेयोहि पुरुषप्रीतिः सा द्रव्यगुणकर्मभिः।
चोदनालक्षणैः साध्या तस्मात्तेष्वेव धर्मता ॥

इत्यादिश्लोकैः श्रेयःसाधनतया यागादिकर्मणोधर्मत्वं, नरकपातादिसाधनत्वाच्च हिंसादिकर्मणो धर्मत्वं प्रतिपादयन्ति, तानि द्रव्यगुणकर्मात्मकानीति तेष्वेव धर्मा-धर्मयोरन्तर्भाव इति वदन्ति। अपूर्वमेव धर्मशब्दवाच्यमिति प्राभाकराः। शाक्य-भिक्षवश्च चित्तवासनांधर्ममाचक्षते। आर्हतास्तु पुण्यपुद्गलान् धर्मत्वेन व्यदिशन्ति। १६३

वासनाजन्याविति। वासना च मिथ्याज्ञानजन्यसंस्कारः राग इति यावत्। तज्जन्यौ इत्यर्थः। ईश्वरे वासनाविरहान्न धर्माधर्मोत्पाद इति भावः। अत इति। धर्माऽधर्मौ प्रति वासनाया हेतुत्वादेवेत्यर्थः। न फलायाऽलमिति। न धर्मा-धर्मोत्पादनसमर्थे इति। तथा च ज्ञानिनोरागरूपसहकारिकारणाभावान्न सुकृत-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शब्दोऽध्वनिश्च वर्णाश्च मृदङ्गादिभवोऽध्वनिः ॥१६४॥
कण्ठसंयोगादिजन्या वर्णास्ते कादयो मताः।

भोगेन वेदबोधितनाशकोपलक्षकत्वात्। कथमन्यथा प्रायश्चित्तादिना कर्मणां नाशः। तदुक्तम्—

ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन
क्षीयन्ते चाऽस्य कर्माणि तस्मिन् दृष्टे परावरे इति।

ननु तत्त्वज्ञानिनस्तर्हि शरीरावस्थानं सुखदुःखादिकं न स्यात्। ज्ञानेन सर्वकर्मणां नाशात् इति चेन्न। प्रारब्धेतरकर्मणामेव नाशात्। तत्तच्छरीर-भोगजनकं हि यत्कर्म तत्प्रारब्धम्, तदभिप्रायकमेव नाभुक्तमिति वचनमिति।

उत्तर—"नाभुक्तम्" यहाँ पर भोग वेदबोधितनाशकमात्र का उपलक्षक (बोधक) है, अर्थात् भोग से जैसे कर्म का नाश होता है वैसे ही वेदबोधित जो तत्त्वज्ञान एवं प्रायश्चित आदि हैं उनसे भी कर्म का नाश होता है। (उक्त वचन के साथ कोई विरोध नहीं है) अन्यथा अर्थात् यदि भोग से ही कर्मों का क्षय होता है तब फिर प्रायश्चित्त आदि से कर्मों का नाश कैसे होता है। जो कि गीता में कहा है कि—"ज्ञानाग्निः सर्वकर्माणि" इत्यादि। तथा श्रुति भी कहती है कि—"क्षीयन्ते चास्य कर्माणि" इत्यादि। (अतः मानना होगा कि भोग से अतिरिक्त तत्त्वज्ञान तथा प्रायश्चित्त आदि से भी कर्मों का नाश हो जाता है।)

प्रश्न—तब तो तत्त्वज्ञानियों के शरीर की तथा सुख-दुःख आदि की स्थिति नहीं रहनी चाहिये, क्योंकि ज्ञान से समस्त कर्मों का तथा कर्मजन्य अदृष्ट का नाश हो चुका है।

उत्तर—प्रारब्ध कर्म से इतर जो संचित तथा क्रियमाण कर्म हैं उन्हीं का तत्त्वज्ञान से नाश होता है। तत्तत् शरीर के द्वारा भोग का जनक जो कर्म उसे प्रारब्ध कर्म कहते हैं, और इसी प्रारब्ध कर्म के अभिप्राय वाले "नाभुक्तं क्षीयते कर्म" इत्यादि वचन हैं।

शब्द का निरूपण करते हैं—शब्द इति। दूरस्थ शब्द का ग्रहण नहीं होता है अतः श्रोत्र कहा। अर्थात् श्रोत्र में उत्पन्न हुवे शब्द का ही प्रत्यक्ष होता है।

दुःष्कृतकर्मभ्यां धर्माधर्मोत्पाद इति भावः। इत्थं च। भोगस्यैव धर्मनाशकत्वे च। झटिति कायव्यूहेन। एकदा अनेकशरीरस्वीकारेण। तत्र। नाभुक्तमित्यत्र-भुक्तपदार्थैकदेशभोगस्य। वेदबोधितनाशकोपलक्षकत्वादिति। वेदबोधितनाशकस्य "तत्वज्ञानस्य" सूचकत्वादित्यर्थः। तथा च नाभुक्तं क्षीयते इत्यस्य भोगवेद-बोधितनाशकान्यतरं विना न क्षीयते इत्यर्थात्र तत्वज्ञानस्य धर्मादिनाशकत्वानुप-पत्तिरिति भावः। अन्यथा कर्मणांभोगैकनाश्यत्वे। कर्मणां नाश इति। कथमिति पूर्वेणान्वयः। भोगस्यैव धर्माधर्मनाशकत्वपक्षे बाधकं प्रदर्श्य इदानीं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते ॥१६५॥
वीचितरङ्गन्यायेन तदुत्पत्तिस्तु कीर्तिता।
कदंबगोलन्यायादुत्पत्तिः कस्यचिन्मते ॥१६६॥

शब्दं निरूपयति। शब्द इति। नभोवृत्तिः आकाशसमवेतः। दूरस्थशब्दस्याऽग्रहणादाह। श्रोत्रोत्पन्न इति। ननु मृदङ्गाद्यवच्छेदेनोत्पन्नशब्दे श्रोत्रे कथमुत्पत्तिरत आह। वीचीति। आद्यशब्देन बहिर्दशदिगवच्छिन्नोऽन्य शब्दस्तेनैव जन्यते। तेन चापरस्तद्व्यापकः। एवं क्रमेण श्रोत्रोत्पन्नोगृह्यते इति। कदम्वेति। आद्यशब्दाद्दशदिक्षु दशशब्दा उत्पद्यन्ते, तैश्चान्ये दश शब्दा उत्पद्यन्ते इति भावः। अस्मिन्मतेकल्पनागौरवादुक्तम्, कस्यचिन्मते इति।

प्रश्न—मृदङ्गप्रदेश में उत्पन्न हुवे शब्द की श्रोत्रप्रदेश में उत्पत्ति कैसे होती है—(अर्थात् मृदङ्ग प्रदेश में उत्पन्न हुवा शब्द कानों तक कैसे पहुँचता है—क्योंकि दोनों दूर हैं)

उत्तर—वीचीतरङ्ग न्याय से आद्यशब्द से बाह्य दशदिशाओं से अवच्छिन्न (सम्बद्ध) अन्य (दूसरा) शब्द उत्पन्न होता है। और उस दूसरे शब्द से फिर तीसरा, इस क्रम से श्रोत्र में उत्पन्न हुवे शब्द का ग्रहण हो जाता है।

कदम्बगोलक न्याय से शब्द की उत्पत्ति मानने वाले किसी का यह मत है कि प्रथम शब्द से दशदिशाओं में दश शब्द उत्पन्न होते हैं। और उनमें से प्रत्येक शब्द से फिर दश दश शब्द उत्पन्न होते हैं। इस मत में बहुत से शब्दों की कल्पना करनी पड़ती है अतः गौरव अवश्य है इसी अस्वरस को दिखलाने के "कस्यचिन्मते" यह कहा है ॥१६६॥

तत्वज्ञानस्यादृष्टनाशकत्वे श्रुतिं स्मृतिं प्रमाणयति। तदुक्तमिति। तर्हि। भोगस्येव तत्वसाक्षात्कारस्यापि कर्मनाशकत्वे। प्रारब्धेतरकर्मणामेवेति। सञ्चित-क्रियमाणकर्मणामेवेत्यर्थः। नाशात्। नाशस्वीकारादित्यर्थः। प्रारब्धकर्मलक्षयति। तत्तच्छरीरभोगजनकंहीति। तत्तच्छरीरावच्छेदेनभोगजनकंहीत्यर्थः। तदभिप्रायकमिति। प्रारब्धकर्माभिप्रायकमित्यर्थः।

इति अदृष्टनिरूपणम्।

शब्दं निरूपयतीति। शब्दविशेष्यकलक्षणस्वरूपप्रामाण्यप्रकारज्ञानानुकूलकृतिमानिति बोधः। श्रोत्रेन्द्रियजन्यज्ञानीयलौकिकविषयतावच्छेदकगुणत्वव्याप्यजातिमत्वं शब्दस्य लक्षणम्। शब्दोद्विविधः। द्वैविध्यंव्युत्पादयति। ध्वनिश्च वर्णश्चेति। ध्वन्यात्मकोवर्णात्मकश्चेत्यर्थः ध्वनिपदवच्यतावच्छेदकतया सिद्धोजातिविशेषो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उत्पन्नः को विनष्टः क इति बुद्धे रनित्यता ।
सोयं क इति बुद्धिस्तु साजात्यमवलंबते ॥१६७॥

ननु शब्दस्य नित्यत्वादुत्पत्तिकथनमसंगतमतआह । उत्पन्न इति । शब्दानामुत्पादविनाशप्रत्ययशालित्वादनित्यत्वमित्यर्थः । ननु स एवायं ककार इत्यादिप्रत्यभिज्ञानाच्छब्दानां नित्यत्वम् । इत्थं चोत्पादविनाशबुद्धिर्भ्रमरूपैवेत्यत आह । सोयमिति । साजात्यमिति । तत्र प्रत्यभिज्ञानस्य तत्सजातीयत्वं विषयो न तु तद्व्यक्त्यभेदोविषयः । उक्तप्रतीतिविरोधात् । इत्थं च द्वयोरपि प्रतीत्योरभ्रमत्वमिति ।

ध्वनित्वम् । मृदङ्गादिसंव इति । आदिना भेर्यादिसंग्रहः । मृदङ्गाद्यवच्छेद्य इत्यर्थः । तथा च मृदंगाद्यवच्छेद्यः शब्दो ध्वन्यात्मक इत्यर्थः । मृदंगादिः शब्देऽवच्छेदकः । शब्दस्तु मृदंगाद्यवच्छेद्यः । एतेन वीथ्यां कोलाहलः, वने कोलाहलः इत्यादि प्रतीतेः अवच्छेद्यतासंबन्धेन वीथीवनादिविषयकत्वेनोपपत्तिः ।

ध्वन्यात्मकः शब्दस्त्रिविधः । संयोगजो विभागजः शब्दजश्चेति । तत्राऽऽद्योभेरी दण्डसंयोगनिमित्तकारणकः । तस्यभेर्याकाशसंयोगोऽसमवायिकारणम् । एवं हस्तमृदङ्गसंयोगोनिमित्तकारणम् । हस्ताकाशसंयोगोऽ समवायिकारणम् । वंशक्रियाजन्यवंशदलद्वयविभागजोद्वितीयः तस्य वंशदलद्वयाकाशविभागोऽसमवायिकारणम् । शब्दोत्पत्तिदेशमारभ्यश्रोत्रदेशपर्यंन्तं शब्दधाराः जायन्ते तत्राऽऽद्यध्वनिं विहाय द्वितीयध्वनिप्रभृतिचरमध्वनिपर्यन्ताः ध्वन्यात्मकाः शब्दाः शब्दजाः । ध्वन्यात्मकशब्दाऽसमवायिकारणकाः तृतीयाः ।

ताल्वोष्ठपुटसंयोगजन्यतावच्छेदकजातिविशेषोवर्णत्वम् । ताल्वोष्ठपुटसंयोगजन्यः शब्दो वर्णस्वरूप इतियावत् । वर्णात्मकोपि द्विविधः संयोगजो वर्णजश्च । आद्यः ताल्वोष्ठपुटसंयोगनिमित्तकारणकः । तस्य ताल्वाकाशसंयोगोऽसमवायिकारणम् । उदाहरति वर्णास्तेकादयो मता इति । द्वितीयवर्णप्रभृतिअन्त्यवर्णपर्यन्तं सर्ववर्णा वर्णाऽसमवायिकारणकाः । वक्ष्यमाणयुक्त्या सर्वोपि शब्दोऽनित्यः । अन्त्यभिन्नः शब्दः स्वेतरकार्यशब्दनाश्यः, अन्त्यशब्दस्तु उपान्त्यअव्याप्यवृत्तिश्च । शब्दनाश्य इत्युक्तं प्रागिति ध्येयम् ।

शब्दस्याऽऽश्रयमाह । नभोवृत्तिरिति । मृदंगाद्यवच्छेदेनेति । आकाशे इति शेषः । उत्पन्नेशब्दे इति । उत्पन्नस्य शब्दस्येत्यर्थः । श्रोत्रे इति । कर्णविवराद्यवच्छेदेनेत्यर्थः । आकाशे इति । शेषः । कथमुत्पत्तिरिति । कर्णविवरस्य तदुत्पत्त्यवच्छेदकत्वाभावादिति भावः । अन्यः शब्द इति । प्रथमशब्दान्यशब्द-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इत्यर्थः। **तेनैवेति**। आद्यशब्देनैवेत्यर्थः। एवकारेण द्वितीयादिशब्देन शब्दोत्पत्तिव्यवच्छेदः। **तेन च**। आद्यशब्देन च। तद्व्यापक इति। आद्यशब्दापेक्षयामहानित्यर्थः। एवं क्रमेणेति। वीचितरङ्गन्यायेनेत्यर्थः। **श्रोत्रोत्पन्न** इति। कर्णविवरावच्छेदेनोत्पन्न इत्यर्थः। **उपलभ्यते** इति। प्रत्यक्षविषयोभवतीत्यर्थः। तथा च शब्दान्तरोत्पत्यवच्छेदकत्वं कर्णविवरस्य सुलभमिति भावः। अयं भावः। वीची यथा सर्वदिगवच्छेदेन एकदा तरङ्गान् जनयति परन्तु यद्देशदिगभिमुखोवायुः तद्देशदिगवच्छेदेन अधिकतरङ्गान् जनयति तथा भेरीमृदङ्गाद्यवच्छेदेन जायमानशब्दः भेर्यादिभिन्नसर्वदेशावच्छेदेन सर्वदिगवच्छेदेन चैकदैव शब्दान् जनयति परन्तु यद्देशदिगभिमुखोवायुः तद्देशदिगवच्छेदेनाधिकशब्दान् जनयतीति वीचीतरङ्गन्यायेनोत्पत्तिक्रम इति।

कदम्बमुकुलन्यायेनशब्दोत्पत्तिप्रकारमाह। **आद्यशब्दादिति**। भेर्याद्यवच्छेदेन जायमानशब्दादित्यर्थः। तैः। दशशब्दैः। एवं क्रमेण श्रोत्रावच्छेदेनोत्पन्नशब्दोगृह्यते। पक्षद्वयेपि आद्यशब्दोऽतीन्द्रियः, भेर्याद्यवच्छेदेन जायमानत्वात् श्रोत्रावच्छेदेन जायमानस्यैव प्रत्यक्षत्वसंभवादिति। **गौरवादिति**। दशशब्दानां तत्प्रागभावानां तद्धेतुहेतुमद्भावानां च कल्पने गौरवादित्यर्थः। १६४–१६६। **उत्पादविनाशप्रत्ययशालित्वादिति**। उत्पादविनाशप्रत्ययविशेष्यत्वादित्यर्थः। न चोत्पत्तिविनाशप्रत्ययोभ्रमः। बाधकाभावात्। न चौपाधिकः। तमन्तरेणैव जायमानत्वात्। उपाधिर्हि नात्रानुभविकः। विदितकुङ्कुमस्य कुङ्कुमारुणा तरुणीति वत्, उपाधेरननुभवात्। न च वायुगतविनाशोत्पत्ती शब्दे भासेते इति वाच्यम्। उत्पत्तेस्वस्वघटितत्वेनाऽन्योत्पत्तेरन्यत्र भानायोगात्। तथात्वे वा घटादेरपि नित्यत्वप्रसंगः। किं च तीव्रमन्दादिभावेन शुकसारिकामनुष्यस्त्रीप्रभवत्वेन च वैलक्षण्यस्य स्फुटमुपलभ्यमानतया वर्णानां नानात्वम्, तथा च सुतरामुत्पत्तिविनाशवत्वम्। न च वायुनिष्ठतीव्रमन्दादिभावः शब्दे प्रतीयते इति वाच्यम्। वायोरप्रतीतेः। अन्यथा गत्वादयोपि वायुधर्मा एव शब्दे भासन्ते इत्येव किं नरोचयेः। तथाचेक एव वर्णोजगति स्यात्। एवं तारत्वमन्दत्वप्रतीतेरपि भेदसिद्धिः। नचैषां वायुधर्मत्वम्। श्रोत्रग्राह्यत्वात्। तथा च प्रयोगः तारत्वादयो न वायुधर्माः श्रावणत्वात् कादिवत्। वायुर्वा न श्रोत्रग्राह्यधर्मवान् मूर्तत्वात् पटवदिति। तस्मात्प्रयत्नजन्यत्वादनित्यः शब्दः।

न च प्रयत्नस्य व्यञ्जकत्वम्। समानदेशानां समानेन्द्रियग्राह्याणां एकव्यञ्जकव्यंग्यत्वनियमात् एकवर्णाभिव्यक्तये कृते प्रयत्ने सर्वेषां वर्णानां अभिव्यक्तिप्रसंगात्। तदुक्तम्—

सकृच्च संस्कृतं श्रोत्रं सर्वशब्दान् प्रकाशयेत्।
घटायोन्मीलितं चक्षुः पटं न हि न बुध्यते इति॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तदेवौषधमित्यादौ सजातीयेपि दर्शनात् ।
तस्मादनित्या एवेति वर्णाः सर्वे मतं हि नः ॥१६८॥

प्रश्न—शब्द तो नित्य है तब फिर उसका उत्पत्तिकथन अनुचित है।
उत्तर—ककारादि शब्दों की उत्पत्ति विनाशयुक्त अनित्यता स्पष्ट ही है।
प्रश्न—यह वही ककारात्मक शब्द है इस प्रत्यभिज्ञा से शब्दों को नित्यत्व सिद्ध ही है, अतः उत्पाद विनाशबुद्धि भ्रमरूप है।

किं च दारुभञ्जने दारुपरशुसंयोगनिवृत्तौ दूरस्थेन शब्द उपलभ्यते, शब्दस्य व्यंग्यत्वे तु तन्न स्यात्, व्यञ्जकनिवृत्तौ व्यंग्यास्यानुपलंभात्। किं च भेरीशब्दात्तन्त्रीशब्दाभिभवो न स्यात्, प्राप्त्यभावात्। अप्राप्तौ चाभिभवे क्वचिदेव भेर्यां प्रणोदितायां समानकालास्तन्त्रीस्वनालोकेषु न श्रूयेरन्। उत्पत्तौ तु सन्तानक्रमेण श्रोत्रप्रत्यासन्नोमन्दस्तन्त्रीस्वन स्तथाविधेन तीव्रेण भेरीध्वनिना, अभिभूयते इति युक्तम्। तस्मादुत्पद्यते शब्दोनाभिव्यज्यते। अष्टकृत्वोगकार उच्चरित इति तु अष्टकृत्वोनृत्यमकरोदितिवत् प्रत्ययोवोध्य इति। तच्चतत्शब्दानामनित्यत्वं "आदिमत्त्वादैन्द्रियकत्वात्कृतकवदुपचाराच्च" इत्यादिसूत्रैर्न्याये, "सतोलिंगाभावात्" इत्यादिसूत्रैर्वैशेषिके, शब्दमणौ च विस्तरतः प्रतिपादितम्। **प्रत्यभिज्ञानादिति।** प्रत्यभिज्ञा च पुरोवर्तिनि पूर्वदृष्टस्याऽभेदावगाहिज्ञानम्। **इत्थं च।** वर्णानां नित्यत्वे च। **उत्पादविनाशबुद्धिरिति।** ककारः उत्पन्नः ककारोविनष्ट इत्याकारिका बुद्धिरित्यर्थः। **भ्रमरूपैवेति।** उत्पन्नत्वाभाववति उत्पन्नत्वप्रकारिका, विनष्टत्वाभाववति विनष्टत्वप्रकारिका इत्यर्थः। **उक्तप्रतीतिविरोधादिति।** उत्पादविनाशशालिप्रत्ययविरोधादित्यर्थः। **इत्थंचेति।** सोयं क इति बुद्धेः सजातीयविषयकत्वे चेत्यर्थः। **द्वयोरपीति।** उत्पन्नः को विनष्टः क इति प्रत्यय सोयं क इति प्रत्यभिज्ञयोरित्यर्थः। **न भ्रमत्वमिति।** सर्वांशे प्रमात्वमित्यर्थः। उपपद्यते इति शेषः। न चोक्तप्रत्यभिज्ञायाः सजातीयविषयकत्वे तज्जातीयोऽयमितीति वाच्यम्। यादृशप्रत्यभिज्ञायां जातित्वेन कत्वादेर्भानं तादृशप्रत्यभिज्ञैव तज्जातीयोयमित्याकारिका, यस्यां तु स्वरूपतः कत्वादिजातेर्भानं तादृशप्रत्यभिज्ञा सोयमित्याकारिकैव स्वीक्रियते इति न काप्यनुपपत्तिः ॥ १६८ ॥

मूले—**तदेवौषधमित्यादाविति।** आदिना पूर्वेद्युर्यद्भुक्तं तदेवेदं भक्ष्यमित्यादेः परिग्रहः। ननु तदेवौषधमित्यादौ व्यक्तयभेद एव विषयोस्तु बाधकाभावादित्याशंकां परिहरति। **यदौषधं मया कृतमिति।** मयैव कृतमित्यर्थः। यथाश्रुते उभयकर्तृकौषधस्याभेदसंभवादसंगत्यापत्तेः। तथा च स्वकर्तृकत्व—स्वभिन्नकर्तृकत्वरूपविरुद्धधर्माध्यासेनाभेदस्य वक्त मशक्यत्वादिति भावः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ननु सजातीये सोयमिति प्रत्यभिज्ञा कुत्र दृष्टेत्यत आह । तदेवेति । यदेवौषधं मया कृतं तदौषधमन्येनापि कृतमित्यादि दर्शनादिति भावः ।१६८

इति श्रीमहामहोपाध्यायविद्यानिवासभट्टाचार्यपुत्र श्रीयुतविश्वनाथ-पञ्चाननभट्टाचार्यविरचितायां सिद्धान्तमुक्तावल्यां गुणनिरूपणम् ।

समाप्तश्चायं ग्रन्थः ॥

उत्तर—'सोऽयंकः' यह वही ककारात्मक शब्द है यह प्रत्यभिज्ञाज्ञान को विषय करती है न कि ककारात्मकशब्दव्यक्तियों के अभेद को, क्योंकि उस प्रतीति से अर्थात् ककारादिशब्दों की उत्पाद-विनाश सम्बन्धी प्रतीति से विरोध हो जावेगा। इसीलिये सोऽयंककारः" "उत्पन्नःककारः" इन दोनों प्रतीतियों में से किसी भी प्रतीति को भ्रमत्व नहीं है ।

प्रश्न—सजातीय पदार्थों में भी "सोऽयम्" यह प्रत्यभिज्ञा कहाँ देखी गयी है ।

उत्तर—जो औषधि मैंने की है वही औषधि दूसरे व्यक्ति ने भी की इत्यादिस्थल में 'तदेव औषधम्' इत्यादिरूप से साजात्यदर्शन होता है ।

कृष्णा टीका समाप्त ।

शब्दो द्रव्यं इन्द्रियसंयोगसमवायान्यतरवेद्यत्वाद् घटवदित्यनुमानात्, अत एव महानेकः शब्दो वेगेन दूरं गत इत्यादि सर्वजनव्यवहारोप्युपपद्यते इति भाट्टमतं न समीचीनम्, अश्रावणत्वस्योपाधित्वात् । तथा च महत्वादिगुणवत्वं तत्रैकार्थ-समवायनैवोपपद्यते इति ।

अत्रेदं बोध्यम् । वैशेषिकमते वीचीतरङ्गन्यायेन शब्दात् शब्दान्तरमुत्पद्यते तथा च प्रशस्तभाष्ये शब्दाच्च संयोगविभागनिष्पन्नात् वीचीसन्तानवच्छब्दसन्तान इत्येवं सन्तानेन श्रोत्रप्रदेशमागतस्य ग्रहणम्, इति । न्यायनये च कदम्बगोलकन्या-येन तदुत्पत्तिः । तदुक्तं-न्यायवार्तिके तत्राद्यः शब्दः संयोगविभागहेतुकः तस्मा-च्छब्दान्तराणि कदम्बगोलकन्यायेन सर्वदिक्कानि तेभ्यः प्रत्येकमेकैकः शब्दो मन्द तरतमादिन्यायेनाश्रयाप्रतिबन्धमनुविधीयमानः प्रादुरस्तीति ।

वेदान्तिनस्तु घ्राणरसनत्वगात्मकानि इन्द्रियाणि स्वस्थानस्थितान्येव गन्धरसस्पर्शोपलंभान् जनयन्ति । चक्षुः श्रोत्रे तु स्वत एव विषयदेशं गत्वा स्वस्व-विषयंगृह्णीतः, श्रोत्रस्यापि चक्षुरादिवत्परिच्छिन्नतया भेर्यादिदेशगमनसंभवात् । अत एवानुभवो भेरीशब्दो मया श्रुत इति वदन्ति । अत्रेदमालोचनीयम् । यतः श्रोत्र-स्यामूर्तत्वेन विषयदेशगमनं न संभवति । न च क्रियाकारणनोदनाभिघातसमावाया-त्तत्र क्रियावत्त्वमित्यपि सांप्रतम् ।

आत्मनि व्यभिचारात् । अतः विद्यमानोऽप्याकाशे अभिघातः क्रियाहेतुर्न भवति, महत्परिमाणेन प्रतिबन्धात् । "तुष्यतुदुर्जन" इति न्यायेन श्रोत्रस्य क्रिया-वत्वस्वीकारेपि न समीहितसिद्धिः । तथासति—

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वायौ शब्दानुकूले च न तस्य श्रवणं भवेत् ।
गच्छन्त्याः प्रतिकूलो हि श्रोत्रवृत्तेः स मारुतः ॥

शब्दानुकूले पवने दवीयसोपि शब्दस्य श्रवणं प्रतिवातं च समीपेपि तस्याऽश्रवणमित्यस्य विपरीतप्रसक्तिः स्यात् श्रोत्रस्य विषयदेशगमनपक्षे। वस्तुतस्तु श्रोत्रस्य शब्ददेशमुपसर्पणमेवाऽसंभवदुक्तिकम्, कर्णशष्कुल्यवच्छिन्नस्यैव नभसः श्रोत्रत्वस्वीकारात्, न हि कर्णशष्कुलीमूर्तापि वक्तृवक्त्रमुपसर्पति, तस्माद् गच्छत्यपि नभोमात्रे कर्णशष्कुल्युपधानविरहात् श्रोत्रस्य विषयदेशगमनं कथमपि न संभवति, कर्णशष्कुल्युपधानमन्तरेणापि केवलनभःसंबन्धेन शब्दप्रत्यक्षोपगमे गौड़देशप्रयुक्तोगोशब्दोवाराणस्यामपि श्रूयेत। तस्मादकामेनापि वीचीतरंगन्यायेन शब्दोत्पत्तिपक्ष एव स्वीकरणीयः।

आर्हतास्तु भाषावर्गणापरमाणुभिः पुद्गलाभिधानैरारभ्यते शब्दः, तथा च सावयवः। तदुक्तं प्रमेयकमलमार्तण्डे "यदस्माभिः श्रावणस्वभावविनाशोत्पत्तिमत् पुद्गलं द्रव्यमित्यभिधीयते, तद्युष्माभिर्वर्ण इत्याख्यायते"। सूत्रितं च प्रमाणनयतत्त्वालोकालङ्कारे "अकारादिः पौद्गलिकोवर्णः" इति। स च शब्दःस्वोत्पत्तिस्थानात् प्रविशति कर्णरन्ध्रमिति नानुपपत्तिः प्रत्यक्षस्येति वदन्ति। तन्मतमित्थं निराकृतं जयन्तभट्टेन—

वर्णस्यावयवाः सूक्ष्माः सन्ति के चन पुद्गलाः ।
तै वर्णोऽवयवी नाम जन्यते पश्य कौतुकम् ॥
कृशश्च गच्छन् स कथं न विक्षिप्येत मारुतैः ।
दलशो वा न भज्येत वृक्षाद्यभिहतः कथम् ॥
प्रमाणकावधिः कश्च गच्छतोऽस्य तपस्विनः ।
एकश्रोत्रप्रविष्टो वा स श्रूयेताऽपरैः कथम् ॥
निष्क्रम्य कर्णादेकस्मात् प्रवेशः श्रवणान्तरे ।
यदीष्येत कथं तस्य युगपद् बहुभिः श्रुतिः ॥
श्रोतृसंख्यानुसारेण न नानावर्णसंभवः ।
वक्तुस्तुल्यप्रयत्नत्वात् श्रोतृभेदे तदत्ययै इति ।
अथ नैयायिकमतेपि शब्दः शब्दान्तरं सूते इति तावदलौकिकम् ।
कार्यकारणभावोहि न दृष्टस्तेषु बुद्धिवत् ॥
जन्यन्तेऽनन्तरे देशे शब्दैः स्वसदृशाश्च ते ।
तिर्यगूर्द्धमधश्चेति केयं वा श्रद्धालुता ॥
शब्दान्तराणि कुर्वन्तः कथं च विरमन्ति ते ॥
न हि वेगक्षयस्तेषां मरुतामिव कल्पते ।
कुड्यादिव्यवधाने च शब्दस्यावरणं कथम् ॥
व्योम्नः सर्वगतत्वाद्धि कुड्यमध्ये व्यवस्थितिः ।
तुल्यारम्भे च तीव्रेण मन्दस्य जननं कथम् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रूयते चान्तिकात्तीव्रः शब्दोमन्दस्तु दूरतः ।
वीचीसन्तानतुल्यत्वमपि शब्देषु दुर्वचम् ॥
मूर्तिमत्वक्रियायोगवेगादिरहितात्मसु । नैवम् ।
समानजातीयगुणारम्भिणो बहवो गुणाः ॥
सन्ति रूपादयो लोके ततो नेयं कुकल्पना ।

शब्दसन्तानविरतिरपि भवत्यदृष्टाधीनसंसर्गाणां सहकारिणामनवस्थानात्। तदुक्तम् कन्दलीकृता "नचाऽनवस्था यावद्दूरं निमित्तकारणभूतः कौष्ठ्यवायुरनुवर्तते तावद्दूरं शब्दसन्तानुवृत्तिः। अत एव प्रतिवातं शब्दानुपलंभः कोष्ठ्यवायुप्रतीघातात्" इति। कणादरहस्येपि। "कण्ठताल्वाद्यभिघातजनितकर्मणोवायोः शब्दनिमित्तकारणतामापन्नस्य यावद्वेगमभिप्रतिष्ठमानस्य क्वचिद्गतिप्रतिबन्धात् क्वचिद्विनाशाद्वा शब्दान्तरानुत्पत्तेः शब्दसन्तानविनाशात्। अत एव कुड्यादिव्यवधाने शब्दानुपलब्धिरप्युपपद्यते। न्यायमञ्जरीकृताऽन्यथापि समाहितमेतत्। तथा च "यत्तुकुड्यादिव्यवधाने किमिति विरमति शब्दसन्तानारम्भ इति। नैष दोषः। निरावरणस्य हि बोधः शब्दारम्भे समवायिकारणत्वम्, तथा दर्शनात् कल्प्यते नाकाशमात्रस्येति"। तीव्रेणापि शनैरेवमतीव्रारम्भसंभवः।

सीदत्सचिवसामर्थ्यसापेक्षक्षीणवृत्तिना ।
वीचीसन्तानदृष्टान्तः किंचित्साम्यादुदाहृतः ॥
नतुवेगादिसामर्थ्यंशब्दानामस्त्ययासिवेति । १६९
श्री ज्वालाप्रसादकृते गुणेचैव सविस्तरे ॥
समाप्तिमगमच्चैव मुक्तावलिविलासिनी ।
समाप्तश्चायं ग्रन्थः । शुभंभूतात् ॥
काशीविश्वेश्वरार्पणमस्तु ॥

... JAGADGURU VISHWARADHYA
...ANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamawadi Math, Varanasi
Acc. No. 3847

...RI JAGADGURU VISHWARADHYA
...ANA SIMHASAN JNANAMANDIR
LIBRARY.
...gamwadi Math, VARANASI,
Acc. No. ...
3847 1971
CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri